अथ योगानुशासनम् १,१,४४ 1.8

रामोत्तरतापनीयोपनिषत् ।

यो वै ये मत्स्य० ३,३,२०८,२२८ 5

वराहपुराणम् ।

त्वया रुद्र महाबाहो० २,२,८४ 70.36

वसिष्ठस्मृतिः ।

आचारहीनं न पुनन्ति वेदाः० ३,१,३२

शतपथब्राह्मणम् ।

आपोऽब्रुवन्० २,१,२० 6.1.3.2.4
तं होपनिन्ये० १,३,७४७ 11.5.3.13
पुरुषेन्तःप्रतिष्ठितं वेद० १,२,५९० 10
सृद्ब्रवीत्० २,१,२० 6.1.3.2.4.6.1.11
यथा व्रीहिर्वा यवो वा १,२,४६४ 10.6.3.2
यदा वै पुरुषः० १,१,३७० 10.3.3.6
स एषोऽग्निर्वैश्वानरः० १,२,५९१ 10.6.1.11

शुक्लयजुर्वेदसंहिता ।

अतो ज्यायांश्च १,१,२८१ 31.3
एतावानस्य० १,१,२८० 31.3
पुरुष एवेदं० १,१,२८० 31.2

श्वेताश्वतरोपनिषद् ।

अजामेकाम्० १,४,८८६ 4.5
अजो ह्येकः० १,४,८८६ 4.5
अपाणिपादो जवनः० ३,२,११७,१३७ 3.19
आदित्यवर्णम्० १,४,९१४ 3.8
आराग्रमात्रः० २,३,५६,६६ 5.8
ऋचो अक्षरे ३,३,३४६ 4.8
ऋषिं प्रसूतम्० १,४,८७३ 5.2
किं कारणं ब्रह्म० 1.1



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

ज्ञाज्ञौ द्वावजौ० १,४,८७३ 1.9
तदेवाग्निः १,४,८७७ 4.2
तमेव विदित्वा० ३,३,११८।१,३,६६८।१,४,१४५।३,२,
१०८ 3.8
तयोरन्यः० २,३,११६ 4.6
ते ध्यानयोगानुगताः० १,४,८७२ 1.3
न तत्समश्चाभ्यधिकश्च ३,२,१८७।३,३,२८३।४,३,१४२।
४,४,२०८ 6.8
न तत्र सूर्यो भाति० १,३,६८८ 6.14
निष्कलं निष्क्रियम्० १,१,२३०।२,१,९१ 6.19
द्वा सुपर्णा० १,४,८७७ 4.6
परास्य शक्तिर्विविधैव श्रूयते ४,४,१९४।४,४,२०६ 6.8
यो योनिम्० १,४,८७३ 5.2
बालाग्रशतभागस्य० २,३,६५.5.8
वृक्ष इव स्तब्धः ३,२,१८८ 3.9
वेदाहमेतं० १,४,८६७ 3.8
साक्षी चेता केवलः ४,४,१९० 6.11
एष ह एव साधु० ३,३,२११ 3.8

सर्वसारोपनिषत् ।

सत्यं विज्ञान० १,१,२७३ 3

कठोपनिषत् ।

शतायुषः पुत्रपौत्रान् ३,२,७७ 23

सांख्यकारिका ।

मूलप्रकृति० १,४,८९२ 3
सामान्यकरणवृत्तिः० २,४,१७४ 29

कूर्मपुराणम् ।

ब्रह्मणा सह ते सर्वे ३,३,११७,४,३,[illegible]
पू. सं. १२,२६९

अनिर्दिष्टस्थलानि वाक्यानि ।

अग्निहोत्रं जुहोति प्रजाकामः ३,२,१९१
अणुः स्थूलः १,३,६७०
अविद्यया मन्यते ३,२,८१
अस्ति चैव तेन मांसं० वेदे ३,१,१७
आकाशवत्सर्वगतश्च ३,२,८८
आरोहणं गोवृष० ३,२,८५
इन्द्रो वैवस्वतः ३,४,४७८
कर्ता कारयिता हरिः १,१,१०२
कश्चित्कस्याञ्चो दक्षिणाः० ३,[illegible]
कषाये कर्मभिः पक्के० ३,४,४८२
अभ्यान्तरसहस्रेषु० ३,३,२[illegible]
ज्ञेयश्च १,१,१
तत्र तथा सं न अन[illegible]ि ३,१,१६
तत्र यः परमात्मा[illegible]० [illegible],३,११६
तस्य पुत्रा दायमुपयन्ति० ४,१,४७
तस्याभिध्यानात्[illegible]० ३,२,८८
तस्याग्नि[illegible] ३,३,१३४
तं यथा य[illegible]पासते० ३,३,३०७
तं विदित्वा ब्राह्मणो भवति १,४,४७३
तृतीयं सर्वभूतस्थं १,२,५९५
[illegible]र्मां पिबते वह्निः ३,१,३०
[illegible]म महतः १,२,५९५
मनुर्वैवस्वतः ३,४,४७८
यत्र दुःखेन ३,४,४६१
यमो वैवस्वतः ३,४,४७८
यदस्य कर्मणा ३,३,२०६
यमहरहर्वा० १,३,६८६
यज्ञो यजमानः २,३,११३
यस्य वेदश्च वेदी च ३,१,४५
यावज्जीवमग्निहोत्रं जुहुयात् ३,४,४३९
विष्णोस्तु त्रीणि रूपाणि० १,२,५९५
सर्वाण्याख्यानानि परिप्लवे० ३,४,४७५
स सर्वं भवति ३,१,२९
संसर्गजैः कर्मदोषैः० ३,१,६१



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

'माया च तमोरूपा' इति श्रुतेर्मायाकृततद्वय: । अयमर्थः । कारणत्वबोधकश्रुतीनां सर्वस्य[illegible] ब्रह्मत्वबोधकश्रुतीनां चानुरोधेन कार्यस्य कारणानन्यत्वे सिद्धेऽग्नित्वाद्यपगमबोधक[illegible] व्याख्यातरीत्यार्थे बुद्धे, 'ऐतदात्म्यमिदं सर्वं तत् सत्यम्' इत्यत्राप्यणिमपरिचा[illegible] सर्वस्यैव सन्निहिततया 'तत्' पदेन परामर्शात् तस्यैव सत्यत्वं विधीयते, सर्वगतमेव चैकत्वमनूद्यत

रश्मिः ।

स्मिन्स्वप्ननिदर्शने' इति श्रुतेः स्वप्नाध्यायाच्च । मायाकृतेति विवर्तविषयिणी य[illegible] । कारणत्वेति 'यतो वा इमानि' इत्यादीनाम् । सर्वस्येति 'इदं सर्वम्' इत्याद्युक्तानां '[illegible]दं ब्रह्म' इत्यादीनां च । अनुरोधेनेति कारणत्वस्याभिन्ननिमित्तोपादानत्वस्य का[illegible]त्र [illegible]मयविधकारणदर्शनाच्छ्रुतावपि वक्तव्यत्वेन तादृशकारणत्वबोधकानां श्रुतीनामनुरोधः [illegible]कशक्यार्थादरणम् । तथा खपुष्पादौ ब्रह्मत्वात्मत्वविधानसंभवेप्युत्तरकालीनबाधाभावेन वैधर्म्या[illegible]शक्यार्थादरणं तेनेत्यर्थः । सिद्ध इति न तु नामधेयमात्रत्वात्कार्यमनृतमित्यर्थः । छान्दो[illegible]यं [illegible]चारयन्ति अग्निरित्वेत्यादि । पूर्वश्रुतयः 'तन्मे विजानीहि' इत्यन्ता व्याख्याताः । अधु[illegible] व्याक्रियते । अग्नित्वादीनित्यादिना व्याख्याता । सच्छब्दार्थेऽग्नौ रूपत्रयं निमित्तकारणरूपमसम[illegible]कारणमिति प्रसिद्धम् । तेजसस्तद्रूपं न तु सगुणत्वापादकं मायारूपम् । अजायाः सदानन्दशक्तेर्जगज्जन्मादिकर्त्र्या रूपं वा । 'पतिश्च पत्नी चाभवताम्' इति श्रुतौ श्रावणं पत्नीरूपाजास[illegible] न संभवति । तदुक्तं 'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः' इति । एवमग्रेपि । 'अपा[illegible]त्वम्' इति पूर्वं व्याख्यातम् । विकारोऽत्र प्रपञ्चः स वाचारम्भणम् । ततश्च विकारे ना[illegible]धेयंप्रयो[illegible]ो रभसात् । त्रीणि रूपाण्येव सत्यम् । व्यवहारदशायां रूपेष्वेव प्रयोगो नामधेयमिति । द्रव्या[illegible] रूपमात्राणीति नास्तिकमतं तद्वारणाय 'यदेकमव्यक्तमनन्तरूपम्' इति श्रुतिरनुसंधेया । यथाकथंचित्सदसती मायेति तस्याः सद्रूपमुक्तम् । अग्रे स्पष्टम् । एवमग्नित्वादीनित्यादिना व्याख्यातरीत्या स्वीयार्थे बुद्ध इत्यर्थः । यदपि स्वात्मनैकं कार्यात्मना नानेत्यर्थे दूषणं पूर्वोक्तावधारणे[illegible]दिनो[illegible]क्तं तत्परिहरन्ति ऐतदात्म्यमिति । अणिमेत्यादि । 'य एषोणिमा' इति पूर्वश्रुत्युक्तस्य अणोः । अण शब्दे भ्वा. प. से औणादिकः उप्रत्ययः शब्दकर्ता भावे इमनिच् शब्दकर्तृभावः श[illegible]णिमा ऊँकारः । एतदात्मनो भावः । इदं सर्वं तत्र शब्दमात्रं किंतु सत्यं सदानन्दरूपम् । अत्र [illegible]ब्रह्मेत्याहुरिति बृहदारण्यकमतं सेत्स्यति । आरण्ये 'कोऽन्तरिक्षे शब्दं करोतीति वासिष्ठो रौहि[illegible]ीमांसांचक्रे तस्यैषा भवति वाश्रेव विद्युत् इति । ब्रह्मण उदरणमसि ब्रह्मणः उदीरणमसि [illegible] आस्तरणमसि ब्रह्मण उपस्तरणमसि' इति । वासिष्ठो गोत्रतः रोहिणस्यापत्यम् । वाश्रेव विद्यु[illegible] । वा च श्रा च वाश्रे । वा गतिगन्धनयोः, श्रा पाके । पाकोऽग्निसंयोगः । वकार इवार्थे । [illegible]तिग[illegible]धनकर्त्री वाश्वरमिव अग्निसंयोगवती च विद्युत् । वातीति विः । द्योततेऽग्निसंयो[illegible] कुरुते इति द्युत् । द्युत दीप्तौ । कर्तृनिर्देशादाह ब्रह्मण इति । उत् अधिकं शरणं गृहं रक्षि[illegible] । 'यज्जृम्भते तद् विद्योतते' इति संहितासमाप्तौ । जभु गात्रविनामे. भ्वा. आ. से । उदीर[illegible]मिति विदीरणमुख्यासि । 'यद्विद्योतते तद्विजृम्भते' इति बृहदारण्यकात् । आस्तरणमिति । 'जृम्भतो द[illegible] त्विदम्' इति श्रीभागवते जम्भारूपास्तरणे इदं विश्वात्मकं ब्रह्म ददृश इति । उपस्तरणमिति [illegible]दनम् । 'आकाशशरीरं ब्रह्म' इति सुबोधिन्यां तदुक्तम् । तस्याणिम्नः परिचायनं विधेयत्वं अर्थ[illegible]योजनं यस्य सर्वस्योद्देश्यस्य तदणिमपरिचायनार्थं तस्य । तस्यैवेति ससंघातस्य जीवस्य । प्रपा[illegible]कोक्तानेकपदार्थेषु कथं तदित्येकवचनं तत्राहुः सर्वगतमिति । 'यथा तु खलु सौम्येमांस्त्रिस्रो देवताः



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.c

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

# श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

## भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

## अथ द्वितीयोऽध्यायः ।

### द्वितीयः पादः

**रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥ (२-२-१)**

**स्वतन्त्रतया सर्वे वादा निराक्रियन्तेऽस्मिन् पादे ।**

---

भाष्यप्रकाशः ।

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥ प्रथमे पादे सांख्यं निराकृत्य तन्निराकरणप्रसङ्गे, 'एतेन शिष्टापरिग्रहा अपि व्याख्याताः' इति सूत्रेण शिष्टापरिग्रहरूपं दोषं प्रदर्श्य अन्ये च वादा निराकृताः । तथापि केषांचन मन्दमतीनां तदुक्तयुक्तिष्वाभासतामानाभावे श्रद्धोत्पत्तौ स्वार्थविभ्रंशः स्यात् स मा भूदिति करुणया तदुक्तयुक्तीराभासीकर्तुं द्वितीयः पाद आरभ्यते इति पूर्वं पादार्थनिरूपणे सूचितं तदत्र स्मारयन्ति स्वतन्त्रतयेत्यादि । तत्र प्रथमे पाद उपपादितः सत्कार्यवादः परिणामवादश्च सांख्यवादे सिद्धान्ते च तुल्य इति सांख्ये श्रद्धा शीघ्रमास्तिकस्योत्पद्येतेति तन्निरासाय प्रथमं तदेव निराक्रियते दशभिः सूत्रैः । तेषां चैवं मतम्—

रश्मिः ।

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥ शास्त्रत्वानुरोधेन प्राप्तं वेदाङ्गत्वं पूर्वपादे निराकृतं तत्प्रसङ्गसंगत्या स्मृतं स्वातन्त्र्यं तेन रूपेण शास्त्रनिराकरणमस्मिन् पाद इत्याहुः प्रथमे पाद इति । श्रद्धोत्पत्ताविति । तत्तच्छास्त्रस्य वेदानुपबृंहकत्वे सामान्यतः शिष्टापरिग्रहा उक्ताः, अधुना तु स्वतन्त्रत्वेन स्वोक्तफलाप्तिस्वरूपेण ये सर्वे वादास्ते निराक्रियन्ते । सूचितमिति पूर्वपादाद्यसूत्रे 'ततो द्वितीये पादे' इत्यादिना 'वेदबाधकत्वाभावेपि' इतरमतैः पुरुषार्थः स्वतन्त्रः सिद्ध्येद्भ्रान्त्येत्यन्यमतं निराकरोति द्वितीयपाद इत्युक्तम्, तत्र निराकरणकर्तृ निराकरोतेर्वाच्योर्थः, युक्त्याभासीकरणं तु व्यञ्जनया बोधितमिति सूचितम् । सांख्ये श्रद्धेति सहजकर्मणां सांख्यानामपरित्यागो भवति 'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्' इति गीतावाक्यात् । तत्राप्येतन्मतीयपदार्थतौल्यमिति श्रद्धा शीघ्रं तन्मतास्तिकस्योत्पद्येत । तदेव सांख्यमेव । एवकारेण शास्त्रान्तरव्यवच्छेदः । सूत्रैरिति षडधिकरण्या । विषयादिकं तु षडधिकरण्या अन्ते वक्ष्यन्ति । विषयः 'यतो वा इमानि' इत्येवमादीनि सामान्यकारणवाचकयच्छब्दघटितानि । अत्र यच्छब्दार्थो ब्रह्म जगदुपादानं सगुणं वेति संशयः । स्वमतशंकरादिमतविरोधः संशयबीजम् । सगुणमुपादानं निष्कलादिश्रुतेरिति शुद्धं ब्रह्म नेति पूर्वपक्षे, सर्वोपादानं [illegible] इति सिद्धान्तः । [illegible] संगतिः ।

RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.c

भाष्यप्रकाशः ।

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः' इति ।

रश्मिः ।

अनुमीयते कारणत्वेन यत् प्रकृतिस्तदनुमानं कर्मप्रत्ययान्तम् । ननु कर्मप्रत्ययमङ्गीकृत्य प्रकृतिकारणवादाङ्गीकारापेक्षयानुमानं प्रसिद्धमेव कुतो न गृह्यत इति चेन्न । कर्मप्रत्ययस्तु व्याकरणसिद्ध इति न पर्यनुयोगार्ह इति । प्रसिद्धानुमानस्य शिष्टापरिग्रहेणाव्याख्यानात् । ननु 'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम् । न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्' इत्यनुमानं नैयायिकादिमतसिद्धं ग्राह्यमिति वाच्यम् । तद्दूषणार्थमेव क्वचिन्नैयायिकादिमतसिद्धपदार्थानुवादात् । योगादरणस्य सूत्र आवश्यकत्वात् । नैयायिकादीनामनुमानशब्दस्य योगरूढत्वात् । ननु 'निर्गुणादिश्रुतिविरोधश्च' इति वदतः सांख्यस्य तु योग एवेति चेन्न । श्रुतिविरोधं ददतोऽपि 'प्रत्यक्षानुमानागमाः प्रमाणानि' इत्यनुमानशब्दघटितसूत्रणात् । अस्माभिस्तु योगमात्रादरणं 'सर्वं सर्वमयम्' 'सर्वे सर्वार्थवाचकाः' इति वाक्यसहायकतर्कैः रूढिस्थाने सर्वत्र प्राप्तयोगपरिहाराय शक्तिसङ्कोचलक्षणा रूढिः । अन्यथा सखण्डब्रह्मज्ञानाय विचारो न स्यात् । ननु नानुमानमिति नैतदर्थकमपि तु प्रत्यक्षमात्रैकप्रमाणसाधनपरम् । यथावत्प्रत्यक्षानुमानयोः प्रामाण्यं तर्कसिद्धं तत्राह रचनानुपपत्तेरनुमानं न, अर्थात्प्रमाणं न । तदुक्तं 'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि । समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्' इति । नन्वेतच्चतुष्टयमपि शब्दात्मकमिति न प्रमाणान्तरमिति चेन्न । आर्षादिना प्रत्यक्षमूलत्वेन प्रामाण्यस्य प्रत्यक्षपर्यवसितत्वात् । न चैवमाचार्यानभिमतमभिप्रेतं कुतो ब्रूष इति शङ्क्यम् । अस्मन्मते संदेहा उपनिषद्विचारेण परिहरणीया इत्याज्ञायाः । उपनिषत्तु बृहदारण्यकं तत्र 'चक्षुर्हि वै सत्यम्' इत्युक्त्वा 'तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमद्राक्षमिति तस्मा एव श्रद्दध्यामः' इत्यत्र शब्दापेक्षया प्रत्यक्षप्रामाण्योररीकारात् । ननु तर्हि प्रकृतिपदं विहायानुमानपदं कुत इति चेन्न । सूचितार्थार्थाय तथोक्तेः । शांकराचार्यास्तु नैयायिकं प्रति अनुमानं मानमीश्वरे नेत्याहुः । भास्करास्तूक्तव्युत्पत्त्यास्मदुक्तमेव । रामानुजास्तु तत्रेत्यध्याहृत्य प्रकृतावनुमानं नेत्याहुः । माध्वास्तु प्रकृतौ नानुमानमित्याहुः । सूत्रेति । तत्त्वसंग्रहोयम् । अतःपरं कारणताशोधकस्तर्कः, फलांशे स्वातन्त्र्यस्य निराकरणम्, इदं वक्तव्यम् । तर्कस्तु प्राज्ञे नावतरति शङ्काभावात् । शङ्का तु आचार्यसंदर्शितागमात् भूयो महत्सु तद्दर्शनादपि कारणताशङ्का सापि तर्कनिवृत्ता भवति । अतस्तर्कोऽपि तं प्रति न । मन्दमध्यमांस्तु इदं वक्तव्यम् । तदुक्तं 'हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः' इति भाषापरिच्छेदे । किंच । 'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते' इति युक्तिः तौ प्रत्यप्यसिद्धा । अतो मीमांसासूत्रेणारभ्यते 'अन्यथाज्ञानं तर्कः' । नन्विदं तर्कलक्षणमत्र सूत्रेऽव्याप्तम् । रचनानुपपत्तेरनुमानं नेत्यस्य प्रमात्वात् । तर्ह्यनुमानं कारणत्ववत् चेतनं विनेति तर्कः । नन्विदमपि न । कारणत्वव्यभिचाराभाववदनुमानं रचनानुपपत्तेरिति सौत्रमितीति चेन्न । ज्ञानकाण्डोपपादकत्वेन मीमांसायां अस्यान्यथाज्ञानरूपत्वानौचित्यात् सांख्यीयान्यथाज्ञानरूपतर्कवैशिष्ट्येन तर्कपादत्वव्यवहाराद् ब्रह्मधातोः कार्यकारणभावः । अथ जगत्कारणं शास्त्रयोनित्वादित्यत्र शास्त्रयोनित्वं जगत्कारणत्वव्यभिचारीत्याशङ्का सूत्रेण तर्कविशिष्टेन नाश्यत इति तर्कपादत्वम् । तदुक्तं 'तदुक्तयुक्तीमांसां कर्तुम्' इति पूर्वं प्रकाशेनैव । अत एव न भाष्येषु पादसमासौ तर्कशब्दः किंतु द्वितीयः पाद इत्येव । अन्यख्यातिरपि परमार्थदशायामख्यातिरेवेति न कोपि दोषः । फलांशे स्वातन्त्र्यनिराकरणं तु



DR. RUPAK NATH RUPNATHJI www.astrology-tantra.c

भाष्यप्रकाशः ।

तत्र साम्यावस्थोपलक्षिता वा अकार्या वा गुणाः प्रकृतिः । प्रकृतित्वं च प्रकर्षेण करोतीति व्युत्पत्त्या तत्त्वान्तरारम्भकत्वम् । गुणास्तु, सत्त्वं लघु प्रकाशकम्, रज उपष्टम्भकं चलम्, तमो गुर्वावरकमिति कार्यलक्षणलक्षिता यथायथं प्रीत्यप्रीतिविषादात्मकद्रव्यस्वरूपा अतीन्द्रियाः कार्यैकोन्नेयाः । गुणक्षोभस्य पाश्चात्यत्वात् साम्यावस्था सर्वेषां कारणभूतेति मूलप्रकृतिरित्युच्यते । सा एका अचेतना अनेकचेतनभोगापवर्गार्था नित्या सर्वगता सततविक्रिया न कस्यचित् विकृतिः । महदहंकारपञ्चतन्मात्राः सप्त प्रकृतिविकृतयः । तत्र महानहंकारस्य प्रकृतिः मूलप्रकृतेर्विकृतिः । अहंकारस्त्रिविधो वैकारिकस्तैजसस्तामसश्च । तत्र वैकारिको मनसः प्रकृतिः, तैजस इन्द्रियाणाम्, तामसः शब्दस्पर्शरूपरसगन्धाख्यानां पञ्चतन्मात्राणाम् ।

रश्मिः ।

वाशीवत् करणत्वमात्रत्वेन ब्रह्मस्वरूपत्वेपि सापेक्षत्वात् । 'प्रकृतिश्च' इत्यधिकरणे ब्रह्मस्वरूपत्वमुक्तम् । अतः स्वमते स्वातन्त्र्येपि न क्षतिः तद्रूक्तुः स्वरूपप्राप्तेः । नैयायिकादिमते तु सांख्ये सङ्ग इव नैयायिकानां कर्ता चार्वाकादीनामभाव इति तदसमवायिकजगतस्तदंशत्वाभावात्प्रकृत्यादिभजने प्रकृत्यादिप्राप्तौ मुक्तित्वहानिः । 'यो यदंशः स तं भजेत्' इति प्रकृत्यादिभजनेन प्रकृत्यादिप्राप्तेरतः श्रद्धोत्पत्तौ स्वार्थात्तत्तन्मतप्रतिपन्नादन्यत्र मोक्षे विभ्रमः स्यात् स मा भूदिति करुणया तदुक्तयुक्तीनामाभासीकरणेन प्रकृतिपरमाण्वादिकारणत्वं भगवदीयत्वेनोक्तं न मोक्षभङ्गः । इति स्वातन्त्र्यनिराकरणम् । व्याकुर्वन्ति तत्रेति उक्तपदार्थेषु । साम्येति 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' इतिसूत्रात् । अकार्येति 'प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्' इति सूत्रात् । सत्त्वमिति लघु(तत्त्व)त्वं त्वनुभववेद्यम् । प्रकाशकं सर्वेन्द्रियज्ञानजनकम् । रज इति उपष्टम्भकमारम्भकम्, चलं प्रवर्तकम् । तमो गुरु सर्वांशेनेत्यनुभवः ज्ञानस्वरूपावरकं च । सूत्राणीमानि । लघुत्वादिकमानुभाविकम् । प्रकाशजनकत्वादिकं कार्यलक्षणं तेन लक्षिताः । 'लघ्वादिधर्मैरन्योन्यसाधर्म्यं गुणानाम्' इतिसूत्रादन्योन्यसाधर्म्योक्त्या लघुत्वगुरुत्वे सत्त्वादिसाधारणे । स्वरूपलक्षणमाहुः यथायथमिति । 'प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम्' इति सूत्राद्वैधर्म्यमपि । कार्येकेति प्रकाशचालनावरणानि कार्याणि तैरुन्नेयाः । तदुक्तं 'कार्यात्कारणानुमानं तत्साहित्यात्' इति सूत्रे । मूलपदतात्पर्यमाहुः गुणक्षोभस्येति । अयं क्षोभः पुराणे स्पष्टः । पाश्चात्यत्वादिति । अत्रैकवचनं विवक्षितमित्याहुः एकेत्यादि । 'अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्य' इति सूत्रादाहुः अचेतनेति । अनेकेति । 'उपाधिभेदेप्येकस्य नानायोग आकाशस्येव घटादिभिः' 'प्रधानसृष्टिः परार्थं स्वितोप्यभोक्तृत्वादुष्ट्रकुङ्कुमवहनवत्' 'ज्ञानान्मुक्तिः' इति सूत्रैः । नित्येति 'प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्' इतिसूत्रात् । सर्वगतेति 'सर्वकार्यदर्शनाद्विभुत्वम्' इति पाठात् । सततेति सत्त्वप्रीत्यादिदर्शनात्सर्वत्र । अविकृतत्वमाहुः नेति । विकृतिः कार्यम् । महदाद्या इत्यादि व्याकुर्वन्ति स्म महदिति । 'महदाख्यमाद्यं कार्यं तन्मनः' इति सूत्रात्त्रिगुणात्मकं कार्यं महान् । अहंकार इति 'अभिमानोऽहंकारः' इति द्वितीयाध्यायसूत्रात् लक्षणम् । पञ्चेति । 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान्महतोऽहंकारोऽहंकारात्पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिगुणाः' इति सूत्रे महदहंकारपञ्चतन्मात्राणीति सप्त । उक्तसूत्रात् साक्षात्प्रकृतिविकृतयः सप्त किंतु क्रमेणेत्याहुः तत्रेति । इन्द्रियाणामिति प्रकृतिरित्यनुवृत्त्यान्वयः । तन्मात्राणामिति प्रकृतिरित्येव ।



DR RUPNATHJI( DR RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

यथा घटादिकं मृत्कारणकम् । तथैवैतेऽव्यक्तशक्तितः प्रवृत्तास्तत्कारणका इति । यद्वाऽत्र हेतुद्वयम् । तथा सति, यद् यच्छक्यं तद् तत्कारणकम् । यथा घटादयो मृदः । एवैते परंपरया परमाव्यक्तस्येति । एवं यद् यत्प्रवृत्तिसंपाद्यं तद् तत्कारणकम् । यथा घटादिः कुलालादेः । एवमेव महदादयोऽव्यक्तस्येति । अयं च हेतुः सामान्यतः कारणत्वं वा कर्तृत्वं वा साधयति । किं च । कारणकार्यविभागादविभागात् ताभ्यामिन्वयः । तथा च ये उत्पत्तौ यतो विभक्ताः प्रलये च यदविभक्तास्ते तत्कारणकाः । यथा घटादयो मृदः । एवमेतेऽपि परंपरया साक्षाच्च परमाव्यक्तादुत्पत्तौ विभक्ताः प्रलये च तदविभक्ता इत्येतैरपि तत्कारणकैर्भवितव्यमिति ।

रामानुजाचार्यास्तु—यद् विचित्रसन्निवेशं तद् कार्यम् । यथा तनुभवनादि । जगदपि विचित्रसन्निवेशमिति तेनापि कार्येण भवितव्यमिति सामान्यतो दृष्टेन जगतः कार्यत्वमनुमाय तेन सिद्धे कारणपूर्वकत्वे ततः किं कारणमित्यपेक्षायां तत्साधनाय समन्वयादयो हेतव इत्येवं सांख्यतत्त्वकौमुद्युक्तप्रकारेण सरूपत्वं समन्वयं देशकालपरिच्छिन्नत्वं परिमाणमङ्गीकृत्य व्याकुर्वन्ति ।

भास्कराचार्यास्तु—अविनाभावरूपमन्वयमङ्गीकृत्य सुखदुःखमोहान्विता बाह्या आध्यात्मिकाश्च भेदा दृश्यन्ते । ये च यदन्वितास्ते तदेककारणपूर्वकाः । यथा घटशरावादयो मृदन्विता मृदेककारणपूर्वका एवं सुखदुःखमोहान्वितं जगत् त्रिगुणकारणकमित्येवं व्याकुर्वते । परिमाणं च द्विविधम्, रूपतः संख्यातश्चेत्याहुः । तत्र भिन्नानां सरूपत्वरूपो यः समन्वयस्तस्य न स्वसजाती-

रश्मिः ।

पटादि तन्तुकारणकम् । तथैवेति महदादयः अव्यक्तकारणकाः, अव्यक्तशक्तितः प्रवृत्तत्वादित्यनुमानम् । शक्तिप्रवृत्तिरिति पाठे पञ्चमीसमासं मत्वा व्याख्यातम् । इदानीं 'शक्तितश्चेति' सूत्राद्विशेषमाहुः यद्वेति । मृद इति शक्याः । तथैत इति भेदाः, तत्कारणकाः, तच्छक्यत्वादित्यनुमानम् । परमेति शक्या एव । यत्प्रवृत्तीति व्याप्तिस्वरूपम् । कुलालादेरिति प्रवृत्तिसंपाद्या इति, अतः परंपरयाव्यक्तकारणकाः । अव्यक्तस्येति प्रवृत्तिसंपाद्या, अतोऽव्यक्तकारणकाः । अयं चेति । व्याप्यत्वादिकमुपादान एव संभवतीत्युक्ता हेतवो विशेषकारणत्वसमर्पकाः प्रवृत्तिस्तु निमित्तोपादानसाधारणीति तत्प्रवृत्तिसंपाद्यत्वहेतुः सामान्यतः कारणत्वम्, प्रवृत्तेश्चेतनधर्मत्वदर्शनात् कर्तृत्वं वा साधयतीत्यर्थः । अनुमानं तु तत्कारणकाः तत्प्रवृत्तिसंपाद्यत्वात् । कारणेत्यादि विवृण्वन्ति स्म किं चेति । मृद इति विभक्ता अविभक्ताश्चेत्यतो मृत्कारणकाः । अहंकारस्य महतः सकाशादुत्पत्तिदर्शनादाहुः परंपरयेति । एतैरिति भेदैः । इतीति एवं सूत्रे कारणत्वेनानुमीयत इत्यनुमानमिति कर्मप्रत्ययः । एतदादि दूषयितुं रामानुजादिमते आहुः रामानुजेति । तेनेति जगता । दृष्टेनेति विचित्रसन्निवेशेन । अनुमायेति जगत् कारणपूर्वकं विचित्रसन्निवेशात् तनुभवनादिवत् । व्याकुर्वन्तीति भेदानामित्याद्युक्तम् । बाह्याः जगद्रूपाः । आध्यात्मिकाः देहरूपाः । भेदाः सुखदुःखमोहान्विताः अन्वयात् तदेककारणपूर्वकाः तदन्वितत्वात् । एवमिति । ये च इत्यादिर्व्याप्तिः । रूपत इति सुखदुःखमोहान्वितं जगत्, त्रिगुणकारणकं रूपतः परिमाणात् घटादिवत् । पक्षविशेषणं तु सत्त्वरजस्तमोरूपार्थान्तरापत्तिवारणाय तेन रूपेण पक्षैकदेशस्य दृष्टान्तत्वाय च । तथा च कार्यं यदन्वितं तदन्वितकारणानुमानमिति नियमाभिमुखं



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.c

भाष्यप्रकाशः ।

याव्यक्तकारणकतासाधकत्वम् । सदृशे मित्रादौ तस्य सत्त्वेन हेतोर्व्यभिचारात् । द्विविधपरिमाणेऽपि संख्यापरिमाणं न साधकम् । एकत्वसंख्यासंख्यातत्वस्य कारणेऽपि सत्त्वाज्जातिसंख्यासंख्यातत्वस्य व्यक्तौ सत्त्वेन व्यभिचाराच्च । अतः पूर्वव्याख्यातरीत्यैव प्रधानस्य कारणत्वानुमानम् ।

रश्मिः ।

कारणं सुखदुःखमोहात्मकम्, न तु सत्त्वरजस्तमआत्मकमिति नार्थान्तरापत्तिः पक्षैकदेशस्य घटादेर्निश्चितसाध्यवत्त्वात् । 'निश्चितसाध्यवत्त्वं दृष्टान्तत्वम्'इति दृष्टान्तलक्षणात् । प्रकृतमनुसरामः । यद् यद्रूपतः परिमाणयुक्तं तत्तत्कारणकम् । घटो हि मृद्रूपतस्तावत्परिमाणो भवति, मृदं विना घटायोगादतो मृत्कारणकः । एवं प्रकृतिरूपा गुणास्तद्रूपतः परिमाणयुक्तं जगद्भवति । प्रकृतिं विना जगदयोगादतो जगत् प्रकृतिकारणकम् । संख्यातश्च इति । अयमर्थः । प्रकृतिर्हि सर्वगताऽतः परिमाणं तस्या महत् । एवं च परिमाणस्य स्वोत्कृष्टपरिमाणजनकत्वान्महदादौ परममहत्परिमाणापत्तिः । तथा च प्रकृतिगता संख्या महदादिपरिमाणारम्भिकेति मन्यते । एवं च महदादि त्रिगुणकारणकं संख्यातः परिमाणात् । यत् यत्संख्याजन्यपरिमाणकं तत्तत्कारणकम्, द्व्यणुकवत् । द्व्यणुकं हि न परमाणुपरिमाणजन्यपरिमाणकम्, अणुतरत्वप्रसङ्गात्, अपि तु परमाणुसंख्याजन्यमिति । अथवा संख्यातः परिमाणमेकत्वसंख्यासंख्यातत्वम् । तद्धेतुः पक्षसाध्यौ पूर्वोक्तौ । तत्रेति तेषु मतेषु । सांख्यरामानुजमतयोरस्वरसमाहुः भिन्नानामिति । भेदानामित्यत्र स्वविशिष्टे लक्षणां कृत्वोक्तम् । दूषणं तन्मते महदादिः स्वसजातीयाव्यक्तकारणकम्, सरूपत्वात्, घटादिवत् । अत्र सरूपत्वं न समन्वयार्थत्वेपि समन्वितसरूपत्वं तदेरितिरिशयेनाहुः तादृश इति । सदृश इत्यपि पाठः । सरूपत्ववति मित्रादौ तस्य साध्यस्यासत्त्वेनाव्यक्ततयाव्यक्तकारणकतासत्त्वेपि बीजादिरूपाव्यक्ते बीजत्वाद्यतिरिक्तजात्यभावात्सजातीयाव्यक्तकारणकताभावादसत्त्वेन हेतोः साध्याभाववद्वृत्तित्वात् । भास्करमतेऽस्वरसमाहुः द्विविधेति । रूपतः परिमाणं व्याख्यातप्रायमिति संख्यातः परिमाणेऽस्वरसमाहुः न साधकमिति । जगत् त्रिगुणकारणकमेकत्वसंख्यासंख्यातत्वात् । अत्र गुणाः सत्त्वादिगुणकार्याणि सुखदुःखमोहरूपाः । यथा स्त्रीरेकैव पुंसः सुखदाः, सपत्न्या दुःखदा, अन्येषां मोहदेति दृष्टान्तः । तथा जगत् ज्ञानिनां सुखदम्, अज्ञानिनां दुःखदम्, उदासीनानां मोहदम् । सत्त्वादिति । तथा च प्रकृतौ साध्याभाववद्वृत्तित्वव्द्यभिचारिहेतुः । एवं सामान्यतो जगत्येकत्वसंख्यासंख्यातत्वमुक्त्वा । ये च महदादयः परिमितास्ते च सामान्यकारणपूर्वकाः यथा शरावादयः तथैव महदादयः परिमितास्तेषामेकैकं सामान्यकारणमस्तीत्यनुमीयत इत्याहुः जातिसंख्येति । घटव्यक्तिः स्वसजातीयाव्यक्तकारणिका जातिसंख्यासंख्यातत्वात् । पटव्यक्तिवत् । व्यक्तीनां बहुत्वान्नैकत्वसंख्या अतो जातीति, जातेः संख्या जातिसंख्या । अवच्छिन्नत्वं षष्ठ्यर्थः । जात्यवच्छिन्नसंख्यासंख्यातत्वादिति फलितम् । तादृशी संख्या घटत्वाद्यवच्छिन्ना संख्या । तत्संख्यातत्वं यत्र तत्र स्वं घटादि तत्सजातीयाव्यक्तं मृत्त्वेन मृदादि तत्कारणकत्वम् । अत्रैकत्वसंख्यासंख्यातत्वस्य व्यक्तावभावात् स्वसजातीयाव्यक्तकारणकत्वं न सिध्येदतो हेत्वन्तरोपन्यासः । किं च । अव्यक्ते साध्याभाववति हेतुसत्त्वाद्व्यभिचारः सोपि नास्ति । तत्तद्व्यक्तितेनाव्यक्तग्रहणात् । तथापि यथाश्रुतसाध्याभाववत्यां व्यक्तौ जातिसंख्येत्यादिहेतोः सत्त्वाद्व्यभिचार इत्याहुः जातिसंख्येति । अत इति पक्षत्रये दोषात् । पूर्वव्याख्यातेति प्रधानं कर्तृ परिमाणं च क्रियाविकारोभयवत्त्वात्क्षीरवदिति रीत्यैव । ननु पूर्वपक्षे एवकारस्य किं प्रयोजनं चतुर्षु यः



RUPNATHJI ( DR RUPAK NATH )
www.astrology-tantra.com

**लोकानां भूर्भुवादीनामचेतनेन केवलेन प्रधानेन रचना नोपपद्यते। रचितत्वादेव न परिणामः। सर्वस्य संश्लेषप्रसङ्गात्।**

**भाष्यप्रकाशः।**

तदत्र 'रचनानुपपत्ति'सूत्रेण दूष्यते। तद् व्याकुर्वन्ति लोकानामित्यादि। यत् पूर्वोक्तैः परिमाणादिभिर्हेतुभिर्जगत्कारणत्वेन प्रधानमनुमीयते तदनुमानं न कर्तव्यम्। कुतः। रचनानुपपत्तेः। रचना हि बुद्धिपूर्विका वा, प्रतिनियतदेशकालव्यवस्थापिका वा, चेतनस्पर्शना वा क्रिया। सात्र लोकानां भूर्भुवादीनामचेतनेन केवलेन प्रधानेन नोपपद्यते। तथा च भूरादिलोकरचना न केवलाऽचेतनकारणिका, रचनात्वात्, गृहादिरचनावत्। भूरादिलोका नाचेतनकर्तृकाः चेतनस्पर्शनक्रियात्मकरचनाविषयत्वात्, घटकुड्यादिवत्। प्रधानं स्वतोऽकर्तृ, अचेतनत्वात्। स्तम्भादिवत्। इत्यादिभिः प्रयोगैः सत्प्रतिपक्षत्वादर्थान्तरापादकत्वाच्च न तैरनुमानैः कारणत्वेन प्रधानमनुमातुं शक्यमित्यर्थः। नन्वेवमेतैः प्रयोगैः कर्तृत्वस्यैवासिद्धिर्न तु कारणत्वस्येति बाधकाभावात् पूर्वोक्तैरन्वयादिभिः प्रधानस्य परिणाम एव तादृशोऽस्तु। तथा सति तस्य कारणत्वानपायान्न कश्चिद्दोष इत्यत आहुः रचितत्वादित्यादि। भवतां मते पुरुषो निष्क्रिय इति, क्रिया शक्तिप्राधानिकी, तथा च सति रचनापि तस्यैव धर्मो न पुरुषस्य। तद्विषयाश्च लोकास्तत्कर्तृकाः, अतो न तत्परिणामः। तथा च भूरादयो लोकाः न प्रधानपरिणामः तद्रचित-

**रश्मिः।**

कोपि भवत्विति चेन्न। स्फुरितदोषानुपेक्षैवेत्यादेराकार इति। **प्रधानमनुमीयत इति।** अत्र प्रधानानुमानानि विषयः, कर्तव्यानि न कर्तव्यानीति विशयः। अन्यमतदर्शनं संदेहबीजम्। कर्तव्यानि क्रियाविकारोभयवत्त्वात्, इति पूर्वपक्षः। तत्र सिद्धान्तमाहुः **तदनुमानमिति।** **बुद्धीति।** इदं विशेषणत्रयं क्रियेत्यस्य। **भूरादीति।** लोकग्रहणे उपपत्तिरग्रिमसूत्रे वक्तव्या। **केवलेति** वाय्वादि यथा न केवलं कारणं तथा, बाधवारणाय केवलेति। रचनायामचेतनकारणकत्वदर्शनेन पक्षे साध्याभावप्रसक्तेः। **रचनात्वादिति** बुद्धिपूर्वकक्रियात्वात् प्रतिनियतदेशकालव्यवस्थापकक्रियात्वाच्च। दृष्टान्तानुरोधेनोभयमुक्तम्। दृष्टान्तान्तरेण तृतीयं हेतुमाहुः **भूरादीति।** स्वरचितानुमाने सत्प्रतिपक्षत्वमाहुः **प्रधानमिति।** **स्वत इति** साध्यविशेषणं परतश्चेतनात्तु कर्तृ। **सत्प्रतीति।** सन्तः प्रतिपक्षाः साध्याभावसाधकहेतवो येषां मतत्रयोक्तानां स्वोत्प्रेक्षितस्य चानुमानानाम्, तत्त्वात्। तथा च पूर्वपक्षे सदनुमानानि सिद्धान्ते सत्प्रतिपक्षरूपाणि। **अर्थान्तरेति** प्रधानस्थापनाय प्रवृत्तस्यादृष्टप्रधानापेक्षया दृष्टकुलालादिसिद्धेरर्थान्तरत्वम्। सत्त्वादीनां सुखादीनां च प्रधानरूपाणां दृष्टत्वेपि कारणत्वेन्यथासिद्धत्वम्। **न त्विति।** वाय्वादौ कारणत्वदर्शनादिति भावः। **परिणाम इति।** समवायिनो जडस्यैव परिणामो दृष्ट इति तथेत्यर्थः। **कारणत्वानपायात्** समवायिकारणत्वानपायात्। **न कश्चिदिति।** 'प्रकृतिश्च'इत्यधिकरणोक्तस्वरूपदोषोक्तिविरोधरूपः। **रचितत्वादीति** रचितत्वं न प्रकृतेः, तस्याः परिणामनिषेधात्। रचितत्वं परिणाम इति। अतो ब्रह्मरचितत्वादित्यर्थः। प्रधानरचितत्वं वा। रचितत्वपरिणामयोर्भेदोऽग्रे वक्ष्यत इति। **प्राधानिकीति** 'क्षीरवच्चेष्टितं प्रधानस्य' इति सूत्रात्। **तस्यैवेति** पुरुषसंसृष्टप्रधानस्यैव। **तत्परिणामः** प्रकृतिपरिणामः। **तद्रचितेति** ब्रह्मरचितत्वादिति भाष्यार्थ उक्तः। अत्र तु प्रधानरचितत्वादित्युक्तम्। तद्रचितत्वपरिणामयोः स्वरूपस्य वक्ष्यमाणत्वात्पूर्वमेव पक्षान्तराद-



DR.RUPNATHJI( DR.RUPAK NATH)
www.astrology-tantra.com

अतश्चेतनकर्तृका रचना नाचेतनेन प्रधानेन कर्तुं शक्या तस्मात् कारणत्वेन प्रधानं नानुमातव्यम् । अन्यथोपपत्त्या बाधितमेवानुमानमिति चकारार्थः ॥ १ ॥

भाष्यप्रकाशः ।

त्वात्, यद् यद् रचितं तत् तस्य परिणामः, यथा घटादिः कुलालादेः । किंच । भूरादयो लोका यदि प्रकृतिपरिणामभूताः स्युः, सर्वेपि संश्लिष्टाः स्युः । लोके परिणतत्वस्य पृथक्त्वयोर्नियमस्य दध्यादिषु दर्शनात् । तथा च भूरादयो लोका नैकस्य परिणामभूता इतरेतरसंश्लेषरहितत्वात् यदेवं तदेवम्, यथा घटकुड्यमन्थानादि । किंच कार्यं द्विविधम्, आरब्धं परिणामभूतं च । तत्र निमित्तव्यापारजन्यं यत् तदारब्धम्, तदेव च रचितम्, यथा गृहादिकम् । यत् पुनरुपादानव्यापारप्राधान्येन वा, तन्मात्रव्यापारेण वा जन्यते तत् परिणामभूतम् । यथा हरिद्राचूर्णसंयोगजन्यं कुङ्कुमादि यथा च दध्यादि । रचितत्वपरिणामयोश्चेतरेतरविरुद्धत्वं लोके दृष्टम्, अतोऽत्र परिणामाङ्गीकारे रचितत्वहानिस्तदङ्गीकारे च परिणामहानिरिति तुन्दिलसुरतन्यायादेकस्मिन् कार्ये उभयरूपत्वाङ्गीकार एकस्मिन् कारणे उपादानत्वनिमित्तत्वयोरङ्गीकारो लोकविरुद्धः, प्रत्यनुमानबाधितत्वाच्चायविरुद्धेत्यर्थः । सिद्धं वदन्तः सौत्रानुमानपदस्वार्थमाहुः अत इत्यादि । तथा चानुमीयत इत्यनुमानम्, भावे ल्युडित्यर्थः ।

रामानुजाचार्यास्तु—'कृत्यल्युटो बहुलम्' इति बाहुलकात् कर्मणि ल्युट् । यदनुमीयते तदनुमानमिति सौत्रानुमानपदस्वार्थमाहुः ।

चकारप्रयोजनमाहुः अन्यथेत्यादि । अन्यथोपपत्तिः प्रतिपक्षानुमानं तया कृत्वा

रश्मिः ।

रात् । कुलालादेरिति परिणामो न, रचितत्वादित्यर्थः । सर्वस्येत्यादिभाष्यं विवृण्वन्ति स्म किंच भूरित्यादि । कुड्यं भित्तिः इतरेतरसंश्लेषरहितमिति मृदोऽश्मचूर्णयोः काष्ठस्य च परिणामभूतमिति ज्ञेयम् । परिणामविरुद्धरचनोपादानानन्तरं तत्प्रयोजनमाहुः किंचेति । क्रमेणोदाहरणे । यथा हरिद्रेत्यादि । चूर्णं चूनेति लोके उच्यते । कुङ्कुमादीति आदिपदेन रङ्गः । दध्यादीति अत्रादिपदेन यथा चातुर्मास्ये छत्राकोत्पत्तिः शुष्ककाष्ठे । तुन्दिलेति तुन्दिलश्च तुन्दिला च तुन्दिलौ तयोः सुरतम् । उभयेति आरब्धपरिणामत्वोभयेत्यर्थः । एकस्मिन्निति प्रधाने । प्रत्यनुमानानि दर्शितानि । अनुमानपदं करणव्युत्पत्त्या व्याप्तिज्ञानं भूत इति प्रसिद्धिर्नैयायिकानामिति भावव्युत्पत्तिमाहुः तथा चेति । अनु चेतनमनु मीयते कारणे मानं क्रियते स्वरूपीक्रियत इत्यनुमानं प्रकृतिः स्वरूपम् । प्रकृतिः सदनुकूलकृतिरपि स्वरूपमिति । तदुक्तं भावे ल्युडिति पूर्वपक्षे राद्धान्तिकास्तु भावव्युत्पत्तिस्फोरणाय । नानुमानमित्यस्य नानुमातव्यमिति विवरणात्कर्मणि प्रत्ययो वक्तव्यः । 'माङ् माने शब्दे च' इत्यस्य सकर्मकत्वाच्च तथापि कर्मणि ल्युटोऽप्राप्त्या भाष्यमार्थिकार्थं स्पृशतीत्याशयेन भावे ल्युट् प्रकृतः । तद्दिति प्रधानम् । आहुरिति अस्वरसस्तु बाहुलकात् । अन्यथेति । यद्यप्यन्यथोपपत्तिर्ब्रह्मकारणकत्वोपपत्तिः । उपपत्तिशब्दस्य तर्के शक्तेः । तथापि बाधितमित्यत्र करणत्वेनोल्लेखात्प्रत्यनुमानमिति लक्षणया व्याख्या । न च भाष्ये बाधितमिति न । 'पक्षे साध्याभावसत्त्वं बाधः' तमितमित्यर्थो येन लक्षणाप्राप्तिरन्वयानुपपत्त्या अपि तु दुष्टमित्येवार्थ इति वाच्यम् । तस्यापि बाध एवेति व्याख्यानस्य सुखत्वात् । न च भाष्ये लक्षणानुचितेति शङ्क्यम् । न्यायमते लक्षणा, आचार्यमते तु भक्तिहंसोक्तदिशानुमानान्तःपतितस्यानुमानत्वात् । अत्र स्वतन्त्रत्वेन सर्ववादिनिराकरणेन 'असदिति चेन्न प्रतिषेधमात्रत्वात्' इत्यत्र छान्दोग्योपन्यासेन सदेव कारणमिति



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## प्रवृत्तेश्च ॥ २ ॥

**भुवनानि विचार्य जनान् विचारयति । सर्वस्य तत्परिणामे प्रवृत्तिर्नोपपद्यते**

---

### भाष्यप्रकाशः ।

सांख्योक्तं पूर्वमनुमानं पक्षे साध्यशून्यमेव क्रियत इति बोधनं चकारेण क्रियते इत्यर्थः । एवं सत्प्रतिपक्षोऽर्थान्तरं बाधश्चेति दोषत्रयं दर्शितम् ॥ १ ॥

प्रवृत्तेश्च ॥ २ ॥ ननु पूर्वहेतुनैव निरस्ते सांख्यमते हेत्वन्तरस्य किं प्रयोजनमत आहुः भुवनानीत्यादि । रचना द्विविधा, भुवनरचना जनरचना च, तत्र जनरचना शुक्रशोणितपरिणामभूता, अतो रचनात्वहेतुकेऽनुमाने जनशरीररचनाया रचनाविषयत्वहेतुके च जनशरीरस्याचेतनत्वहेतुके च शुक्रशोणितयोर्दृष्टान्तीकरणे तेषां साधारण्यात्तस्या न तन्मतदूषणं न वा पूर्वोक्तन्यायावतार इति तत्समर्थनार्थं हेत्वन्तरेण तान् विचारयतीत्यर्थः । तद् व्युत्पादयन्ति सर्वस्येत्यादि । प्रवृत्तिर्हि प्रयत्नस्तत्पूर्विका क्रिया वा । तथा च सर्वस्य प्रकृतिपरिणामत्वे

### रश्मिः ।

व्यवस्थापितम् कार्यं सदसद्वेति किमपि नोक्तम् । तत्तर्केहतं सत्कार्यमसत्सदसद्वा भवेत् । न तु सदेवेति । तदत्र वादस्य तस्य पौराणत्वेनात्र निरासः । स च पौराणो वादः 'सत इदमुत्थितं सदिति चेन्ननु तर्कहतम्' इत्यत्र सुबोधिन्यामुक्तः । एवं सत्प्रतिपक्ष इति । न च प्रतिपक्षसानुमानस्य सत्प्रतिपक्षत्वेन तेन कथं पक्षे साध्यशून्यमेव क्रियत इति शङ्क्यम् । श्रुत्यनुकूलतर्कोत्थापनात् सत्त्वेनास्य सत्प्रतिपक्षत्वाभावात् ॥ १ ॥

प्रवृत्तेश्च ॥ २ ॥ जनशरीरेति । षष्ठ्यन्तानीमानि पदानि दृष्टान्तीकरण इत्यनेनान्वयन्ति । तेषां प्रतिपक्षानुमानानां साधारणत्वं साध्याभाववती जनशरीररचना सा साध्याभाववती 'योनेः शरीरम्' इति केवलाचेतनकर्तृकत्वात् । तत्र रचनात्वहेतोः सत्त्वात् । एवमचेतनकर्तृकत्ववति जनशरीरे रचनाविषयत्वसत्त्वात् । एवं परतः कर्तृत्ववतोः शुक्रशोणितयोरचेतनत्वहेतोः सत्त्वात् साध्याभाववद्वृत्तित्वेन हेतवाम् । तन्मतदूषणं सत्प्रतिपक्षस्वरूपं तत्र । प्रतिपक्षाणां साधारणत्वेन तन्मतानुमानानां सत्प्रतिपक्षत्वाभावात् । न वेति रचितत्वपरिणतत्वयोरेकत्र जनशरीरे दर्शनात्पूर्वोक्तहान्यारमाप्तन तुन्दिलसुरतन्यायावतार इत्यर्थः । तत्समर्थेति प्रतिपक्षाणां सद्धेतुत्वं समर्थयितुम् । हेत्वन्तरेण सौत्रेण । तानिति रचितत्वादीन् हेतून् दृष्टान्तान्तैर्विशेषणैश्च युक्तान् कर्तुं तत्तद्धर्मान्सशरीरान् जीवान् विचारयतीत्यर्थः । व्युत्पादयन्तीति जनविचारेण दृष्टान्तेषु पूर्वं जनशरीररचनाजनशरीरशुक्रशोणितानामुक्तत्वेन हेतूनामविशेषितत्वेनाविचारितत्वस्फूर्तेः । 'तर्कोद्वेकविभावनासु सततं व्याजेन तन्द्रालवः' इति तार्किकोक्तेरत आवश्यकत्वाज्जनविचारे लोकन्यायेन व्युत्पादयन्ति । दृष्टान्तविशेषणत्वार्थं प्रयत्न इति द्वितीयोर्थस्तत्पूर्विकेति । तथा च भूरादिलेकरचना न केवलाचेतनकारणिका रचनात्वात्, इत्यत्र प्रवृत्तेरिति हेतुत्वेन न साधारण्यम् । यद्वा रचनात्वादित्येव हेतुः सा च बुद्धिपूर्विकेति प्रतिनियतदेशकालव्यवस्थापिकेति सांख्यबोधनायोक्तं क्रियाविशेषणम् । तत्परित्यागेन व्यासोक्तविशेषणं प्रवृत्तिरुक्ता प्रयत्नपूर्विका क्रिया रचनेति । सोयमर्थः सौत्रचकारेण द्योतितः । तथा च प्रयत्नपूर्विका क्रिया, बुद्धिपूर्विका क्रियेति पूर्वसूत्रेणार्थो जातस्तत्र श्रीव्यासमतेन बुद्धिपूर्विकेतिविशेषणत्यागः, सौत्ररचनाशब्देन लक्षणे क्रियारूपविशेषणत्यागः । एवं च प्रयत्नपूर्विका क्रियेत्येवावशिष्टम् । तदुक्तं तत्पूर्विका क्रिया वेति । भाष्यं विवृण्वन्ति तथा चेति ।



DR. RUPAK NATH
www.astrology-tantra.com

भाष्यप्रकाशः।

शरीरोत्पादनाय मातापित्रोः प्रवृत्तिर्नोपपद्यते। अयमर्थः। अचेतनस्य स्वत एव प्रवृत्तौ शुक्रशोणिते अपि चेतनप्रवृत्तिमन्तरेण स्वत एव जनशरीराणि जनयेताम्, न तु मातापित्रोः प्रवृत्तिमपेक्षेताम्। अपेक्षा त्वस्ति। बहिः पतितयोः संसृष्टयोरपि तयोः शरीरसंभवादर्शनात्। पोषणादिनैव तत्समग्रत्वदर्शनाच्च। अत एव गर्भस्रावादौ शरीरस्यासमग्रता दृश्यते। तेन चेतनाधिष्ठितयोरेव तयोः प्रवृत्तिर्न त्वनधिष्ठितयोः। अतो जनरचनादिदृष्टान्तैः रचनात्वादीन् हेतून् साधारणीकृत्य पूर्वोक्तैरन्वयादिभिः प्रधानं न कारणत्वेनानुमातुं शक्यम्। असदुक्तेषु हेतुषु रचनात्वे प्रवृत्तिपूर्वकत्वेन विशेषिते मातापितृप्रवृत्तिपूर्वकशुक्रशोणितपरिणामात्मकशरीर-रचनया दृष्टान्तिते, रचनाविषयत्वे च तथा विशेषिते, पुरुषशरीरेण च दृष्टान्तिते, अचेतनत्वे च प्रवृत्तिमत्त्वेन विशेषिते जीवच्छरीरेण च दृष्टान्तिते साधारण्यनिवृत्तौ दोषाभावादित्यर्थः। ननु केवलचेतनस्यापि प्रवृत्त्यदर्शनात् प्रवृत्तिरपि विशिष्टधर्म एव। तथा सति तत्र कस्य प्राधान्यमित्यपेक्षायां चेतनस्य निष्कलत्वनिष्क्रियत्वाभ्यां न प्राधान्यम्, अपि त्वचेतनस्यैवेति

रश्मिः।

**मातापित्रो**रिति 'पिता मात्रा' इत्यस्य वैकल्पिकत्वादेकशेषः। **नोपपद्यत** इति। पूर्वसूत्रादनुपप-त्तिपदं नानुमानपदे चानुवर्तेते। एवं च प्रवृत्तेरनुपपत्तेरनुमानं प्रकृतेरिति सूत्रार्थः। चेतनकर्तृका प्रवृत्तिर्नोपपद्यते 'योनेः शरीरम्' इति सूत्रात्। तथा च नापलपितुं शक्या। उक्तं व्युत्पादनं कुर्वन्ति **अयमर्थ** इति। **तयो**रिति शुक्रशोणितयोः। संबन्धे षष्ठी। संबन्धो जन्यजनकभावः। तदाहुः **शरीरसंभवे**ति। **पोषणे**ति मातापितृकृतपोषणादिना। आदिपदेन मासकालः। **अत एवे**ति पोषणाद्यभावादेव। **अत** इति भूरादिलोकरचनापक्षके केवलाचेतनकारणप्रतियोगिका-भावसाध्यके रचनात्वहेतुकेऽनुमाने जनशरीररचना दृष्टान्तीकृत्य साधारण्यमुक्तं तन्मन्दम्, दृष्टान्ते केवलाचेतनजन्यत्वाभावात्। मातापितृभ्यां पोषित एव शरीरादौ सामग्र्यदर्शनेन शुक्रशोणित-पितृयोनिजन्यत्वादिति। इति न साधारण्यम्। किंच। भूरादिलोकपक्षकेऽचेतनकर्तृकत्वप्रतियोगि-काभावसाध्यके चेतनस्पार्शनक्रियात्मकरचनाविषयत्वहेतुकेऽपि जनशरीरदृष्टान्तो न साधारण्या-पादकः। पितृभ्यां पोषिते साङ्गीकारेण जनशरीरे साध्यवदन्यत्वाभावेन चेतनस्पार्शनक्रियात्मकरचना-विषयत्वरूपहेत्वाश्रयत्वेऽपि साधारण्याभावात्। एवं प्रधानपक्षके स्वतः कर्तृत्वाभावसाध्यके अचेतनत्व-हेतुकेऽपि शुक्रशोणितयोर्दृष्टान्तत्वेऽपि न क्षतिः पित्रादिचेतनाधिष्ठितयोरेव शुक्रशोणितयोः सम-वायित्वदर्शनात्। शुक्रादेः साध्यवदनन्यत्वेऽप्यचेतनत्वेन हेत्वाश्रयत्वान्न साधारण्यम्। इति हेतुत्रयी अतःशब्दार्थः। **जनरचने**ति भाष्यानुसारेणोक्तम्। **प्रकाशा**नुसारेण तु जनशरीररचनादिदृष्टान्तैः। साधारण्यनिवृत्त्यनुवादपूर्वकं दोषान्तराभावमाहुः **असदि**ति। **प्रवृत्ती**ति। प्रवृत्तिः प्रयत्नः तत्पूर्विका रचना क्रिया। बुद्धिपूर्विका क्रियेति सांख्यमतनिरूपणे नात्र। **दृष्टान्तित** इति अग्रे साधारण्य-निवृत्तावित्यनेनान्वेति। **तथे**ति प्रवृत्तिपूर्वकचेतनस्पार्शनक्रियात्मकरचनाविषयत्वात्, इत्येवंप्रकारेण। **अचेतनत्व** इति प्रवृत्तिमदचेतनत्वादिति हेतुः। प्रवृत्तेरनन्वयं मत्वा प्रवृत्तेः प्रवृत्तिमति लक्षणा कृता। **दोषे**ति सिद्धान्ते हेत्वाभासरूप**दोषाभावात्**। सांख्याः शङ्कन्ते हेतुघटकप्रवृत्तिविशेषणदानेप्यन्वया-दिहेतुशुद्ध्या स्वमतसिद्धिम्। **ननु केवले**ति। सांख्यमतत्वेन चन्द्रादिप्रवृत्तिदर्शनेप्यक्षतिः। **प्रवृत्त्य-दर्शनादि**ति तदीयमुक्तेषु तथोक्तेः। **विशिष्टधर्मो** विशिष्टस्य धर्मः। **तत्रे**ति चेतनाचेतनयोः।



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

**प्रधानस्य वा प्रथमप्रवृत्तिः । यद्यपि प्रधानकारणवादे फलपर्यन्तमङ्गीक्रियमाणे**

---

भाष्यप्रकाशः ।

**प्रवृत्तेरपि नैमित्तिकाचेतनधर्मत्वान्नान्वयादिषु प्रतिपक्षादिदोषः, किंतु रचनात्वादिष्वेव दोष इत्यत आहुः प्रधानस्येत्यादि । निमित्तसंसर्ग एव नैमित्तिकधर्मसंभवान्निमित्तभूतचेतन-संसर्गस्य सार्वदिकत्वे सृष्टिस्थितिप्रलयादिकालविभागानुपपत्तेः कादाचित्कत्वे च हेतोर्वक्तु-मशक्यत्वात् प्रधानस्य या प्राथमिकी प्रवृत्तिः सृष्ट्यर्था सैव नोपपद्यते । तथा च तव मते चेतनाधिष्ठानस्यापि वक्तुमशक्यत्वेन हेतोः सविशेषणस्याप्युपादाने त्वन्मतासिद्धिरित्यर्थः । ननु तस्याः स्वभाव एव तादृशोऽतो न किंचिद् दूषणमित्याकाङ्क्षायां तदनूद्य दूषयन्ति यद्यपीत्यादि । धेनुवद्वत्साय पुरुषार्थं स्वभावत एव तस्याः प्रवृत्तिः । नर्तकीवत् सर्वप्रदर्श-**

रश्मिः ।

**नैमित्तिकेति** निमित्तं चेतनं तेन संसृज्यत इति शैषिकः ठक् नैमित्तिकम्, नैमित्तिकं च तदचेतनं नैमित्तिकाचेतनं प्रधानं तस्य धर्मत्वात् । **प्रतिपक्षादीति** प्रतिपक्षोऽत्र सत्प्रतिपक्षत्वम् । **आदि-**शब्देनानुमितिप्रतिबन्धः । **किंत्विति । दोषस्तु** विशेषणदानेन जडप्रवृत्तिसंपादनेनाविशेषिततुल्यत्वा-द्रचनात्वादिहेतूनां पूर्वतुल्यत्वेन साधारण्यम् । तथाहि । साध्यवदन्यस्मिञ्छत्राके प्रवृत्तिपूर्वकरचनात्व-सत्त्वात्पुनः साधारण्यम् । तथा प्रवृत्तिपूर्वकचेतनप्रार्थनाक्रियात्मकरचनाविषयत्वस्यापि छत्राकवृत्त्या साधारण्यम् । छत्राकस्याचेतनकर्तृकत्ववत्त्वेन चेतनकर्तृका इति साध्यवदन्यत्वात् । एवं प्रवृत्ति-मदचेतनत्वस्य स्वतः कर्तृत्वाभाववजीवच्छत्राकान्यस्मिन्नुच्चलज्जलतरङ्गादौ सत्त्वात्साधारण्यं प्रवृत्ते-र्नैमित्तिकाचेतनधर्मत्वात् । अपि च । अर्थान्तरपादकैः सविशेषणै रचनात्वादिहेतुभिर्नान्वयादिषु सत्प्रतिपक्षता संपाद्यते । प्रधानेन चित्संसर्गेण प्रवृत्त्या कर्तृत्वसंभवादर्थान्तरं दोषः । पूर्वमर्थान्तरं निरस्यन्ति **निमित्तेति । सृष्टीत्यादि । कालविभागानुपपत्तिस्तु** कालो ह्युपाधिभेद्यः । उपाधि-भूतप्रवृत्तिस्त्वेकविधा । यदि चाधेयानां सृष्ट्यादिभेदोऽभ्युपेयते तदा तु भविष्यत्त्वादाधेयानां भेदकता न संभवतीति विभागानुपपत्तेः । **कादाचित्कत्व** इति तादृशसंसर्गस्य । **हेतोरिति** भगवदि-च्छारूपहेतोरप्यसूत्रणे वक्तुमशक्यत्वात् । **प्राथमिकीति** साम्यावस्थातः प्रच्युतिरूपा, सत्त्वरज-स्तमसां साम्यावस्थातः प्रच्युतिरूपा, सत्त्वरजस्तमसामङ्गाङ्गिभावापत्तिरूपा विशिष्टकार्याभिमुखप्रवृत्ति-रित्यर्थः । **नोपपद्यत** इति । जायमाना च प्रवृत्तिः स्थितिप्रलयौ प्रतिबध्नीयादिति नोपपद्यते । ननु जायतां प्राथमिकी प्रवृत्तिर्हेतोर्विद्यमानत्वात् । प्रवृत्ती तु स्थितिप्रलययोर्दर्शनादुपाधिपरिकल्पनया भविष्यत इति चेन्न । चितः कारणतायां बाधकाभावात् । **तथा चेति** प्रवृत्त्यविशिष्टत्वे प्रकारे सति । **सविशेषणस्येति** प्रवृत्तिरूपविशेषणसहितस्य । **त्वयाप्युपादाने त्वन्मतस्य** प्रथमप्रवृ-त्तिरूपस्यासिद्धिरित्यर्थः । रचनादिष्वर्थान्तरापादकत्वेपि प्रधाने तदसंभवात् **त्वन्मतासिद्धिः** । किंच रचनादिषु दोषासंपादकत्वान्निर्दोषैः प्रवृत्तिघटितैस्तैरन्वयादयः प्रतिपक्षीक्रियन्त इति त्वन्मता-सिद्धिः । **तथा** इति प्रकृतेः । **तादृश** इति स्वयं विभक्तप्रवृत्तिरूपः । **न किंचिदिति** प्रवृत्त्यनुपपत्तिरूपम् । तथा च प्रवृत्तिपूर्वकरचनात्वादिहेतुकेष्वर्थान्तरापत्तिरिति भावः । **धेनु-वदिति** 'धेनुवद्वत्साय' इति द्वितीयाध्यायसूत्रे षष्ठ्यन्ताद्वतिरित्याहुः **तस्याः प्रवृत्तिरिति** । **पुरुषार्थमिति** पुरुषादिरचनाय निर्लेपपुरुषार्थं वा । **नर्तकीवदिति** 'नर्तकीवत्प्रवृत्तस्यापि निवृत्तिश्चारितार्थ्यात्' इति तृतीयाध्यायसूत्रादाहुः **नर्तकीति** । प्रदर्शितकार्येण स्वस्याश्चारितार्थ्यादि-



Dr. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

न किंचिद् दूषणम्। कृतिमात्रस्य प्रधानविषयत्वात्। तथापि वादिनं प्रति लोकन्यायेन वक्तव्यम्।

तत्र लोके चेतनाचेतनव्यवहारोस्ति। चेतनाश्चतुर्विधा जीवाः सशरीरा अलौकिकाश्च। अन्ये अचेतनाः। तन्न्यायेन विचारोत्रेति न किंचिद् विचारणीयम् ॥ २ ॥

---

भाष्यप्रकाशः।

नोत्तरं स्वत एव कार्याभिवृत्तिरित्येवं कृतिमात्रस्य प्रधानविषयत्वमङ्गीकृत्य फलपर्यन्तं प्रधानकारणवादेऽङ्गीक्रियमाणे स्वभाववादाश्रयणाच्च किंचिद् दूषणं रचनाप्रवृत्त्योः कालनियमस्य च स्वभावादेव संभवात्। तथापीदं शास्त्रं तर्कमाश्रित्य प्रवृत्तं न तु श्रुत्युपष्टब्धम्। तदीयव्याख्यानस्य श्रुत्यन्तरविरोधेन लक्षणाग्रासेन च व्याख्याभासत्वात्, अतस्तदालम्बने वादिनं प्रत्यपि लोकन्यायेन वक्तव्यम्। तत्र लोके चेतनाचेतनव्यवहारोऽस्ति। चेतना जरायुजाण्डजोद्भिज्जस्वेदजभेदेन चतुर्विधाः। सशरीरा जीवाः। अलौकिका मुक्ता अशरीराश्चेतनास्तेभ्योऽन्ये घटादयो रथादयश्च ते अचेतना इति। तन्न्यायेनात्र सूत्रेषु विचारस्तथा सति

रश्मिः।

त्यर्थः। न तु कृत्स्नप्रसक्तिः ज्ञानकाशात्वात्। सर्वेति नृत्यादिकन्दुकलीलान्तं सर्वं दृष्टान्ते, सर्वं कार्यं दार्ष्टान्तिके। निवृत्तिरिति। तथा चैतदुत्तरं स्थितिः पश्चात्स्वभावादेव लयः स च गुणत्रयसाम्यावस्था इत्यर्थः। तथा च षाष्ठं सूत्रं 'साम्यवैषम्याभ्यां कार्यद्वयम्' इति। कार्यद्वयं च सर्जनप्रलयरूपम्। कृतिमात्रस्येति। यद्यपि स्वभावादेवेन कृतिमात्रस्य प्रधानविषयत्वादिति हेतुपरतया भाष्यं सुखेन संभवति तथाप्यभिप्रायविशेषबोधनाय ल्यब्लोपे पञ्चमीमाश्रित्य व्याकुर्वन्ति प्रधानेति। तथा चाभिप्रायः सांख्यमतानुवादो न तु स्वीयकथन इति भावः। तेन तन्मते कृतिमात्रस्येत्यादिभाष्ये हेतुरिति तन्मते इत्यध्याहारो नेत्यपि भावः। ननु न किंचिद्दूषणं कुतः दृष्टान्तस्य चेतनत्वेन जडया रचनाप्रवृत्तिकालनियमनासंभवेन च दूषणसत्त्वादिति चेत्तत्राहुः रचनाप्रवृत्त्योरित्यादि। तथापीत्यादि भाष्यं विवृण्वन्ति स्म तथापीति। इदमिति सांख्यम्। तर्कमिति। 'अस्त्यात्मा नास्तित्वसाधनाभावात्' स्पष्टमिति। 'देहादिव्यतिरिक्तोसौ वैचित्र्यात्' इत्यत्रानुमानबोधनात्तथा। षडध्यायोपक्रम इत्यर्थनिर्णायकत्वम्। आत्मा अस्ति नास्तित्वसाधनाभावात् घटादिवत्, आत्मा देहादिव्यतिरिक्तः, वैचित्र्यात्, प्राणवत्। अत्र तर्कः कार्यकारणताग्राहकः व्याप्तिशोधकः। ननु असंगतिः श्रुतिविरोधश्च इति 'श्रुत्या प्रसिद्धस्य नापलापस्तत्प्रत्यक्षबाधात्' 'नाद्वैतश्रुतिविरोधो जातिपरत्वात्' इत्यादिसूत्रेषु श्रुत्युपष्टम्भद्योतनात्कुतो 'न तु श्रुत्यनुपष्टब्धम्' इति चेत्तत्राहुः तदीयव्याख्यानस्येति सांख्यव्याख्यानस्य। व्याख्यानेति। तच्चोक्तमानुमानिकाधिकरणे चतुर्थपादे। लोकन्यायेनेति वस्त्वालम्बनं तन्न्यायेन वक्तव्यम्। अन्यथा प्रतिज्ञात्यागादिरूपनिग्रहस्थानापत्तेः। लोकन्यायप्रतिपादकं तत्र लोके इत्यादि भाष्यं विवृण्वन्ति स्म, तत्र लोक इति। जरायुजेत्यादि। अश्वादयः कपोतादयः वृक्षादयो मत्कुणादयश्चेति चतुर्धा, जरायुरतिसूक्ष्मवेष्टनचर्म। 'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्' इति श्रुतौ तु त्रैविध्यं यत्तन्मत्कुणानामण्डजत्वात्। मुक्ताः अक्षरात्मकाः। तन्न्यायेनेति भाष्यं विवृण्वन्ति तन्न्यायेनेति। विचार इति

---

१. निर्गुणादि इति पाठः। २. श्रुत्या सिद्धस्य' इति प्रवचनसूत्रपाठः।



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

प्रकृतेः पञ्चविधेषु चेतनेष्वप्रवेशादचेतनत्वमिति । तत्र धेनुनर्तकीदृष्टान्ताभ्यां प्रवृत्तिनिवृत्ती प्रतिवादिनं प्रति न वक्तुं शक्ये । लोके तयोश्चेतनत्वेनैव व्यवहारात् । अभ्युपगमस्य स्वमात्रसंतोषकत्वेनानुत्तरत्वात् । अत एतावन्मात्रेणैव तन्निग्रहे सिद्धे न किंचिद्विचारणीयम् । प्रवृत्तिः कस्य धर्मः यत्र दृष्टा तस्य वा, यत्संयुक्ते दृष्टा तस्य वेति शङ्कायां यस्मिन् दृष्टा तस्यैव सेति युक्तम् । प्रवृत्तितदधिष्ठानयोः प्रत्यक्षत्वात् केवले चेतने क्वचिदपि प्रवृत्त्यदर्शनात् । अत एवान्वयव्यतिरेकसिद्धत्वाच्चैतन्यमपि देहधर्म एवेति लोकायतिकदर्शनम् । तस्मादचेतनस्यैव धर्मः प्रवृत्तिरिति पूर्वपक्षमुद्भाव्य, न ब्रूमो यस्मिन्नचेतने प्रवृत्तिर्दृश्यते न तस्य सेति किंतु सा चेतनाद् भवतीति ब्रूमः । तद्भावे भावात् तदभावे चाभावात् । यथा काष्ठादिनिष्ठापि दाहप्रकाशलक्षणा क्रिया केवलेऽनलेऽनुपलभ्यमानापि ज्वलनान्वयव्यतिरेकानुविधानात् तन्निमित्तैवेत्यादिकमेकदेशिभिर्विचारितं तल्लोकन्याये देहस्यैव चेतनत्वेन समाधानान्न विचारणीयमित्यर्थः ॥ २ ॥

रश्मिः।

चेतनाचेतनविचारः । तत्रेति प्रधाने । तयोरिति धेनुनर्तक्योः । दृष्टान्ताभावेऽपि प्रधानस्यायं स्वभावः स्वयं प्रवर्तत इति वादिनं प्रत्याहुः अभीति । यथा च तृतीये सूत्रं 'स्वभावचेष्टितमनभिसंधानाद्भृत्यवत्' इति । यथा भृत्यस्य नित्यकर्मणि तदभिसंधानाभावादपि नित्याभ्यासं प्राप्य स्वभावचेष्टितं तथा प्रधानस्य जडत्वेनानभिसंधानाद्धेतोर्न चेतनचेष्टितं किंतु स्वभावचेष्टितमित्यर्थः । एतावदिति समन्वयादीनां सत्प्रतिपक्षीकरणेन दृष्टान्ताभावेन च । तन्निग्रह इति प्रतिवादिनिग्रहे । प्रतिज्ञाहानिर्निग्रहः । तदेवाहुः प्रवृत्तिरिति । यत्रेति शरीरेषु । यत्संयुक्ते चेतनसंयुक्ते देहे । प्रवृत्तीति प्रवृत्तिशरीरयोः । केवल इति सूर्याचन्द्रमसोरपि प्रवृत्ती रथाभ्यां तयोरप्यश्वादिभिरिति । अत एवेति प्रत्यक्षत्वादेव देहसत्त्वे चैतन्योपलब्धिर्देहाभावे तदनुपपत्तिरित्यन्वयव्यतिरेकौ । न तस्येति तस्याचेतनस्य सा प्रवृत्तिर्नेति न ब्रूम इति योजना । एतदग्रे भवतु तस्यैव सेति ग्रन्थः स प्रयोजनविधुरो भवति । सा तु चेतनाद्भवतीति ग्रन्थस्थले किंतु सा चेतनाद्भवतीत्येतावतैव चारितार्थ्यं लाघवादित्ययमभिप्रायः । तद्भाव इति चेतनसत्त्वे । काष्ठादीति आदिनाश्मा । केवल इति काष्ठशून्येऽनले वह्नौ । तन्निमित्तैव ज्वलननिमित्तैव । इत्यादिकमिति आदिशब्देन तद्वल्लोकायतिकानामपि चेतन एव देहोऽचेतनानां रथादीनां प्रवर्तको दृष्ट इत्यविप्रतिषिद्धं चेतनस्य प्रवर्तकत्वम् । ननु तव देहादिसंयुक्तस्यात्मनो ज्ञानस्वरूपमात्राव्यतिरेकेण प्रवृत्त्यनुपपत्तेरनुपपन्नं प्रवर्तकत्वमिति चेन्न । अयस्कान्तवद्रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्तकत्वोपपत्तेः । यथाऽयस्कान्तो मणिः स्वयं प्रवृत्तिरहितोप्ययःप्रवर्तको भवति । यथा वा रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादिप्रवर्तका भवन्ति । एवं प्रवृत्तिरहितोऽपीश्वरः सर्वशक्तिः सन् सर्वं प्रवर्तयेदित्युपपन्नम् । एकत्वात्प्रवृत्त्यभावात्प्रवर्तकत्वानुपपत्तिरिति चेन्न । अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रयुक्तत्वात्तस्मात्संभवति प्रवृत्तिः । सर्वज्ञकारणत्वे न त्वचेतनकारणत्व इति भाष्यस्य संग्रहः । एकदेशिभिः शंकराचार्यैः । प्रवृत्तेश्चेतनधर्मत्वेऽविचारणीयत्वं दूषमाहुरित्याहुः तल्लोकेति तत्प्रवृत्तेश्चेतनधर्मत्वम् । लोकन्याय इति । प्रवृत्तिः कस्य धर्म इत्याद्युक्ते देहस्यैवेति । तस्य चात्मरूपत्वात्तस्य चाविद्यावच्छिन्नत्वाद्देहात्मभावदृढप्रतीतेस्तद्व्यतिरिक्तस्य ब्रह्मणोभावाच्च वेदमात्रादसंभावनाविपरीतभावनानिवर्तकं ज्ञानमुत्पद्यत इति भाष्यादेवकारः, लोकन्यायोप्ययम् । समाधानादिति अचेतनकारणत्वे प्रवृत्तिर्न संभवति सर्वज्ञकार-



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## पयोम्बुवच्चेत्तत्रापि ॥ ३ ॥

**यथा पयो विचित्रफेनरचनां करोति, यथा वा नद्यादिजलं स्वत एव स्पन्दत**

---

### भाष्यप्रकाशः।

**पयोम्बुवच्चेत्तत्रापि ॥ ३ ॥** ननु मास्तु धेनुनर्तकीदृष्टान्तेन प्रवृत्तेरचेतनधर्मत्वं तथापि क्षीरजलदृष्टान्तेनाचेतनधर्मत्वं तस्याः साधयिष्याम इत्याशङ्कायां समाधत्ते पय इत्यादि। तद् व्याकुर्वन्ति यथा पय इत्यादि। यथा दुह्यमानेऽधिश्रीयमाणे च पयसि दृश्यमानां विचित्रां फेनरचनां केवलं पय एव करोति। यथा वा नद्यादिजलं स्वत एव प्रस्रवति, न तत्र चेतनसंसर्गलेशोऽपि, तथा प्रधानमपि प्रवर्तते। विचित्रलोकरचना केवलाचेतनकर्तृका, रचनात्वात्, दुह्यमानपयःफेनरचनावत्। बन्धाद्यर्था प्रधानप्रवृत्तिः केवलाचेतनधर्मः, प्रवृत्तित्वात्, नद्यादिस्पन्दनप्रवृत्तिवदित्यनुमास्यामहे इत्युच्यते

### रश्मिः।

णत्वे संभवतीत्यस्यार्थरूपसमाधानात्। न विचारणीयमिति 'यत्संयुक्ते' इत्यादिकोऽभ्युपन्यासेन न विचारणीयम्। इत्यर्थ इति यदि च सांख्यदोषपोषकोऽयं लोकन्याय इति विभाव्येत तदा तु इत्यादिकशब्दार्थग्रन्थेऽविद्येति न वक्तव्यम्। कालस्यापवर्ग्यप्रवर्तकत्वापत्तेः। उत्तरक्षणे ब्रह्मविदां च बाधादर्शनात्। अविद्यैव मायेति चानुपपन्नम्। एकस्या जीवशक्तित्वात्, मायायाश्च सगुणब्रह्मशक्तित्वात्। अत्र शंकराचार्याः प्रवृत्तिं साम्यावस्थाप्रच्युतिमाहुः। रामानुजास्तु प्रवृत्तेरित्यन्तमेकसूत्रमङ्गीकृत्य त्रयाणामपि सर्वगतत्वेन न्यूनाधिकभावाभावाद्वैषम्यासिद्धिमाहुः। तेन पूर्वत्र हेतुरुक्तः। माध्वास्तु प्रवृत्तिं चेतनधर्ममाहुः। तेन भाष्योक्तार्थेऽन्यत्र सिद्धिरुक्ता। भास्कराचार्यास्तु चेतनस्यापि केवलस्य प्रवृत्तिर्न तदा कथं ब्रह्मणः प्रवृत्तिशक्तिरिति चेन्न सर्वशक्तित्वादित्याहुः। तेन भाष्यमते समर्थनमुक्तम्। विरुद्धसर्वधर्माश्रयत्वं सिद्धान्तेप्यविरुद्धमिति रमणीयम् ॥ २ ॥

**पयोम्बुवच्चेत्तत्रापि ॥ ३ ॥** अधीति। श्रीञ् पाके क्र्यादिः। अधिश्रयमाण इति पाठे तु श्रिञ् सेवायाम्, लटः शानच् उभयपदित्वात् शपि गुणे च कृते 'एचोऽयवायावः' इति कर्तरि भवति। प्रस्रवतीति स्पन्दत इत्यर्थः। प्रसवतीति पाठः। 'स्रु प्रस्रवणे' इत्यस्य तु सौतीत्येवादादिगणे पठितत्वात्। चेतनसंसर्गेति। दोग्धुरधिश्रेतुश्च तु यथायथं पयोनिष्ठसंयोगजनकव्यापाराश्रयत्वात्पात्रनिष्ठसंयोगजनकव्यापाराश्रयत्वाच्च दोहाधिश्रयणकर्तृत्वमिति भावः। तथेति 'अचेतनत्वे च क्षीरवच्चेष्टितं प्रधानस्य' 'कर्मवद्दृष्टेर्वा कालादेः' इति सूत्राभ्यां तथा। कालादेर्हेतुत्वे वृष्टेर्वृष्टिजलस्य नद्यादेः कर्मप्रवृत्तिस्तद्वदिति सूत्रार्थः। इदानीं रचनात्वहेतुर्विरुद्ध इत्याहुः विचित्रेति। रचनाया लोके प्रवृत्तिपूर्वकत्वदर्शनात्सविशेषणोपादानेपि न व्याप्यत्वासिद्धिः प्रधानरूपाया तदा नापादिकेति वक्तुं प्रवृत्तेरचेतनधर्मतामनुमिनोति बन्धादीति गुणैर्बन्ध इति तथा। इदं च विशेषणं प्रवृत्तिप्रयोजनाभिधानपरम्, प्रधानप्रवृत्तित्वस्य लाघवेन पक्षतावच्छेदकत्वात्। प्रवृत्तित्वं तु न पक्षतावच्छेदकम्। शरीरप्रवृत्तिदृष्टान्तेनास्यैव हेतोः साध्याभावसाधकत्वेन विरुद्धत्वप्रसङ्गात्। विमतेतरपक्षस्योन्मत्तस्वीकृतत्ववदस्यापि पक्षस्य विमतत्वार्थं च विशेषणम्। तथा च बन्धाद्यर्था सांख्ये विमता प्रधानप्रवृत्तिरित्यर्थः। न तत्रापीत्यादि भाष्यं



RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

**इति चेत् । न । तत्रापि दोहनाधिश्रयणे, मेघानां चेतनानामेव सत्त्वात् ।**

भाष्यप्रकाशः ।

नेत्य । कुतः तत्रापि तस्मिन् दृष्टान्तद्वयेऽपि दोहनाधिश्रयणयोश्चेतनकर्तृकयोः प्रयोजकतया सत्त्वात्, नदीप्रस्रवणेऽपि चेतनानां मेघानां प्रयोजकानां सत्त्वात् । तथा च दृष्टान्तद्वयेऽपि चेतनप्रयुक्तत्वस्य विद्यमानत्वेन हेतोः सपक्षराहित्येन व्याप्तिग्रहाभावादानुमानमित्यर्थः । ननु यथा क्षीरमचेतनं स्वत एव वत्सविवृद्धये प्रवर्तते । यथा वा नद्यादिजलं स्वभावत एव लोकोपकाराय स्यन्दत एवं प्रधानमपि स्वभावत एव पुरुषार्थसिद्धये प्रवर्तत इत्याशङ्क्योभयवादिप्रसिद्धे

रश्मिः ।

विवृण्वन्ति स्म नेति । तत्रापीति सौत्रौ व्याख्येयौ इमौ शब्दौ । अत्र तत्रापि दोहनाधिश्रयणयोरपि । दोहनाधिश्रयण इत्यत्र सुपांशे सर्वादेशः, अतो गुणः । चेतनानामिति । 'इत्थं मघवताज्ञप्ता मेघा निर्मुक्तबन्धनाः' इति वाक्यात् । अत एव गुर्जरदेशे तत्तत्कालावच्छेदेनैव सममूमौ प्रवृत्तिनिवृत्ती अप्सु दृश्येते । एवेति अस्तु दोहने पयसो विचित्रफेनरचनाकर्तृत्वं यत्र स्वयं प्रस्रवणं तत्र फेनरचना चेतनदोग्धारमन्तरेणाऽपि भवतीति चेतनकर्तृकदोहनं फेनरचनां प्रत्यन्यथासिद्धं दोहनाधिश्रयणे तु प्रसिद्धमन्यथासिद्धमित्येवकारः । तेन दोहनाधिश्रयण इति समाहारद्वन्द्वोऽपि । न चाधिश्रयण इत्येवाऽस्तु दोहनमधिकमिति शङ्क्यम् । अनेकस्थलप्रदर्शनार्थत्वात् । समाहारस्तु समाहारेण प्रदर्शनार्थः । ननु मेघानां जलरूपत्वेन पयसो द्रव्यान्तरत्वेन तत्रान्तर्यामिणः सत्त्वं न तु मेघानामिति चेन्न । सांसिद्धिकद्रवत्वसत्त्वेन किं पुनर्जललक्षणसत्त्वेन द्रव्यान्तरत्वाभावात् । जलस्य लक्षणं त्वभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, तदत्रापि । किञ्च प्रस्थानरत्नाकरे सामान्यलक्षणमुक्तं जलस्य 'क्लेदनपिण्डनतृप्तिप्रीणनाप्यायनप्रेरणतापापनोदनभूयस्त्वाख्याष्टकार्यकत्वं सामान्यलक्षणमिति । तदप्यत्रेति घृततैलादौ यत्क्लेदकत्वं संग्राहकत्वं च दृश्यते सोऽपि जलधर्म एव । वह्न्यादिसंसर्गेण परमभिव्यज्यते । इत्यत्रापि प्रस्थानरत्नाकरे, आदिपदेन पयः । एवं च तत्रापि यः क्लेदकत्वादिर्दृश्यते सोऽपि जलधर्म एवेति । अमुं दृष्टान्तविषये तु नोक्तं तस्य प्रवृत्तेः केवलाचेतनधर्मत्वसाधकत्वेन विचित्ररचनापक्षकेनुमाने केवलाचेतनकर्तृकत्वसाधकत्वात् । इत्येवं भाष्यव्याख्यानं यद्यपि तथापि वादिनं प्रति लोकन्यायेन वक्तव्यमिति भाष्यादाहुः तत्रापि दृष्टान्तद्वयेपीत्यादि नदीप्रस्रवणेपीत्यादि च । अयं शेषः पूरितः । तथैव सिद्धमाहुः तथा चेति । प्रयुक्तत्वस्येति चेतनेन प्रकर्षेण युक्तत्वस्य । हेतोरिति रचनात्वस्य, व्याप्तीत्यनेनान्वेति । हेतोः सम्बन्धिनी या व्याप्तिराधाराधेयभावसंसर्गः तस्याः ग्रहस्तस्याभावादित्येकदेशान्वयः । व्याप्तिग्रहाभावे हेतुः सपक्षराहित्येनेति । निश्चितसाध्यवान्सपक्षः । पक्षभिन्नत्वे सति निश्चितसाध्यवत्त्वं दृष्टान्तत्वम् । निश्चितसाध्यवद्भावेन दुग्धमाद्यपयःफेनरचनायामपि केवलाचेतनकर्तृकत्वरूपसाध्याभावात् । तथास्मदीयरचनात्वहेतुर्न विरुद्ध इति भावः । नानुमानमिति व्याप्तिज्ञानं परामर्शो वा । इत्यर्थ इति । एवं प्रवृत्तिरलिङ्गमप्यसाधारणम् । साध्याभाववतीषु नद्यादिप्रवृत्तिषु प्रवृत्तित्वस्य साध्यासामानाधिकरण्यात् । प्रवर्तते इति वत्सपीतं प्रवर्तते । लोकोपकारायेति तदुक्तम्, यमुनोत्पत्तौ पद्मपुराणे 'रसो वै परमाधारः सच्चिदानन्दलक्षणः । ब्रह्मेत्युपनिषद्गीतः स एव यमुना स्वयम् । पावनायास्य जगतः सा भूत्वा ससार ह' इति । प्रवर्तेत इति जगज्जननप्रवृत्तिं कुरुते । उभयेति लोकरीत्या प्रतिवादी



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

व्याख्यानान्तरे त्वश्माम्बुवदित्युच्येत । द्वितीय(स्य) समाधानं नोभयवादिसंमतम् ॥ ३ ॥

भाष्यप्रकाशः ।

रथादावचेतने केवलस्य प्रवृत्त्यदर्शनाच्छास्त्रे च, 'योऽप्सु तिष्ठन् योऽपोन्तरो यमयति', 'एतस्यैवाक्षरस्य प्रशासने गार्गि प्राच्यो नद्यः स्यन्दन्ते' इति चेतनकर्तृकत्वश्रावणात् साध्यपक्षनिक्षिप्त एवायमुपन्यास इत्येकदेशिकृतव्याख्यानेऽपि प्रकृतार्थसिद्धेस्तत् कुतोऽयं(?)इत्यान्यथा व्याख्यायत इत्यत आहुः व्याख्यानान्तर इत्यादि । पूर्वत्र रचनाप्रवृत्त्योरनुपपत्त्या पूर्वपक्षिणोऽसंगतवादित्वमुक्तमिति तेन तदेव दृष्टान्तेन निवारणीयम् । अत एव दृष्टान्तद्वयमत्र सूत्र उक्तम् । यदि लोकोपकाराय प्रवृत्तिमात्रमेव दूष्यत्वेनाभिप्रेतं स्यात् तदा प्रवचनसूत्रेषु 'अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य' इति कथनात् तन्मात्रमेवाभिप्रेतम् सूत्रे क्षीरपदेनानूदितं स्यात् । यदि च तदभिप्रेता पुरुषोपकारकता दूष्यत्वेनात्राभिप्रेता स्यादश्माम्बुनोस्तथात्वस्य लोकप्रसिद्धत्वादश्माम्बुवदित्युच्येत । अतो भिन्नैवेयं युक्तिरिति तथा व्याख्यानमयुक्तम् ।

रश्मिः ।

वादी चेत्युभयवादिप्रसिद्धे । केवलस्येति सारथ्याद्यनधिष्ठितस्य । योऽप्स्वित्यत्र यः अपः अन्तर इति पदच्छेदः । साध्यपक्षनिक्षिप्त इति साध्यं चेतनाधीनत्वं पक्षः प्रवृत्तिरूपस्तौ निक्षिप्तौ यस्मिन्दृष्टान्ते तस्योपन्यासः पयोम्बुवच्चेत्येवम् । एकदेशीति शंकरभास्कररामानुजमाध्वकृतेत्यर्थः । प्रवृत्तिश्चेतनाधीना प्रवृत्तित्वात् रथादिप्रवृत्तिवत् । प्रकृतार्थेति पयोम्बुनोश्चेतनत्वसिद्धेः । पूर्वत्रेति सूत्रद्वये । पूर्वपक्षिणः सांख्यस्य । तेनेति पूर्वपक्षिणा । तत् असंगतवादित्वम् । अत एवेति सूत्रद्वयीयार्थदृष्टान्तार्थत्वादस्य सूत्रस्य । चेतनाधीनत्वं न साधारणमन्तर्यामिब्राह्मणोक्तं येन दृष्टान्तौ साध्यपक्षनिक्षिप्तौ स्यातां किंतु मेघानामित्यादिभाष्योक्तमिति भिन्नैवेयं युक्तिर्यया सूत्रद्वयोक्तहेत्वनुवादार्थं दृष्टान्तद्वयं न तु प्रवृत्तिमात्रहेत्वनुवादार्थमित्याशयेनाहुः यदि लोकेति । 'प्रधानसृष्टिः परार्थं स्वतोप्यभोक्तृत्वादुष्ट्रकुङ्कुमवहनवत्' इति प्रवचनसूत्राल्लोकोपकारो मुख्य इति पुरुषोपकारात्पूर्वमुक्तः । प्रवृत्तीति । मात्रमिति पूर्वसूत्रीयरचनात्वहेतुव्यवच्छेदाय । एवेति तदा तु कृत्स्नप्रवृत्तिव्यवच्छेदः । 'मात्रं कार्त्स्न्येऽवधारणे' इति कोशात् । कृत्स्नत्वं प्रवृत्तौ स्वभावसाधारणासाधारणचेतनसंसर्गित्वम् । अभिप्रेतमिति सूत्रे व्यासचरणानामभिप्रेतं स्यात् । अचेतनत्वेऽपीति तेन स्वभावचेष्टितमुक्तम् । अत्र तु साधारणचेतनाधीनमसाधारणचेतनाधीनं च चेष्टितमिति, इमां युक्तिमग्रेऽनूद्य दूषयिष्यन्ति न चैवमित्यादिना । तन्मात्रमिति क्षीरमात्रम् । तत्रापि विशेषमाहुः क्षीरेति न तु पयःपदेन, पयःपदेन क्षीरतन्निष्ठसांसिद्धिकद्रवत्वस्फूर्तेः । क्षीरपदेन वटादिघनक्षीरस्याप्युपस्थित्या सांसिद्धिकद्रवत्वास्फूर्तेः । अनूदितमिति तथा च पयोम्बुवदित्यत्र क्षीरवदित्यनूदितम् । पुरुषोपकारपक्षे आहुः यदि चेति । पुरुषेति । अत्र सूत्रम् । 'पुरुषार्थं संसृतिः लिङ्गानां सूपकारवद्राज्ञः' इति । संसृतिः प्रपञ्चोऽपि । अग्रेऽपि सूत्राणि । 'पाञ्चभौतिको देहः' स्पष्टं 'चातुर्भौतिकमित्येके' । 'एकभौतिकमित्यपरे' पार्थिवं शरीरमिति । 'न सांसिद्धिकं चैतन्यं प्रत्येकाऽदृष्टेः' 'प्रपञ्चस्य मरणाद्यभावश्च' 'मदशक्तिवच्चेत्प्रत्येकपरिदृष्टे सांहत्ये तदुद्भवः' 'ज्ञानान्मुक्तिः' 'बन्धो विपर्ययात्' इति । मदशक्तिः ताम्बूलपूगीफलचूर्णेष्वदृष्टो मदः सांहत्ये मद इति तद्वत् । तथात्वस्य पुरुषोपकारकत्वस्य । अश्माम्बुवदिति 'अश्म-

१. प्रपञ्चताभावश्च प्रपञ्चमरणाद्यभावश्चेति प्रवचनसूत्रे द्वयोः पाठभेदः ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

**प्रधानस्यान्यापेक्षाभावात् सर्वदा कार्यकरणमेव, न व्यतिरेकेण तूष्णीमव-**

### भाष्यप्रकाशः ।

न चैवं सति प्रवचनसूत्रस्थयुक्तेरदूषणात् तथा स पुनः प्रत्यवस्थास्यतीति शङ्क्यम् । क्षीरस्य जीव-द्धेनुत एव प्रस्रवणेन तस्य दृष्टान्तस्य शिथिलतया तेन प्रत्यवस्थानाभावस्यार्थतः सिद्धत्वात् । तस्मादयुक्तमेव तद्व्याख्यानम् । यत् पुनर्न चाम्बुनोऽत्यन्तमनपेक्षा, निम्नभूम्याद्यपेक्षितत्वात् स्यन्दनस्येति समाधानम्, तत्तु सिद्धान्तिनश्चेतनसापेक्षताभिप्रायवतो निम्नभूमिसापेक्षताया अनभि-प्रेतत्वात् पूर्वपक्षिणोऽपि निरपेक्षतां प्रतिपादयतोऽनभिप्रेतत्वाच्चोभयविदितमतस्तदुभयमना-दृत्यैवं व्याख्यातमित्यर्थः ॥ ३ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥४॥ प्रकृतेः कर्तृत्वं दूषयित्वा तस्याः स्वतःपरिणामं दूषयति व्यतिरेकेत्यादि । अत्रापि नानुमानमित्यस्यानुषङ्गः । तद् व्याकुर्वन्ति प्रधानेत्यादि ।

### रश्मिः ।

पाने च सर्वदा' इति श्रुतेः । 'एकमस्य साधारणम्' इतिसप्तान्नब्राह्मणश्रुतेः । यच्छान्तिकरं सर्वैरद्यते तदेकम् । अस्येत्यस्य सर्वस्याचतुर्वर्गस्येत्यर्थः । अतो निरूपेति सूत्रद्वयार्थादस्मिन्सूत्रे व्यासाभिप्रेत-त्वात् प्रवृत्तिसूत्रमात्रार्थाद्विज्ञेयं युक्तिरिति । तथेति पुरुषलोकोपकारकत्वेन प्रवृत्तिसूत्रमात्र-विषयत्वेन च व्याख्यानम् । प्रवचनेति सांख्ये तु स्वभावचेष्टितं प्रवचनसूत्रेऽचेतनत्वेऽपीत्यनेन साधारणासाधारणचेतनत्वनिषेधात् । अत्र तु साधारणचेतनत्वमनादृत्यासाधारणमेव चैतन्यमङ्गीकृत-मिति तवेदं दूष्यज्ञानं स्यात् तदा मन्मतं दूषितं स्यात्तव तु दूष्यज्ञानाभावान्न मन्मतं दूषितमिति युक्तेः । स इति सांख्यः । प्रत्यवेति । 'समवप्रविभ्यः स्थः' इत्यस्यैकैकोपसंसृष्टात्तिष्ठतेरात्मनेपदं भवतीत्यर्थस्यापि सुवचत्वादुपसर्गद्वयविशिष्टात्तिष्ठतेः परस्मैपदम् । विच्छिन्ने पल्लीपुच्छादौ चेतन-त्वदर्शनाद्धेनुशरीरगतमपि क्षीरं चेतनं ततः प्रस्नुतमपि चेतनमिति पयसि चेतनत्वं मन्यमाना आहुः क्षीरस्येति । तेनेति दृष्टान्तेन स्वभावप्रवृत्तिमत्क्षीरेण । अर्थत इति प्रधानप्रवृत्तिः केवला-चेतनधर्मः प्रवृत्तित्वात् क्षीरस्वभावप्रवृत्तिवदित्यस्य दृष्टान्तार्थः क्षीरं चेतनमिति तत एव सिद्धत्वात् । तदित्थम् । क्षीरस्वभावप्रवृत्तिर्न केवलाचेतनधर्मः प्रवृत्तित्वात् । तव मतेऽम्बुप्रवृत्तिवदित्यनेनानु-मानेन विरुद्धत्वात् । 'साध्याऽभावसाधको हेतुर्विरुद्धः' इति । अनपेक्षेति स्वभावेतरानपेक्षेत्यर्थः । द्वितीयस्येति भाष्यं विवृण्वन्ति स्म यत्पुनरिति । समाधानमिति सांख्यैरम्बुनः स्वभावप्रवृत्तावन-पेक्षत्वे स्वीकृते सापेक्षत्वाय शंकराचार्यकृतं समाधानम् । पूर्वपक्षिण इति सांख्यस्य । उभयमिति व्याख्यानान्तरं समाधानं च । इत्यर्थ इति तथा च भाष्ये द्वितीयस्येत्यस्याम्बुन इत्यर्थः । उप-संहारदर्शनसूत्रे क्षीरशब्दोऽन्यविषयोऽविरुद्धव्याख्यानः । रामानुजभाष्येप्येवम् ॥ ३ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥ कर्तृत्वमिति प्रवृत्तिः कृतिः कृतिमत्त्वं कर्तृत्वमित्यत्र कर्तृलक्षणे कृतिमत्त्वं कृतिरतः 'प्रवृत्तेश्च' इति सूत्रान्नानुमानं कर्तृप्रवृत्त्यभावात् । प्रवृत्तिमती कुलालादेः कर्तृत्वात् । परिणाममिति । अभिन्ननिमित्तोपादानत्वेनोपादानकारणं निरूपणीयं परिणामिनि तादात्म्यसंबन्धेन समवायस्थानीयेन परिणामात् । नानुमानमिति समवायित्वेन सांख्याभिमतमनुमानं न समवायि, अनपेक्षत्वात्कार्यव्यतिरेकेणानवस्थितेः, यद्येवं

१ म० सू० २



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

अन्यानपेक्षत्वात् प्रलयानुपपत्त्यादिरूपं दूषणं यथाऽनीश्वरसांख्यमते तथात्रापीति मतद्वयमप्य-संगतमित्यर्थः ॥ ४ ॥

रश्मिः ।

श्रयवादिनामिति यावत् । ऐश्वर्यमिति ब्रह्मनिष्ठमैश्वर्यम् । अत्रापीति सेश्वरसांख्यमतेऽपि । इत्यर्थ इति । तथा चेदमनुमानं फलितम्—प्रधानं कार्यव्यतिरेकावस्थानाभाववत्, अनपेक्षत्वात् वेध आदिवदिति । स्मृतिसिद्धा हि वेधोऽनपेक्षा अत्र प्रवृत्तिवदनपेक्षत्वाद्व्यतिरेकानवस्थितिरपि प्रधान-धर्मः । न तु प्रवृत्तेश्च कार्यव्यतिरेकानवस्थितेश्चानपेक्षत्वादित्यत्र प्रवृत्तिः । अनपेक्षत्वाद्व्यतिरेकानव-स्थितिश्चेश्वरधर्म इति व्याख्यानम् । तथाहि कर्तृ प्रधानं न प्रवृत्तेः यत्र यत्र चेतनधर्मः प्रवृत्तिः तत्र तत्र जडप्रधानभिन्नत्वं सूर्यादिवदित्यस्य माध्वीयत्वात् । तथा जगत्समवायि किंचिद्वस्तु प्रधानं न, अनपेक्षत्वाद्व्यतिरेकानवस्थितेश्चानातत्त्वनदुग्धवत् । ईश्वरैकांशस्यानपेक्षत्वाद्व्यतिरेकानवस्थितिर्वर्तते । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति गीतावाक्यादित्यस्यापि माध्वमततुल्यत्वात् । शंकराचार्यास्तु 'गुणव्यतिरेकेण प्रधानस्य प्रवर्तकं निवर्तकं वा किंचिद्बाह्यमपेक्ष्यमवस्थितमस्ति । पुरुषस्तूदासीनो न प्रवर्तको न निवर्तक इत्यतोऽनपेक्षं प्रधानम् । अनपेक्षत्वाच्च कदाचित्प्रधानं महदाद्याकारेण परिणमते कदाचिन्न परिणमत इत्येतदयुक्तम् । ईश्वरस्य तु सर्वज्ञत्वात् महामायत्वाच्च प्रवृत्त्यप्रवृत्ती न विरुध्येते' इत्येवं व्याचक्रुः । अत्र सगुणत्वापत्त्या 'अथातो ब्रह्मजिज्ञासा' इति निर्गुणब्रह्म-जिज्ञासाविरोधात्प्रतिज्ञासंन्यासाख्यनिग्रहस्थानम् । भास्कराचार्यास्तु 'व्यतिरिक्तस्य बाह्य(स्य)प्रवर्त-(न)कस्यावस्थितस्याभावात् प्रधानस्य स्वतः प्रवृत्तिः सा च नित्या स्यादनपेक्षत्वात्ततश्च सर्वदा सर्ग एव स्यात्' इत्येवं व्याचक्रुः । अत्र मध्यमपदलोपित्वापत्तिः । पूर्वसूत्रानुवृत्तप्रवृत्तेः प्रवृत्तिमत्प्रवर्तके लक्ष-णापत्तिः । अवस्थितत्वावच्छिन्नप्रतियोगिताकाभावहेतौ प्रतियोगिभूतावस्थितेऽवस्थितिशब्दस्य लक्षणापत्तिः । रामानुजाचार्यास्तु 'इतश्च सत्यसङ्कल्पेश्वराधिष्ठानानपेक्षपरिणामित्वे सर्गव्यतिरेकेण प्रतिसर्गा-वस्थाया अनवस्थितिप्रसङ्गाच्च न प्राज्ञानधिष्ठितं प्रधानं कारणं प्राज्ञाधिष्ठितत्वे तस्य सत्यसङ्कल्पत्वेन सर्गप्रतिसर्गविचित्रसृष्टिव्यवस्थासिद्धिः' इत्येवं व्याचक्रुः । अत्रानपेक्षत्वादित्यस्यार्थकथनं सत्येत्यादिना सर्गस्यासमंताद्व्यतिरेकेण प्रतीत्यादिः किंतु सर्गसाहित्येन प्रतिसर्गावस्थायामवस्थितिप्रसङ्गाच्चेत्यर्थः । तत्र व्यतिरेकानवस्थितेरित्यत्र समासानुपपत्तिः । व्यतिरेकस्यानवस्थितिपदेन सह सामर्थ्याभावात् । 'समर्थः पदविधिः' इति सूत्रे व्यपेक्षालक्षणसामर्थ्यस्यापि व्याख्यानात् । किंतु प्रतिसर्गावस्थाया अनवस्थितेश्च सापेक्षत्वात् । सापेक्षमसमर्थं भवतीति च । या तु श्रुतिरुक्ता 'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः' इति सा त्वदुष्टा । या तु गीता 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति सा तु सांख्यानभिप्रेतात्रानुपयुक्ता । ईश्वरप्रवर्तकत्वविचारोपयुक्ता । माध्वाचार्यास्तु 'न ऋते त्वत्क्रियते किंचनारे इति तद्व्यतिरेकेण कस्यापि कर्मणोऽनवस्थितेरनपेक्षितमेवाचेतनवादिमतम्' इति व्याचक्रुः । त्वत् त्वत्तः ईश्वरात्, पञ्चम्यन्तं गुणादिरूपम्, किंचन अरे इति च छेदः । अत्रापि कर्मानवस्थित्योः सामर्थ्यं न तु व्यतिरेकानव-स्थित्योरिति समासानुपपत्तिरतोऽस्मद्व्याख्यानं परमार्थः सयुक्तिकश्च, नेति वाक्यविरोधः स्पष्टः ॥ ४ ॥



DR. RUPAK NATH
www.astrology-tantra.com

## अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

**प्रधानकारणवादाङ्गीकारेऽपि प्रेक्ष्यकारित्वाभावान्न पुरुषार्थः सिद्ध्यति ॥ ६ ॥**

**इति द्वितीयाध्याये द्वितीयपादे प्रथमं रचनानुपपत्तेरित्यधिकरणम् ॥ १ ॥**

---

भाष्यप्रकाशः ।

**अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥** अन्यानपेक्षस्य प्रधानस्य स्वभावत एव महदादिरूपः परिणामो न युक्तिसह इत्युक्तम् । इदानीं तदुपगम्य यथा धेनुर्वत्सार्थं स्वत एव प्रवर्तते तथा प्रधानमपि पुरुषभोगाद्यर्थं स्वत एव प्रवर्तत इति यत्तेऽङ्गीकुर्वन्ति तद् दूषयन्तीत्याहुः प्रधानकारणेत्यादि । अभ्युपगमे प्रधानकारणवादाङ्गीकारे प्रधानस्य पुरुषार्थे स्वतः प्रवृत्तिर्नोपपद्यते । कुतः । अर्थाभावात् अर्थः प्रयोजनं तदभावात् । तद्धि प्रेक्षावतां भासते । यतः प्रेक्षापूर्वकारित्वं चेतनधर्मः सोऽचेतने प्रधाने वक्तुं न शक्यते । लोके तथाऽदर्शनात् । तदभावे च पुरुषार्थो न सिद्ध्यति । घुणाक्षरवत्तु कादाचित्कः स्यात् । तथापि तादर्थ्यप्रवृत्तिप्रतिज्ञा तु भज्येतैवेत्यसंगतस्तथाभ्युपगम इत्यर्थः ॥६॥ इति प्रथमं रचनानुपपत्तेरित्यधिकरणम् ॥१॥

रश्मिः ।

**अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥** भाष्यं सांख्यस्य निर्हेतुकत्वं स्फोरयतीति भ्रमात्स्यात्तन्निवारणायाहुः इदानीमिति । तद्दूषयन्तीति । यद्यपि 'प्रवृत्तेश्च' इत्यत्रेदं दूषितं परं तु स्वभाववादमभ्युपगम्य यदुक्तं तद्दूषितमत्र तु यो वाक्यविरोधी अभ्युपगमस्तमङ्गीकृत्य यत्तद्दूषयतीत्याहुरित्यर्थः । तदभावादिति प्रयोजनाभावस्याप्रवृत्तिहेतुत्वम् 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति वाक्यात् । अनुमानं तु प्रधानं न प्रवर्तते, प्रयोजनाभावात्, अस्मदादिवदिति फलितम् । कथं प्रधाने प्रेक्ष्यकारित्वाभाव इत्यतस्तं विवृण्वन्ति तद्धीति प्रयोजनम् । प्रतिभावतां भासते । तथेति अचेतनस्य प्रकृष्टज्ञानरूपप्रेक्षावत्त्वेन प्रकारेण । मा प्रधाने प्रेक्षा भूत्, प्रवृत्तिस्त्वभ्युपेयत इत्यत आहुः तदभाव इति । पुरुषार्थ इति पुरुषाणामर्थः प्रयोजनं तच्चानेकविधम् । पुरुषाः सृष्टास्तद्भोग्यमसृष्टम्, अनेनायमुपजीविष्यतीति प्रेक्षाभावादिति विचित्रा जगतः कृतिः हरेरेव । ननु प्रधानं प्रवर्तते, अर्थाभावात् घुणवदित्यसमानाधिकरणो हेतुरित्यत आहुः घुणाक्षरवदिति । घुणः कीटस्तच्चरणेन यदृच्छया कदाचिद्भूमौ रजश्छायायामक्षराणि निपतन्ति तद्वत्प्रधानमपि पुरुषात्स्रक्ष्यति तद्भोग्यं चेति प्रेक्षाभावेऽपि पुरुषार्थः सेत्स्यति परं कादाचित्को भविष्यति । दृष्टान्ते तथा दर्शनादित्यर्थः । इदमनुमानं विरुद्धत्वापादकं तु पूर्वानुमानस्येति तु न च वाच्यं प्रधानं न प्रवर्तते जडत्वाद् घटवदित्यनेन सत्प्रतिपक्षत्वाद्घुणदृष्टान्तेन प्रवृत्तिसाधकस्यानुमानस्येति । तथापीति प्रेक्षाभावे पुरुषार्थसिद्ध्यङ्गीकारेऽपि 'प्रधानसृष्टिः परार्थे स्वतोऽप्यभोक्तृत्वादुष्ट्रकुङ्कुमवत्' इति सूत्रे परार्थे पुरुषार्थमित्यर्थात् । तादर्थ्यं स्वार्थे ष्यञ् पुरुषार्थम् । पुरुषार्थं प्रवृत्तिप्रतिज्ञेत्यर्थः । भज्येतेति एतत्प्रवृत्तिरेतद्भोग्यमित्यादिप्रेक्षां विना न भवतीति भज्येतेत्यर्थः । शांकराचार्यभाष्ये न विशेषः । रामानुजाचार्यभाष्येऽपि । भास्कराचार्यभाष्येऽपि न विशेषः । माध्वाचार्यभाष्ये तु 'अन्यत्र' इति सूत्रे सेश्वरसांख्यमतनिराकरणं यथा पृथिव्या एव पर्जन्यानुगृहीतं तृणादिकमुत्पद्यते एवं प्रधानादीश्वरानुगृहीतं जगदित्यतो ब्रवीति अन्यत्रेति । 'यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इत्यन्यत्र ब्रह्मणो जगतोऽभावात्तृणादीनां पर्जन्यवदनुग्राहकत्वमात्रमीश्वरस्य । चकारेण प्रकृतिसत्तादिप्रदत्वं चाङ्गीकृतम् । अभ्युपगमसूत्रे लोकायतिकपक्षनिराकरणम् । यस्य धर्माधर्मौ न स्तस्तत्सिद्धान्ते किं प्रयोजनमित्यर्थमाहुः । स्वपक्षाभ्युपगमे



RUPNATHJI ( DR RUPAK NATH )
www.astrology-tantra.com

## पुरुषाश्मवदिति चेत्तथापि ॥ ७ ॥ (२-२-२)

**प्रधानस्य केवलस्य कारणवादो निराकृतः । पुरुषप्रेरितस्य कारणत्वमाशङ्क्य**

---

भाष्यप्रकाशः ।

**पुरुषाश्मवदिति चेत्तथापि ॥ ७ ॥** एवं प्रधानकारणवादे निरस्ते पुनः प्रत्यवस्थानानवकाशात् किमस्य सूत्रस्य प्रयोजनमित्यत आहुः प्रधानस्येत्यादि । तथा च प्रतिज्ञान्तरपरिहारः प्रयोजनमित्यर्थः । पुरुषप्रेरितप्रधानकारणवादस्य स्वरूपमाहुः पुरुषेत्यादि । तथोक्तं सांख्यसप्तत्याम्—

'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥' इति ।

उभयोः प्रधानपुरुषयोः संयोगः संश्लेषस्तत्कृतो महदादिसर्गः । तस्य प्रयोजनद्वयम् । पुरुषस्य भोग्यतया प्रधानविषयकं दर्शनं, पुरुषस्य कैवल्यं चेति । तथा च

रश्मिः ।

अर्थः प्रयोजनम् । अत्र सेश्वरसांख्यनिरासस्य पूर्वसूत्रे कृतत्वात् सांख्यप्रस्तावे लोकायतिकमतनिराकरणं प्रसङ्गेन भवति । स चाग्रे निराकरणाद्गुरुरिति न स्वमते विचारान्तरप्रयोजनम् । अधिकरणरचना तु जन्माद्यधिकरणेषु ब्रह्मकारणवाद उक्तस्तत्र समन्वयो हेतूक्तः स चानुमानेऽपि सुखदुःखाद्यैर्घटादिषु समन्वयात्तुल्य इति संशयः । समवायि ब्रह्म वानुमितं वेति 'प्रधानाज्जगज्जायते' इति श्रुतेः प्रधानं समवायि निमित्तं च ब्रह्मकारणत्वबोधिकास्तु सांख्यीयानिमित्तत्वेनापि नेतुं शक्येति पूर्वपक्षे सिद्धान्तः रचनाद्यसंभवाद्ब्रह्मैवाभिन्ननिमित्तोपादानम् । प्रधानादिति श्रुतिस्तु स्वरूपपरा । प्रकृतेः स्वरूपत्वं प्रकृतिश्चेत्यधिकरण उक्तमिति ॥ ६ ॥ **इति प्रथमं रचनानुपपत्तेरित्यधिकरणम् ॥ १ ॥**

**पुरुषाश्मवदिति चेत्तथापि ॥ ७ ॥** लिङ्गं यत्किंचित् । अश्मा व्यापको जडश्चेति योगरूढिस्तद्वत् । 'व्यापको भगवान्रुद्रः' इत्यस्य रुद्रचरितत्वे तामसप्रकरणीया लीला नोचेद्भगवल्लीला 'आनन्दादयः प्रधानस्य' इत्यत्र व्याससूत्रे आनन्दव्यापकत्वादयः प्रधानस्य भगवतो धर्मा इत्युक्तत्वात् । एवं च नन्वेतर्हि सतोऽश्मादेः प्रवृत्तिश्चेतनाधीना क्वापि न स्यात्तथा च प्रतिमायाः सच्चिदानन्दबोधकवाक्यानि विरुद्धानि भवेयुः, अप्रतीकालम्बनसूत्रे भाष्यं च विरुध्येत, तत्र प्रतिमायां भगवत्सान्निध्यमुक्तम् । पर्वतत्रय सरोनिष्ठं सच्चिदानन्दकं सत् स्वपूजां गृह्णत् प्लवते न प्रवर्तेत इत्यन्यमुखश्रुतं तद्विरोधश्च । अतः सेश्वरसांख्ये दृष्टान्तसत्त्वात्तेन प्रत्यवस्थातारं सांख्यं प्रत्याहुरित्याशयेन भाष्यमवतारयांबभूवुः एवमिति । ननु द्वन्द्वेन व्याख्यानं पुरुषश्चाश्मा च पुरुषाश्मानौ ताविव पुरुषाश्मवत् । आभासे तु कर्मधारय इति विरुद्धमिति चेन्न । माध्वभाष्ये पुरुषोऽश्मशरीरादिकं गृहीत्वा गच्छतीति कर्मधारय उक्तः । किमेतावता संपन्नमिति चेन्न । 'पूर्णा भगवदीयास्ते शेषव्यासाग्निमारुताः' इत्याचार्योक्तेस्तेषां भगवदीयत्वेन कर्मधारयग्रहणेऽप्याचार्योक्तिविरोधाभावरूपो गुणः संपन्न इति । तेन द्वन्द्वेन शंकराचार्यादिवद्व्याख्यानम् 'अनाविष्कुर्वन्नन्वयात्' इति सूत्राद्भगवत्संबद्धानां कृष्णमूर्तिसंबन्धानाविष्कारार्थमेवेति । अत एव पूर्णभगवदीयरामानुजाचार्यभाष्येऽपि शंकराचार्यादिवद्व्याख्यानं युज्यते । आज्ञा च तथा लिखितपाठकोऽधमः इति । अतः पाठे उपयोगः । प्रतिज्ञान्तरेति यद्यपि प्रतिज्ञान्तरमपि निग्रहस्थानमिति न तत्परिहारो वक्तव्यः परमाचार्यप्रवृत्तिर्ज्ञपयति मतान्तरेण जनता मा नश्यत्विति परिहारः । इत्यर्थ इति तथा च पूर्वाधिकरणेनास्य प्रसङ्गः संगतिरिति भावः । संश्लेष इति । पङ्ग्वन्धवदित्यत्र दृष्टान्तः । कैवल्यमित्यौदासीन्यम् ।



RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

परिहरति । पुरुषः पङ्गुरन्धमारुह्यान्योन्योपकाराय गच्छति, यथा वा अयःकान्तः सन्निधिमात्रेण लोहे क्रियामुत्पादयति । एवमेव पुरुषाधिष्ठितं पुरुषसन्निहितं वा प्रधानं प्रवर्तिष्यत इति चेत् तथापि दोषस्तदवस्थः । प्रधानप्रेरकत्वं पुरुषस्य स्वाभाविकं प्रधानकृतं वा । आद्ये प्रधानस्याप्रयोजकत्वम् । द्वितीये प्रधान-

भाष्यप्रकाशः ।

यथा पङ्गुरन्धमारुह्याऽन्योन्योपकाराय गच्छत्येवं पुरुषः प्रधानमधिष्ठाय उभयकार्यद्वयार्थं प्रवर्तयतीत्येकं मतम् । यथा वा अयःकान्त इति द्वितीयं मतम् । तदनूद्य दूषयन्ति तथापीत्यादि, एवमङ्गीकारेऽपि । दोषस्तदवस्थ इत्यतो नानुमानमित्यर्थः । तदुपपादयन्ति प्रधानेत्यादि । अप्रयोजकत्वमिति पुरुषोपकारजननासमर्थत्वम् । यथा च स्वाभाविकत्वपक्षे पुरुषस्य स्वत एव प्रवृत्तेः प्रधानकृतो न कश्चिदुपकारः । यथा स्वहस्तेन वीजने व्यजनस्य नोपकारकत्वेन प्रसिद्धिस्तथेति । प्रधानकृतत्वपक्षे तु प्रेक्ष्यकारित्वस्य तत्र वक्तुमशक्यत्वादु-पकारकत्वासिद्धिर्व्यतिरेकानवस्थितेश्चानपायात् पुरुषार्थासिद्धिः प्रयोगासिद्धिश्च तदवस्था । किंच ।

रश्मिः ।

अन्योन्योपेति । 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये' 'असमासवच्च बहुलम्' इति द्वित्वे समासव-द्भावेन सोरलुकि चान्योन्य इति । 'असमासवद्भावे पूर्वपदस्थ सुपः सुर्वक्तव्यः' इति वार्तिकादन्यो-न्यस्योपकारायेति षष्ठीतत्पुरुषः । न चात्रान्यान्योपकारेति सोर्लोपः संभाव्यः 'अन्योन्यसंश्रयत्वं तदिति महाभाष्याद्बाहुलकेन च सोर्न लुक् । तत्राशक्तस्य पङ्गोः पादकार्यसंपादकोऽन्धः अन्धस्य चक्षुःकार्यसंपादकः पङ्गुरित्यन्योन्योपकारः । तदुक्तं प्रथमेऽध्याये 'नेश्वराधिष्ठितेऽफलसंपत्तिः कर्मणा तत्सिद्धेः' 'स्वोपकारादधिष्ठानं लोकवत्' इति सूत्रे । ईश्वराधिष्ठिते प्रधानेऽफलसंपत्तिर्नेत्यर्थः । कर्मणा प्रेक्षापूर्वकप्रवृत्त्याख्येन फलं पुरुषार्थ उक्तरूपस्तत्सिद्धेः । स्वस्येश्वरस्य प्रवर्तकत्वरूपप्रधानकृतोपकारा-ल्लोकः पङ्गुरन्धमित्यादिस्तद्वदित्यर्थः । उक्तेति असङ्गस्य पुरुषस्य प्रवर्तकत्वसंपादकं प्रधानं जडस्य प्रधानस्य प्रवृत्तिसंपादकः पुरुष इत्यन्योन्योपकारः । अयःकान्त इति 'तत्सन्निधानादधिष्ठातृत्वं मणिवत्' इति सूत्रात् । अनीश्वरसांख्ये जीवसन्निधानात्प्रधानाधिष्ठातृत्वमयःकान्तमणिवदित्यर्थः । द्वितीयमिति निरीश्वरसांख्यम् । दूषय इति । एतच्चाध्याह्रियते । नानुमानमिति पूर्वसूत्रादनुवर्तते पुरुषेति सूत्रीयं तथापेतस्य तात्पर्यवृत्तिलभ्यो वा भाष्ये तेन सूत्रान्तरादनिर्मोक्षप्रसङ्ग इत्यनुवर्त्य व्याख्यानं भाष्यान्तरे गुरु । अत एव रामानुजाचार्यभाष्ये तथापीत्यस्य व्याख्यानमेवमपि प्रधानस्य प्रवृत्त्यसंभवस्तदवस्थ एवेति । माध्वभाष्ये तु 'न ऋते त्वत्क्रियते किंचनारे' इति तत्रापि तथात्वे दृष्टान्ताभावादिति व्याख्यानम् । अत्र तात्पर्यं दृष्टान्ताभाव इति तथाप्येतयोरेकतरस्य तात्पर्यार्थस्य विवक्षितत्वे न दोषः । अन्यथा विवादास्पदं तात्पर्यार्थः स्यात् । नानुमानमिति पूर्वसूत्रादनुवर्तते । वीजन इति स्वहस्तव्यजनकसंबन्धिवीजन इत्यर्थः, दार्ष्टान्तिकसाम्यार्थम् । द्वितीयेत्यादि भाष्यं विवृण्वन्ति प्रधानकृतत्वेति । अत्रेति असङ्गे निर्गुणे तद्विघटके प्रधाने तत्कृते प्रवर्तकत्वेऽत्र प्रधानेऽप्रेक्ष्यकारित्वापत्त्या प्रेक्ष्यकारित्वस्यवक्तुमशक्यत्वादनुपका-रित्वापत्त्योपकारकत्वाऽसिद्धिः । व्यतिरेकेति कार्यव्यतिरेकानवस्थितेश्चानपायादनाशात्पुरुषार्थो न स्यातस्याऽसिद्धिः । अयं भाष्ये प्रधानदोष इत्युक्तः, तदवस्थेति सा अवस्थीयत इत्यवस्था यस्य घञ् अवस्थितिर्यस्य दोषस्य स तदवस्थ इति भाष्ये । नित्येत्यादिभाष्यं विवृण्वन्ति स्म किंचेति अन्यदपि दूषणमारभ्यते । किंचेत्यस्यारम्भसाकल्यार्थत्वं 'किंचारम्भे च साकल्ये' इति



RUPNATH JI (DR. RUPAK NATH)
www.astrology-tantra.com

दोषस्तदवस्थः । नित्यसंबन्धस्य विशिष्टकारणत्वे अनिर्मोक्षः । अशक्तस्य तु मोक्षाङ्गीकारः सर्वथानुपपन्नः ॥ ७ ॥

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

प्रकृतिपुरुषयोरङ्गाङ्गित्वे भवेदप्येवम् । तच्च नोपपद्यते । पुरुषस्याङ्गित्वे

भाष्यप्रकाशः ।

प्रकृतिपुरुषयोर्यः कश्चित् संबन्धो निर्वक्तव्यः स तयोर्नित्यत्वान्नित्य एव । सोऽप्युदासीनत्वेनाभ्युपगतस्य पुरुषस्य वागादिव्यापारासंभवात् प्रकृतिप्रेरणयोग्यतारूपो वक्तव्यः । तस्यैव चेद् भोगादिके विशिष्टकारणत्वं तदा तस्य नित्यत्वात् पुरुषस्यानिर्मोक्ष एव प्रसज्येत । यदि चात्मनामानन्त्यात् तेषां मध्ये कस्यचन शक्तस्य अधिष्ठातृत्वं इतरस्याशक्तस्य मोक्ष इति न दोष इति विभाव्यते तदापि प्रधानस्य स्वातन्त्र्याद् बन्धकत्वात् स्याज्ञानिच्छतोऽपि तेनैव भोगसंभवादशक्तत्वेन तन्निवारणासंभवाच्चाशक्तस्य मोक्षाङ्गीकारः सर्वथाऽनुपपन्न इत्यर्थः । सूत्रयोजना तु पुरुषश्चाश्मा च पुरुषाश्मानौ ताभ्यां तुल्यः संबन्धस्तथा । द्वन्द्वान्ते श्रूयमाणो वतिः प्रत्येकमभिसंबध्यत इति ॥ ७ ॥

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥ पुरुषविशिष्टप्रधानकारणवाद एव दूषणान्तरमाह अङ्गित्वेत्यादि । तद् व्याकुर्वन्ति प्रकृतीत्यादि । यत् तयोरन्योन्योपकारकत्वमङ्गीकृतं तत् तदा स्याद् यदि तयोर्गुणप्रधानभावेनाङ्गत्वमेकस्यान्यस्याङ्गित्वं च स्यात् तदेव तु न जाघटीति । कुतः । अङ्गित्वानुपपत्तेः । पुरुषस्याङ्गित्वे स पुरुष इतरविलक्षणो वक्तव्यः । अन्यथा प्रकृतिनियामकत्वं तस्य न स्यात् । तथा सति तत् तस्य वैलक्षण्यं श्रौतधर्मवत्तयैवेति

रश्मिः ।

कोशात् । उदासीनेति । 'असङ्गोऽयं पुरुष इति' इति सूत्रात् । तस्यैवेति संबन्धस्य विशिष्टकारणत्वं क्व प्रधानस्य भोक्तृत्वं यदा पुरुषे । तस्येति संबन्धस्य । पुरुषस्येति शुद्धबुद्धमुक्तस्वभावस्य 'द्वयोरेकतरस्य वा औदासीन्यमपवर्गः' इति सूत्राद्भोगादिके औदासीन्यादनिर्मोक्षः । निरीश्वरसांख्यमतेपि दूषणारम्भ इत्याशयेनाशक्तस्येति विवरामासुः यदि चेति । स्वातन्त्र्यादिति प्रकृतिः कर्त्रीति प्रतिप्रयोगात् । 'अकार्यत्वेपि तद्योगः पारवश्यात्' 'स हि सर्ववित्सर्वकर्ता' 'ईदृशेश्वरसिद्धिः सिद्धा' इति तृतीयाध्यायसूत्रेभ्यश्च स्वातन्त्र्यात् 'स्वतन्त्रः कर्ता' । पुरुषस्याकार्यत्वेपि तद्योगः प्रकृतियोगः । तेन पुरुषस्य तद्योगांशेन तद्योगाव्याप्तिः परिहृता । ईदृशेति सगुणेत्यर्थः । बन्धकेति प्रधानं रूपैरात्मानं बध्नातीति तथा । अनिच्छतः पुरुषस्य । तेनेति प्रधानेन । तन्निवारणेति भोगनिवारणेत्यर्थः । सूत्रयोजना च पुरुषश्चाश्मा च पुरुषाश्मानौ ताभ्यां तुल्यः संबन्धस्तथा । द्वन्द्वान्ते श्रूयमाणो वतिः प्रत्येकमभिसंबध्यत इति ॥ ७ ॥

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥ तच्चेति भाष्यं विवृण्वन्ति स्म तदेवेति । जाघटीतीति । 'यङोचि च' इति सूत्रे चकारेण च्छन्दसीत्यनुकृष्य बहुलमित्यस्यानुकर्षाद्भाषायामपि यङ्लुगिति मनोरमादौ स्पष्टम् । घटधातोः 'धातोरेकाचो हलादेः क्रियासमभिव्याहारे' यङि 'यङोऽचि च' इति तल्लुक् । ततः प्रत्ययलक्षणेन यङन्तत्वात् 'सन्यङोः' इति द्वित्वे 'अभ्यासे चर्च' इति घस्य जत्वम् । 'दीर्घोऽकितः' इति दीर्घे धातुत्वाल्लट् ततस्तिपि 'यङो वा' इतीटि भवति । पुरुषस्येति भाष्यं विवृण्वन्ति स्म पुरुषस्याङ्गित्वे इति । प्रधानसन्निहितः प्रधानावच्छिन्नश्च पुरुषः प्रवर्तते । इतरेति निरीश्वरसांख्यविलक्षणः । अन्यथेति जीवत्वे । श्रौतधर्मेति सांख्ययोगावेकं शास्त्रं तद्विलक्षणेन तच्छास्त्रीय-



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

## अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥

अन्यथा वयं सर्वमनुमिमीमहे । यथा सर्वे दोषाः परिहृता भवेयुरिति चेत्

---

भाष्यप्रकाशः ।

भावोऽनुपपन्न इति स्वयमेव व्याख्यानात् साम्यावस्थावस्थितगुणकृतमुदासीनस्वरूपस्य परमात्मनः प्रवर्तकत्वमित्यसंगतम् । अथ शुद्धसत्त्वप्रधाना साङ्गीक्रियते, तदा तु तया ज्ञानमात्रमेवोत्पादयितव्यं, न प्रवर्तयितव्यम् । सत्त्वस्य तादृशस्वभावे मानाभावात् । अप्राधान्येन गुणान्तरेऽपि तथात्वस्य वक्तुमशक्यत्वात् । अतः स्वोक्तमप्यननुसंदधानानां निर्लज्जत्वात् तादृशमेव हृदये भासत इति तथासमर्थनमसंगतमित्यर्थः ॥ ८ ॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥ 'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः' इति हि सांख्यानामपरा प्रतिज्ञा । अर्थस्तु—प्रीतिः सुखम्, अप्रीतिर्दुःखं, विषादो मोहः; सत्त्वरजस्तमांसि गुणाः क्रमेणैतत्त्रयात्मका एतत्त्रयस्वरूपाः । प्रकाशः प्रवृत्तिर्नियमो निग्रह इति तेषां क्रमेणासाधारणं कार्यं, तेन तेऽनुमीयन्ते । वृत्तिः क्रिया, अन्योन्याभिभवोऽन्योन्याश्रयोऽन्योन्यजननमन्योन्यमिथुनीभावश्च तेषां साधारणीक्रियेति । एवं साधारणक्रियया गुणवृत्तं चलमङ्गीकृत्य तमसा रजोनियमनेन प्रवृत्तावपोदितायां प्रलयसिद्धिः । तत्पूर्वकं सत्त्वजनने तेन प्रकाशादात्मविवेके निर्मोक्ष इत्येवं समर्थनमप्यशक्यं परिहरति । तद् व्याकुर्वन्ति अन्यथेत्यादि । गुणा एवं विभागशः प्रवृत्तिमन्तश्चलस्वभावत्वात् चलदलदलवदित्येवमन्यथारहिम ।

रुत्त्यापत्त्याऽसंगतत्वात् । न च भास्करभाष्ये प्रलयकाले साम्येनावस्थितानां सत्त्वादीनामिति प्रलयकालोक्तेर्न पुनरुक्तिरिति वाच्यम् । पदार्थैक्येन दोषतादवस्थ्यात् । असंगतमिति साम्यावस्थावस्थितेति विशेषणस्य समासघटकस्यापि हेतुगर्भत्वेनासंगतम् । नव्यमतेप्याहुः अथेति । एवेति 'सत्त्वात्संजायते ज्ञानम्' इति वाक्यात् । तादृशेति ज्ञानातिरिक्तपरिणामहेतुत्वे । तथात्वस्येति प्रवर्तकत्वस्य । यथा वातपित्तकफेषु प्रकुपितस्यैव कार्यं दरीदृश्यते तथा । तथासमर्थनमिति स्वरूपव्यपाश्रयमित्यादिशङ्कराचार्यभाष्यानुवादेनोक्तामासोक्तं समर्थनम् । तथा नाम परमात्मन उदासीनत्वेन मायाव्यपाश्रयप्रवर्तकत्वेन समर्थनम् । माध्वभाष्ये तु जडशरीरकत्वेज्ञित्वव्यवहारापत्तिः तस्याज्ञित्वस्यानुपपत्तेरित्युक्तम् ॥ ८ ॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥ तृतीयकार्यस्य नियमस्य विवरणं निग्रह इति । अनुमीयन्त इति अनुमानान्यग्रे वक्तव्यानि स्वयमेव । वृत्तिरिति कारिकोत्तरार्धे समासघटकः शब्दः । अन्योन्यानि अभिभवाश्रयजननमिथुनानि वृत्तयो येषां ते गुणा इत्याशयेनाहुः अन्योन्याभिभवेति । एवमिति । प्रकृतेः साम्यावस्थोक्ता तस्या गुणवृत्तं गुणवर्तनं साधारणक्रियया चलमङ्गीकृत्य तमसा रजोनियमनेन रजोधर्मप्रवृत्तावपोदितायां नष्टायां सूक्ष्मभावस्य प्रतिबन्धकाभावत्वेन कारणस्योपस्थित्या तमसा प्रलयसिद्धिः । आत्यन्तिकप्रलयमाहुः तत्पूर्वकमिति रजस्तमोनियमनपूर्वकं सत्त्वोद्रेके । निर्मोक्षः आत्यन्तिकप्रलयः । रजसा तमोभिभवे सृष्टिः, सत्त्वेन तमोनियमने स्थितिरिति वृत्तिकृच्छ्रीकृष्णचन्द्राः । समर्थनमिति 'साम्यवैषम्याभ्यां कार्यद्वयम्' इति पाठक्रमात् । परीति सूत्रकारः । विभागश इति विभागं ददतीति विभागशः । चलेति चलदले दलं



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

तथापि पूर्वं ज्ञानशक्तिर्नास्तीति मन्तव्यम् । तथा सति बीजस्यैवाभावादित्यस्वा-मानिर्मोक्ष इति ॥ ९ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥

परस्परविरुद्धत्वान्मतवर्तिनां पञ्चविंशादिपक्षाङ्गीकारात् । अतस्त्व-लौकिकार्थे वेद एव प्रमाणं नान्यदिति ॥ १० ॥

इति द्वितीयाध्याये द्वितीयपादे द्वितीयं पुरुषाश्मवदित्यधिकरणम् ॥ २ ॥

---

भाष्यप्रकाशः ।

नुमाने रचनाऽनुपपत्त्यादयः सर्वे दोषाः परिहृता भवेयुरितिचेदत्र दूषणमाह ज्ञशक्ति-वियोगादिति । सौत्रश्चोऽप्यर्थे । एवं प्रकारान्तरेणानुमितावपि तत्तत्काले तत्तत्कार्यं वाच्यं, न सर्वदा । क्रमानुपपत्त्यादिदूषणग्रासात् । तत्र तथा तदा भवति यदि तमसा कालो ज्ञायेत । सा तु ज्ञानशक्तिर्भवतां मते पुंप्रकृतिसंयोगात् पूर्वं नास्तीति स्वमतानु-रोधान्मन्तव्यम् । तथासति प्रवृत्तिबीजस्य ज्ञानशक्तिसंयोगस्याभावात् प्रवृत्त्यसिद्धिः । अथ 'दिक्कालावाकाशादिभ्यः' इति सूत्रात् सृष्टिदशायां कालस्यानित्यत्वात् पुंयोगेन ज्ञानशक्ति-सद्भावाच्च प्रवृत्तिः साध्यते, तथापि संयोगस्य नित्यत्वात् प्रलयदशायां कालस्यापि नाशाद् वियोजकान्तरस्य वक्तुमशक्यत्वात् पुरुषस्य गुणसाम्यादनिर्मोक्षस्तद्वस्य इति नानुमानान्तरेणापि तथासिद्धिरित्यर्थः ॥ ९ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥ सर्वपक्षसाधारणं दूषणान्तरं वदति तन्मतस्या-र्वाचीनत्वख्यापनायेत्याशयेनाहुः परस्परेत्यादि । तानि च मतान्येकादशस्कन्ध उद्धवप्रश्न

रश्मिः ।

तद्वत् प्रथमान्ताद्वतिः । हेतुसूत्रार्थत्वेन तथापीति भाष्यमित्याशयेन तथापीति भाष्यमवतारयन्ति स्म सौत्रे इति । क्रमेति आदिना प्रत्यक्षविरोधः । तत्रेति प्रलयकाले प्रलयरूपं कार्यं न त्वन्यस्मिन्काले । तथेति क्रमप्रकारेण । तमसेति तमसः प्रवृत्तिनिरोधे प्रलय इत्युक्तेस्तमः प्रलयकर्तृ । ज्ञायेतेति अयं प्रलयकाल इति ज्ञायेत । पुमिति पुंप्रकृत्योः संबन्धात् । स्वमतेति 'स हि सर्ववित्सर्वकर्ता' इति सूत्राज्ज्ञानशक्तिरीश्वरस्येति मतम् । मन्तव्यमिति अनेन ज्ञस्य या ज्ञानशक्तिस्तस्य वियोगात् अभावादिति सूत्रांशार्थश्च बोधितः । तथा सति बीजस्येति भाष्यं विवृण्वन्ति स्म तथा सतीति । बीजस्येति जानातीच्छति यतते इत्यत्रापि ज्ञानसंयोगः कारणं न तु तूष्णींस्थितज्ञानमिति बोधितं तस्याभावो हेतुरुक्तोऽसत्त्वमः । प्रवृत्त्यसिद्धिरिति । तथा च चलस्वभावत्वं हेतुर्बाधित इति भावः । 'पक्षे साध्याभावो बाधः' यथावक्षणावच्छिन्नो घटो रूपवान्पृथ्वीत्वात् पटवदित्यत्र । अनित्यत्वादिति भाष्यमवतारयन्ति स्म अथेति । पुंयोगेनेति 'उपरागात्कर्तृत्वं चित्साङ्निध्यात् चित्साङ्निध्यात्' इति सूत्रात् । योग उपरागः संबन्धः । साध्यत इति । तथा च चलस्वभावत्वं हेतुर्न बाधित इति भावः । नाशादिति 'नाशः कारणे लयः' इति सूत्रात्कालस्याकाशादौ लयात् । गुणेति गुणसाम्यं प्रधानं संबध्य वर्तमानस्यानिर्मोक्षः आत्माविवेकलक्षणः । तद्वचेति विजातीय-द्वैतासिद्धेरिति संगृह्यते । नानुमानेति चलस्वभावत्वलिङ्गकेन । तथेति गुणेषु प्रवृत्तिरूप-कार्यासिद्धः ॥ ९ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥१०॥ सर्वपक्षेति सर्वे पक्षा अत्रैव वक्तव्यास्तानि चेत्यादि-ना । तन्मतस्य सांख्यमतस्य । अर्वाचीनत्वं वेदादिभ्यः । तत्कर्तुः स्मरणात् । उद्धवेति एकादशस्य



RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

रश्मिः ।

प्रयोगे भ्रमत्वमात्मत्वं चेति । 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इति जैमिनिसूत्रे । अत्र पुरुषस्या-भिन्ननिमित्तोपादानत्वम्, प्रधानकारणानुमानदूषणात् । प्रधानं तु 'यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदा-त्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्' इति गुणत्रयात्मकं यद्यपि तथाप्युद्गतास्तस्मात्तो गुणा अपि भवन्ति । 'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुषः' इति प्रथमस्कन्धादिति सांख्या-द्विशेषः । नित्यं स्वरूपात्मकत्वात् । 'प्रकृतिश्च' इत्यधिकरणे उक्तं प्रकृतेः स्वरूपात्मकत्वं सद-सदात्मकत्वम् । समाकर्षादित्यधिकरणेन स्वरूपविशेषणात् । कार्यभावशून्यं कार्यत्वादित्यविशेषं वि-शेषवदिति । एते च गुणाः 'प्रजायेय'इतीच्छया जघन्यतां गताः सच्चिदानन्दांशाभासा अंशा भगवत उत्पन्नायां तस्यां शक्तौ प्रतिष्ठितास्तस्याः प्रधानत्वं बोधयन्ति । गुणलक्षणानि तु 'तत्र सत्त्वं निर्मलत्वा-त्प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ' इति वाक्यात्सुखानावरकत्वे प्रकाशकत्वे सुखात्मकत्वे च सति सुखासक्त्या ज्ञानासक्त्या च देहिनो देहाद्यासक्तिजनकं सत्त्वम् । प्रकाशो वस्तुयाथात्म्यावबोधः । पदकृत्यं तु स्पष्टं प्रस्थानरत्नाकरे । 'रजो रागात्मकं विद्धि तृष्णासङ्गसमु-द्भवम् । तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्' इति वाक्याद्रागात्मकं वा तृष्णासङ्गादिजनकं वा कर्मासक्त्या देहिनो नितरां देहाद्यासक्तिजनकं वा रजः । प्रथमं स्वरूपलक्षणम् । 'पुंसोः परस्परं स्पृहा रागः' इति रामानुजाचार्याः । विषयेषु गर्द्ध इति परे । द्वयं तु कार्यलक्षणम् । गुणान्तरेऽतिव्याप्ति-व्युदासाय कर्मासक्त्येति । बन्धने सत्त्वादाधिक्यं नितरामिति पदं बोधयति । 'तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् । प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत' इति वाक्यात् । आवरणशक्तिजन्यं सर्वदेहिमोहकं प्रमादालस्यनिद्राभिर्देहिनो देहाद्यासक्तिजनकं तमः । अत्रान्यथासूत्रे एतेषां स्वतोऽ-नुवर्तनादिकमुक्तं सांख्यैस्तन्न । जडत्वेन स्वभाववादोऽनीश्वरवादश्च स्यात्स चानिष्टः । 'कालः स्वभावो नियतिर्यदृच्छा' इति श्रुतौ चिन्त्यत्वोक्तेः । अन्योन्यजननमिथुनवृत्तित्वमप्यसंभवि । लक्षण-सांकर्यप्रसङ्गात् । रजसो दुःखात्मकत्वं च तथा । रागात्मकत्वाद् एतदुपादानीभवति । कदाचिद्यद-च्छयेति सदसदात्मकमिति पदेनावसीयते । अत एवैकादशे 'प्रकृतिर्गुणसाम्यं हि प्रकृतेर्नात्मनो गुणाः । सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः । सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते । गुणव्यतिकरः कालः स्वभावः सूत्रमेव च' इति । इमानि गुणलक्षणानि शोभनानि । गुणव्यतिकरः गुणक्षोभकः । क्षोभश्च कार्योन्मुखत्वम् । तत्त्वानि तु नव 'पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः । ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव' इत्येकादशे द्वाविंशाध्याये भगवद्वचनात् । तत्त्वं च तस्य भाव उच्यते । भगवतः कारणता नवधा लोके प्रकटेति यावत् । तथा च पदार्थस्त्वेक एव ब्रह्माख्यः । नैयायिकास्तु प्रकृत्यहंकारयोः स्थाने दिक्कालौ पठन्ति तन्न । प्रकृत्यहंकारयोः सार्वजनीन-त्वात् दिक्कालयोरीश्वरानतिरेकात् । तथा च पदार्थतत्त्वविवेचने दीधितिकृत् । दिक्कालावीश्वरा-न्नातिरिच्येते प्रमाणाभावात् । न च पूर्वस्यां दिशि घटः इदानीं घट इति प्रतीत्यपलापप्रसङ्ग इति वाच्यम् । तत्तन्निमित्तसमवधानवशादीश्वरादेव तादृशप्रतीत्युपपत्तेः । न चेश्वरे घट इति प्रतीत्यापत्तिः । 'यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा । स्यादिदं भगवान्साक्षात्प्रधानपुरुषेश्वरः' इति वाक्यादना-पत्तेः । कालदिक्शब्दवाच्ये त्वीश्वरे लोकप्रतीतिः । प्रकृतमनुसरामः । पुरुषस्त्वात्मा । स्वयंप्रकाशत्वं लक्षणम्, तच्च ब्रह्मण्यतिव्याप्तमिति चेन्न । अनादित्वे निर्गुणत्वे प्रकृतिनियामकत्वे सति अहंवित्ति-

रश्मिः ।

वेद्यत्वस्य तल्लक्षणत्वात् । प्रकृतिनियामकत्वं सांख्याद्विशेषः । इदमपि तत्रैवाव्याप्तमिति चेन्न । 'आत्मैवेदमग्रे' इत्यत्र सादित्वस्य महदादिसमानाधिकरणस्य निषेधात् । तथा च सादित्वाभावोऽप्र-पदार्थः 'द्विधा समभवद् बृहत्' इति वाक्यात् । न चैवमपि न निस्तार एतादृशाऽनादित्वस्य ब्रह्मत्वाऽवच्छेदकत्वादिति शङ्क्यम् । विश्वगतगुणदोषसंबन्धाभावे सति सम्यग्गुणदोषसर्गवत्त्वमिति लक्षणात् । 'जगृहे पौरुषं रूपम्' इत्यत्र ब्रह्माण्डतनोरुदरे सृष्टिरिति बहिर्गुणदोषसंबन्धाभावेऽप्युदरे तथेति नासंभवः । स्पष्टं चेदमाकरे । एवमप्यतिव्याप्तौ ब्रह्मभिन्नत्वे सतीति विशेषणं देयम् । सोऽयं न नाना किंत्वेक एव । 'कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः । पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्' इति वीर्याधानमात्रार्थं करणत्वेनैकपुरुषापेक्षणात् । सांख्ये त्वयमेवेश्वर उपाधिभेदेभिन्नो जीव इत्युच्यत इति महान् भेदः । तदुक्तं तृतीयस्कन्धे 'अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः । प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम्' प्रत्यक् अन्तर्मुखतया धाम स्फूर्तिर्यस्य । अहंवृत्तिवेद्य इत्यर्थः । प्रकृतिस्तु व्याख्याता । व्यक्तं महत्तत्त्वम् । तच्च 'तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः । मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च । तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः । सूचनात्सूत्रं क्रियाशक्तिमान्प्रथमो विकारस्ततो महान् ज्ञानशक्तिमान् । महान्नाम स्थूलमाद्यं कार्यं वा । स च सूत्रेण संयुतः सम्यग्मिश्रः । किंत्वेकमेव तत्त्वं ज्ञानक्रियाशक्तिभ्यां द्विधोच्यत इति । तच्च हिरण्मयं 'महत्तत्त्वं हिरण्मयम्' इति वाक्यात् । आनन्दसतोरैक्ये हिरण्यरूपता । कूटस्थत्वे सति स्वस्वाधारविश्वव्यञ्जकत्वम् । प्रकृताव-तिव्याप्तिवारणाय विशेष्यम् । ब्रह्माण्डेऽतिव्याप्तिवारणाय सत्यन्तम् । जगदङ्कुरत्वम्, अतिसमर्थतमो-नाशकत्वमित्यपरं लक्षणद्वयम् । वासुदेवाविर्भावस्थानं शुद्धसत्त्वात्मकं चेतरत् । चित्तत्त्वं तु सांख्य-समानं लक्षणमिति भेदः । अहंकारस्तु महतः कार्यं चिदचिन्मयश्च । अहं जानामीतिवदहं कुर्वे इति चिदाभासरूपत्वात् । तन्मात्रेन्द्रियमनोजनकत्वमादिगुणकत्वं तन्मात्राजनकत्वं तामसत्वम् । इन्द्रियजनकत्वं राजसत्वम् । मनोजनकत्वं सात्त्विकत्वम् । संकर्षणाधिष्ठानत्वमाधिदैविकं लक्षणम् । संकर्षणो देवतेत्यर्थः । संकर्षणश्च पुरुषादतिरिच्यते । कर्तृत्वं करणत्वं कार्यत्वं चेत्यपराणि लक्षणानि । कर्ताहमितिबुद्धिविषयकत्वं कर्तृत्वम् । एवमन्यदपि ज्ञेयम् । शान्तघोरविमूढत्वमित्यपरम् । निरहंकारस्य नैते भावा उत्पद्यन्ते । शान्तत्वं सात्त्विकाहंकारस्य । घोरत्वं राजसस्य । विमूढत्वं तामसस्येति । विशेषस्तु तृतीयस्य षड्विंशाध्याये सुबोधिन्यां द्रष्टव्यः । मनस्त्वनित्यं क्षितौ निविशते । 'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योणिष्ठस्तन्मनः' इति श्रुतेः । गुणान्तर्भावस्तु समवायाभ्युपगमसूत्रे वक्तव्यः । अत्र शांकरभास्कराचार्याभ्यां वेदान्तेऽपि विप्रतिषेधादसमञ्जसमुक्तम् । तत्सगुणब्रह्माङ्गीकारे जीवब्रह्मवादापत्त्या संभवति । आदित्यान्तःस्थस्य पुरुषान्तःस्थस्य च तैत्तिरीय ऐक्याङ्गीकारात् तप्यतापकभावाशङ्का । प्रकृते तु तप्यत्वस्य दुःखरूपाविषयकत्वम् । वाराहे चातुर्मास्यमाहात्म्ये यत उक्तम् 'मनसीर्ष्यासूयादीनां सुखे सामानाधिकरण्येन सत्त्वे सुखं दुःखायते' इति । रामानुजाचार्यास्तु स्वयुक्तिभिः सांख्योपन्यासेन च विप्रतिषेधादसमञ्जसमित्याहुरन्यदप्याहुः । येऽपि कूटस्थनित्यनिर्विशेषस्वप्रकाशचिन्मात्रं ब्रह्माविद्यासाक्षित्वेनापरमार्थिकबन्धमोक्षभागिति वदन्ति तेषामप्युक्तरीत्याविद्यासाक्षित्वासाधसंभवान्महदसामञ्जस्यमेव । इयांस्तु विशेषः । सांख्या जननमरणप्रतिनियमादिव्यवस्थासिद्धये पुरुषबहुत्वमिच्छन्ति ते तु तदपि नेच्छन्तीति सुतरामसामञ्जस्यमिति । अत्राप्यस्माकं तद्वजीवाणुत्वादुपपन्नम् । न च विशिष्टाद्वैते चिदचिद्भ्यां विशिष्टे तथात्वं किंतु चित एव । प्रकृते त्वैक्यात्तप्य-



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

## महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥ (२-२-३)

इदानीं परमाणुकारणवादो निराक्रियते। तत्र स्थूलकार्यार्थं प्रथमं परमाणुद्वयेन द्व्यणुकमारभ्यते। परमाणुद्वयसंयोगे द्व्यणुकं भवतीत्यर्थः। तत्रायमो-

भाष्यप्रकाशः।

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥ अतः परं सप्तसूत्र्या नैयायिकादिसमयोऽत्र निराक्रियते। केचिदिदं सूत्रं ब्रह्मकारणवाददूषणपरिहारार्थत्वेन व्याकुर्वन्ति। तदयुक्तम्। ब्रह्मकारणवादे प्रसक्तानां विलक्षणत्वादीनां दोषाणां पूर्वस्मिन् पाद एव न विलक्षणत्वाद्यधिकरणैर्निवारितत्वेन प्रसङ्गाभावात् पुनरुक्त्यापादकत्वाच्चेत्यभिप्रेत्याहुः इदानीमित्यादि। अत्रासमञ्जसमिति पूर्वसूत्रादनुवर्तत इति केचिदाहुः। वस्तुतस्त्वग्रिमसूत्रेणैतस्यान्वयः। वाशब्दो विकल्पार्थः। तथा च ह्रस्वपरिमण्डलाभ्यां परमाणुभ्यां जायमानं द्व्यणुकं महत् स्याद् दीर्घवद् वा स्यान्न त्वणु ह्रस्वमिति। तदिदं व्याकुर्वन्ति तत्रेत्यादि।

रश्मिः।

त्वापत्तिरिति वाच्यम्। तत्त्वमस्यादिस्थले तस्य त्वमित्यपि समासात्। अभेदपक्षे तु ह्यविद्यासंबन्धादेव तप्यत्वमित्युक्तम्। माध्वभाष्ये तु न विशेषः। अत्राधिकरणे प्रेरितकारणप्रतिपादकातिविषयाच्च प्रेरितकारणप्रतिपादकैः संशय्य प्रेरितकारणकं जगत् 'सृजामि तन्नियुक्तोऽहम्' इत्यादिवाक्यात्प्रेरितं कारणमिति प्राप्ते सिद्धान्तः। अप्रेरितं कारणं अलौकिकार्थे वेद एव प्रमाणं नान्यदिति हेतोः। न च प्रेरितकारणस्य स्मार्तत्वेन विषयाद्यसंभव इति शङ्क्यम्। 'इतिहासपुराणं च वेदानां पञ्चमो वेदः' इति छान्दोग्याद्वेदत्वमिति नासंभवात् विलक्षणवेदत्वादधिकरणान्तरम् ॥ १० ॥

इति द्वितीयं पुरुषाश्मवदित्यधिकरणम् ॥ २ ॥

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥ नैयायिकादीति आदिशब्देन वैशेषिकः। अधिकरणसमाप्तौ वैशेषिकशब्देनातद्गुणसंविज्ञानो वा। अत्रापि प्रतिबन्धकीभूतजिज्ञासानिवृत्त्यर्थं प्रथमं सांख्ययोगजिज्ञासानिवृत्तिः तस्यां सत्यां नैयायिकादिसमये निराकरणावसर इत्यवसरसंगतिः। अत्रायानेत्यादुक्तप्रसङ्गसंगतिस्तु वर्तत एव। आदिपदेन 'कणादेन तु संप्रोक्तं शास्त्रं वैशेषिकं महत्। गौतमेन तथा न्यायम्' इतिवाक्यादादिपदेन वैशेषिकः। निराक्रियत इति उक्तवत्यमप्रकारेणां निराक्रियते। केचिदिति शंकराचार्याः। प्रसङ्गेति। तथा संगतत्वादित्यर्थः। संगतिसामान्यलक्षणे प्रसङ्गाभिनिवेश ईक्षत्यधिकरण उक्तः। चेति। यत्तु प्रधानगुणानां बुद्ध्यादीनां चैतन्यानन्वयात्प्रधानस्यानुपादानत्वमुक्तम्। तथा ब्रह्मगुणचैतन्यानन्वयाद् ब्रह्मणो नोपादानत्वमिति दोषो दृष्टान्तसंगतिलाभादत्र स यस्य समन्वय इति तच्चैतन्यान्वयस्य समन्वयाधिकरणे साधनाद्दोषास्फुरणादस्फुरणे स्फुरणे वा स्मरणमात्रनिवृत्त्या सूत्रप्रणयनवैयर्थ्यमेवेति ध्येयम्। केचिदिति रामानुजाचार्याः। तथा च भाष्यं 'असमञ्जसमिति वर्तते' इति। अतोऽसमञ्जसं तन्मतमित्येवम्। परंतु वाक्यपरिसमाप्तिस्त्वतो द्व्यणुकस्याभाव इत्यनेनेति। वस्तुतस्तु पक्षमाहुः वस्तुतस्त्विति। तं तत्रैव वदन्ति। एवं च ह्रस्वेत्यादिना भास्कराचार्या अध्याहरन्ति। माध्वशंकराचार्यास्तु सूत्रद्वये भिन्नं भिन्नं प्रमेयमाहुः। अतोऽन्यत्तत्। वाशब्दश्चार्थ इति शंकराचार्योक्तं माध्वाचार्यरामानुजाचार्योक्तं च निरस्यन्ति स वाशब्द इति। भास्कराचार्यास्तु 'वाशब्दादध्याहृत्य योजना कर्तव्या' इत्याहुः। ह्रस्वेति। ह्रस्वत्वं परमह्रस्वत्वपरमाणुपरिमाणत्वं परितो मण्डलं च तद्विशिष्टः परमाणुस्ताभ्यामित्यर्थः। न त्वणुवति द्व्यणुकेप्यणुपरिमाणं नैयायिका मन्यन्ते। व्याकुर्वन्तीति संपूर्णसूत्र-



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः

अयमर्थः। तेषां मते सर्वं जगद् उपादानभूतेभ्यो नित्येभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेणो-त्पद्यते। तत्रैषा युक्तिः। सूक्ष्मादेव स्थूलस्योत्पत्तिर्लोके दृश्यते। तन्तुभ्यः पटस्य, अंशु-भ्यस्तन्तूनां चोत्पत्तिदर्शनात्। स चापकर्षः परमकारणद्रव्यमतिसूक्ष्ममवस्थापयति परमाणु-रूपम्। तस्य सावयवत्वाङ्गीकारे त्वनन्तावयवत्वेन मेरुसर्षपयोः समानपरिमाणत्वप्रसङ्गः। एवं सिद्धाः परमाणवः पार्थिवाप्यतैजसवायवीयभेदाच्चतुर्विधा नित्याः प्रलयकालेऽवतिष्ठन्ते। किंच। कार्यमात्रं लोके समवाय्यसमवायिनिमित्ताख्यकारणत्रयजन्यं दृश्यते। यथा पटे तन्तवः समवायिकारणम्। तेषां परस्परं संयोगोऽसमवायिकारणम्। तुरीवेमकुविन्दादयश्च निमित्तकारणम्। एवमाद्यकार्येऽपि परमाणवः समवायिनस्तत्संयोगोऽसमवायी। अदृष्टेश्वरे-च्छादिकं च निमित्तम्। तत्र जीवादृष्टसहकृतेश्वरेच्छावशाद् वा, ईश्वरेच्छावशगादृष्टवदात्म-संयोगाद् वा परमाणुषु कर्मोत्पद्यते। ततस्ते परमाणवः परमाण्वन्तरेण संयुज्यमानाः प्रत्येकं द्व्यणुकरूपं कार्यमारभन्ते। बहवस्तु परमाणवः संयुक्ता न सहसा स्थूलं कार्यमारभन्ते,

रश्मिः।

भाष्येण व्याकुर्वन्ति। स चेति कारणसौक्ष्म्यम्। परमेति परमाणुरूपमित्यस्य विशेष्यम्। अतः परमाणौ विश्राम इति भावः। स च नित्यः। अन्यथानवस्थितकारणककार्योत्पत्तिप्रसङ्गः। अथेति अणुकं सावयवं चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः साव-यवाः महदवयवत्वात् कपालवदित्यनुमानेन स्थापयतीत्यर्थः। साध्यवदन्यस्मिन्नाकाशादौ साधा-रण्यवारणाय चाक्षुषेति। अनन्तेति अवयवावयवधाराया अनन्तत्वात्तथा। अयं हेतुः। मेर्विति मध्यमपरिमाणौ। अयं पक्षः। समानेति। इदं साध्यम्। तथा च मेरुसर्षपौ समानपरिमाणौ अनन्तावयवत्वात्, घटवत्। पार्थिवाप्येति आप्येति पदच्छेदः। कार्यमात्रमिति द्रव्यं बोध्यम्। केषांचिदसमवायिकारणमात्रात्। समवायीति 'यत्समवेतं कार्यमुत्पद्यते तत्समवायि-कारणम्'। असमवायीति कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या ज्ञानादिभिन्नमसमवायिकारणम्। कार्यैकार्थप्रत्यासत्त्या ज्ञानमिच्छा कारणमित्यतिव्याप्तिवारणाय ज्ञानादिभिन्नमित्युपात्तम्। आदिपदेन यत्नं प्रति कारणीभूताया इच्छाया संग्रहः। अत्रापि कार्यैकार्थप्रत्यासत्त्या तन्तुसंयोगोसमवायि-कारणम्। तुरीतन्तुसंयोगस्यापि पटं प्रति कार्यैकार्थप्रत्यासत्त्या कारणत्वादसमवायित्वं पटं प्रति युक्तं परत्वादिना तस्यापि संग्रहात् भवति। तत्र इति अदृष्टेश्वरेच्छादिके विचार्यमाणे। ईश्वरेच्छा-मात्रस्य कारणत्वे देवदत्तादिवदृष्टभोग्यव्यवस्थोत्पन्नेषु न स्यादतो विशेषणम्। अनीश्वरवादापत्त्या वि-शेष्यम्। कारणतावच्छेदकद्वयापत्त्येश्वरस्य संसारमहीरुहस्य बीजत्वं न स्यादत आहुः ईश्वरेच्छेति। ईश्वरस्येच्छावशं गच्छन्ति ये ते ईश्वरेच्छावशगाः ईश्वरेच्छाकारणका अदृष्टवन्त आत्मानः तेषां संयोगात्। अन्यथा जीवानां परमाण्वादिभोगो न स्यात्। तूष्णीं जीवा न कारणाभोग्यसांकर्य-प्रसङ्गात्। यस्य यस्य संयोगः तत्तस्य भोग्यमिति न संयोगः कारणतावच्छेदकैक्यान्नानीश्वर-वादापत्तिः। नैयायिकव्याख्याने स्पष्टम्। ननु संहत्य परमाणवः कार्यमुत्पादयन्तु, किं द्व्यणुकादि-क्रमेणेत्यत आहुः। बहवस्त्विति। पक्षसंख्याविस्मरणायेदम्। न तु पक्षान्तर्गतम्। साध्या-प्रसिद्धिवारणाय संयुक्ता इति पक्षविशेषणम्। असमवायिकारणविधुरे समवायिनि साध्यप्रतियोग्य-प्रसिद्ध्या साध्याप्रसिद्धिः। बाधवारणाय सहसेति 'अतर्किते तु सहसा' इत्यमरात्, सहते। षह मर्षणे



DR. RUPNATHJI( DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

परमाणुत्वे सति बहुत्वात्, घटोपगृहीतपरमाणुवत् । न चात्र मानाभावः । नष्टे घटे कपालादिदर्शनस्यैव मानत्वात् । तैरेव घटारम्भे तु मुद्गरादिना घटनाशे तदवयवानां परमाणूनामतीन्द्रियत्वाच्च किंचिदुपलभ्येत । तस्माच्च बहूनां परमाणूनां सहसा स्थूलकार्यारम्भकत्वं किंतु द्व्यणुकादिक्रमेणैव महाकार्यारम्भ इति द्व्यणुकमेवाद्यं कार्यं द्वाभ्यां परमह्रस्वपरिमण्डलपरिमाणाभ्यां परमाणुभ्यामारभ्यते । किंच । द्रव्येण द्रव्यान्तरारम्भवद् गुणेन गुणान्तरारम्भ इति परमाणुद्वयगतया द्वित्वसंख्यया द्व्यणुकेऽणुत्वं ह्रस्वत्वं च परिमाणान्तरमारभ्यते । अणु च पारिमाण्डल्यादन्यत् । पारिमाण्डल्यं च परमाणुत्वस्यैव नामान्तरम् । पर-

रश्मिः ।

असाप्रत्ययः । अवितर्किते अविचारिते । तथा च तर्काप्रतिष्ठानादवितर्कितस्थूलकार्यारम्भकत्वस्य पक्षे सत्त्वाद्बाधः । अवितर्कितस्थूलकार्यारम्भकत्वं तु नास्तीत्यबाधः । संयुक्तपरमाणुषु अवितर्कितं कार्यं द्व्यणुकादिरूपं तादृशकार्यारम्भरूपसाध्यदर्शनादपक्षताप्रसक्तिवारणाय स्थूलमिति, महत्परिमाणावच्छिन्नमित्यर्थः । सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता । सिद्धिः साध्यसिद्धिः अनुमितिप्रतिबन्धिका । 'संदिग्धसाध्यवान्पक्षः' इति वा । तेन सहसा स्थूलकार्यारम्भकत्वाभाववत्त्वं साध्यम् । द्व्यणुके साधारण्यवारणाय हेतौ विशेष्यम् । तथा च द्व्यणुके साध्यप्रतियोगिरूपसाध्याभाववति परमाणुत्वस्य सत्त्वात्साधारण्यम् । बहुत्वरूपविशेष्याभावान्न साधारण्यम् । बहुकपालेषु बहुकपालकघटजनकेषु साध्याभाववत्सु बहुत्वरूपहेतुसत्त्वात्साधारण्यं तद्वारणाय विशेषणम् । तथा च परमाणुत्वाभावान्न साधारण्यम् । परमाणुनिष्ठबहुत्वं हेतुतावच्छेदकं लाघवात् । नन्वतीन्द्रियलिङ्गकानुमानमिदं कथं साध्यं साधयिष्यतीत्याशङ्क्य प्रतिषेधति स्म न चात्रेति । अत्रेति हेतौ । मानं व्याप्तिज्ञानं तस्याभावः । अथवा । दृष्टान्ताभावं शङ्कते न चात्रेति । अत्रेति दृष्टान्ते । कपालादीति त्रसरेणुपर्यन्तं दर्शनं प्रत्यक्षं द्व्यणुकादिविषयकं तु योगिनामिति । योग्ययोगिसाधारणं दर्शनं तस्यैव मानत्वात् । पूर्वपक्षे कपालादीत्यतद्गुणसंविज्ञानो बहुव्रीहिः दर्शनयोगिनामेव । पीलुपाकवादिनां मतेनाह तैरेवेति । पक्षान्तरेण पिठरनिषेधः । किंचित् कपालशकलादि । अतः पिठराणामपि कारणत्वमिति भावः । परमाणूनामिति । परमेति परमह्रस्वमणुपरिमाणेतरत् । अणुह्रस्वमहद्दीर्घभेदेन चतुर्षु परिमाणेषु । पारिमाण्डल्येति भावप्रधानः । परिमण्डलत्वमणुपरिमाणं ते परिमाणे ययोस्ताभ्यां परमाणुभ्याम् । भाष्ये स्थूलकार्यत्वमुद्देश्यतावच्छेदकमुक्तमत्र च महाकार्यारम्भ इत्युद्दिष्टं तदुपपादयामासुः किंचेत्यादि । ह्रस्वत्वमिति परमह्रस्वत्वम्, द्रव्यचाक्षुषत्वावच्छिन्नं प्रति महत्त्वेन कारणत्वाच्च ह्रस्वत्वे चाक्षुषत्वं न द्व्यणुकादौ । तर्हि ह्रस्वत्वे परमेतिविशेषणं न देयम् । अणुपरिमाणेनैव चारितार्थ्ये इदं त्रसरेणुपरिमाणारम्भार्थम् । अणुमात्रस्याणुतरपरिमाणजनकत्वात् । तर्हि त्रसरेणुपरिमाणं ह्रस्वजन्यं भवतु अणुतरस्य जनकत्वं मास्त्विच्याकाङ्क्षायामणुतरपरिमाणस्यैवाभावादणुह्रस्वैर्व्यणुव्यवहारशून्यैः सुखेन महदादिपरिमाणजनकत्वसंभवाच्च तदर्थमणुपरमाण्वोरभेदभ्रमं वारयन्ति परमाणोः सकाशाद्द्व्यणुकपरिमाणभेदसाधनाय अणु चेति । न च नामभेदाद्भेद इति शङ्क्यम् । पूर्वमीमांसामतेनाह । संज्ञाया भेदकत्वे श्यामघटाद्रक्तघटः पाकदशायां भिन्नः स्यात् । अतो लक्षणं भेदकम् । ह्रस्वं तु भवति च पुनरणुपारिमाण्डल्यादन्यत् । रूक्षमाह पारिमाण्डल्यमिति । तदुक्तम्-'पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्' इति भाषापरिच्छेदे । पारिमाण्डल्यमणुपरिमाणमित्यपि स्थितम् ।





RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**भावमिलने द्व्यणुकं महत् स्याद् द्विगुणपरिमाणवत्त्वात् ।**

भाष्यप्रकाशः ।

तामेतां प्रक्रियां दूषयन् प्रथमं त्र्यणुकपरिमाणं दूषयति महदित्यादि । अयमर्थः । यदुक्तं परमाणुगतया द्वित्वसंख्यया त्र्यणुकेवान्तराणुत्वमवान्तरह्रस्वत्वं चारभ्यत इति तदसंगतम् । द्रव्ययोरसंयुक्तयोरपि परमाण्वोरीश्वरापेक्षाबुद्धिजन्यद्वित्वस्य विद्यमानतया तदानीं तदभावेन त्र्यणुकोत्पत्त्यनन्तरं च भावेन त्र्यणुकद्रव्यासमवायिकारणीभूतः संयोग एव परिमाणेपि कारणत्वेनाभ्युपेयः । न च तस्यान्यथासिद्धत्वम् । एकेन संयोगेन द्रव्यगुणात्मककार्यद्वयजननेपि बाधकाभावात् । एकस्मिन् गुणे द्रव्यगुणजनकत्वस्य सर्वोत्पत्तिमन्निमित्तकारणे अदृष्टे सिद्धत्वात् । वस्तुतस्तु संख्याया अपि द्व्यणुकादिकं प्रति कारणता । अन्यथा तद्वाचके पदे संख्योल्लेखो न स्यात् । अतः संख्यया परिमाणमेव जन्यते इति न नियमः । किंच । तत्र त्र्यणुकगतमेकत्वमेव जन्यते, साजात्यात् । न त्वेकत्वेन । विनिगमनाविरहात् । न च तन्नित्यम् । अनित्यगतगुणस्यानित्यत्वा-

रश्मिः ।

शयेनाहुः तामेतामिति । दूषयतीति सूत्रकारो दूषयतीत्यर्थः इदं सूत्रप्रतीकम् । तत्रोपरीत्यादि भाष्यं विवरिष्यन्तः किंचिद्द्रव्येणेत्यादिस्वोक्तदूषणानां गौणत्वसूचनाय स्वेषामीश्वरोपादानत्वस्य सूचनाय तान्यनूद्य स्वान्याहुः अयमर्थ इति । तेन तत्परिहारसंभवादित्यन्तेन ग्रन्थेन स्वोक्तदूष्यदूषणानि गौणत्वेन भाष्ये युवन्ति स्म तेन गौणत्वेन त्वयमर्थ इत्यर्थः । अवान्तरेति । महाकार्यावान्तराणुत्वमेवमेवावान्तरह्रस्वत्वम् । तदभावेनेति तयोरणुत्वह्रस्वत्वयोरारभ्यमाणयोरभावेन । संयोग इति परमाण्वोः संयोगः । कारणत्वेनेति अन्वयव्यतिरेकाभ्याम् । तथा द्व्यणुकं तु समवायिकारणम् । अन्यथासिद्धत्वमिति अवश्यक्लृप्तनियतपूर्ववर्तिन्या द्वित्वसंख्ययाणुत्वह्रस्वत्वकार्यसंभवे तद्भिन्नसंयोगस्यान्यथासिद्धत्वम् । द्रव्यगुणेति गुणः परिमाणम् । बाधकेति संयोगस्यावश्यक्लृप्तत्वे बाधकस्य संख्याया अवश्यक्लृप्तत्वस्य अभावात् । संख्यावश्यक्लृप्तत्वस्य न्यायमात्रेऽभ्युपगमैकशरणस्य न संयोगावश्यक्लृप्तत्वविघटकत्वरूपं बाधकत्वमिति भावः । सर्वोत्पत्तिमदिति । जडस्य भोग्यतया यद्यदृष्टजन्यं तत्तद्भोग्यमित्येवं तथेत्यर्थः । तत्तु द्वित्वस्य विद्यमानत्वेनास्तु कारणत्वं संयोगस्य त्वसमवायित्वेन परिमाणासमवायिकारणलक्षणाक्रान्तत्वेनादृष्टस्य निमित्तरूपस्य द्रव्यगुणजनकत्वादन्यत्राप्रसिद्धत्वेन च किं पुनः 'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम्, न विवादस्तत्र कार्यो लोकोक्तेश्च तथा भवेत्'इत्यनेन विरुद्धत्वेन च द्रव्येतरकार्यं प्रति कारणत्रयानावश्यकत्वेन पक्षान्तरमाहुः वस्तुतस्त्विति । संख्याया अपीति परमाणुरूपेणापि द्व्यणुकपरिमाणजननसंभवात्परमाण्वोर्द्वित्वसंख्याया अपि द्व्यणुकसमवायित्वम्, समन्वयात् । सूचितश्चायं भाष्ये तत्रोपर्यध इत्यादिना । अन्यथेति समवायित्वाभावे । द्व्यणुकवाचके द्व्यणुकपदे 'द्वि'इतिसंख्योल्लेखो न स्यात् । घटो मृदिति प्रत्ययात्समवायिवाचकस्यैव तद्वाचकत्वात् । न नियम इति किंतु संख्यापि जन्या इति । अथापि द्व्यणुकमेकमिति प्रत्यये द्वित्वमवयवगतमेकत्वमवयविगतमिति स्मरणानुपातिविषयत्वं मन्तव्यम् । तत्रापि संख्यैव कारणमित्येककार्यकत्वं नेत्याहुः किंचेति । एवेति एवकारः परिमाणं व्यवच्छिनत्ति । साजात्यात् संख्यात्वेन साजात्यात् । न त्विति साजात्यमित्येव । अन्यथा द्व्यणुके द्वित्वसंख्योल्लेखो न स्यात् । अथवा परिमाणं मा जन्यतामन्यथैवोपपत्तेः । परिमाणेन न जन्यतामित्याहुः किंचेति । न चेति एकत्वं नित्यमिति तन्न जन्यते किंतु संख्यया परिमाणमेव

१. मित्यात्मकत्वमिति ग पाठः ।



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

प्राक्पश्चान्मिलने दीर्घवद् वा स्यात् । परमाणुपरिमाणं ह्रस्वं परितो

भाष्यप्रकाशः ।

भ्युपगमात् । एवं द्व्यणुकपरिमाणमपि परमाणुपरिमाणेनैव जन्यत इति मन्तव्यम् । अ[illegible]ति-प्रसङ्गापत्तेः । न च परिमाणस्य प्रकृष्टपरिमाणजनकत्वदर्शनात् सूक्ष्मे चातिसूक्ष्मत्वस्य[illegible] प्रकर्षत्वात् परमाणौ विश्रान्त्यनङ्गीकारेनवस्थापत्त्या मेरुसर्षपयोस्तौल्यापत्तेस्तस्यानारम्भक[illegible]त्वमिति वाच्यम् । विभागजन्य एव कार्ये सूक्ष्मत्वस्य प्रकर्षतायाः सर्षपभङ्गादौ निर्णीतत्वेन संयोग[illegible] कार्ये तथाङ्गी-कारस्य भ्रान्तिमूलकत्वात् । अस्तु वा संख्यायाः परिमाणमात्रजनकत्वम् । तथापि तया-णुत्वह्रस्वत्वे एव जननीये न महत्त्वदीर्घत्वे इत्यत्र किं नियामकम् । न च प्रत्यक्षतापत्तिः । स्पर्शरूपयोरनुद्भूतत्वाङ्गीकारेणापि तत्परिहारसंभवात् । अथवा, [illegible]दिकमेव जन्यताम् । तथापि द्व्यणुकस्य परमाणुपरिमाणापेक्षया द्विगुणपरिमाणवत्त्वात् [illegible] स्वजनकसंयोगद्वैविध्ये-नोक्तरीत्या महद्वद्दीर्घवद् वा स्यान्न तु वर्तुलं ह्रस्वं चेत्यर्थः । भाष्ये, संज्ञापूर्वकस्य विधेरनित्य-त्वमभिप्रेत्य मिलनमित्यत्र गुणाभावः । प्राक्पश्चादिति ति[illegible] । नन्वस्याकाण्डताण्डवस्य

रश्मिः ।

जन्यत इति न च वाच्यमित्यर्थः । एवमिति संख्यया संख्यावत् । अन्यथेति गुणजनने साजात्यापेक्षाभावे । स्वरसेनापि तज्जन्येतेत्येवमतिप्रसङ्गापत्तेः । अनवस्थेति विश्रान्त्यनङ्गीकारे सावयव-त्वापत्त्या परमाणवः स्वावयवैरवयवाश्चावयवावयवै[illegible]पत्त्या मेरुसर्षपयोरनन्तावयवत्वसाम्या-त्तौल्यापत्तेरित्यर्थः । 'न च वाच्यं अवयवाल्पत्व[illegible] हि सर्षपमहीधरयोर्वैषम्यम् । परमाणो-रप्यनन्तावयवत्वेऽवयवानन्त्यसाम्यात्सर्षपमही[illegible]योर्वैष[illegible]सिद्धेरवयवापकर्षकाष्ठावश्याभ्युपगमनीयेति । परमाणूनां प्रदेशाभावे सति एकपरमाणुपरिमाणातिरेको प्रतिप्रथिमा न जायेतेति सर्षपमहीधरयोरेवासिद्धेः किं कुर्म इति चेत् वैदिकपक्षः परिगृह्यताम् । तस्येति परिमाणस्य । विभागेति सर्षपभङ्गादावित्यस्य विशेषणम् । सर्षपेति । आदिपदेना[illegible]विस्फुलिङ्गभङ्गादिः राजिका वा । संयोगज इति घटादिकं संयोगजं कार्यम् । भ्रान्तीति [illegible] प्रकर्षतायाः काप्यदर्शनात्तथेत्यर्थः । महदारब्धस्य संयोगासमवायिकारणकस्याणुतरत्वं त्रसरेणौ दृष्टमिति भावः । न च तन्तुषु यथा यथा सूक्ष्मत्वं तथा तथा प्रकर्ष इति लोके उपलम्भात् परमाणुपरिमाणजन्यस्याणुतरत्वं प्रकर्ष इति शङ्क्यम् । परिमा-णाभ्यां जायमानस्याणुतरत्वाभावे[illegible]णुत्वे एकतरवैयर्थ्यप्रसङ्गात् । परमाणोस्तत्तत्कार्यविश्रान्तिस्थानत्वे दूषणम्, ईश्वरस्य सम[illegible] तत्तत्कार्यविश्रान्तिस्थानत्वे दूषणं नेत्युक्तम् । न तु परमाण्वभावः । तेन 'चरमः सद्विशे[illegible]नेकः' इत्यस्याविरोधः । तेन 'तस्माद्वा एतस्मात्' इति श्रुतावङ्गः परमाण-वस्तेभ्य उक्तरीत्या मह[illegible] पृथिवीत्येवं सर्वत्र । तुष्यतु दुर्जन इति न्यायेनाहुः अस्तु वेति । महत्त्वदीर्घत्वयोर्जनित[illegible]रसत्त्वेनुपलब्धिर्नियामिकेति शङ्कते न चेति । यदि महत्त्वदीर्घत्वे स्यातां तर्हि द्व्यणुकमुपलभ्येत चक्षुषेति प्रत्यक्षतापत्तिः । अनुद्भूतत्वेति तत्कृतेनाङ्गीकारेण । तत्रोपरीत्यारभ्य मण्डलं [illegible]न्तं भाष्यं विवृण्वन्ति स्म अथवेति । तयेति द्वित्वसंख्यया । अयमभ्युपगमः पूर्ववत् । स्वेति । [illegible]विध्यमुपर्यधोभागमेलनेन प्राक्पश्चान्मेलनेन च । उक्तरीत्येति उपर्यधोभागमिलने इत्युक्तरीत्या । महद्वदित्यादौ मतुब् वतिर्वा । भाष्ये संज्ञेति अस्याः परिभाषायाः ज्ञापकमोरोदिति [illegible] 'गुण' इत्यत्र गुणशब्देनादेङोः संज्ञाभूतेनोद्विधानम् । तेन पचपाणः क्षिणोतीत्यत्र 'सार्व-धातुकार्धधातुकयोः' इति गुणो न । गुणाभाव इति 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणाभावः । ति[illegible]गिति । अन्यथातिसूक्ष्मयोरन्यभावाऽननुभवापत्तेः, दिनवृद्धौ पलाननुभववत् । अकाण्डेति



www.astrology-tantra.com

**अदृष्टवदात्मसंयोगे चाभ्युपगम्यमाने निरवयवत्वात् तदेव तत् स्यात् । विशेषा-**

भाष्यप्रकाशः ।

दर्शनात् । अन्यथात्ममनसोर्नित्यत्वेन संयोगनित्यतया प्रयत्नस्यापि सार्वदिकत्वप्रसङ्गात् । अथादृष्टवदात्मसंयोगस्तदा तस्य सार्वदिकत्वात् कर्मणोपि तथात्वप्रसङ्गः । लोके तथैव दर्शनात् । किंचैवमभ्युपगम्यमानेपि कारणान्तरे परमाण्वोर्निरवयवत्वादसंयुक्तांशस्याभावेन तदपि कार्यं परमाणु स्यान्न द्व्यणुकम्, विशेषाभावात् । न च प्रविभक्तावयवत्वमेव विशेष इति युक्तम् । लोके मुद्गराभिघातादिना घटभङ्गे कपालानां तेषामपि तथाभङ्गे कपालिकानां दर्शनेन विभागस्य प्रतिलोमक्रमेणैवोत्पत्तिनिश्चयात् प्रलयेपि शरीराणां प्रागेव नाशेन तदानीं परमाणुविभागजनककर्मजनकस्य जीवप्रयत्नाभिघातादेर्वक्तुमशक्यतया, अदृष्टपक्षेपि तस्य भोगनाश्यत्वेन द्व्यणुकपर्यन्तभोगोत्तरं तन्नाशे तदानीं शरीराभावेन कर्मकरणाभावाददृष्टान्तरस्याप्यनुत्पत्तावणुद्वयविभागजनकस्य कस्यापि वक्तुमशक्यतया विभागस्याशक्यत्वादपि विशेषा-

रश्मिः ।

च्छतीत्यादिना 'यन्मनसा ध्यायति तद्वाचा वदति यद्वदति तत्करोति' इति श्रुतेश्चासंभवः । निःशरीरस्येत्याद्युक्तं तत्र निःशरीरत्वे मनःसंबन्धो न घटत इत्यत्र हेतुमाहुः **शरीरेति** । **बृहदारण्यके** 'उषा वा' इति ब्राह्मणेश्वमुक्त्वा द्वितीयब्राह्मणे 'नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत्' इत्यनया मृत्युरूपदेहसंबन्धमुक्त्वोच्यते 'तन्मनोकुरुत' इति । मृत्योः शरीरत्वं तत्रैवोक्तम् अशनाया हि मृत्युरिति । अशनायेति सोर्याद्व । अशनाग्नेः शरीरम् । 'यास्ते अग्ने घोरास्तनवः क्षुच्च तृष्णा च' इति श्रुतेः । अश्नात्यनया क्षुधेत्यशनाया क्षुत् । **तदुत्पत्तीति बृहदारण्यके** मनउत्पत्तिदर्शनात् । ननु व्यापकस्यात्मनो मनःसंयोगः सुघट इति शरीरमन्तराप्युपपन्न इति प्रयत्नसंभव इत्यत आहुर**न्यथेति** । शरीरमन्तरापि मनःसंयोगाङ्गीकारे प्रकारे । **सार्वदिकत्वेति** । तथा च संयोगजनककर्मजनकस्यैव प्रयत्नस्य संभवेन प्रलयाद्यनुपपत्तिः । **अदृष्टेत्यादिभाष्यं** विवृण्वन्ति स्म **अथेत्यादि** कारणमित्येव । **अदृष्टवानात्मा** जीवः । 'बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा, धर्माधर्मौ गुणा एते आत्मनश्च चतुर्दश' इति भाषापरिच्छेदे । स च मुक्तः संसारिणस्तदाभावात् । **तथात्वेति** नित्यत्वप्रसङ्गः । **लोक** इति श्येनशैलसंयोगे संयोगजनककर्मनित्यत्वे विभागजनककर्माभावात्संयोगनित्यत्वप्रसङ्गदर्शनात् । **चाभ्युपेत्यादिभाष्यं** चमप्यर्थे आश्रित्य विवृण्वन्ति स्म **कारणान्तर** इति असमवायिकारणे । **तदपीति** तेन तदेवेत्येवकारोप्यर्थे व्याख्यातः । चैवशब्दयोः स्पष्टार्थत्वेपि व्याख्यानतो विशेषप्रतिपत्तेःअदोषः । विशेषेति भाष्यं विवृण्वन्ति स्म **विशेषेति** संयोगकृत**विशेषाभावात्** । विभागेति भाष्यमवतारयन्ति स्म न चेत्यादिना । परमाणुर्न विभज्यते द्व्यणुकं तु विभज्यत इति । **अभिघातः** कर्मजः संयोगः । **आदिशब्देन** द्व्यणुकनिष्ठं विभाजकं कर्म । यद्वा । **घटभङ्गे** कारणत्वाद्धृतजलामत्वमादिशब्दार्थः । **प्रतिलोमेति** संयोगप्रतिलोमक्रमेण । **प्रागिति** स्वारम्भकद्व्यणुकादिनाशात्प्राक् । **तदानीमिति** । **जीवप्रयत्नेति** । **आदिशब्देन** महेश्वरेच्छा । यद्वा, आदिशब्देन दृष्टनिमित्तान्तरम् । तस्याः कालस्य चादृष्टे निवेशात् । **अशक्यतयेति** ज्ञानाभावेन ज्ञातुमशक्यत्वात्प्रक्रियाभावात्तथा । दृष्टमुद्गरादिकमुक्त्वाऽदृष्टकारणाभावमाहुः **अदृष्टेति** । 'धर्माधर्मावदृष्टं स्यात्' । **तस्येत्यादि तस्य** अदृष्टस्य । सुखदुःखसाक्षात्कारो भोगः । **तन्नाशे** इति अदृष्टनाशे । **तदानीमिति** द्व्यणुकभोगोत्तरकाले । **अदृष्टान्तरेति** प्रारब्धस्य इत्यपिशब्दार्थः । **अपि विशेषा-**

RUPAK NATH
www.astrology-tantra.com

**भावाद् विभागस्याशक्यत्वाच्च । अतो द्व्यणुकस्याभावः ॥ १२ ॥**

भाष्यप्रकाशः ।

भावात् । चोऽप्यर्थे । किंच । पार्थिवद्व्यणुकाङ्गीकारः सुतरामसङ्गतः । पृथिवीपरमाणुषु स्नेहाभावेनेतरेतरासंग्रहादवयव्युत्पत्तेरशक्यवचनत्वात् । संग्राहकत्वेनाप्यणुप्रवेशाङ्गीकारे तु त्र्यणुकचतुरणुकताया एवापत्तेरिति । एवं च ह्रस्वपरिमण्डलाभ्यां परमाणुभ्यां जायमानं द्व्यणुकं महद् दीर्घवद् वा स्यात् । उभयथापि न, तज्जनकं कर्मापि न । अतः स्वरूपविरोधाद्धेत्वभावाच्च तदभावो द्व्यणुकस्याभाव इति सूत्रयोरन्वयः । तथा च द्व्यणुकाभावात् परमाणुकारणवादोऽसङ्गत इत्यर्थः । ननु भवत्वेवं, तथापि, 'अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः' इति श्रीभागवते संज्ञाभेदेन द्व्यणुकस्याङ्गीकृतत्वात् कथं तद्विरोधः साधनीय इति चेत् उच्यते । तत्र हि 'चरमः सद्विशेषाणामनेकोऽसंयुतः सदा । परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः' इति परमाणुलक्षणे सदा असंयुत इत्यनेन तत्संयोगानङ्गीकारात् संयोगजन्यद्व्यणुकाभावेपि ततः स्थूलभूतत्र्यणुकत्रसरेण्वादिविभागजन्यद्व्यणुकप्रतिषेधाभावेनाविरोधात् । श्रौते पौराणे च दर्शने स्थूलादेव कारणात् सूक्ष्मस्य कार्यस्य विभागेनादावुत्पत्तेः ।

रश्मिः ।

भावादिति । तथा च विभागस्याशक्यत्वाद्विशेषाभावादित्यपि भाष्यार्थः । भाष्ये चकारोप्यर्थ इति पदार्थसंभावनार्थकत्वात् । चोप्यर्थ इति पूर्वेण । अतो द्व्यणुकस्येत्यादिभाष्ये विशेषमाहुः किंचेति । स्नेहेति अस्य जलमात्रवृत्तित्वेन तथा । नैमित्तिकं स्नेहं संगृह्यैव परमाणुः परमाणुं प्रतीत्यपि न । द्व्यणुके स्नेहांशाधिक्यात्त्र्यणुकतापत्तिः स्नेहाधिक्ये चतुरणुकतापत्तिरित्याहुः संग्राहकत्व इति । नन्वणुप्रवेशो जलपरमाणुप्रवेशो वा वाच्यः स चासंगतः । विशेषरूपपदार्थैस्तदसंभवादिति चेन्न । त्वया विशेषपदार्थखण्डनात् । जलपरमाणुप्रवेशे द्व्यणुकातिरिक्तकार्यभोगाभावात्त्र्यणुकादिरुक्तः । वस्तुतस्त्वग्रिमसूत्रेणास्यान्वयायुक्तत्वात्तमाहुः एवं चेति । स्वरूपेत्यादि । महद्दीर्घपरिमाणापत्त्या द्व्यणुकस्वरूपविरोधाद्धेतोरसमवायिकारणस्य संयोगस्याभावाच्चेत्यर्थः । संज्ञेति अणुसंज्ञाया भेदेन । चरम इति । वाक्यार्थस्तु स परमाणुर्विज्ञेयो यः सद्विशेषाणां चरमः सतो घटादेर्विशेषाणामवयवानां मध्ये चरमो यस्य पुनरवयवो नास्ति, अनेकः समुदायावस्थां न प्राप्तः । असंयुतः कार्यावस्थां न प्राप्तः सदा । द्व्यणुकस्य त्र्यणुकादुत्पत्तिरिति वक्ष्यते । ऐक्यभ्रमश्च नृणां यतः परमाणुभिर्भवति नृणां जीवानां यैः परमाणुभिः कृत्वात्मना सह देहस्यैक्यभ्रमो भवति देहाध्यासात्मकः । ऐक्यभ्रमहेतवस्तु परमाणव एव । 'स्त्रियाः प्रविष्ट उदरे पुंसो रेतःकणाश्रयः' इति वाक्याद्यदा जीवो गर्भे प्रविशति तदान्यदा वा स्वस्य पित्रादेश्च वा धर्माधर्माभ्यां संस्कृतास्ते परमाणवोपि तत्राहारादिना प्रविश्य जीवस्वरूपेण संबध्यन्ते रजस्वलमिव तं कुर्वन्ति तदा जीवा देहमापद्यन्ते देहमध्यस्तन्ति । अत्र भ्रमजनको नेन्द्रियदोषः, सर्वेषामेव भ्रमात् किंतु विषयगतः परमाणुसंबन्धः, अतः सर्वेषां भ्रम उपपद्यते । संबन्धापगमे तु विषयदोषाभावान्न भ्रमो विद्यावताम् । यद्यपि प्रस्थानरत्नाकरे सर्वत्रेन्द्रियदोषोऽभ्युपगतः स चैतदतिरिक्तविषयः । तत इति संज्ञाभेदात् । स्थूलभूतेति त्र्यणुकमेव त्रसरेणुः तदादीत्यादिः । अविरोधादिति । तथा च त्रसरेणुः समवायी विभागोऽसमवायी तज्जनकं कालादिकं निमित्तं द्व्यणुकं कार्यमिति फलितम् ।

१. त्रयस्तु ते इति पाठः ।

RUPAKNATH DR. RUPAKNATHJI
www.astrology-tantra.c

भाष्यप्रकाशः।

'ब्रह्म वनं ब्रह्म स वृक्ष आसीद् यतो द्यावापृथिवी निष्टतक्षुः' इति 'यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति' इति तक्षणादिश्रुतेः । न चानुगतकार्यकारणभावविरोधः । जन्यद्रव्यत्वेन स्वयोग्यावयवस्थूलांशत्वेन कारणतानुगमात् । न च लोके सूक्ष्मेभ्य एव तन्तुप्रभृतिभ्यः पटादेः स्थूलस्य कार्यस्योत्पत्तिदर्शनाद् व्यभिचारः शङ्क्यः । तत्रापि तन्तुसमुदायस्यैव कारणत्वेन तं छित्त्वैव यन्त्रादिभ्यः पटाद्युद्धारात्, स्थूलादेव सूक्ष्मोत्पत्तेः । एवं तन्त्वादेरप्यंशुसमुदायरूपात् कार्पासादिरूपस्थूलांशादेवोत्पत्तिः । ते चावयवाः स्थूलादेः मूलाद् विभज्य पश्चाद्दीर्घावस्थाप्राप्त्यर्थं संयुज्यन्त इति विभाग एव मुख्यो व्यापारः । संयोगस्त्ववान्तरः । यत्र पुनर्मञ्जूषादौ लोहदन्तदारुनिर्यासादिभिः पर्यायेणावयवशो योजनम्, गृहादौ चेष्टकादिभिस्तत्रापि तत्तदवयवसमुदायाद्वान्तरावयव्युत्पत्तिस्तत्समुदायाच्च महावयव्युत्पत्तिरिति पटन्याय एव । एवं च गर्भादावपि बीजरजःसमुदायस्यैवोपादानता । स च स्थूलांश एव ।

रश्मिः।

**ब्रह्म वन**मिति वनं वृक्षसमूहः द्यावापृथ्वीसमूहो वा । **स** इति द्यावापृथ्वीभ्यां स्थूलः । **द्यावापृथिवी**ति सुपांसुलुगित्यौटो लुक् । पूर्वसवर्णो वा । **निष्टतक्षु**रिति तक्षू तनूकरणे धातुर्लिडन्तो निस्पूर्वकः । **तक्षणादी**ति । 'तथाऽसतः सत् ततक्षुः' । असतः कार्यसद्विलक्षणात्स्थूलात्कारणात्सत्कार्यं ये तक्षाणस्ततक्षुः तनूकरणं चक्रुरित्यर्थः । दन्तशृङ्गादितक्षणेन पात्रीचषकाद्युत्पत्तिं चक्रुः । तथा पौराणं दर्शनम् । **काल उपादान**मिति । स च परममहत्परिमाणवानिति स्थूलात्सूक्ष्मोत्पत्तिः । एतच्च 'गुणव्यतिकराकारः' इत्यस्य **सुबोधिन्यां** तृतीयस्कन्धे स्फुटम् । **न चान्विति** साधारणत्वमनुगतत्वम् । जन्यद्रव्यत्वेन स्पर्शवत्त्वेन कार्यकारणभावः । जन्यद्रव्यस्य कारणत्रिकवत्त्वनियमात् । स्पर्शस्य संयोगस्यासमवायित्वात् । तस्य संयोगाभावेनाभावाद्विभागजन्ये कार्ये कारणत्रिकाभावाद्विरोधः इति न च शङ्क्यमित्यर्थः । कार्याणां द्वैविध्येन जन्यद्रव्यत्वावच्छिन्नं प्रति स्पर्शवत्त्वेन कारणत्वस्य विभागजन्यकार्येषु व्यभिचारदर्शनादसिद्धमनुगतत्वं सिद्धं च संयोगविभागजकार्यसाधारणं(ण्यं) जन्यत्वे द्रव्यत्वे स्वयोग्यावयवस्थूलांशत्वमनुगतत्वं तदाहु**र्जन्यद्रव्ये**ति । स्थूलांशत्वेन घटं प्रति मृदंशेरपि कारणता स्यादतः **स्वयोग्यावयवे**ति । अवयवशब्देनैव परमाणुवारणे ह्रस्वपरिमाणमादाय परमाणुकारणवादः स्यात्तन्निवारणाय **स्थूलांशत्वेने**ति । स्थूलत्वं ह्रस्वपरिमाणे परमाणुपरिमाणेतरपरिमाणवत्त्वं तेन विभागजपरमाणुषु न कारणत्वं स्थूलांशाभावात् । **ब्रह्मण**स्तु समवायित्वम् । **कारणते**ति । किंच त्वदुक्तस्य मनसि व्यभिचारात्, मनसि संयोगाङ्गीकारात्, संयोगस्य स्पर्शानतिरेकात्, लोके संयुक्त एव स्पृष्टत्वव्यवहारात् । उष्णादयश्च संयोगस्यैव भेदाः स्फुटमिदं **प्रस्थानरत्नाकरे** । **तं छित्त्वे**ति तं तन्तुसमुदायं छित्त्वा । तेन निमित्तसंयोगवद्विभागस्यापि कार्यान्तःपातित्वम् । न चान्यदेशावच्छेदेन विभागः संयोगस्तु प्रतितन्तूनिति शङ्क्यम् । निमित्तत्वेन तद्योग्यस्थानेषूपगमात् । असमवायिलक्षणसमन्वये संयोगाद्विभागस्य मुख्यव्यापारत्वमुपपाद्याहुः **एवमि**ति । आदिशब्देन कपालादिः । **कार्पासादी**त्यत्रादिशब्देन मृदंशयादिः । **विभाग** इति सप्तम्यन्तम् । **संयोग** इति यन्त्रविशेषे खण्डवस्तुलावयवयोजनं संयोगः । कुण्डलप्रतिमादावपि सुवर्णमण्यादिसमुदायस्यैव कारणत्वम् । **यत्रे**ति । **निर्यासो** वृक्षरसः । आदिशब्देन पित्तलादिः । **इष्टकादी**त्यत्रादिशब्देनाश्मचूर्णसुधादिः । **तत्तदवयवे**ति लोहादिरूपावयवसमुदायाद्दीर्घो मञ्जूषादियोग्यो लोहादिभ्यो वान्तरावयवी तदुत्पत्तिः । तादृशावयविसमुदायाच्च मञ्जूषादिरूपमहावयव्युत्पत्तिरित्यर्थः । **एवं चे**ति । **रजांसि** परमाणवः रुधिरं च । **स्थूलांशे**ति 'पुंसो रेतःकणाश्रयः' इति वाक्याद्रेतःकणापेक्षया स्थूलांशः ।



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

अत एकस्यैकमेवोपादानम् । अन्यथा अनेकं कार्यं स्यात् । कारणगुणानामेव कार्यगुणजनकत्वेन कारणगतैकत्वैः प्रत्येकमेकत्वारम्भे बाधकाभावात् । नच तेषामनारम्भकत्वम् । द्वित्वबहुत्वादीनां तत एवारम्भात् । अत एकस्यैकमेवोपादानमिति निश्चयः । तेनादिसृष्टिगतमन्तिमं च कार्यं विभागात् । अन्यत्तु यथासम्भवं विभागात् संयोगाद्वेति दृष्टादिबलादवगन्तव्यम् । इदं यथा तथा सृष्टिभेदवादे व्युत्पादितमस्माभिः । अतोणुद्वयसंयोगजन्यद्व्यणुकस्यैवात्रासम्भवेन न कोपि दोष इति दिक् ॥ १२ ॥

रश्मिः ।

रजांसि तु स्थूलानि । अत इति । समुदायकारणत्वाङ्गीकारादेकस्य मञ्जूषादेर्गृहादेः शरीरस्य चैक एव लोहदन्तकाष्ठसमुदाय इष्टकादिसमुदायो बीजरजःसमुदायश्चोपादानमित्यर्थः । अन्यथेति मञ्जूषादेर्लोहदन्तकाष्ठानि, गृहादेरिष्टकामृत्पाषाणकाष्ठानि, शरीरस्य बीजरजःपरमाणव इत्येवमनेकेषामुपादानत्वे । कारणगतेति लोहगतमेकत्वं दन्तगतमेकत्वं काष्ठगतमेकत्वं तैरेवमन्यत्र । प्रत्येकमिति कार्यावयवगतैकत्वारम्भे । तेषामिति अनेकोपादानगतनिष्ठैकत्वानाम् । किंतु तत्समुदायगतमेकत्वमारम्भकम् । तत एवेति एकत्वेभ्योपेक्षाबुद्धिविषयेभ्यः । अत इति कार्यानेकत्वापत्तेः । ननु तन्त्वादिसंयोगेभ्य एव पटाद्युत्पत्तिसंभवेषु विभागादीनामन्यथासिद्धत्वमिति हृदिकृत्याहुर्निष्कृष्टं तेनेति ब्रह्मवनमित्यादिश्रुतिसिद्धत्वेन । अन्तिमं परमाणुरूपं द्व्यणुकविभागात् । विभागाद्वेति । दान्तचषकाद्युत्पत्तिर्दन्तादिविभागात् । घटनाशो मुद्गराघातसंयोगात् । पटोत्पत्तिस्तन्तुविभागात् । वह्निनाशो जलसंयोगात् । एवमादिसृष्टिगतं स्वकारणसंयोगात् यतः सर्वं स्वकारणे लीयत इति । अन्तिमं च स्वस्वकारणसंयोगात् यथा पृथिवी गन्धे परमाणुरूपापि, गन्धस्त्वप्सु । व्युत्पादितमिति । तन्मयात्र पूर्वमनूदितम् । परमाणुलक्षणं तु 'उभयथा च दोषात्' इति सूत्रभाष्यव्याख्याने दूषणीयम् । आरम्भवादोपि दूषित एवेति न पुनरुच्यते । अतोन्यथासिद्धत्वं निमित्तान्यासमवाय्यास्थातुर्मते न तु निमित्तान्तरत्वेनासमवाय्यास्थातॄणामस्माकं मते कारणत्वे निमित्तत्वं तदभावेन्यथासिद्धत्वमिति । एतेनाण्डजा उद्भिज्जा अपि व्याख्याताः 'पुंसो रेतःकणाश्रयः' इति वाक्यात् । उद्भिज्जा अपि बीजखातजलपृथ्व्यादिरूपस्थूलेभ्यः । स्वेदजास्तु स्थूलादेव स्वेदादुत्पद्यन्ते । संयोगाद्विभागाद्वा भवतीति पूर्वं वचनव्यक्तेः, सूक्ष्मरूपेण कार्यसत्ता न विरुध्यते पश्चात्त्वस्तिशब्दवाच्या सत्ता 'नित्यमेकमनेकानुगतं सामान्यम्' इति लक्षणाद्घटाद्युपाधिभेदेन घटत्वादिवत्स्थूलसामान्यविभागकादेवं व्यक्तिसत्तादिकं भासते । विपरिणतं वृद्धमपक्षीणं च तदेव न द्रव्यान्तरम्, तत्त्वेनाप्रत्ययात्, प्रत्यभिज्ञानुपपत्तेश्च । परिणतं दुग्धं दधि भवति स्थूलदुग्धविभक्तदुग्धपरिणामात् । चिरविभक्तदुग्धं यत्र दधि भवति तत्र स्थूलमन्यथासिद्धम् । गुरूपसत्त्यादेर्ज्ञानं प्रति नान्यथासिद्धत्वं समन्वयात्समवायित्वम् । उपदिष्टज्ञानसमन्वयान्न शिष्यज्ञानमपि कार्यम् । गुरूपसत्तिर्निमित्तकारणम् । 'इमामगृह्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त' इति वाक्येन गर्दभरशनाग्रहणमन्त्रात् । गृह्णन् रशनां 'अहो मरुच्छन्दसि' । ननु विभागेनोत्पत्तौ नाशः केन स्यात् । शृणु संयोगेन भविष्यतीति । मुद्गराद्यभिघातादिना घटादिनाशात् । अत इत्यादिभाष्यविवरणमत इत्यादि भाष्यं विवृण्वन्त उपसंहरन्ति स्म अत इति । कोपीति ननु 'परास्य शक्तिर्विविधैव श्रूयते' इति श्रुतेरुपादानभीश्वरः परमाणवश्चतुर्विधाश्च । अत एव 'जन्माद्यस्य यतः' इत्यत्र 'यतो वा इमानि' इत्यत्र यत इत्यव्ययमुक्तमिति चेन्न । यत इत्यत्र ब्रह्मरूपार्थस्य जिज्ञासाधिकरणेन सिद्धाव्ययप्रयोगस्य



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥

परमाणुद्व्यणुकयोः समवायोऽङ्गीक्रियते । स संबन्धिनोरवस्थानमपेक्ष्य, संबन्धस्योभयनिष्ठत्वात् । स च नित्यः सदा संबन्धिसत्त्वमपेक्षते । अतोऽपि न द्व्यणुकमुत्पद्यते । किंच । समवायो नाङ्गीकर्तुं शक्यः । संयोगेन तुल्यत्वात् ।

भाष्यप्रकाशः ।

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥ असमवायिनिमित्तयोर्दूषणमुखेन दूषयित्वा समवायदूषणमुखेन दूषयतीत्याशयेनाहुः परमाणुद्व्यणुकयोरित्यादि । सूत्रे तु समवायाभ्युपगमाच्च तदभाव इति पूर्वेण संबन्धः । परमाणुद्व्यणुकयोः कारणकार्ययोः समवायोऽङ्गीक्रियते काणादैः । समवायो नामायुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः संबन्धः । यथा इह तन्तुषु पटः, इह पटे शुक्लत्वम्, इह गवि गोत्वमिति । स च, कार्यकारणयोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च । अयुतसिद्धौ च तौ, ययोर्द्वयोरनश्यदेकमपराश्रितमेवावतिष्ठते । स च सर्वत्र एको नित्यो व्यापकश्चेति । एवमभ्युपगम्यमानो यः समवायः स संबन्धिनोः परमाणुद्व्यणुकयोरवस्थानमपेक्ष्य वक्तव्यः । संबन्धस्योभयस्वरूपनिरूप्यत्वेनोभयनिष्ठत्वात् । स च नित्यत्वात् सदा संबन्धिसत्त्वमपेक्षते । संबन्धि च द्व्यणुकं न सदातनम् । असत्कार्यवादाभ्युपगमेन पूर्वकाले तदभावात् । अतस्तस्य नित्यत्वाय द्व्यणुकं नोत्पद्यत इत्यङ्गीकार्यम् । तथा सति असत्कार्यवादहानिरन्यथा च

रश्मिः ।

ब्रह्मविद्योपनिषदि 'ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमाम् । यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरात्' इति प्रोक्तब्रह्मादिभ्य एवोत्पत्तेरद्वैतश्रुतिविरोधाच्चेत्येवं न कोपि दोष इत्यर्थः । दिगिति शंकराचार्यादिसर्वासंमतत्वात्पुराणाद्यसंमतत्वाच्च दिगिति ॥ १२ ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥ असमवायीति । नन्वसमवायो दूषितः, निमित्तं तु न दूषितमिति चेन्न । किंच । ईश्वरस्य निमित्तमात्रत्वे परमाणुसमवाय्यभावान्निमित्तमीश्वरः सूत्रोक्तं कथं निमित्तं तद्दूषितमेव । अभिन्ननिमित्तोपादानमिति वक्तव्यमिति निमित्तं दूषितम् । समवायो नामेति एतच्च तद्वाप्येऽस्ति संबन्धान्तम् । इह प्रत्ययानाहुः यथेति । आधाराधेये आहुः स चेति । कार्यकारणयोरित्यादि द्व्यणुकपरमाण्वोः, घटरूपयोः । पचंश्चैत्र इत्यत्र चैत्रपचनयोः घटघटत्वयोः कर्मक्रिययोः । कर्म 'सत्यं विज्ञानमानन्दं ब्रह्म' इत्युक्तश्रीयमुनाद्रूपं सत्ताक्रियात्वं राधात्वं च । क्रिया राधा । नवाध्यां व्युत्पादितं वेदटीकायाम् । विशेषपदार्थसकलपरमाण्वोश्चेत्यर्थः । एतेषु युगलेष्वयुतसिद्धत्वं विधत्ते अयुतेति । तौ अयुतसिद्धौ जानीयात् तावीदृशावित्याह ययोरिति अयुतसिद्धलक्षणम् । यथा जातिव्यक्त्योर्व्यक्तिनाशेऽनश्यदेकं गोत्वमपरगवाश्रितमेवावतिष्ठतेतो जातिव्यक्ती अयुतसिद्धे । स चेति समवायः । 'नित्यसंबन्धत्वम्' तल्लक्षणम् । संयोगेतिव्याप्तिवारणाय नित्येति । आकाशादावतिव्याप्तिवारणाय संबन्धेति । स समिति भाष्यं विवृण्वन्ति स्म एवमिति । संबन्धस्येति भाष्यं विवृण्वन्ति स्म संबन्धस्येति । स च नित्य इत्यादिभाष्यं विवृण्वन्ति स्म स च नित्यत्वादिति । तदभावात् द्व्यणुकाभावात् । अतोपीति भाष्यं विवृण्वन्ति स्म अतस्तस्येत्यादि । तस्य समवायस्य नित्यत्वाय । तथा सति द्व्यणुकस्य नित्यत्वे सति । अन्यथेति द्व्यणुकानित्यत्वे ।

RUPNATHJI ( DR.RUPAK NATH )
www.astrology-tantra.com

**संबन्धत्वात् तस्य । यथा संबन्धिनि संबन्धान्तरापेक्षा एवं समवायस्यापि । तथा सत्यनवस्थितिः ॥ १३ ॥**

---

भाष्यप्रकाशः ।

समवायनित्यत्वहानिरित्युभयतःपाशा रज्जुः । अथ स नित्यत्वात् परमाणुष्वेव तिष्ठन् पश्चाद् द्व्यणुकेन संबध्यत इत्युच्यते तर्हि तस्य तदानीं सत्तायां प्रमाणं वक्तव्यम् । न तावल्लौकिकं प्रत्यक्षम् । परमाणूनामेवाप्रत्यक्षत्वेन तद्धर्मस्यास्य सुतरां तथात्वात् । नापि योगिनाम् । कणादादिव्यतिरिक्तैर्मुनिभिरनङ्गीकारात् । कणादप्रत्यक्षस्य वादकवलितत्वात् । नाप्यनुमानम् । तत्साधकस्य लिङ्गस्याभावात् । नापि शब्दः । सर्ववेदादिवेत्तृणामपि मुनीनां तादृशश्रुतिपुराणवाक्यानुपलम्भात् । नाप्युपमानम् । तत्सदृशस्य संबन्धान्तरस्याभावात् । किंच । सदृशान्वेषणे संयोगस्तथा वक्तव्यः । तदापि समवायो नाङ्गीकर्तुं शक्यः तत्र तुल्यत्वात् । संबन्धत्वेनापि तिष्ठतस्तस्य यथा संबन्धिनि स्थित्यर्थं संबन्धान्तरस्य समवायस्यापेक्षा, एवं समवायस्यापि स्यात् । संबन्धत्वेनात्यन्तभिन्नत्वेन च तत्तौल्यात् । ततस्तस्यापि तस्यापीत्यनवस्थितिश्च । अन्यान्यपि दूषणानि श्रीहर्षमिश्रायुक्तानि मया प्रस्थानरत्नाकरे व्युत्पादितानीति

रश्मिः ।

पाशो बन्धनसाधनम्, प्रकृते दूषणकारणम् । अग्रिमभाष्यं विवरीतुं पीठिकामाहुः अथ स इति । स समवायः । पश्चादिति द्व्यणुकोत्पत्त्यनन्तरम् । तदानीमिति द्व्यणुकोत्पत्तिपूर्वकाले । प्रमाणमिति अयुतसिद्धेष्वभावाद्वक्तव्यम् । तत्साधकेति द्व्यणुकोत्पत्तेः पूर्वं परमाणौ समवायसत्तासाधकस्य । तादृशेति परमाणूनां समवायो दृश्यते यत्र तानि तादृशानि श्रुतिपुराणवाक्यानि तेषामनुपलम्भात् । तत्सदृशस्येति समवायसदृशस्य । सादृश्यमेकत्वनित्यत्वव्यापकत्वैः सादृश्यम् । किंचेति भाष्यं विवरीतुमवतारयन्ति स्म किंचेति । तथेति संबन्धत्वेन । संयोगेनेति भाष्यं विवृण्वन्ति स्म तेनेति । तथा च सूत्रे साम्यात्तुल्यत्वात्समवायानवस्थितेर्न समवायाङ्गीकारो युक्त इति सूत्रशेषार्थः । संबन्धत्वादित्यस्य तुल्यत्वादित्यर्थ इति भाष्ये उपचारं व्यावर्तयितुं संबन्धाद्धेतोस्तुल्यत्वादित्यर्थ इति हृदि कृत्वाहुः संबन्धत्वेनेति । तस्येति संयोगस्य । समवायस्यापेक्षेति गुणगुणित्वाभ्यामिति । संयोगातिरिक्तगुणगुणिनोः स इति कल्पने गौरवात् । अस्मन्मते स्पर्शस्य संयोगानतिरेकात्स्पर्शस्य संबन्धानङ्गीकारप्रसङ्गाच्च । 'न च संयोगजाः स्पर्शजाश्च न मन्तव्याः' इत्यत्राचार्यैः संयोगभेदाङ्गीकारान्नैवमिति वाच्यम् । लोकसिद्धपुरस्कारात् । तत्तौल्यात् संयोगतौल्यात् । तथा सतीति भाष्यं विवृण्वन्ति स्म ततं इति । समवायस्यापि समवायापेक्षेत्येवं समवायसमवायस्यापि समवायापेक्षेत्यर्थः । चेति । तथा च सौत्रश्चकारोऽत्रान्वेतीत्यर्थः । प्रस्थानरत्नाकर इति शब्दखण्डे । व्युत्पादितमिति । यत्त्वयुतसिद्धलक्षणेऽपराश्रितत्वं तच्चापरसंबन्धित्वम् । तत्र कोऽसौ संबन्धः संयोगः समवायो वा, नाद्यः समवायस्थलेऽपि तस्य संभवेन समवायस्य लोपप्रसङ्गात् । प्रतियोग्यनुयोगिनोरविशेषात् । नापरः, अपराश्रितत्वस्य समवायिघटितत्वेन समवायनिरूपणे आत्माश्रयप्रसङ्गेनानिर्वाच्यत्वात्समवायासिद्धेः । वस्तुगत्या तु कार्यमात्रस्य प्रलये नाशं वदद्भिर्वैशेषिकैस्तादृशगुणक्रियाप्रतियोगिकस्य तादृशव्यक्त्यनुपयोगिकस्य च समवायस्य प्रतियोग्यादिनाशात् प्रमातॄणां जीवानां बाह्यकरणनाशाच्च प्रतीत्यभावेन कालिकादिसंबन्धेन कालादौ सत्तामप्युपपादयितुमशक्नुवद्भिर्नित्यत्वप्रतिज्ञा भज्यतेति श्रीहर्षमिश्रः । आदिशब्देनान्यमतं तदपि

www.astrology-tantra.com

भाष्यप्रकाशः ।

नात्रानूद्यन्ते । अतः समवायाभ्युपगमादपि द्व्यणुकाभाव इत्यर्थः । ननु दूषिते समवाये अयुत-सिद्धयोः कः सम्बन्धोऽङ्गीकर्तव्य इति चेत्, तादात्म्यमेवेति वदामः । कथमिति चेत्, इत्थम् । प्रत्यक्षात् यद् द्रव्यं यद्द्रव्यसमवेतं तत् तदात्मकमिति व्याप्तेः'यथा सुवर्णं सुकृतम्' इत्यादिभग-वद्वाक्याच्च कारणकार्यद्रव्ययोस्तादात्म्यं निर्विवादम् । गुणादिष्वपि विचारे शब्दादीनामाकाशा-दितन्मात्रात्वेन संख्यापरिमाणपृथक्त्वपरत्वापरत्वविभागानां सापेक्षवृत्तिकतया स्वरूपानतिरेकेण

रश्मिः ।

तत्र द्रष्टव्यम् । सूत्रार्थमाहुः अत इति । साम्यादनवस्थितेः समवायानुपगमाच्चेत्यपेरर्थः । तदभाव इति पूर्वसूत्रादनुवर्तत इत्याहुः द्व्यणुकेति । तादात्म्यमिति । तच्च समन्वयाधिकरणे लक्षितम् । इति व्याप्तेरिति । यथा घटद्रव्यं कपालद्रव्यसमवेतं तद्द्रव्यं कपालद्रव्यात्मकमित्यत्र यदि यद्द्रव्यसमवेतं तदात्मकत्वव्यभिचारि स्यात्तदा यद्द्रव्ये तदात्मकं न स्यादिति तर्को व्याप्ति-शोधकः । कारणेति धर्मादिः । उपजीव्योपजीवकभाव इतिवत् । गुणगुणिनोरित्याद्युक्तेषु तादात्म्य-माहुः । यद्वा यद्ययं वह्निमान्न स्याद्धूमवान्न स्यात् कारणं विना कार्यानुत्पत्तेः । कार्यं च यदि क्वचित्कारणं विना भविष्यति । अहेतुक एव वा भविष्यतीतिवद्वा । गुणगुणिनोरित्याद्युक्तेषु तादात्म्यमाहुः गुणादिष्वपीति । स्वरूपेति घटे दृष्टे सति पूर्वोक्तानां गुणानां घटस्वरूपानतिरेके-णानुभवो दृश्यते । यथैको घटः परिमित एतद्देशात्पृथक्सामीप्येनास्मादपरोऽस्माद्विभक्त इति । यदि स्वरूपा-तिरिक्ततया गुणता स्याद्रूपो घट इति प्रतीत्यनुल्लेखवदेको घट इत्यादिप्रतीत्यनुल्लेखः स्यात् । उल्लेखस्तु रूपवान् रूपीत्येवम् । तस्माद्रूपमर्थजातिः । एते तु स्वरूपे निविशन्ते । एकत्ववानिति प्रतीतिसत्त्वे एक इति प्रतीतेः । एवमन्याः प्रतीतय उन्नेयाः । किंच । सापेक्षावृत्तिर्वर्तनं येषां तथाविधाश्च । नहि रूपादीनां सापेक्षावृत्तिरस्ति एतदपेक्षया नील इति । या तु स्वल्पनीलमपेक्ष्यैष नीलोऽधिक इति प्रतीतिः सा तु नीलस्याधिक्यं सापेक्ष्यमिति बोधयतीति न दोषः । अन्यथैतादृशाधिक्यमपि गुणान्तरं स्यात् । न च स्वाश्रयसमवेतत्वरूपपरंपरासंबन्धेनात्रापि परिमाणात्मकाधिक्यमिति वाच्यम् । नीले आधिक्यप्रतीतेर्बाधकाभावाच्च । न च गुणे गुणानङ्गीकार इति नैवमिति वाच्यम् । स्वाश्रया-धिकदेशवर्तिन्यां प्रभायां गुणाधिकस्यावश्यकत्वात् 'गुणाद्वा लोकवत्' इति सूत्रभाष्ये स्फुटी-करिष्यते । अथवा सापेक्षा तद्द्रव्यमेवापेक्ष्य वृत्तिर्वर्तनं सत्ता द्रव्यनाशे तु नाश इत्येवंरूपया सापेक्षि-कवृत्तिकतयेवेत्यर्थः । तथा च संख्यादयः स्वरूपानतिरेकवन्तः स्वरूपसत्त्वेऽसत्त्वे सति स्वरूपनाशे नाशात्, कम्बुग्रीवादिमत्त्ववत् । व्यतिरेके रूपादिमदित्यनुमानं फलितम् । ननु व्यतिरेके हेतुः साधारण इति चेन्न । आमघटादौ रूपपरावृत्तिदर्शनेन विशेष्याभावप्रयुक्तो हेत्वभाव इति । एवं शब्दरसगन्धस्पर्शानां परावृत्तिरत्र द्रष्टव्या । संख्यादयस्तु न तथा । आमघटे दृष्टानामेवैकत्वसंख्या-मध्यमपरिमाणयोर्निरूपितपृथक्त्वपरत्वापरत्वविभागानां पक्वे घटेऽप्यनुभवात् । न चैवं रूपादयो भवन्ति । अतः संख्यादयो घटस्वरूपानतिरेकवन्तः । रूपादयस्तु स्वरूपातिरेकवन्तः । न च संयोगाभावो विभागः विभागाभावः संयोगः किं न स्यादतो विनिगमनाविरहादुभयं मन्तव्यम् । प्रस्थानरत्नाकरे तु कारणकोटिसमास्युपान्ते पृथक्त्वमाविर्भावेन्तर्भावयांबभूवुः । अस्मात्पृथगि-तिव्यवहारसाधकत्वेनाविर्भावातिरेके मानाभावात् । शिरोमणिस्तु पदार्थतत्त्वविवेचनाख्य-ग्रन्थे गुणवृत्तितया संख्या पदार्थान्तरमित्याह । न चैकं रूपमितिप्रत्ययो भ्रमः । बाधकाभावात् । एकार्थसमवायप्रत्यासत्त्यैकं रूपमिति प्रत्यय इति चेत् विलक्षणाभ्यां समवायैकार्थसमवायाभ्यामविलक्ष-



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

रश्मिः ।

पत्त्यास्तद्वत्ताप्रतीतेरसंभवात् । नन्वेतादृशानुभवे मानाभाव इति चेन्न । घटत्वादावेकत्वैकार्थसमवाया-देकं घटत्वमितिवद्द्वौ घटत्वमिति प्रत्ययापत्तिः । द्वौ घटावित्यत्र तादृशसंबन्धेन द्वित्वस्य घटत्वे वक्तुं शक्यत्वात् । यत्तु घटत्वे घटत्वमित्यादिप्रत्ययप्रसङ्ग इति रघुदेव एतद्व्याख्यायामाह तन्मन्दम् । घटत्वस्यैकत्वेन घटत्वे घटत्वान्तरैकार्थसमवायाभावात् । तस्मात्संख्या पदार्थान्तरमिति द्वित्वस्य घटत्वे समवायाभावान्न द्वौ घटत्वमिति प्रत्ययः । तदिदमशोभनम् । पदार्थान्तरत्वे गौरवात् । पञ्चकं प्रातिपदिकार्थ इति पक्षे स्वरूप एवान्तर्भावात् । द्विकं प्रातिपदिकार्थ इति पक्षे विभक्त्यर्थत्वात् । तथा च पाणिनिः 'द्व्येकयोर्द्विवचनैकवचने' इति । यत्तु शिरोमणिः पृथक्त्वमपि न गुणान्तरम् । अन्योन्याभावादेव पृथक्त्वव्यवहारोपपत्तेः । तथा च घटात्पटः पृथग्भिन्न इतरोऽर्थान्तरमिति प्रत्ययः । पृथक्त्वं भिन्नत्वरूपं भेदं चावगाहत इति युक्तम् । तथा परत्वा-परत्वेऽपि न गुणान्तरे । न चैवं विप्रकृष्टसन्निकृष्टयोर्ज्येष्ठकनिष्ठयोश्च देशकृते परत्वापरत्वे कालकृते च ते आश्रित्यायमस्मात्परोऽयमस्मादपर इति व्यवहार उच्छेत्स्यतीति वाच्यम् । बहुतरसंदेशसंयोगा-ल्पतरसंयोगान्तर्भूताभ्यां विप्रकृष्टत्वसन्निकृष्टत्वाभ्यां दैशिकपरत्वापरत्वयोस्तत्प्रागभावाधिकरणक्षण-वृत्तित्वरूपतज्ज्येष्ठत्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिक्षणवृत्तितत्कालरूपतत्कनिष्ठत्वाभ्यां कालिकपरत्वा-परत्वयोश्चोपपत्तेः । परत्वापरत्वयोर्देशापेक्षा । यथा प्राचीदिशमपेक्ष्य ग्रामावधेः परं गृहमिति । द्वितीययोस्तु परस्परसापेक्षेति कनिष्ठत्वमपेक्ष्य ज्येष्ठत्वं ज्येष्ठत्वमपेक्ष्य कनिष्ठत्वमिति तथेति । पृथक्त्वपरत्वापरत्वाना-मन्योन्याभावसंयोगतत्तत्पदार्थेष्वन्तर्भावमाह तदपरिकल्प्यम् । कथमिति चेत् । विप्रकृष्टत्वसन्नि-कृष्टत्वयोः संयोगेऽन्तर्भावस्य व्याख्यातृदोषदुष्टत्वात् । यदि च बहुतरदेशसंयुक्तो देशस्तस्य संयोगो दूरतर इति परत्वमेतादृशसंयोगस्तस्यापरत्वमपीति विभाव्यते तर्हि अस्तु संयोगेऽन्तर्भावो दैशिकपरत्वा-परत्वयोर्न तावता गुणान्तरत्वेति ध्येयम् । तत्रासमवायिकारणं दिक्संयोगः । निमित्तं तु बहुतर-सूर्यसंयोगान्तरितत्वज्ञानम् । अपरत्वस्य स्वल्पतरसूर्यसंयोगान्तरितत्वज्ञानं निमित्तम् । असमवायि तु तदेवेति । कालिके तु कालसंयोगोऽसमवायिकारणम् । निमित्तं तु तत्पूर्वोत्पन्नत्वरूपज्येष्ठत्वबुद्धिः । तदनन्तरोत्पन्नत्वरूपकनिष्ठत्वबुद्धिश्च । केचित्तु बहुतरसंयोगान्तरितत्वे विप्रकृष्टत्वम् । अल्पतरसंयोगा-न्तरितत्वे सन्निकृष्टत्वम् । बहुतरस्पन्दान्तरितजन्मत्वे ज्येष्ठत्वम् । अल्पतरस्पन्दान्तरितजन्मत्वे कनिष्ठत्वमन्तर्भावयन्ति स्म । कनिष्ठेऽधिकजीविनि बहुतरसूर्यपरिस्पन्दान्तरितजन्मसत्त्वेन परत्व-व्यवहारापत्तिस्तु न भवति । कनिष्ठत्वबुद्धिकाले ज्येष्ठत्वबुद्धिस्त्वदेति तत्सापेक्षत्वात् । एवं च कनिष्ठ-जन्मकालानन्तरभूतकनिष्ठत्वबुद्धिकालमादाय स्पन्दन्यूनाधिकतयोरवसेयत्वाद् इत्यपि वदन्ति स्म । मुक्तावलीकारस्तु पृथक्त्वस्यान्योन्याभावात्मकत्वे घटात्पृथगितिवद्घटो नेत्यत्रापि पञ्चमीप्रसङ्गः । अतो यावद्द्रव्यभावि पञ्चमी सोऽर्थोऽन्योन्याभावभिन्नः पृथक्शब्दार्थ इत्याह । अत्र 'अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रेण इतरार्थग्रहणमितरस्यान्यार्थत्वेऽपि ग्रहणं प्रपञ्चार्थमित्यनेन तु पञ्चमी ग्रन्थकर्तुर्नापेक्षिता । घटान्नेति इतिवद् घटो नेत्यत्र पञ्चम्यापत्ते-रनुद्धारात्तु 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' इति सूत्रेणाभिप्रेता । अत्र तु पृथगिति शब्दग्रहणं न त्वर्थग्रहणम् । रामं रामेण वान्य इतरो भिन्न इति प्रयोगाभावात् । तथा च नञ् न पृथक्शब्द इति नञो योगे पञ्चम्यापादनं न संभवति । ननु 'अन्यारात्' इति सूत्रेण प्राप्ता पञ्चमी स्यादेवायां । अन्यो घट इतरो घटो भिन्नो घट इतिवद् घटो नेत्युपपत्तेः । अन्यारादिति सूत्रं तु पदार्थोपस्थितिकान्योन्याभावबोधकम् पञ्चमीं विदधाति न त्वन्योन्याभावानुयोगिनि । नन्वेवमपि घटो



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

**संयोगगुरुत्वद्रवत्वस्नेहानां स्पर्शेन्तर्भावेन बुद्ध्यादिप्रयत्नान्तानां मनोवृत्तितया वेगस्थितिस्थापक-**

रश्मिः ।

नेत्युपपत्तावपि घटो न पट इत्यत्र पटशब्दादन्योन्याभावप्रतियोगिनः पञ्चमी तु स्यादेवेति चेन्न । अन्योन्याभावमात्रवाच्यार्थग्रहणात् । अन्यपदस्य तत्रैव शक्तेः । नञर्थस्तु संसर्गाभावोऽन्योन्याभावश्चेत्यग्रहणमित्यपञ्चमी । न चान्यारादिति सूत्रेणैव पञ्चम्याः पृथग्योगे प्राप्तावपि पृथक्सूत्रेण पञ्चमीविधानं पृथक्त्वमन्यात्पृथगिति बोधयिष्यतीति वाच्यम् । पृथक्सूत्रस्य तृतीयाद्वितीययोरप्राप्तयोर्विधानार्थत्वात् । नव्यास्तु । अन्यारादिति सूत्रे निपातातिरिक्तान्यानाभावार्थकपदप्रयोगस्यैव पञ्चमीप्रयोजकत्वं कल्प्यते । घटो नेत्यत्र पञ्चम्यदर्शनात् । न चान्योन्याभावविशिष्टार्थ पदयोगे पञ्चमीति व्याख्यायतां घटो नेत्यत्र तु नञो नान्योन्याभावविशिष्टार्थकत्वं किंत्वन्योन्याभावार्थकत्वमिति न नञो योगे पञ्चमीति वाच्यम् । घटान्नेद इत्यत्र घटो नेत्यत्रैवान्योन्याभावार्थकभेदपदयोगे पञ्चम्यप्रसङ्गापत्तेः । अतः पूर्वोक्तमेव प्रयोजकमित्याहुः । अत्रापि घटादन्यः पट इत्यत्रान्योन्याभावानुयोगिनः पटात्कथं न पञ्चमीति प्रश्नः । किंच पूर्वतन्त्रे षष्ठस्य तृतीये पादे 'क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागः स्यात्' इत्यधिकरणे दर्शपूर्णमासयोर्व्रीह्यसंभवे नीवाराः स्वीक्रियन्ते । तत्र नीवारद्रव्यभेदात् कर्म भिद्यते, द्रव्यकर्मणोरेकत्वात् । यतो द्रव्यं कर्मणः स्वरूपम् । ततो द्रव्यान्तरत्वे कर्मान्तरत्वमिति प्राप्ते इदं सूत्रं प्रवृत्तं क्रियाणामित्यादि । क्रियाणामाश्रितत्वाद्द्रव्याणामाश्रयत्वात्तादात्म्येन भेदस्यापि सत्त्वाद्द्रव्यान्तरे नीवारद्रव्ये कर्माविभागः स्याद्द्रव्यस्य तु विभाग इति सूत्रार्थः । अत्र क्रियाक्रियावतोरभेदे जात्यादिवद्गुणवद्देवतादिभेदेपि चलति यजति दर्शपूर्णमासावनुतिष्ठतीत्येकबुद्धिवेद्यत्वं हेतुरिति पार्थसारथिमिश्रा वदन्ति । तदेकबुद्धिवेद्यत्वं चेमौ घटपटावित्यत्र व्यासज्यवृत्त्यपीति घटपटयोस्तादात्म्यापत्तिः । मैवम् । एकबुद्धिवेद्यत्वं च ययोरेकतरस्याविच्छिद्यैव वेद्यत्वं घटपटयोस्तु न भवत्यविच्छिद्य वेद्यत्वम् । कालान्तरे विच्छेदेऽयं घटस्ततोऽप्ययं पट इति बुद्धिवेद्यत्वात् । नह्येवं क्रियां द्रव्यतो विच्छेद्य जानाति कश्चित् । एवं हेतुं प्रसाध्य संख्यादिषु पक्षेषु एकबुद्धिवेद्यत्वाद्धेतोस्तत्तदाश्रयस्वरूपानतिरेकः साधनीयः । पक्षैकदेशस्तु दृष्टान्तः । सर्वमभिधेयं प्रमेयत्वादित्यत्रेव शब्दस्पर्शरसगन्धरूपाणि तु विच्छिद्य गृह्यन्त इति नाश्रयस्वरूपम् । वेदशब्दनित्यत्वेनाकाशोत्पत्तेर्वक्ष्यमाणत्वेनाकाशोत्पत्तेः पूर्वं शब्दस्य विच्छिद्य ग्रहणात् । ननु यद्ग्राहकं तदेवाकाशमस्तु यत्र गृह्यते स एवाकाशोस्तु । सत्यज्ञानानन्दातिरिक्तपदार्थाभावेन तदानीं तदतिरिक्तग्राहकाधिष्ठानयोरभावात् । स्पर्शोप्युष्णो जले विच्छिद्य गृह्यते । नहि तत्र वह्न्यवयवाः सन्ति । अंशतो वह्निनाशप्रसङ्गात् । पात्रेणान्तरितेवयवप्रवेशासंभवाच्च यतस्तत्रैव दृश्यते । रसोपि विच्छिद्य गृह्यते । कटुसंलग्नकाष्ठे कटुरसोपलब्धेः । गन्धरूपयोस्तु गुणान्तरेति सूत्रे विच्छिद्य ग्रहणं वक्ष्यते । अतः शब्दादयः पञ्चाप्यधिकदेशवर्तिनः । तर्हि संयोगादीनां तु भविष्यत्याधिक्यमित्याकाङ्क्षायां नेत्याहुः संयोगेति । स्पष्ट एव लोके संयुक्तत्वव्यवहारात्संयोगः स्पर्शः । गुरुत्वमपि स्पर्शः स्पर्शसहितेनोत्तोलनादिना तदवगतेः । द्रवत्वमपि स्पर्शः, स्पर्शेन तज्ज्ञानात् । स्नेहोपि तथा, त्वचैवावगमात् । तथाच स्पर्शेन्तर्भावेनेत्यर्थः । उक्तमेतत्स्पर्शनिरूपणे प्रस्थानरत्नाकरे । संयोगस्पर्शत्वं प्रत्यक्षसिद्धम् । गुरुत्वं तु कठिनसंयोगः । स्नेहद्रवत्वे शिथिलसंयोगौ प्रत्यक्षः । बुद्ध्यादीति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानाम् । मनोवृत्तीति 'कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव'



RUPNATHJI( DR.RUPAK NATH )
w.astrology-tantra.c

भाष्यप्रकाशः।

क्रियाणां सामर्थ्यरूपत्वेन जातेरपि व्यवहारसाधकतया स्वरूप एव निवेशेन तत्रापि तादात्म्यस्यैव स्फुटत्वात्। भावना संस्कारो विशेषाश्च प्रमाणविरहादेवानादरणीया इति न कोपि क्लेश इति दिक्॥ १३॥

रश्मिः।

इति श्रुतेः। काम इच्छा, सङ्कल्पो निश्चयः, विचिकित्सा संशयः, श्रद्धा आस्तिक्यम्, धृतिः सुखादि, धरणमप्रकाशनम्। धीर्भ्रमः। इतिशब्देन प्रकारवाचिना दृष्टद्वेषाद्या मनोधर्मा एव। एते चाध्यासेन जीवे भासन्ते। तेन रूपसंख्यापरिमाणस्पर्शविभागवत्त्वसांख्ययोगतपोभक्तिचैतन्यसत्त्वानि द्वादश पारमार्थिकानि। परत्वापरत्वान्तःकरणाध्यासप्राणाध्यासेन्द्रियाध्यासदेहाध्यासस्वरूपविस्मरणानि सप्तान्योपमर्दनीयानीत्येवमेकोनविंशगुणा जीवे न तु चतुर्दशगुणाः, ब्रह्मविद्यावतां तथैवानुभवात्। अन्यत्रान्तर्भूतानि स्पष्टप्रतिपत्तावुक्तानि। अतो न संख्याविरोधः। वेगेति। इमौ संस्कारौ। क्रियाः पञ्चविधा अपीति। सामर्थ्येति मनसो झटिति दूरगमन ईदृशो वेगो भवतीति प्रयोगवदीदृक् सामर्थ्यं भवतीति प्रयोगात्पर्यालोचनाश्रयात्। एवं शास्त्रादावेतादृशः संस्कारो भवतीति प्रयोगवदीदृक्सामर्थ्यं भवतीति प्रयोगात्। क्रिया तु प्रत्यक्षेणैव गृह्यते निष्क्रिये शरीरादौ निःसामर्थ्यं शरीरमिति सक्रिये समर्थं शरीरमिति च प्रयोगात्क्रियापि सामर्थ्यम्। सामर्थ्येन गच्छतीत्यत्रापि सामर्थ्येन कर्मणेत्यर्थः। क्रियाणां त्रिक्षणावस्थायित्वेन क्रियान्तरजन्यत्वात् सामर्थ्यरूपत्वेनेत्यर्थः। तेनैषां सामर्थ्यरूपत्वे प्रत्यक्षं प्रमाणम्। जातेरपीति। इयं गौरित्यादिव्यवहारसाधकतया आकृतेरपि व्यक्तावेव द्रव्यरूपायां निवेशेनेत्यर्थः। इदं शब्दखण्डे प्रस्थानरत्नाकरे स्पष्टम्। यथा काष्ठविकारेषु मञ्जूषास्तम्भपीठकादिषु काष्ठस्यैकविधस्य आकृत्या मञ्जूषादिव्यवहारः। तेन स्वरूपे निवेशे प्रत्यक्षमेव प्रमाणम्। स्वरूप इति पूर्वोक्तदिशा। निवेशेनेति। स्वद्रीत्यापि पञ्चैव गुणा भवन्तीति शेषः। संबन्धोयं तत्राप्यव्याहत इत्याहुः तत्रापीति। प्रमाणेति। तथा च भावनाज्ञानम्। न चैवं स्मृत्यनुपपत्तिः। 'अनुभवभिन्नं ज्ञानं स्मृतिः' इति तल्लक्षणात्। विशेषस्तु शब्दखण्डे प्रस्थानरत्नाकरे भ्रमनिरूपणानन्तरं स्मृतिनिरूपणेवसेयः। विशेषास्तु नवीनमतेपि न सन्ति। शिरोमणिरपि पदार्थतत्त्वविवेचने नाङ्गीचकार। न कोपीति। समवायघटितलक्षणादावपि समवायपदेन तादात्म्यमेवोच्यत इत्यतो न कोपीत्यर्थः। सांख्यमतदूषणावसरे पदार्था विचारिता अपि तादात्म्येपि प्रोच्यन्ते गुणाद्यन्तर्भावार्थम्। अत्र समवायदूषणेन पदार्थेन्तर्भावः स्मृतः। किंच। पूर्वाधिकरणसमाप्तौ नव तत्त्वान्युक्तानि दिक्कालयोः स्थाने प्रकृत्यहंकारौ स्वीकृत्य तेन द्रव्याणि नव। परं त्वीश्वरस्तु न तन्मतप्रतिपन्न इति भेदोऽयं स्फुटम्। आत्मवादे चोक्तं मया। मनस्तु जन्यमन्नमयं चेति क्षितौ प्रवेशः। गुणास्तु तन्मात्रात्मकाः पञ्चैव। इतरेषामन्तर्भाव उक्तः। इतरेषां यथायथमेतेष्वेवान्तर्भावात्। धर्मोधर्मोवपि कर्म। स्वर्गादिसाधनं धर्मः। तिरोहितधर्मस्त्वधर्मः नरकसाधनम्। नराणां कं सुखम्। अत्यन्तापराधिनां पश्चमोक्तनरकाणामपि सुखत्वात्। कर्म तु आत्मस्वरूपं सक्रियमप्येकमेव गमनात्मकम्। न तूत्क्षेपणादिपञ्चकम्। द्व्यणुकसमवाययोर्दूषणेनास्य स्वतन्त्रेच्छत्वपि मुनेः पर्यनुयोगानर्हत्वात्। सामान्यं त्वाकृतिरत्वस्तदपि स्वरूपम्। आनन्दमात्रकरपादमुखोदरादिरूपत्वादाकृतेः, माया वा, व्यक्तिमात्रे शक्तिरिति, आकृतिः तत्र स्थितं रूपं वा। विशेषास्तु न सन्त्यैक्यभ्रमजनकाः। विशेषास्तु सन्ति। समवायोपि न, तादात्म्यमस्ति। अभावत्व-



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## नित्यमेव च भावात् ॥ १४ ॥

## परमाणोः कारणान्तरस्य च नित्यमेव भावात् सदा कार्यं स्यात् ॥ १४ ॥

भाष्यप्रकाशः ।

**नित्यमेव च भावात्** ॥ १४ ॥ तदभाव इतीहाप्यनुषज्यते । व्याकुर्वन्ति परमाणो-

रश्मिः ।

स्त्वत्यन्ताभावः । उपदेशे सत्त्वात् तिरोभावे निविशते । इह भूतले घटो नास्तीत्यादिप्रतीतीनां तिरोभावावगाहित्वात् । तिरोभाव एव नास्तीति व्यवहारदर्शनात् । घटाभावाभावस्य घटात्मकत्वेन संकीर्णत्वेऽप्यभावमुखप्रतीत्या तिरोभावत्वाव्यभिचारात् । अभावपदेनापि भावप्रतियोगिकपृथक्त्ववानेव प्रतीयते । न भावः अभावः इति भावभिन्नः अभाव इति । स च निषेधपूर्वको भाव एवान्यथा ह्यसत्त्वात् खपुष्पवन्निःस्वभावः स्यात्तथा सति न प्रतीयेतैव । अतः प्रतीत्यनुरोधाद्भावान्तरविलक्षणस्तिरोभावरूपब्रह्मशक्तिरूप एव । 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्यात् । तिरोभावस्तु वर्तमानस्य वस्तुनो दर्शनाभावप्रयोजक इति विद्वन्मण्डने स्फुटम् । ध्वंसप्रागभावौ तु समवाय्यवस्थाविशेषस्वरूपौ । तिरोभावसहकृता कार्यस्थितिप्रतिकूलावस्था ध्वंसः । तादृशी कार्याविर्भावानुकूलावस्था प्रागभावः । तदतिरिक्ते मानाभावात् । अवस्था च समवायिनो ग्राह्या । तथा च प्रत्ययः कार्यस्थितिप्रतिकूलां कारणावस्थां पश्यत एवेह घटो ध्वस्त इति । कार्यजननानुकूलां कारणावस्थां पश्यत एवेह घटो भविष्यत्यत्र घटप्रागभाव इतीति । अन्योन्याभावस्तु प्रतियोगितावच्छेदकारोपापवादः । अयं घटः पटो नेत्यत्र पटत्वावच्छिन्नप्रतियोगिताकभेदवान्घट इति बोधमुत्पादयन् प्रतियोगितावच्छेदकपटत्वं घटे नास्तीत्येवमारोप्यापवदतीत्यत्यन्ताभाव एव । लक्षणान्तरे तु स्पष्ट एवात्यन्ताभावः । 'प्रतियोगितावच्छेदकतानियामकसंबन्धावच्छिन्नप्रतियोगितावच्छेदकात्यन्ताभावः सः' इति लक्षणम् । घटे समवायेन पटत्वं नास्तीति प्रत्ययः । तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वमन्योन्याभावत्वं यदि तदा त्वतिरिक्तः । परं तु घटस्तादात्म्येन पटो नेत्यत्र पटतादात्म्यप्रतियोगिकाभावे पर्यवसानात्तादात्म्यरूपप्रतियोगितिरोभावसंकीर्णघटरूपानुयोगिस्वरूपविषयत्वात्स्वरूप एव निविशते । न च भवेदेतदेवं यदि पटतादात्म्यं घटे नेति बोधः स्यात् । बोधस्तु पटप्रतियोगिकाभाववान्घट इत्यापाद्यते तदा पृथक्त्वमन्योन्याभावः । एतच्चोपपादितं प्रस्थानरत्नाकरे प्रत्यक्षखण्डेऽभाववादे निपुणतरमुपपादितम् । अन्योन्याभावस्य भावत्वं संसर्गाभावत्वं चेति वदन् शिरोमणिरप्येतदनुमेने । केचित्तु प्रागभावमपि न मन्यन्त इत्यलम् । अपि च तमः पदार्थान्तरं न तेजःसामान्याभावः । 'स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः' इति वध्यघातकभावात् । विशेषस्त्वन्धकारवादे द्रष्टव्यः । प्रतिबिम्बोऽपि पदार्थान्तरः प्रतिबिम्बवादे स्फुटः । तन्न्यायेन गन्धर्वनगरादेरपि मायिकत्वस्य तुल्यत्वात् । 'अपरेयमितस्त्वन्याम्' 'जीवभूताम्' इति गीतायाम् । जीवस्य व्यापकत्वं तु न भवति । जीवव्यापकत्वखण्डनवादे खण्डनात् । किंच गन्धोऽधिकदेशवृत्तिः, चम्पकादौ तथादर्शनात् । विशेषस्तु 'गुणाद्वा' इति सूत्रे वक्ष्यते । पृथिव्यादिपञ्चमहाभूतैकादशेन्द्रियाणां च लक्षणानि प्रमेयप्रकरणे प्रस्थानरत्नाकरे सन्ति । इन्द्रियाणां त्वन्तर्भावोहंकारे । 'वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् । तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः' इत्येकादशे भगवद्वाक्यात् । एतच्चतुर्थपादे विशिष्य वक्तव्यम् । विस्तरभयात् तर्काप्रतिष्ठानादित्यलमिति ॥ १३ ॥

**नित्यमेव च भावात्** ॥ १४ ॥ कारणान्तरस्य चेति भाष्यं विवृण्वन्ति स्म



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.c

रूपादिमत्त्वाच्च विपर्ययोऽदर्शनात् ॥ १५ ॥

यद् रूपादिमत् तदनित्यम् । परमाणोरपि रूपादिमत्त्वाद् विपर्ययः ।

भाष्यप्रकाशः ।

रित्यादि । सामग्रीसमवधाने हि कार्यावश्यंभावनियमो लोके दृष्टः । प्रकृतेऽपि परमाणोः समवायिन ईश्वरेच्छादृष्टयोर्निमित्तयोश्च सृष्टिप्राक्काले सत्त्वात्तज्जन्यस्य परमाणुकर्मणस्तज्जन्यस्य संयोगस्य चाभावो वक्तुमशक्य इति कारणान्तरस्य सर्वस्य विद्यमानत्वाद् द्व्यणुकं सदा स्याद्-तोऽपि जन्यद्व्यणुकाभावात् परमाणुकारणवादो न संगत इत्यर्थः ।

अन्ये तु परमाणवः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा अनुभयस्वभावा वा । आद्येऽविरतं सर्गोपत्तिः । द्वितीये तु सर्वदा तदभावापत्तिः । तृतीये तु विरोधः । चतुर्थे तु पूर्वोक्तरीत्या निमित्तस्य नित्यसंनिधानान्नित्यप्रवृत्तिप्रसङ्गः । तदतन्त्रत्वे नित्यनिवृत्तिप्रसङ्ग इत्याहुः । सोऽयं स्वभावविकल्पो वैशेषिकानभ्युपगतत्वादाचार्यैरुपेक्षितः ॥ १४ ॥

रूपादिमत्त्वाच्च विपर्ययोऽदर्शनात् ॥ १५ ॥ एवं संयोगजन्यद्व्यणुकदूषणेन कार्यद्वारा परमाणुकारणवादे दूषितेऽपि यावत् तेषां नित्यत्वं न दूष्येत तावदनन्यथासिद्धनियतपूर्ववर्तित्वरूपस्य तदीयस्य कारणलक्षणस्य परमाणुष्वभिमाने पुनः स वाद उत्तिष्ठेदिति तदभावाय परमाणुनित्यत्वदूषणेन दूषयतीत्याशयेन सूत्रं व्याकुर्वन्ति यदित्यादि । 'सदकारणवन्नित्यम्' इति हि काणभुजं चतुर्थाध्यायस्थं लक्षणम् । तदत्र विपरीतव्याप्तिप्रदर्शनेन सत्प्रतिपक्षोत्थापनाद् दूष्यते । परमाणवो नित्याः, सत्त्वे सत्यकारणवत्त्वादाकाशादिवदिति साधने, अनित्या रूपादिमत्त्वाद् घटादिवदिति प्रतिसाधनस्य सत्त्वादिति । एतेनैव स्थौल्यस्यापि सिद्ध्या परमाणुतापि दूषितैव । तेषां मते रूपादिक्रमेणैव गुणानामुपक्रान्तत्वात्

रश्मिः ।

ईश्वरेच्छेति । अदृष्टं च जीवस्य । तज्जन्यस्येति कर्मजन्यस्येत्यर्थः । भावादित्यस्य विवरणं अभावो वक्तुमशक्य इति । अभावपदस्वविवरणं तु परैर्दूषणानामुद्भावितानां सत्त्वाद्भावे संदेहात् । सदेति । तदभाव इत्यतस्तदित्यनुवृत्तेरिहानुषज्य सदेत्यावृत्त्या योजनीयम् । तत्कार्यं द्व्यणुकमपीति भाष्ये स्यादिति क्रियापदम् । अधुना तु तदभाव इत्यनुषज्यत इति पूर्वोक्तमनुषङ्गेण सहार्थमाहुः अतोपीति । अन्य इति शंकराचार्यादयः सर्वे । निमित्तस्य ईश्वरेच्छादृष्टरूपस्य । तदतन्त्रत्वे इति निमित्ताऽतन्त्रत्वे । उपेति । तेनाशङ्काः सिद्धा एवानूद्यन्ते सर्वत्रेति ध्वन्यते ॥ १४ ॥

रूपादिमत्त्वाच्च विपर्ययोऽदर्शनात् ॥ १५ ॥ कार्यद्वारेति द्व्यणुकरूपकार्याभावं द्वारीकृत्य । तदीयस्येति । स्वस्य तु आविर्भावकशक्त्याधारत्वस्य कारणलक्षणस्येश्वरेभिमान इति भावः । लक्षणमिति नित्यत्वलक्षणम् । तदत्रेति व्याप्तिबोधकं सूत्रम् । प्रकृतसूत्रे सत्प्रतीति 'साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः' । न्यायसूत्रं व्याचक्षते परमाणव इति । यत्र सत्त्वे सत्यकारणवत्त्वं तत्र नित्यत्वमिति व्याप्तिः । विपरीतव्याप्तिमाहुः अनित्या इति । एतेनेति रूपादिमत्त्वेन हेतुना । सिद्ध्येति परमाणवः ह्रस्वाः रूपादिमत्त्वात्, शकलवदित्यनुमानेन सिद्ध्या । दूषितैवेति ह्रस्वपरिमाणाङ्गीकारात् तदनङ्गीकारे बाधावरोध इति । ये तु परमाणुगतवायुत्वतेजस्त्वादेः पक्षतावच्छेदकत्वमाहुस्ते तत्प्रयुक्तं गौरवं न विदुः । ननु नैवं व्याप्तिः संभवति रूपादिमत्त्वाभाववति वायौ भागवतोक्तरीत्याऽनित्यत्व-



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

अनित्यत्वमपरमाणुत्वं च । नच प्रमाणबलेन तदतिरिक्तेऽव्याप्तिरिति वाच्यम् ।

भाष्यप्रकाशः ।

सूत्रे रूपादीत्युक्तम् । तेन वायुपरमाणुष्वपि न व्याप्त्यभावः । नन्ववयवावयविसंबन्ध-स्तावदनुभूयते । स यदि निरवधिः स्यान्मेरुसर्षपयोः परिमाणभेदो न स्यात् । अनन्तावयवा-रब्धत्वाविशेषात् । न च परिमाणप्रचयविशेषाधीनो विशेषः स्यादिति शङ्क्यम् । संख्या-विशेषाभावे परिमाणप्रचययोरप्यशक्यवचनत्वात् । न चैवं विशेषाभ्युपगमेऽप्यवयवप्रलयस्य शक्यवचनत्वात् सावधित्वं शङ्क्यम् । अन्त्यस्यावयवस्य निरवयवत्वाभ्युपगमे तदवयवविभाग-स्याभावेन तज्जनकस्यान्यस्य सजातीयस्य वक्तुमशक्यतया अजन्यत्वे, अजन्यभावत्वेन स्थान-श्वरत्वेन व्याप्त्या प्रलयस्यैवासंभवात् । अतो निरवयवमेव द्रव्यमवधिरिति मन्तव्यम् । एवं प्रमाणबलेनावगते सति तदतिरिक्त एव रूपादिमत्त्वानित्यत्वयोर्व्याप्तिरिति न प्रतिसाधनदोष इत्याशङ्कायामाहुः न चेत्यादि । स्यात् तदतिरिक्ते व्याप्तिर्यदि प्रमाणं बलवत् स्यात् । तदेव

रश्मिः ।

सत्त्वेनान्वयव्यभिचारात् इति चेत्तत्राहुः रूपादीति रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चेति न्यायोक्ता प्रणाड्याश्रिता आदिपदात् । न तु 'शब्दस्पर्शौ रसो गन्धो रूपं चेत्यर्थजातयः' इति भगवद्वाक्यो-क्तप्रणाडी । इत्युक्तमिति । तथा च स्पर्शस्य भावे सत्त्वेन रूपादिमत्त्वादनित्यत्वं वायाविति नान्वयव्यभिचार इति भावः । तेनेति सूत्रे रूपादीति शब्दे स्पर्शस्यापि संग्रहेण । अधिकरणस्या-यमर्थ इत्यादिना मुक्तावल्युक्तं परमाणुसाधनमनुवदन्ति । इदानीं दिनकरो महादेवनामा यदाह तत्परमाणुसाधनमाशङ्कन्ते नन्ववयवेति । अनन्तेति । तथा च परमाण्वभावे एवं परमाणु-कारणत्वे त्वीश्वरातिरिक्तकारणे इच्छायास्तावत्परमाणुसंयोगविषयिणीत्वेन नोक्तदोष इति भावः । न च परिमाणेति मेर्ववयवपरिमाणं महत् । सर्षपपरिमाणं ह्रस्वम् । मेर्ववयवसंयोगो-ऽशिथिलः प्रचयः । सर्षपावयवसंयोगः प्रचयः शिथिलः, अन्तःस्नेहदर्शनात् । विशेष इति अवय-विपरिमाणविशेषः । मेरुसर्षपयोः परिमाणमवयवसंख्याजन्यं न तु प्रचयपरिमाणजन्यमिति मत्वा तावदाह संख्येति । विशेषेति नित्यं परमाणुमवधिं मत्वा मेरुसर्षपयोः परिमाणभेदरूपविशेषा-भ्युपगमे । प्रलयस्य नाशस्य । सावयवस्त्वमिति अवयवावयविसंबन्धस्य नश्यद्वयविपर्यन्तत्वम् । अवयवावयविसंबन्धस्य विनश्यदवयवोऽवधिरिति यावत् । एवं च न मेरुसर्षपयोः परिमाण-भेदानुपपत्तिरिति भावः । निरवयवस्येति । सावयवत्वे तु कार्यद्रव्यत्वापत्त्यावयवधाराप्रसङ्ग इति भावः । तज्जनकस्येति अन्त्यावयवजनकस्य । व्याप्त्येति अनश्वरोऽजन्यत्वादित्य-त्राकाशादौ व्याप्त्यान्त्यावयवनाशस्यैवेत्यर्थः । अत इति नित्यत्वात् । द्रव्यं परमाण्वाख्यम् । तदन्यम् । प्रमाणेति व्याप्तिज्ञानरूपप्रमाणवत्त्वेन । तदतिरिक्त इति परमाण्वतिरिक्ते । व्याप्तिरिति । परमाणुषु तु विपक्षत्वेनान्वयव्यभिचार इति भावः । (न प्रतीति अन्व-यव्यभिचारात्) न प्रतीति न प्रतिसाधनं प्रतिपक्षस्तत्संबन्धी सत्प्रतिपक्षे दोषः प्रतिपक्षरूपः । आशङ्कायामिति स्वयमनूदितायाम् प्रतिविधानमाहुरित्यर्थः । व्याप्तिरिति । अन्वयव्यभि-चारेऽपि लक्षयति । भाष्यस्य दर्शनमनुमितिस्तदभावादित्यर्थं मत्वाहुः न हीति । नित्यत्व-व्याप्यसदकारणवत्त्ववन्तः परमाणव इति ज्ञानं परामर्शः । तज्जन्यं ज्ञानं परमाणवः नित्यत्ववन्त इति ज्ञानमनुमितिः । एवं च परमाणुषु नित्यत्वप्रत्यक्षानुमित्योरभावाद्रूपादिमत्त्वेनानित्यत्वेन व्याप्तेरन्वयव्य-

१. सावधित्वमितिप्रकाशः ।



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.c

अदर्शनात् । कार्यानुपपत्तिः श्रुत्यैव परिहृता ॥ १५ ॥

भाष्यप्रकाशः ।

तु नास्ति । कुतः । अदर्शनात् । न हि परमाणुर्दृश्यते, येन भवदुक्तस्याकारणवत्त्वस्य हेतोः पक्षधर्मतावसीयेत । न च तस्य पक्षधर्मतायां अज्ञातायां परमाणुषु नित्यत्वानुमितिः संभवति । व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वादनुमितेः । ननु कार्यद्रव्यत्वसावयवत्वयोः समव्याप्त्या क्वचिन्मूलकारणरूपस्यावधेरवश्यं परामर्शनीयत्वादुक्तरीत्याऽवधित्वेन परमाणुसिद्धौ तस्याजन्यतायाश्च सिद्धौ कार्यलिङ्गकानुमानमेव तत्र प्रमाणमित्यदर्शनेऽप्यदोष इति चेत् तत्राहुः कार्येत्यादि । यदि हि कार्यानुपपत्तिः स्यादेवं कल्पनाप्यनुमन्येत सा तु नास्ति । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः', 'इदं सर्वं यदयमात्मा', 'तज्जलान्' इत्यादिश्रुत्यैव तत्परिहारात् । कार्यवैजात्यादीनां बाधकानां न विलक्षणत्वाद्यधिकरणैः प्रागेव परिहाराच्च । अतः सत्प्रतिपक्षत्वाच्च तदनुमानेन परमाणोस्तन्नित्यत्वस्य वा सिद्धिरित्यसंगतः परमाणुकारणवाद इत्यर्थः । किंच । यदिदं नित्यस्य सामान्यलक्षणे सत्पदं तदप्यनर्थकम् । कारणावस्था-

रश्मिः ।

मिचाराभावात्प्रतिसाधनाहितः सत्प्रतिपक्षत्वदोषस्तदवस्थ इत्यर्थः । दृश्यत इति । उद्भूतरूपाभावादिति भावः । उद्भूतरूपत्वेन प्रत्यक्षत्वेन कार्यकारणभावः । अकारणवत्त्वस्येति । सत्त्वे सतीति त्यक्तुं शक्यमित्यभिप्रायः । वक्ष्यन्ति चात्रैव । तस्येति हेतोः । व्याप्तिविशिष्टेति व्याप्तिविशिष्टस्य हेतोः पक्षधर्मतायाः ज्ञानमिति षष्ठीतत्पुरुषौ । अनुमितेरिति । एवं चाजन्यभावत्वेनानश्वरत्वेन व्याप्तिरपि न । परमाणुषु द्व्यणुकजन्यत्वात् । तत एव तज्जनकस्य सजातीयस्यान्यस्य वक्तुमशक्यतयेति पूर्वोक्तहेत्वसिद्धिः । व्याप्तौ भावपदमपि न देयम्, प्रागभाववारणार्थकम् । प्रागभावस्यैवाभावादिति स्पष्टमाकरे । मेरुसर्षपयोर्न परिमाणभेदाभावापत्तिः । सर्षपस्य सर्षपपरिमितमेरुदेशानन्तावयवसमसंख्याकावयवत्वदर्शनेन मेरोस्तदाधिक्यात् । कार्यस्य निरवधित्वेऽपि तादृशमेरुदेशादारभ्य सर्षपमेरुदेशयोः परिमाणभेदो न स्यादिति वक्तव्यत्वात् । तादृशयोस्तु परिमाणभेदाभावेन तदापादनं न स्यादित्यलं गिरा । समेति त्र्यणुकं सावयवं, कार्यद्रव्यत्वात् । द्व्यणुकं सावयवम्, कार्यद्रव्यत्वात् । परमाणुः सावयवः कार्यद्रव्यत्वाद्घटवदिति समा त्र्यणुकादिपक्षादिषु या व्याप्तिस्तया । उक्तरीत्येति अन्त्यस्यावयवस्येत्याद्युक्तरीत्या । कार्यलिङ्गकेति अनुपदमुक्तमनुमानम् । कार्यद्रव्यत्वं तु शब्देनानुमित्या च द्व्यणुके ज्ञातम् । परमाणुत्र्यणुकं तु इदानीं स्वरूपासिद्धमिति नानवस्थाजनकमिति भावः । अदर्शन इति पक्षहेत्वोरदर्शनेप्यलौकिकप्रत्यासत्त्या दर्शनान्न दोष इत्यर्थः । कार्यानुपपत्तिरिति परमाणून्तरा महापृथ्व्यादेः कार्यस्यानुपपत्तिः । कल्पनेति परमाणूनां नित्यत्वेन समवायित्वेन कारणत्वकल्पना । एवमाकाशवायुतेजोप्पृथ्वीनां कार्याणामात्माकाशवायुतेजोप्सु समवायित्वमुक्त्वा सर्वसमवायित्वमात्मन आहुः सृष्टिभेदेन इदं सर्वमिति । तत्परीति कल्पनापरिहारात् समवाय्याकाङ्क्षापरिहाराद्वा । बाधकानामिति ब्रह्मणः समवायित्वे बाधकानाम् । प्रागेवेति प्रथमचरणे । अत इति प्रतिपक्षस्यादुष्टत्वात् । तदन्विति । परमाणवः नित्या इत्याद्युक्तानुमानं, तत् अनुमानं तदनुमानं तेन । एवं भाष्यं व्याख्यायोक्तं नित्यलक्षणं दूषयन्ति स्म किंचेति । कारणेति । इह कपाले घटो भविष्यतीति प्रतीतेस्सत्त्वात् । न च कारणावस्थाधिकरणिका प्रतीतिः तद्विषयिणीति नाधेयाभावं विषयीकरोतीति कथं भावावस्थाविशेषत्वमिति वाच्यम् । अभावबोधकपदाभावेन तथावसायात् । अतोधुना कपाले घटो



www.astrology-tantra.com
RUPNATHJI( DR. RUPAK NATH )

भाष्यप्रकाशः ।

तिरिक्तस्य प्रागभावस्य निरूपयितुमशक्यत्वेनाभ्युपगमैकशरणतया तद्व्यावृत्त्यर्थस्य तस्य व्यर्थत्वात् । किंच । सत्त्वमपि न सत्तायोगित्वम् । सामान्यादित्रयस्यासत्त्वप्रसङ्गात् । न च तेषां सत्तासामानाधिकरण्यमेव सत्त्वमिति युक्तम् । सत्तायां तदुभयाभावेन तस्या असत्त्वे पूर्वोक्तानां सर्वेषामेवासत्त्वप्रसङ्गात् । न च सदिति व्यवहारविषयत्वं सत्त्वमिति न कोऽपि दोष इत्यपि युक्तम् । घटाभावोऽस्तीत्यभिलापस्याभावेऽपि दर्शनेन प्रागभावव्यावर्तकस्य सत्पदस्यानर्थक्यप्रसङ्गात् । यत् पुनर्नित्यत्वसाधकं सूत्रान्तरम्, 'अनित्य इति विशेषतः प्रतिषेधभावः' इति । अर्थस्तु—विशेषस्य नित्यस्य प्रतिषेधस्तदा स्याद् यद्यनित्य इति प्रत्ययः शब्दप्रयोगश्च न स्यात् । नञ उत्तरपदार्थनिषेधकत्वात् । अतः प्रतिषेधसत्त्वात् कस्यचिन्नित्यत्वसिद्धिरिति । तदपि नित्यस्य कस्यापि साधनेनैव चरितार्थत्वान्न परमाणुनित्यतां साधयितुमलम् । यदपि 'अविद्या' इति सूत्रान्तरं, तदर्थस्त्वेवं तैर्व्याख्यायते । परमाणुरनित्यो मूर्तत्वाद्, रूपादिमत्त्वाद्, एवं

रश्मिः ।

नास्तीत्यार्थिकस्याभावबोधकस्य नाभावबोधकत्वमनङ्गीकारात् । तद्व्यावृत्त्यर्थस्येति । 'सदकारणवन्नित्यम्' इत्यत्राकारणवत्त्वेन प्रागभावस्य नित्यत्वापत्त्या सत्त्वेनेन तद्व्यावृत्तिः । प्रागभावे सत्त्वाभावात् । व्याख्यानं दूषयन्ति स्म किं च सत्त्वमिति । सत्तायोगित्वं सत्तासंबन्धित्वम् । सामान्यादीति सामान्यसमवायाभावरूपस्य त्रयस्य । असत्त्वेति 'सत्तावन्तस्त्रयस्त्वाद्याः' इति भाषापरिच्छेदाद्द्रव्यगुणकर्मणां सत्तावत्त्वसाधर्म्यात् । समवायसंबन्धातिरिक्तसंबन्धेन संबन्धित्वमाशङ्क्य पराकुर्वन्ति स्म न चेति । तेषां त्रयाणाम् । घटीयघटत्वसामान्यस्य तन्निष्ठसत्तासामान्यस्य तन्निष्ठसत्तासामानाधिकरण्यवत्सत्तासामानाधिकरण्यमर्थः । तदुभयेति सत्तायोगित्वसत्तासामानाधिकरण्यरूपस्योभयस्याभावेन । पूर्वोक्तानामिति चतुर्विधपरमाणूनां सामान्यपूर्वोक्तानां द्रव्यगुणकर्मणां वा सत्त्वविशिष्टसत्तासङ्गेन सताम् । आनर्थक्येति । तथा सति सत्त्वे सत्यकारणवत्त्वस्य प्रागभावे सत्त्वेन नित्यत्वातिरिक्ति भावः । यत्तु पदार्थतत्त्वविवेचने सत्ता न जातिः किंतु भावत्वम् तच्चाभावान्यत्वम् । भावत्वं चाखण्डोपाधिः तच्च ज्ञेयत्वादेर्ज्ञेयत्वाज्ज्ञेयत्वादिवत् । घटाभावेऽपि घटाभावाद्घटाभावादेश्च स्ववृत्त्यपीति सामान्यादौ सद्व्यवहारोपपत्तिरिति शिरोमणिः । तथा चाभावस्य सत्यकारणवत्त्वस्य प्रागभावेऽभावेऽभावान्न नित्यत्वापत्तिरिति ब्रूयात्कश्चित् तदात्यन्ताभावे व्यभिचारादसाधारणो हेतुः । साध्यासमानाधिकरणत्वस्यासाधारणलक्षणत्वात् । विशेषत इति सार्वविभक्तिकस्तसिरित्यभिप्रायमाहुः विशेषस्येति । प्रतिषेध इति परमाणुषु । यद्वा । विशेषस्येश्वरान्निमित्तात्समवायिरूपस्य नित्यस्य परमाणोः प्रतिषेध इत्यर्थः । शेषं पूर्ववन्नित्वस्य प्रत्यय इति । प्रपञ्चोऽनित्य इति शब्दप्रयोगश्चायम् । न स्यादिति । तथा चानित्यस्य नेश्वरः समवायी किंतु परमाणव इति भावः । ननु नित्य इति प्रत्यये नञो विरोधार्थकत्वेनेश्वरविरुद्धनित्यत्वादिसंभवे कुतो न बीजमीश्वर इत्यत आहुः नञ इति । नञो हि चतुर्भ्योऽर्थेभ्य इतरेषां निषेधादिति भावः । स्वोत्तरपदार्थः नित्यपदार्थः । कस्यचिदिति परमाणोरीश्वरातिरिक्तस्य । सिद्धिरिति । प्रतियोगिज्ञानाभावे प्रतिषेधानुपपत्तेः । कस्यापीति । अनित्यः प्रपञ्च इति प्रत्ययः शब्दश्च । कस्यापीति अनिर्वचनीयस्य ब्रह्मणः । तथा च ब्रह्मणि प्रसिद्धस्य नित्यस्य प्रतियोगिनः प्रपञ्चे तव मते निषेधः सुपपन्नः किं परमाणुनित्यत्वेनेति भावः । मूर्तत्वादिति मूर्तत्वमपकृष्टपरिमाणवत्त्वम् । एवमिति हेतुद्वयप्रकारवत् ।



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

'षट्केन युगपद् योगात् परमाणोः षडंशता' इति दिङ्नागोक्तरीत्या षट्पार्श्ववत्त्वात् । किञ्च । परमाणोर्मध्ये यथाकाशोऽस्ति तदा सच्छिद्रत्वेनैव सावयवत्वाद् अव्याप्यवृत्तिसंयोगाश्रयत्वाद् घटादिवदिति । किंच । यत् सत् तत् क्षणिकं यथा घन इति नानानुमानसाध्या परमाण्वनित्यत्वसाधिका अनुमितिरविद्या भ्रमरूपा हेत्वाभासजन्यत्वात् । एतेषामाभासत्वं च क्वचिद् व्याप्यत्वासिद्ध्या, क्वचित् स्वरूपासिद्ध्येति समानतन्त्रेऽन्वेष्टव्यमिति । तन्न । मूर्तत्वस्य सत्त्वस्य च कथंचिद् व्याप्यत्वासिद्धत्वेऽपि षट्पार्श्ववत्त्वादीनां कथंचित् स्वरूपासिद्धत्वाभिमानेऽपि

रश्मिः ।

षट्केनेति परमाण्वपेक्षया योयं प्राचीदक्षिणेत्यादिदिग्भेदव्यवहारस्तदवच्छिन्नेन येऽवयवाः परमाणोस्तादृशावयवषट्केनेत्यर्थः । चम्पकावयवगन्धषट्केनाकाशस्य योगेन षडंशतापत्तिस्तस्येति तु न । योगस्य समवायात्मकत्वात् । दिङ्नागेति दिङ्नागः शङ्करः । तथा चापरिग्रहसूत्रभाष्यं परमाणुनिरवयवत्वनिरासकम् । किंचान्यत् । परमाणूनां परिच्छिन्नत्वाद्यावत्यो दिशः षडष्टौ दश वा तावद्भिरवयवैः सावयवास्ते स्युरिति । ते परमाणवः । षट्पार्श्वेति षट् पार्श्वान्यवयवा विद्यन्ते यस्य स षट्पार्श्ववान् तत्त्वात् । नन्वतिसूक्ष्मे षट्पार्श्वविभागासंभवेन स्वरूपासिद्धिमाशङ्क्य व्याप्त्या सावयवत्वमाहुः किंचेति वेदान्तिभिन्नमते । यथाकाश इति । व्यापकत्वादिति शेषः । सच्छिद्रत्वेनेति । यत्सच्छिद्रं तत्सावयवमिति व्याप्तेर्घटादौ दर्शनात् तथा परमाणूनां सावयवत्वात् । अव्याप्येति 'स्वात्यन्ताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वम्' । आकाशादावसाधारण्यवारणायेदं संयोगविशेषणम् । आकाशसंयोगस्य व्याप्यवृत्तित्वात् । घटादीति । षट्पार्श्ववत्त्वलिङ्गके तु षट्कपालो घटः । परमाण्वनित्येति पक्षसाध्यविषयिणी । अनुमितिरिति पक्षसाध्यमविद्येति । अनुमितिस्तु परमाणुरनित्यत्ववान् । अविद्यार्थं संदिग्धत्वादाहुः भ्रमरूपेति । हेत्वाभासजन्यत्वं विवेचयन्ति स्म एतेषामिति, मूर्तत्वादिहेतूनाम् । मूर्तत्वे सत्त्वे च हेतौ व्याप्यत्वासिद्धिः । सा चात्र हेतौ व्याप्तिविरहरूपा । अनित्यत्वस्य व्याप्तिः सामानाधिकरण्यं तद्विरहो मूर्तत्वस्य इति । अयं विरहो मनसि द्रष्टव्यः । मनसोनित्यत्वान्मूर्तत्वाच्च । तदुक्तं चिन्तामणावनुमाने व्याप्तिसिद्धिनिरूपणे ये व्याप्तिपक्षधर्मताविरहरूपास्तेऽसिद्धिमध्यासते । तदन्ये च यथायथं व्यभिचारादय इति सिद्धान्तप्रवाद इति । द्वितीये तु साधनाप्रसिद्धिरूपा । सत्तायां सत्ताभावेन हेतौ हेतुतावच्छेदकाभावात् । क्वचिदिति । षट्पार्श्वत्वादिषु त्रिषु स्वरूपासिद्धिः 'पक्षे व्याप्यत्वाभिमतस्य हेतोरभावः' यथा ह्रदो द्रव्यं धूमादिति । तद्वदत्र पक्षस्य परमाणोरतिसूक्ष्मत्वेन तत्र षट्पार्श्ववत्त्वसच्छिद्रत्वसत्त्वानां व्याप्यत्वाभिमतानां हेतूनामभावात् तथा इति । एतेषां समानतन्त्रे सकृदुच्चरितं बहूनामुपकारकं तन्त्रं तद्रूपे, हेत्वाभासत्वमन्वेष्टव्यम् । सत्त्वस्येति अन्त्यस्य क्षणिकं सत्त्वादित्यत्र सत्त्वस्य । कथंचिदिति । मुक्तावल्यां काञ्चनमयवह्निमानिति काञ्चनमयधूमवानिति नीलधूमादिति च विशेषणविशिष्टसाध्यासाद्युदाहरणातद्रीतिकरातिकानुमानचिन्तामण्यनुरोधप्रकारेणेति कथंचिदित्युक्तम् । कथंचित्स्वेति परमाणूनां सन्त्याज्य ह्रस्वपरिमाणमप्यङ्गीकृतमिति षट्पार्श्ववत्त्वादीनां पक्षधर्मता सुखेन संभवतीति नव्यमतेन प्रकारेणेति कथंचिदित्युक्तम् । सत्त्वं न कमपि पक्षधर्मताभाववदित्यभिमानशब्द उपात्तः ।



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## उभयथापि च दोषात् ॥ १६ ॥

**परमाणूनां रूपादिमत्त्वे तदभावे च दोषः । एकत्रानित्यत्वमन्यत्र कार्य-**

---

भाष्यप्रकाशः ।

रूपादिमत्त्वस्य सद्धेतुताया उपपादितत्वात् तेनैव षट्पार्श्ववत्त्वादीनामपि दोषनिरासात् तज्जन्यानुमितेरविद्यात्वाभिमानस्यैवाविद्यात्वादिति ॥ १५ ॥

**उभयथापि च दोषात् ॥ १६ ॥** प्रकारान्तरेणापि परमाणुकारणवादस्यासंगतिं व्युत्पादयतीत्याशयं स्फुटीकुर्वन्ति परमाणूनामित्यादि । परमाणूनां हि न स्वरूपतो भेदः । सर्वेषामेव ह्रस्वपरिमण्डलाकारत्वोपगमात् । नापि, भौतिकत्वे सति नित्यो गतिमान् परमाणुरिति लक्षणात् तत्तद्भौतिकत्वाद् भेदः । भूतानां पाश्चात्यत्वेन भौतिकत्वस्य पूर्वमशक्य-

रश्मिः ।

सद्धेतुतेति न चाकारणवत्त्वहेतोः सत्प्रतिपक्षत्वेन नित्यत्वासाधकत्वम् । तथा रूपादिमत्त्वहेतोरपि सत्प्रतिपक्षत्वेनानित्यत्वस्थूलत्वे अपि न सिद्धेतामिति वाच्यम् । अकारणवत्त्वस्य स्वरूपासिद्धत्वेन प्रतिपक्षत्वाभावात् । परमाणोर्द्व्यणुकरूपकारणवत्त्वस्य विभागेन सृष्टिपक्षे उक्तत्वात् इति सद्धेतुतायाः । उपपादितेति तेषां मत इत्यारम्भेत्यर्थ इत्यन्तेनोपपादितत्वादित्यर्थः । तेनैवेति रूपादिगुणवत्त्वात्किंचिद्ध्रस्वत्वेनैव । दोषेति पक्षावृत्तित्वरूपो दोषस्तन्निरासात् । इति एकप्रकारसमाप्तौ ॥ १५ ॥

**उभयथापि च दोषात् ॥ १६ ॥** परमाणूनां रूपादिमत्त्वे इत्येतावद्भाष्यं व्याकुर्वन्ति स्म परमाणूनामित्यारभ्य आपत्तव्या इत्यन्तेन । तदर्थमत्र स्वरूपासिद्धिवारणाय परमाणुभेदरूपादिगुणयथायोग्यत्वमाहुः परमाणूनामित्यादिना । 'पक्षे व्याप्यत्वाभिमतस्याभावः स्वरूपासिद्धिः' यथा ह्रदो द्रव्यं धूमादित्यत्र । स्वरूपत इति परमाणुत्वेन रूपेणेति प्रयोगात्स्वस्य परमाणो रूपतः परमाणुत्वतोऽभेदः । सर्वेषामिति पार्थिवाप्यतैजसवायवीयानां परमाणूनाम् । पारिमाण्डल्यपदेन सर्वेषामविशेषेण व्यवहाराद्ध्रस्वेत्यादिः । लक्षणादिति । भौतिकत्वस्य ग्रहणेऽतिव्याप्तिर्नित्यत्वे सति गतिमत्त्वस्य मनस्यतिव्याप्तिरतो विशेष्यविशेषणदले भौतिकत्वे सति नित्यत्वस्याकाशत्वे भौतिकत्वे सति गतिमत्त्वस्य शरीरेतिव्याप्तिरतो नित्यो गतिमानिति । तत्तदिति पृथिवीपरमाणुषु पृथिवीभूतसम्बन्धित्वमेवमबादिपरमाणुषु द्रष्टव्यम् । पृथिव्यादिरूपनिरूपकभिन्नभौतिकत्वादित्यर्थः । पूर्वमिति सृष्टेः पूर्वम् । अशक्येति । अनेन लक्षणेऽसंभवदोषोऽपि ज्ञेयः । आकाशमादायासंभववारणे तु मनस्यतिव्याप्तिः । न च भूतसमवेतत्वं भौतिकत्वम् । मनसस्तु न समवायो भूते किंतु संयोगो द्रव्यत्वादिति वाच्यम् । आकाशेऽपि भूतसमवायाभावेनोक्तासंभवस्य स्यात् योग्यतामादाय लक्षणसमर्थने तु मनस्यतिव्याप्तिः । 'चन्द्रमा मनसो जातः' इति तेजोरूपभूतसमवायित्वयोग्यत्वान्मनसः । इष्टापत्तिर्मनसोऽणुत्वादिति चेन्न । परमाणुचातुर्विध्यव्याघातेः । एतेन 'द्रव्यारम्भश्चतुर्षु स्यात्' इत्यपि प्रत्युक्तम् । न च द्रव्यारम्भकत्वं द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमिति पृथिव्यप्तेजोवायुषु द्रव्यारम्भकत्वं न मनसीति वाच्यम् । पारिभाषिकस्यास्य लक्षणस्य चन्द्रसमवायिनि मनस्यक्षतेः । ननु भौतिकत्वं भूतसंबन्धित्वं भूताश्च परमाणवस्तत्संबन्धः समवायः स च नित्य इत्यपि न संभव इति चेन्न । बाह्येन्द्रियग्राह्यविशेषगुणवत्त्वस्य भूतत्वेन प्रकृतेऽभावात् । आत्मावृत्तिविशेषगुणवत्त्वं भूतत्वं पर-



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

रूपस्य निर्मूलत्वं च। हरिद्राचूर्णसंबन्धे रूपान्तरस्य जननात् विरोधोपि चकारार्थः ॥ १६ ॥

---

### भाष्यप्रकाशः

वचनत्वात् 'सामुद्रो हि तरङ्गः' इति न्यायात्। अतः परं गुणभेदाद् वक्तव्यः। तत्र क्रमेण चतुस्त्र्येकगुणत्वविचारे आप्यतैजसपरमाण्वोर्गन्धापत्तिः। प्रतिलोमक्रमे च वायवीयादिषु चतुस्त्र्येकगुणत्वापत्तिरित्युद्देशक्रममनादृत्य यथायोग्यं गुणा आदर्तव्याः। तथापि पूर्वोक्त-व्याप्तेरनपायादनित्यत्वमनिवार्यम्। यदि च त्रसरेणुमारभ्यैव भूतानां रूपादिमत्त्वदर्शनात् तेषां रूपादिराहित्यमुच्यते, तदा, कारणगुणाः कार्यगुणानारभन्त इति नियमात् कार्यरूपा-देर्निर्मूलत्वमित्युभयथापि दुष्टः परमाणुकारणवाद इत्यर्थः। चकारोऽनुक्तसमुच्चयार्थ इत्याहुः हरिद्रेत्यादि। विरोध इति रूपादीनां सजातीयारम्भकत्वनियमविरोधः। तथा चात्यन्ता-संगतमिदं दर्शनमित्यर्थः ॥ १६ ॥

### रश्मिः।

दिष्टम्। कार्यत्वेऽपि संभवात्। समवेतेन्द्रियग्राह्यगुणवत्त्वस्य भूतलक्षणत्वेनातीन्द्रियपरमाणुषु भूतत्वाभावात्। ननु स्पन्दावच्छिन्नसमवायिकारणतावच्छेदकत्वं भूतत्वमिति लक्षणे तु भवेदिति चेन्न द्व्यणुकजन्यत्वेन स्पन्दावच्छिन्नसमवायिकारणतायाः स्पन्दावच्छिन्नानां पूर्वमभावेनो-क्तदोषतादवस्थ्याच्च। सामुद्र इति अयं न्यायः शब्दपद्धतावस्ति समुद्रस्य भूतपूर्वत्वेन तरङ्गः सामुद्रो भवति तरङ्गस्तु पाश्चात्य इति न समुद्रः क्वचन तारङ्ग इति। तथा प्रकृते भूतानां पाश्चात्यत्वेन न परमाणुर्भौतिक इत्यर्थः। परमाणुनित्यत्वं तु गतसूत्रे दूषितम्। अन्यत्त्व-विरुद्धम्। वक्तव्य इति परमाणुभेदो वक्तव्यः। क्रमेणेति रूपरसगन्धस्पर्श इति क्रमेण। गन्धापत्तिरिति रूपरसगन्धा इति। गन्धो रसोपलक्षक इति तैजसेषु रसापत्तिः। तथा च गन्धापत्ती रसापत्तिश्चेत्यर्थः। वायवीयेषु स्पर्शसत्त्वान्नापत्तिः। चतुस्त्रीति। तथा च वायवीयेषु रूपापत्तिः। तैजसेषु रूपरसयो रसापत्तिः। आप्येषु रूपरसगन्धेषु गन्धापत्तिः। पार्थिवेषु चतुष्टय-सत्त्वान्नापत्तिः। गुणप्रातिलोम्ये तु वायवीयेषु गुणत्रयापत्तिः। स्पर्शस्य सत्त्वात्। तैजसेषु रसगन्धापत्तिः स्पर्शस्य सत्त्वात्त्रयाभावापत्तिश्च। आप्येषु गन्धापत्तिः त्रयाभावापत्तिश्च। पार्थिवेषु चतुष्टयसत्त्वान्नापत्तिः। इति हेतोः। उभयोरुद्देशक्रममनादृत्य। आदर्तव्या इति। ते च नैयायिकानां साधर्म्यनिरूपणे स्पष्टा भाष्यादावस्माकं तूक्ता एवान्ये च स्पष्टा आकरे भूतनिरूपणे। परमाणूनां रूपादिमत्त्वे एकत्रानित्यत्वमिति योजयित्वोत्तरफक्किकार्थमाहुः तथापीति। पूर्वोक्तेति रूपादिमत्त्वेनानित्यत्वेन व्याप्तेः। अतः परं तदभावे च दोषः इति भाष्यं विवृण्वन्ति स्म यदि चेति। तेषामित्यादि चतुःपरमाणूनाम्। द्रव्यक्रमेण गुणक्रमेण च पृथिव्यप्तेजोवायव इति द्रव्यक्रमः। रूपरसगन्धस्पर्शा इति गुणक्रमः। पृथिव्यां चत्वारः। अप्सु त्रयः। गन्धाभावात्। तेजसि द्वौ। रसगन्धयोरभावात्। वायावेकः। रूपरसगन्धाभावात्। अत्र पूर्ववदन्यत्र कार्यरूपस्य निर्मूलत्वं चेति भाष्यं योजयन्तो दोष इति भाष्यार्थं च वदन्तस्तद्भाष्यं विवृण्वन्ति स्म तदेति। कार्येति द्व्यणुकं कार्यम्। तेन च परंपरया घटादिरूपादेरपि ज्ञेयम्। उभयथेति परमाणूनां रूपादिमत्त्वे तदभावे च। सजातीयेति साजात्यं च शुक्लत्वादिना। आदिशब्देन योग्यम्। तथा चाति विजातीयरूपाकारणत्वेन नियमव्यभिचारे सति। लोकेप्यकौशल्यापत्तेरत्यन्तेति ॥ १६ ॥



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.c

**अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥**

**सर्वैर्वैदिकानामपरिग्रहाच्चात्यन्तं सर्वथा नापेक्ष्यते ॥ १७ ॥**

**इति द्वितीयाध्याये तृतीयं महद्दीर्घवद्वेत्यधिकरणम् ॥ ३ ॥**

---

भाष्यप्रकाशः ।

**अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥** व्याकुर्वन्ति सर्वैरित्यादि । तथा चाचार्यस्य न तन्मतदूषणार्थमभिनिवेशः किंतु वैदिका मा भ्रम्यन्तामित्येतदर्थमेतदुक्तमित्यर्थः । एवं सप्तभिः सूत्रैर्वैशेषिकप्रतिपक्षः परमाणुकारणवादो निराकृतः ॥ १७ ॥

**इति तृतीयं महद्दीर्घवद्वेत्यधिकरणम् ॥ ३ ॥**

रश्मिः ।

**अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥** सर्वैरित्यादिरिति नैयायिकवैशेषिकसमययोरपेक्षा न, मतद्वयं नापेक्ष्यत इत्यर्थः । तेनाधिकरणारम्भे नैयायिकादिसमयोऽत्र निराक्रियत इत्यादि-शब्देनोक्तो वैशेषिकसमयोऽप्यत्र निराकृतः । दूषणानि तु नैयायिकोक्तानीति न विशिष्योक्तानि । न तन्मतेति । भगवच्चिकीर्षितकर्तृत्वादिति भावः । वैशेषिकेति एकदेशविकृतत्वाद-विशेषणोपादानम् । प्रमाणद्वयवादिनो वैशेषिकाः, प्रमाणचतुष्टयवादिनो नैयायिकाः, इति अभे-तनसंगत्यर्थं चोपादानम् । निराकृत इति । अत्र परमाणुकारणवादो विषयः । संभवति न वेति संशयः । 'तदात्मानं स्वयमकुरुत' इति श्रुतिः सन्देहबीजम् । संभवतीति काणाद-पूर्वपक्षः । न संभवतीति परमाणुकारणवादोऽसंभव इति सिद्धान्तः । शांकरास्तु अत्रा-धिकरणद्वयमङ्गीकुर्वन्ति । तत्र पूर्वत्र चेतनाद्ब्रह्मणोऽचेतनस्य विजातीयस्योत्पत्तिरुक्ता । तत्र विलक्षणो-त्पत्तौ काणादद्दृष्टान्तोऽस्ति न वेति संशये शुक्लतन्तुभ्यः शुक्लपटोत्पत्त्यङ्गीकारान्नास्ति दृष्टान्त इति पूर्वपक्षः । परमाणुपारिमाण्डल्यपरिमाणाभ्यां विलक्षणमणुपरिमाणयुक्तं द्व्यणुकमुत्पद्यते ह्रस्वपरिमाणो-पेताद् द्व्यणुकान्महत्परिमाणयुक्तं त्र्यणुकमुत्पद्यते इत्यस्ति दृष्टान्त इति सिद्धान्तः । तत्र पारिमाण्ड-ल्यमणुपरिमाणमिति नैयायिकाः । अत्र तु ह्रस्वमणुपरिमाणमिति विभेदः । अनेनाधिकरणेन 'सदेव सोम्येदमग्र आसीत्' इति श्रुतांशादेव जडोत्पत्तिः समर्थिता । परमाणूनामप्यनित्यत्वस्थापनात् । वियदुत्पत्तिस्तु वक्ष्यते । समवायो विशेषाश्च प्रत्युक्ताः । कालदिशोरीश्वरत्वम् । मनस्तु न नित्यमित्युक्तम् । अत्यन्ताभावस्य तु नित्यत्वेप्यश्रुतेः । सलक्षणत्वेन तिरोभावरूपयगवच्छक्तित्वात् । भगवद्धर्माणां च नित्यत्वमित्युक्तम् । सामान्यं त्वाकृतिरित्युक्तम् । अत एव कस्यचित् 'किं गवि गोत्वमुतागवि गोत्वं गवि चेद्गोत्वमनर्थकमेतत् । अगवि च गोत्वं यदि पुनरिष्टं संप्रति भवति भवत्यपि गोत्वम्' इति । न चाकृतेरनित्यत्वम्, एकव्यक्तिनाशेपि व्यक्त्यन्तरे दर्शनात् । ननु प्रलये तु 'सदेव सोम्येदमग्र आसीत्' इति श्रुतेस्तिरोभावः । सत्यलोकपर्यन्तमाकृतेर्विद्यमानत्वात् । मैवम् । वैकुण्ठेप्याकृतयः सन्तीति प्रलयेप्यतिरोभावात् । उक्तं च द्वितीयस्कन्धे नवमे वैकुण्ठदर्शन-प्रस्तावे 'श्रीर्यत्र श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायति । ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम्' इति जगतोपि तत्र सत्त्वात् । वैकुण्ठे पुनरस्ते मूर्तिरूपा आत्मस्वरूप्य' इति । तथा चाविकृतं नित्यत्वमिति सर्वं सुस्थमिति सुधीभिराकलनीयम् ॥ १७ ॥

**इति तृतीयं महद्दीर्घवद्वेत्यधिकरणम् ॥ ३ ॥**



PUNAWAR DR. RUPAK NATH
www.astrology-tantra.com

## समुदाय उभयहेतुकेपि तदप्राप्तिः ॥ १८ ॥ (२-२-४)

अतः परं बाह्यमतनिराकरणम् । ते समुदायद्वयं जीवभोगार्थं संहन्यत इति

भाष्यप्रकाशः ।

अतः परमूनविंशतिभिः सूत्रैर्बाह्यसमयो निराक्रियते ।

समुदाय उभयहेतुकेपि तदप्राप्तिः ॥ १८ ॥ ननु तदग्रे कया संगत्यैतन्मतनिराकरणमित्याकाङ्क्षायामाहुः अतः परमित्यादि । वैशेषिका ह्यर्धवैनाशिकाः । परमाण्वाकाशादिद्रव्याणामन्येषां च पदार्थानां नित्यत्वाङ्गीकारेऽपि कार्यद्रव्याणां केषांचिद् गुणानां च निरन्वयविनाशाङ्गीकारात् । निरन्वयध्वंसो नाम तत्प्रायःपतिताब्बिन्दोरेव निःशेषनाशः । सर्ववैनाशिकास्तु बाह्याः सर्वानित्यत्ववादिनः । तन्मते सर्वस्यैव निरन्वयध्वंसात् । तत्र निराकृतेऽर्धवैनाशिकेऽतियौक्तिकसर्ववैनाशिकनिराकरणाकाङ्क्षाऽवश्यं मुमुक्षूणामुदेतीत्यवसरसंगत्या तन्निराकरणमित्यर्थः । सूत्रं व्याकर्तुं पूर्वं तन्मतमनुवदन्ति त इत्यादि । ते सौगताश्चतुर्विधाः । वैभाषिकः, सौत्रान्तिकः, विज्ञानवादी, माध्यमिकश्चेति बुद्धशिष्याः । तत्राद्यः सर्वार्थान् प्रत्यक्षानुमानसिद्धान् सतः क्षणिकान् वदति । द्वितीयस्तु बाह्यान् सर्वान् अर्थान् क्षणिकान् सतो विज्ञानानुमेयानाह । तृतीयस्तु अर्थजन्यं विज्ञानमेव परमार्थम् । अर्थास्त्वसन्तः स्वाप्नकल्पा इत्याह । इतरस्तु सर्वशून्यत्वमेवाह । मतचतुष्टयेऽपि भोक्ता वा प्रशासिता वा कश्चिच्चेतनः स्थिरः रस्थिरः ।

समुदाय उभयहेतुकेपि तदप्राप्तिः ॥ १८ ॥ बाह्येति परमाणुपुञ्जस्य कारणतादिनिराक्रियते । तदग्र इति नैयायिकादिसमयनिराकरणाग्रे । अन्येषामिति सामान्यविशेषसमवायात्यन्ताभावानाम् । परमाण्वाकाशादीति । आदिशब्देन कालदिगात्मनाम् । केषामिति पूर्वोक्तव्यतिरिक्तानाम् । अर्धवैनाशिकानुक्त्वा सर्ववैनाशिकानाहुः सर्वेति । अतीति अत्यन्ता निरवधिर्युक्तिस्तर्कोन्यथाज्ञानं विदन्त्यधीयते वा तेऽतियौक्तिकाः । वेदमुक्त्यादेरतिक्रान्ता युक्तयोऽतियुक्तयस्ता विदन्त्यधीयते वातियौक्तिकाः । अपेक्षयान्यथाज्ञानमन्यस्य न भवतीत्यर्थः । 'क्रतुकथादिसूत्रान्ताट्ठक्' । अवसरेति प्रसङ्गस्तु संगतिमात्रसाधारण इति सामान्यलक्षण इतीक्षत्यधिकरण उक्तम् 'बाह्याबाह्यमतान्येकीकृत्य निराकरणं द्वितीयपादे' इत्युक्तम् । तत्र सांख्ये निराकृते प्रतिबन्धकीभूता नैयायिकादिमतनिराकरणजिज्ञासा । किं नैयायिकमतनिराकरणमिति तस्याः बाह्यमतनिराकरणापेक्षया प्राथमिकजिज्ञासाविषयत्वप्रयोजकं बहुसंमतत्वं तेन नैयायिकादिमतनिराकरणान्निवृत्तौ सत्यां बाह्यमतनिराकरणमवश्यं वक्तव्यमिति जिज्ञासया किमिदानीं वक्तव्यमिति जिज्ञासया वा बाह्यमतनिराकरणमित्यवसरसंगत्येत्यर्थः । त सौगता इति भाष्ये बाह्याः सौगतत्वेन ग्राह्याः । अन्यथा प्रतिज्ञाहानिरूपनिग्रहस्थानापत्तेः । अर्धवैनाशिकस्य प्रत्युक्तत्वात् । बुद्धेति तेन बुद्धावतारे त्वधुना वेदसंरक्षणार्थं ते प्रबोध्या इत्यर्थः । अन्यथा विरुद्धधर्माश्रयत्वं न स्यात्, तेन बुद्धावतारस्य 'वदेदुन्मत्तवद्विद्वान्' इति ज्ञानप्रवेशोऽपि ज्ञापितः । क्षणिकानिति विधायकमिदम् । बाह्यानिति भूतं भौतिकं बाह्यम् । चित्तं चैत्यं च कामाद्यान्तरमिति विभागः । सत इति विधायकमिदं पदम् । विज्ञानेति । तृतीय इति अयमेव योगाचार इति कथ्यते । अर्थेति अर्थो विषयः । इतरेति न सन्नासन्न सदसन्न च सदसद्विलक्षणमिति तदेवाहेत्यर्थः । मतेति मतचतुष्टयेप्यध्यात्मांशे मतैक्यम् । चार्वाका आर्हताश्चोपेक्षिताः बृहस्पतिप्रणीतलोकायतदर्शनानुसारिणो देहात्मवादिनः प्रत्यक्षैकप्रमाणवादिनः । तन्मतस्यात्यन्तासंगतत्वात् । स्थिर इति अनेकक्षणावस्थायी ।



RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

क्षणिकत्वं तु बुद्धवचनात् । क्षणिकाः सर्वसंस्काराः संस्थित्यन्त इति । उत्पत्तिमन्त इत्यर्थः । एवमयं भूतसमुदायो बाह्य एकः । द्वितीयश्चित्तचैत्तिकरूप आभ्यन्तरः समुदायः । स च रूपविज्ञानवेदनासंज्ञासंस्काराख्यस्कन्धपञ्चकसमुदायात्मकः । तत्र रूप्यन्त एभिरिति वा, रूप्यन्त इति वा व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः । केचित्तु शरीरं तमाहुः । तदा आभ्यन्तरपदस्याध्यात्ममित्यर्थः । अहमित्याकारं रूपादिविषयमिन्द्रियादिजन्यं ज्ञानं विज्ञानस्कन्धः । स एव क्षणिकविज्ञानसंतानः, कर्ता भोक्ताहमिति...दात्मेत्युच्यते, न त्वेतदतिरिक्तः कश्चिदित्य आत्मास्तीति । केचित्तु यस्मिन् कर्माणि...वासनाः शेरते तद् आशयापरनामकमालयविज्ञानमेवात्मेत्याहुः । प्रियाप्रियानुभवविषयसंस्पर्शे सुखदुःखतद्रहित विशेषावस्था या चित्तस्य जायते सा वेदनास्कन्धः । कश्चित्तु यथा स्वस्तिमती गौरिति स्वस्तिमत्तया गौरुपलक्ष्यते, ध्वजेन गृहं दण्डेन पुरुष इत्युपलक्षणप्रत्ययो वेदनास्कन्ध इति व्याख्यायते । सविकल्पः प्रत्ययः संज्ञासंसर्गयोग्यः प्रतिभासो यथा डित्थः कुण्डली गौरो ब्राह्मणो गच्छतीत्यादिः स संज्ञास्कन्धः । रागादयः क्लेशाः, मदमानमात्सर्यादय उपक्लेशाः, धर्माधर्मौ चेति संस्कारस्कन्धः । स्कन्धशब्दः समूहवाची । अयं स्कन्धपञ्चकरूप आध्यात्मिकत्वादाभ्यन्तरः समुदायः । एवं पुञ्जद्वयस्वीकारेण सकललोकयात्रानिर्वाहे सति नास्त्यवरचिमि...

सर्वसंस्कारा इति रागादयः क्लेशाः मदमानमात्सर्यादय उपक्लेशाः धर्माऽधर्मौ चेति संस्काराः । संस्थित्यन्त इति संस्थितेरन्ते । कीदृशा इत्यपेक्षायामाहुः उत्पत्तिमन्त इति । अयमिति परमाणुहेतुकः । अयं च पञ्चस्कन्धहेतुक इति तान्विवृण्वन्तो रूपेत्यादि भाष्यं विवृण्वन्ति स्म स चेति । समुदायात्मक इति । एतद्द्वयव्यतिरिक्तं जगन्नातोऽधिकं किंचिदस्ति । रूप्यन्त इति रुप विमोहने दिवादिः, रूप्यन्ते मुह्यन्ते एभिः सविषयेन्द्रियैरिति रूपस्कन्ध इत्येकवचनानुरोधत्वादाहुः रूप्यन्त इति रूप्यते मुह्यतेऽनेन रूपस्कन्धेन जन इति । केचिदिति रूपाद्यतिरिक्तद्रव्याभाववादिनः । शरीरं तु द्रव्यादिरहितं बहिरित्याभ्यन्तरः समुदाय इति कथं तत्राहुः तदेति । अध्यात्ममिति आत्मानमालयविज्ञानमधिकृत्य, आत्मन्यालयविज्ञाने इत्यध्यात्ममिति वा । अहमिति अहमित्याकारं ज्ञानमिति योजना । ननु विज्ञानस्कन्धः क्षणिक इत्युक्तलक्षणे विज्ञानस्कन्धानुभवकर्तृत्वं...आहुः स एवेति । तथा च संतानत्वाददोषः । क्षणिकविज्ञानसंतानस्वरूपमाहुः कर्तेति । आत्मेति संतानद्वाराऽततीत्यात्मेति । कर्माण्विति कर्मानुभवाभ्यां जन्या वासनाः संस्कारादयः । आशयेति तथा चाशेरतेऽस्मिन्नित्याशयः । प्रियेति प्रियाप्रिययोर्वस्तुनोरनुभवे उदासीनविषयसंस्पर्शे प्रियेण सुखमप्रियेण दुःखमुदासीनेन तद्रहितावस्थेति विवेकः । उपलक्ष्यत इति । तथा च स्वस्तिमत्तयोपलक्षणप्रत्ययः । उपलक्ष्यतेनेन स्वस्तिमत्तादिनेत्युपलक्षणम् । सविकल्प इति वैशिष्ट्यावगाही प्रत्ययः । अयं तु भ्रमात्मकः । अलीकघटत्वादिसामान्यविशेषादेः घटपटत्वसंसर्गावगाही सविकल्पः । अत्र कस्य संसर्ग इत्यत आह संज्ञेति । संज्ञायाः संसर्गः तद्योग्यः प्रतिभासः डित्थ इत्यादि । इमे प्रत्ययाः डित्थत्वकुण्डलगौरत्वब्राह्मणत्वगमनक्रियादिकं युक्तेऽवगाहमानाः डित्थादिसंज्ञासंबन्धं योजयन्ति आध्यात्मिकेति अध्यात्म-



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

## इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥

सर्वक्षणिकत्वेऽपि पूर्वपूर्वस्योत्तरोत्तरप्रत्ययविषयत्वात् कारणत्वात् संघातेऽ

भाष्यप्रकाशः ।

भास्कराचार्यास्तु—परमाण्वादीनामचेतनत्वात् क्षणिकत्वाभित्यस्य मोक्तुः प्रशासितुरीश्वरस्य संहन्तुरनभ्युपगमाच्च न स्थूला पृथिवी संभवेत् । परमाणवश्चातीन्द्रियाः । न तैः स्थूलव्यवहारः । येन च स्थूलव्यवहारः स तु नास्तीति लुप्यते लोकयात्रेत्याहुः । एवमेव शांकरा अपि । एतदेव किंचिद्वैलक्षण्येनान्येऽप्याहुः ॥ १८ ॥

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥१९॥ एवं क्षणिकत्वदूषणे समाधिं सूत्रांशेनाशङ्क्यांशान्तरेण परिहरतीत्याहुः सर्वेत्यादि । अप्रसिद्धिरिति पूर्वसूत्रादत्रानुवर्तत इति बोध्यम् । प्रत्ययः कारणसमवायः । इतरेतरं प्रत्यया इतरेतरप्रत्ययाः तेषां भावस्तत्त्वं तस्मात् ल्यब्लोपे पञ्चमी । तत् प्राप्य वा । अयमर्थः । अविद्यादिभ्यो जन्मादयो जन्मादिभ्यश्चाविद्यादय इति चक्रवत्परिवृत्तौ सर्वक्षणिकत्वेऽपि न कारणव्यक्तिं प्रति कार्यव्यक्तेः

रश्मिः ।

नष्टस्पृष्टश्च नष्टः तथा वेदिता विदितश्च नष्टः कथं चान्येन स्पृष्टमन्यो वेदयते कथं चान्येन विदितमर्थमन्य उपादत्ते । संतानानामेकत्वेऽपि संतानिभ्यस्तेषां वस्तुतो वस्त्वन्तरत्वानभ्युपगमाच्च तन्निबन्धनं व्यवहारादिकमुपपद्यत' इति । सौत्रान्तिकमतं दूषयन्ति परमाण्वादीनामिति । न स्थूलेति ईश्वरमन्तरेणेति ज्ञेयम् । येनेति अवयविना । नास्तीति समुदायेनान्यथासिद्धत्वान्नास्तीत्यर्थः । अन्य इति माध्वा अन्ये । वैलक्षण्यं त्वेतत् समुदायस्यैकहेतुत्वं न युज्यते, अन्यतरादर्शनप्रसङ्गात् । उभयहेतुकेप्यन्योन्याश्रयत्वात्स्थूलपृथिव्यादेरप्राप्तिः । स्वभाववादे तु सर्वदा समुदायत्वं स्यादिति भाष्येऽन्योन्याश्रयः । स न पृथिव्यादिभूतसमुदाये सति रूपादिस्कन्धसमुदायस्तस्मिन्सति च तत्समुदाय इति । अत्र सविकल्पकं भ्रम इति तन्न । सामान्यादेः सत्त्वेन तद्विषयकज्ञानस्य भ्रमत्वायोगात् ॥ १८ ॥

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ १९ ॥ परिहरतीति सूत्रकारः । सर्वेत्यादीति । सर्वक्षणिकत्व इति भाष्ये पाठं मत्वोक्तम् । कारणेति इति नास्तिकैरुच्यते । इणः धातोर्मत्वर्थीयाच्प्रत्ययमादायेत्यत्रापि प्रत्ययः कारणसमवाय इति व्याख्येयमित्यर्थः । अयधातोरजिति विकल्पः पूर्वस्मात् । प्रत्ययत्वं तु हेतुं हेतुं प्रत्ययन्ते गच्छन्तीति व्युत्पत्त्येत्यर्थ इति द्वितीयसूत्रे स्फुटम् । इतरेतरमिति इतरदिति विग्रहे कर्मव्यतिहारसूत्रे द्वित्वे समासवद्भावे च सुपूलुकि इतरेतरं प्राप्तम् । अदड्डादेशस्तु न 'स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वाच्यः' इति वार्तिकात् । तथा सामान्ये नपुंसकत्वेऽपि बहुवचनं स्यादिति वाच्यम् । आमः सर्वविभक्त्यादेशत्वात् तस्मिन् इति विग्रहोऽपि संभवी । तदेतरेतरे इति प्रत्यया इति विग्रहः । तस्मादिति । तथा चेतरेतरकारणसमवायत्वादित्यर्थो जातः । अयं हेतुः सर्वक्षणिकत्वेन जीवस्य संसाराप्राप्तिरुक्ता सा नेत्यत्र भवति । पूर्वस्य कारणत्वमुत्तरस्य क्रियाविषयत्वं प्राप्यैव भवति । इदमप्युत्तरसूत्रे 'प्रतीत्यसमुत्पादलक्षणस्य' इत्यादिना स्फुटिष्यति तदाहुः ल्यब्लोप इति । 'ल्यब्लोपे कर्मण्यधिकरणे च' इति पञ्चमी । तत्प्राप्येति इतरेतरप्रत्ययत्वं प्राप्य । सोयं प्रत्ययशब्दस्य प्रत्ययविषये लक्षणार्थो न तु तत्राश्रुतमित्याशयेनाहुः अयमर्थ इति । भाष्यं विवृण्वन्ति स्म अविद्यादिभ्य इति । चक्रवदिति कुलालचक्रवत् । कारणव्यक्तिमिति विज्ञानव्यक्तिर्जडव्यक्तिश्च । एवं कार्यव्यक्तिरपि ज्ञेया ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

जीवत्वाज्जडत्वाच्च न काप्यनुपपत्तिरिति चेन्न । उत्पत्तिमात्रनिमित्तत्वात् । अनुसंधानाभ्युपगमे स्थिरत्वापत्तिः । संबन्धवियोगार्थं को वा यतेत । स्थैर्याभावात् समुदायानुपपत्तिश्च ॥ १९ ॥

भाष्यप्रकाशः ।

प्रत्ययता, किंतु पूर्वपूर्वप्रत्ययस्य उत्तरोत्तरः प्रत्ययो विषयः क्रियागोचर इत्युत्तरोत्तरप्रत्ययविषयत्वं प्राप्य पूर्वपूर्वस्य प्रत्ययस्य कारणत्वाद्, उत्तरोत्तरक्षणिकविज्ञानसंततेरेव जीवत्वात्, तादृशार्थसंततेरेव जडत्वाच्च संतत्यात्मकस्य जीवस्य संतत्यात्मकरूपस्कन्धसंबन्धेन तादृशे वेदनादिस्कन्धात्मके संसारे तादृशसंस्कारस्कन्धेन नानाविधशरीरपरिमाणादिभेदसिद्धिः संस्कारविरामादेवाभावरूपमोक्षसिद्धिर्न स्वत इति न काऽपि पुञ्जकारणतायामनुपपत्तिरिति चेत् । न । कुतः । उत्पत्तिमात्रनिमित्तत्वात् । ये हि प्रत्ययास्त उत्पत्तिमात्रं प्रति निमित्तभूताः सदृशीं संततिमुत्पाद्य नश्यन्ति । तथा सति विज्ञानसंततिरूपस्य जीवस्य पूर्वकालीनप्रियाप्रियसंस्पर्शानुसंधानात् कथं वेदनादिस्कन्धात्मकसंसारसिद्धिः । अनुसंधानाभ्युपगमे च संतानिनः स्थिरत्वापत्तिः । संततिरूपस्य जीवस्य क्षणिकत्वेन स्थैर्याभावाद्रूपादिस्कन्धसंबन्धवियोगार्थं को वा

रश्मिः ।

प्रत्ययता कारणसमवायता । समवायस्य कार्यपूर्ववर्तित्वेनैव निश्चयात् । पूर्वपूर्वेति कारणस्य विज्ञानस्य कारणसमवायस्य च । उत्तरोत्तरेति कार्यस्य । प्रत्ययो विज्ञानं जडवृत्तिः । कारणसमवायश्च क्रियागोचरः कार्यम् । उत्तरोत्तरेति । क्षणिकविज्ञानसंततिस्तु कर्ताहं भोक्ताहमित्याकारिका । तादृशेति उत्तरोत्तरक्षणिकेत्यर्थः । अर्थसंततिरविज्ञरूपा । जीवस्येति विज्ञानस्कन्धस्य । विषयेन्द्रियरूपरूपसमूहस्तत्संबन्धेन । तादृशे नाम क्षणिके । वेदनादीति चित्तस्य सुखदुःखतद्रहितावस्थात्मके आदिशब्देन सविकल्पकप्रत्ययात्मा संज्ञास्कन्धो गृह्यते । संस्कारेति क्षणिकरागादिक्लेशधर्माधर्मात्मकेन । अभावेति संस्कारस्कन्धक्षयरूपेत्यर्थः । कापीति पृष्टाप्यनुपपत्तिः सर्वक्षणिकत्वेऽपि । जीवस्य संसारप्राप्त्यनुपपत्तिः । तथा च क्षणिकत्वेऽपि पूर्वपूर्वकारणरूपपदार्थस्योत्तरोत्तरं कार्यं लक्षीकृत्य प्रत्ययस्य कारणसमवायस्य च विषयत्वात्क्रियागोचरत्वाद्धेतोर्विषयत्वं प्राप्य वा कारणत्वाद्विद्यादीनां कुलालचक्रवत्परिभ्रमणेन विज्ञानसंततेरेव जीवत्वात् जडसंततेरेव जगत्त्वाच्च न जीवस्य संसारप्राप्त्यनुपपत्तिरिति चेदिति भाष्यार्थः । अत्र क्षणिकत्वेऽपीति न कापीत्यनेनान्वयी । पूर्वपूर्वस्येति तु कारणत्वादित्यनेनान्वेति । प्रत्ययस्येति षष्ठ्या निरूपितत्वमर्थः । तथा च कारणसमवायनिरूपितं यत्कार्यनिष्ठं विषयत्वं प्राप्यादित्यर्थः । पूर्वस्य उत्तर इति च विग्रहौ । उत्पत्तीति व्याख्येयम् । उक्तं भाष्यं विवृण्वन्ति स्म ये हीति । प्रत्ययाः कारणसमवायाः । संततिमिति विज्ञानसंततिमुत्पाद्य नश्यन्तीति अवान्तरपूर्ते इत्यर्थः । तथा सतीति क्षणं क्षणं जीवस्यान्यत्वे सति । पूर्वकालीनेति पूर्वकालीनाः प्रियाप्रियसंस्पर्शास्तेषामननुसंधानात् प्रियाप्रियस्पर्शक्षणसंबन्धिजीवस्य नष्टत्वेन द्वितीयक्षणे जीवस्यान्यत्वादननुसंधानादित्यर्थः । वेदनादीति व्याख्यातम् । अनुसंधानेत्यादिभाष्यं विवृण्वन्ति स्म अनुसंधानेति । चक्रवत्परिभ्रमणेऽनुसंधानं संभवतीति तस्याभिप्रायः । जीवस्य नष्टत्वाच्चक्रवत्परिभ्रमणेऽप्यनुसंधानं न संभवतीत्यभ्युपगमपदसूचितार्थः । संतानिन इति । इदं च विज्ञानवादिमतानुसारेणार्थः संभवति । तेनार्थजन्यत्वे सति परमार्थत्वस्य विज्ञानेऽभ्युपगमात् । सर्वक्षणिकवादिमते तु संतानातिरिक्तसंतानी न विद्यते । सर्वक्षणिकवादिमते स्थिरत्वं न संभवतीत्याहुः संततिरूपस्येति । संबन्धेत्यादिभाष्यं विवृण्वन्ति स्म रूपादिस्कन्धेति । को वेति । विज्ञानसंततेः



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

उत्तरोत्पत्तिरपि न संभवति । उत्पन्नस्य खलूत्पादकत्वम् । अत उत्तरोत्पत्तिसमये पूर्वस्य नष्टत्वादुत्पत्तिक्षण एव स्थितिप्रलयकार्यकरणसर्वाङ्गीकारे विरोधादेकमपि न स्यात् ॥ २० ॥

---

भाष्यप्रकाशः ।

यतेत । परमाणूनां बाह्यानामाभ्यन्तराणां च यः समूहस्तस्यापि स्थैर्याभावात् स्कन्धसमुदायानुपपत्तिश्च । अतः क्षणिकानामर्थानामुत्पत्तिमात्रनिमित्तत्वात् संघातस्वीकारेऽपि संसारापवर्गाव्यवस्थानादसंगतं पुञ्जस्य कारणत्वमित्यर्थः ॥ १९ ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥ ननु यथा दीपज्वाला उत्पद्यमानैव संहन्यते विषयीभवति च तथा पदार्थान्तरमपि संहस्यते विषयीभविष्यति चेति शङ्कायामुत्पत्तिमपि दूषयति उत्तरेत्यादि । अत्रापि तदनुवृत्तिः । सूत्रस्यार्थं व्युत्पादयन्ति उत्तरेत्यादि । उत्पद्यमानस्य संहन्यमानत्व उत्तरोत्पत्तिः कथमिति विचार्य सा तु न संभवति । खलुर्हेतौ । यतो हेतोर्लोके उत्पन्नस्य जननोत्तरं स्थितस्योत्पादकत्वम् । स्थितिक्षणस्तु न त्वन्मते । नाशक्षणे तूत्पादकत्वं न क्वापि दृष्टम् । नाशश्च त्वन्मते अजन्मा अन्यं ग्रसत्येव । अत उत्तरोत्पत्तिसमये पूर्वस्य नष्टत्वादुत्तरानुत्पत्त्या, उत्पत्तिक्षण एव स्वस्थितिकारणप्रलयस्वकार्यकरणादि सर्वाङ्गीकारे परस्परविरोधात् कार्यकारणभावविरोधात् एकमपि न स्यादित्येवमप्यनुपपत्त्या च समुदायस्य संसारादेश्चाप्राप्तिरित्यसंगतं पुञ्जस्य कारणत्वमित्यर्थः ।

टीका ।

क्षणिकत्वादिति भावः । तथा च मोक्षासिद्धिः । स्थैर्येत्यादिभाष्यं विवृण्वन्ति स्म परमाणूनामिति । असंगतमिति । तथा चेश्वरस्य कारणत्वमिति भावः ॥ १९ ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥२०॥ संहन्यत इति । संघातभावं प्राप्नोति । संहस्य त इति कर्मकर्तरि प्रयोगः । 'अनुदात्तोपदेश' इति सूत्रेणानुनासिकलोपः । वस्तुतस्तु संहनिष्यत इत्येव । 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इति सूत्रात् । अतो हसे हसने इत्यत उपसंसृष्टाल्लृट् । इति शङ्कायामिति समुदायोपपत्तिशङ्कायाम् । दूषयतीति सूत्रकारः । अनुवृत्तिरिति अप्राप्तेरनुवृत्तिः । उत्पन्नस्येति भाष्ये परमाणुपुञ्ज उत्पन्नपदार्थः । तस्य कारणमुत्पद्यमानपरमाणुरिति तस्य व्याख्यामाहुः उत्पद्येति परमाणोरित्यर्थः । परमाणुपुञ्जाय संहन्यमानत्वे तेनोत्तरक्षणे नष्टेन । उत्पन्नस्येति भाष्यं विवृण्वन्ति स्म खलुरिति । उत्पन्नस्येति परमाणुपुञ्जस्य । उत्पादकत्वमिति । तथा च प्रथमक्षणे कारणसमवायात्मिकोत्पत्तिः, द्वितीयक्षणे स्थितिः, तृतीयक्षण उत्पादकत्वम् । नाशोऽपि द्वितीयक्षणो नाशक्षणस्तस्मिन् । अजन्मेति प्रागभाववत् । अनादिः सान्तः प्रागभाव इति । न तु ध्वंसवत् सादिरनन्तः । सादिरनन्तो ध्वंसाभाव इति । अत उत्तरेत्यादिभाष्यं विवृण्वन्ति स्म अत इति । अजन्मत्वाद्धेतोः पूर्वक्षणे कार्योत्पत्तिः । द्वितीयक्षणे नाशोत्पत्तिः, तृतीयक्षणे कार्यनाश इति न भवति किंतु द्वितीयक्षणे कार्यनाश इति । उत्तरेति द्वितीयक्षणे कार्योत्पत्त्याश्रये । उत्तरेति कार्यानुत्पत्त्या । उत्पत्तीत्यादि भाष्यं विवृण्वन्ति स्म उत्पत्तीत्यादि । आदिशब्देन प्रागभावः । परस्परेति स्थित्युत्पत्त्योः सहानवस्थानलक्षणविरोधादेवमन्यत्र कृतिविषयत्वरूपकार्यभावः आविर्भावकशक्त्याधारत्वरूपकारणभावस्तयोः



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

यत् खलु हेतूपनिबद्धं कार्यं तदन्यानपेक्षं हेतुमात्राधीनोत्पादत्वात् तदुत्पद्यतां नाम । यः पुनः पञ्चस्कन्धसमुदायः स तु प्रत्ययोपनिबद्धो न हेतुमात्राधीनोत्पत्तिरपि तु नानाहेतुसमवधानजन्मा । न च चेतनमन्तरेणान्यः कारणानां संनिधापयिताऽस्तीति पूर्वसूत्र एवोक्तम् । बीजादङ्कुरोत्पत्तेरपि प्रत्ययोपनिबद्धाया विवादाध्यासितत्वेन पक्षकुक्षिनिक्षिप्तत्वात् । पक्षेण च व्यभिचारोद्भावनायामतिप्रसङ्गेन सर्वानुमानोच्छेदप्रसङ्गात् । विवादाध्यासितत्वं तु कुसूलस्थबीजादङ्कुरानुत्पत्तेर्ज्ञेयम् । वस्तुतस्तु तत्रापि चेतनप्रयुक्तिर्मृग्यैव । मेघाभावे वापाभावे च केवलर्तुधातोरप्रयोजकत्वात् । नदीमातृकस्थले तु स्फुटेव चेतनप्रयुक्तिरित्यपि द्रष्टव्यम् । अतः स्थिरस्य चेतनस्य संहन्तुरनुपगमे सर्वथा संघाताप्राप्तिः । किंचाविद्यादिभिरर्थाक्षिप्तः संघात इति यदुच्यते, तत्र कोऽर्थः । किं संघातमन्तरेणात्मानमलभमाना अविद्यादयः संघातम-

रश्मिः ।

अविद्यादीनामितरेतरकारणत्वेनोत्पत्तिमात्रे निमित्तत्वान्न हेतुसमवधानाधीनः कार्योत्पादः संभवति । स्थिरस्य चेतनस्य संघातभावप्रापकस्यानङ्गीकारादित्यर्थः । अत्र द्विविधो हि कार्योत्पादः सौगताभिमतो हेत्वधीनः कारणसमुदायाधीनश्च । तत्र हेत्वधीनो यथा बीजादङ्कुरोऽङ्कुरात्पत्रं पत्रात् काण्डमित्यादिः । कारणसमुदायाधीनो यथा पृथ्व्यप्तेजोवाय्वाकाशकालविशेषाणां मेलने सति तेभ्य उपकृताद्बीजादङ्कुरो जायते । आध्यात्मिककार्योत्पादेऽपि हेत्वधीनः कार्योत्पादोऽविद्यादीनाम् । द्वितीयस्तु पृथिव्यप्तेजोवाय्वाकाशालयविज्ञानानां समवायात्कार्योत्पादः । कार्येऽङ्कुरादौ काठिन्यस्नेहपाकबहिर्निर्गमनानुकूलकर्मश्वासाद्यन्तःसुषिरज्ञानानां दर्शनात्पृथिव्यादीनां कारणत्वम् । एवमुभयविधेऽपि कार्योत्पादे न चेतनापेक्षेति । तत्राद्यमभ्युपगम्य द्वितीयं दूषयतीत्याहुः यत् खल्विति । हेतूपेति यदिदं बीजादङ्कुर इत्यादिना पूर्वमुक्तम् । पञ्चस्कन्धेति रूपविज्ञानवेदनासंज्ञासंस्काररूपपञ्चस्कन्धानां समुदायः । प्रत्ययोपेति तत्र प्रत्ययोपनिबन्ध इत्यादिना पूर्वमुक्तः । नानेति । यथा कायो बाह्याभ्यन्तरपृथिव्यादिहेतुकः । संनिधापेति । अयं दोषो हेतूपनिबन्धेऽपि यत्र निर्वापस्तत्र द्रष्टव्यः । निर्वापस्य चेतनकर्तृकत्वात् । विवादेति चेतनकृतनिर्वापाभावे कुसूलस्थबीजेनाङ्कुरानुत्पत्तेश्चेतनसापेक्षत्वं विवादाध्यासितमित्यर्थः । पक्षेति अविद्यादिः पक्षः अविद्यादयोऽसंहताः निमित्ताभावात्, कुलालासंहतमृदादिवदिति पूर्वसूत्र उक्तमिदानीमविद्यादयः संहता इतरेतरकारणत्वात् । बीजाङ्कुरवदित्यनेन सत्प्रतिपक्षीकृतम् । तत्रेतरेतरकारणत्वेन संहतिसाधनमप्रयोजकम् । चेतनस्यापि कारणकोटौ कुलालादेर्यथा । अतः पक्षे दृष्टान्ते च हेतोः संदेहात्संदिग्धसाध्यव्यभिचाराद् दृष्टान्ताभावाच्चेत्याहुः पक्षेणेति चकारेण दृष्टान्तः । पक्षेणाविद्यादिना । दृष्टान्तेन बीजाङ्कुरेण । अतीति हेतोरपि धूमसंदेहाद्वह्निमत्त्वप्रसङ्गेन । अङ्कुरेति । कारणकोटौ चेतनस्यावश्यकत्वादिति शेषः । तत्रापीति बीजादङ्कुरोत्पत्तौ । अग्रेति । तथा च निश्चिता कार्यमात्रे चेतनकारणता । नदीमातृकेति नदी माता अस्य । 'नद्यृतश्च' इति कप्, तादृशे देशे । स्फुटैवेति । 'मथुरा भगवान् यत्र नित्यं संनिहितो हरिः' इति वाक्यात्स्फुटैव । 'योऽप्सु तिष्ठन्निति' श्रुतेरेवकारः । आदिशब्देन देवमातृको देशः । 'देवो मेघे सुरे राज्ञि' क्रमेणैकैकम् । नदीमातृकः नद्यम्बुसंपन्नधान्यपालितो देशः, देवमातृकस्तु वृष्ट्यम्बुसंपन्नधान्यपालितः, कोशे भूमिवर्गे । अत इति कार्यमात्रे चेतनप्रयुक्तिदर्शनात् । आत्मानमिति स्वरूपम् । संघातविषयिणीं बुद्धिमिति यावत् । विषयमन्तरा क्षणिकेषु स्थिरत्वबुद्धिरूपाऽविद्या न संभवतीत्यभिप्रायः । एवं रागद्वेषमोहादिषु स्वरूपालाभो ज्ञेयः ।



RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

क्षणिकत्वहानिः । किंच कारणधर्मानुविधाने कार्यकारणभावकल्पनायामतिप्रसङ्गः । यतो मृदन्विताः शरावादयः सुवर्णान्विताश्च कुण्डलादयो दृश्यन्ते । किंच आकारसमर्पणेऽपि न सामर्थ्यं त्वन्मते, वस्तुनः क्षणिकत्वात् । तस्मान्नित्यपक्ष एव कार्यकारणव्यवस्था युज्यते, न क्षणिकपक्षे । प्रत्यक्षप्रत्यभिज्ञानाच्च कुम्भादीनां नित्यत्वमिति । ननु नित्यपक्षेऽपि कार्यकारणभावानुपपत्तिः क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् । किं कुसूलस्थो व्रीहिरङ्कुरजननस्वभावोऽथातत्स्वभावः । यद्यन्त्यस्तदा न कदाचिदपि जनयेत् । यद्याद्यस्तदा तत्क्षणमेवोत्पादयन् यानि कर्माणि व्रीहिणा कर्तव्यानि तानि युगपदेव कुर्यात्, न तु सामग्रीवशेनाङ्कुरं जनयेत् । अतत्स्वभावत्वे तत्स्वभावत्वे वा सामग्र्या अकिंचित्करत्वात् । नच प्रत्यभिज्ञानादपि नित्यत्वम् । दीपज्वालादिषु व्यभिचारात् । यदि च नित्यो भावः स्यात् विनाशं न प्राप्नुयात् । अथ मुद्गरादिना विनाशः क्रियत इति चेत् । तदयुक्तम् । विनाशो यः क्रियते स द्रव्यव्यतिरिक्तो वा तदव्यतिरिक्तो वा । आद्ये घटस्य न किमपि स्यात् । यथा पटे कृते । द्वितीये घटस्वरूपमेव विनाशः । स्वरूपं तु कुलालेन कृतमेवेति मुद्गरः किमपरं कुर्यात् । अथ घटसंबन्धी विनाशः क्रियत इति कः संबन्धः । किं तादात्म्यलक्षण उत तदुत्पत्तिलक्षणः । द्वितीयश्चेद्, घटस्य न किंचित् । यथा पावकेन्धनाभ्यां धूम उत्पादिते वह्नेर्न किंचित् तथा घटमुद्गराभ्यां विनाश उत्पादिते घटस्यापि । तादात्म्यपक्षेऽपि तादात्म्यस्य तत्स्वभावत्वात् तस्य च कुलालेन कृतत्वाद् व्यर्थो मुद्गरः स्यात् । अतः स्वाभाविको विनाश एष्टव्य इति । अत्रोच्यते । योऽयं विकल्पः कृतः स तव सिद्धान्तं बाधते सदृशसंतानोत्पत्तिप्रतिनिरोधात् ।

रश्मिः ।

क्षणिकत्वेति द्विक्षणावस्थायित्वेन तथा । अतीतेति मृत्पटयोः कार्यकारणभावप्रसङ्गः । प्रत्यक्षेति प्रत्यक्षेण घटग्रहानन्तरं घटिकानन्तरं पुनः स एवायं घटः इति प्रत्यभिज्ञानाच्चेत्यर्थः । सौगतः शङ्कते ननु नित्येत्यादिना एष्टव्य इतीत्यन्तेन । क्रमेत्यादि अर्थो व्रीह्यादिस्तत्क्रियाङ्कुरजननादिः सा क्रमेण प्राग्वादौ भवति क्वचिद्यौगपद्येन भवति तद्विरोधात् । विरोधमापादयति किमित्यारभ्याकिंचित्करत्वादित्यन्तेन । न कदाचिदपीति निर्वापोत्तरकालेप्यङ्कुरं न जनयेत् । सूचीकटाहन्यायेनान्त्यं पूर्वमुक्त्वाद्यमाह यद्याद्य इति । तदानीमिति कुसूलस्थत्वकाले । उत्पादयन्निति अङ्कुरम् । यानीति अङ्कुरोत्पादोत्तरमङ्कुरवर्द्धनादीनि । व्रीहिणा निर्वापादिकारणसमवहितेन । कुर्यादिति कुसूलस्थो व्रीहिः । नाङ्कुरमिति । अङ्कुरजननस्वभावात्स्वस्य । नित्यत्वमिति कुम्भादीनाम् । दीपेति । आदिपदेनाग्निज्वाला चेति । स्वाभाविको नाशोऽपि द्रष्टव्यम् । स्वाभाविकत्वविकल्पः परित्यक्त इति । वक्ष्यमाणत्वात्तस्यात् । किमपीति नाशादिकम् । कृत इति, घटस्य न किमपि स्यादिति पूर्वग्रन्थान्वयः । किं तादात्म्येति विनाशस्य घटत्वे तादात्म्येत्यादिः । तदुत्पत्तीत्यग्रे स्पष्टम् । किंचिदिति नाशादिकम् । घटस्यापीति न किंचिदित्यन्वेति । तादात्म्यस्येति संबन्धस्य घटस्य स्वभावत्वात्तस्य घटस्य । तृतीयमुपगच्छति अत इति । एष्टव्य इति इच्छायाः कर्मविषयः कर्तव्यः । उच्यते सिद्धान्तिभिः । योऽयमिति न तु नित्यपक्ष इत्यादिनोक्तो विकल्पः । सदृशेति । अङ्कुरस्य विसदृशत्वेन तज्जननस्वभावत्वात् । तथा च भोग्यादृष्टेन यो घटसदृशसंतानस्तस्य बाधः । नन्वन्त्ये घटक्षणे क्षणे सदृशसंतान-



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

योऽयमन्त्यो घटक्षणोऽभिमतो यतः कपालोत्पत्तिरिष्यते, स सदृशसंतानजननस्वभावो घटक्षणत्वादतीतानन्तरघटक्षणवदित्यनुमानात् । यदि चासौ विसदृशसंतानजननस्वभाव इत्यभ्युपेयते, तदा पूर्वक्षणाः विसदृशसंतानजननस्वभावाः । घटक्षणत्वादन्त्यक्षणवदित्यनुमानात् कुम्भकारादारभ्य कपालपङ्क्तिरेव स्यात् । एवं सति मुद्गरेण घटस्य सदृशसंतानजननस्वभावता नाश्यते विसदृशसंतानजननस्वभावता चोत्पाद्यत इत्यवश्यमभ्युपेतव्यम् । अन्यथा कपालोत्पत्त्यसंभवात् । ततश्च भवता सहेतुकं विनाशमभ्युपगच्छता विनाशस्य स्वाभाविकत्वविकल्पः परित्यक्तः ।

यदि विकल्पोऽङ्गीक्रियते विसदृशसंतानस्त्यक्तव्य इति सिद्धान्तनिष्टविरोधश्च । तत्र यथा तव सदृशसंतानजननस्वभावविनाशो मुद्गरेण क्रियते तथा ममापि घटविनाश एव क्रियते इति स्थितः सहेतुको विनाश इति । प्रत्यभिज्ञानाच्च कालान्तरस्थायित्वम् । ज्वालादिष्वपि सामान्यं समाश्रित्य प्रत्यभिज्ञा । वृद्धिह्रासदर्शनाद् व्यक्तीनामनित्यत्वम् । तथापि न क्षणिकत्वं, बाधाभावात् । क्षणिकत्वं च न प्रत्यक्षम् । प्रथमोत्पत्तौ निर्विकल्पकज्ञाने विशेषापरामर्शात् । यच्चोक्तं क्रमयौगपद्याभ्यामर्थक्रियाविरोध इति । स तु तवापि समानः । योऽसावन्त्यक्षणो यस्मादङ्कुरोत्पत्तिरिष्यते, सोऽप्यङ्कुरजननस्वभावो न भवति, व्रीहिक्षणत्वादनन्तरातीतव्रीहिक्षणवत् ।

रश्मिः ।

बाधोस्त्वेवेति चेत्तत्राहुः योऽयमन्त्य इति पुञ्जः । कपालोत्पत्तिरन्त्यकार्यावान्तरोत्पत्तिः । इष्यत इति अन्त्यकार्यपर्यन्तं संतानवादिनेष्यते । स इति अन्त्यघटलक्षणः पुञ्जः । घटक्षणेति घटरूपक्षणत्वात् । इत्यनुमानादिति । तथा च कपालरूपविसदृशजननस्वभावेन्त्ये घटे सदृशसंतानजननाप्त्या सदृशसंतानोत्पत्तिप्रतिनिरोधः । असाविति अन्त्यो घटः । पूर्वक्षणा इति आमघटरूपाः । कुम्भकारादिति आमघटकर्तरि कुम्भकारपदलक्षणव्यापारादारभ्य पाकादिकालेऽपि कपालपङ्क्तिरामुद्गरसंयोगं स्यात् । एवं सतीति उभयथापि दोषे सति । अन्यथेति सदृशसंतानजननस्वभावतानाशाभावे । अथ मुद्गरादिनेत्याद्युक्तं दूषयन्ति स्म ततश्चेति । सहेतुकमिति हेतुर्मुद्गरः । विनाशं सदृशसंतानजननस्वभावस्य विनाशम् । विकल्प इति स्वाभाविको वेति विकल्पः । विनाशो यः क्रियत इत्यादिग्रन्थेऽत्रैव पूर्वमुक्ते । विसदृशेति विसदृशे संतानेऽङ्गीक्रियमाणे आमघटदर्शनोत्तरं क्षणेन कपालदर्शनापत्त्या त्यक्तव्यः । सिद्धेति सिद्धस्य विसदृशोत्पादकत्वस्य हानिर्दृष्टायाः कपालोत्पत्तेर्विरोधश्च । तत्रेति अन्त्ये घटादौ । दीपज्वालादिषु व्यभिचारः प्रत्यभिज्ञाया नित्यत्वेन साकमुक्तं परिहरन्ति प्रत्यभीति । ननूक्तं दीपज्वालादिषु व्यभिचारस्तत्राहुः ज्वालादिष्विति । सामान्यमभित्वं जातिः । व्यक्तीनामिति ज्वालादिव्यक्तीनाम् । तथापीति व्यक्तीनामनित्यत्वेऽपि । बाधेति उत्तरक्षणे ज्वालाबाधाभावात् । प्रथमेति प्रथमक्षणरूपघटोत्पत्तौ सत्यां तद्विषयकं निर्विकल्पकं ज्ञानं जायते तत्क्षणत्रिके विशेषः इदमपरमित्याकारकः तस्य परामर्शः चाक्षुषादिस्तस्याभावात् । तच्च स्वलक्षणमात्रगोचरमिति बौद्धाः । एतादृशे निर्विकल्पकज्ञाने विशेषजात्यादीनामपरामर्शाद्विशेषाधीनं प्रत्यक्षं न भवतीत्यर्थः । अन्त्यक्षणं दूषयन्ति यस्मादिति बीजरूपात् । तथा च कालरूपक्षणस्य कालिकसंबन्धो बीजनिष्ठो लक्षणा । दूषयन्ति स्म सोऽपीति । अनन्तरेति उत्पत्तिविनाशविषयप्रतियोगिनौ व्रीहिरूपौ क्षणौ तद्वत् । अनन्तरक्षणस्य नाङ्कुरजननस्वभावत्वमिदं समवायिकारणधर्मः । उक्तौ तु हेतू । व्रीहिक्षणावस्थायित्वं तदनुसारेणोक्तं न तु तन्मतीयक्षणिकत्वमादृत्य । व्रीहिरसमानसंतान-



DR.RUPNATHJI( DR.RUPAK NATH)
www.astrology-tantra.com

**असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥**

एका क्षणिकत्वप्रतिज्ञा । अपरा चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्प-

भाष्यप्रकाशः ।

असमानसंतानजननस्वभावत्वे पूर्वक्षणानामपि तथात्वप्रसङ्गः । अथ सहकारिवशात्स्वभावः, स त्वस्माकमप्यविशिष्ट इति । किंच । विनाशोत्पादौ भावाव्यतिरिक्तौ न वा । अन्त्ये भावस्यो-त्पत्तिस्थितिनाशक्षणत्रयसंसर्गप्रसङ्गः । आद्ये उत्पत्तिविनाशयोरभावो नित्यः स्यात् । किंच । विनाशो नाम अभावः । स किं भावस्य पूर्वभावी वा सहभावी वा पश्चाद्भावी वा, आद्ये भावोत्पत्तिरेव न स्यात् । द्वितीयेऽप्यविरोधाद्भावस्य शाश्वतिकत्वप्रसङ्गः । तृतीये तु तस्यापि सहेतुकत्वान्नाशः प्राप्नोतीति नित्यत्वप्रतिज्ञाभङ्ग इत्याहुः ।

रामानुजाचार्यास्तु-क्षणिकत्वपक्षे जगदुत्पत्तिर्न संगच्छते । पूर्वक्षणस्य विनष्टत्वेन तस्योत्तरक्षणं प्रति हेतुत्वानुपपत्तेः । अभावस्य हेतुत्वे सर्वत्र सर्वदा सर्वोत्पत्तिप्रसङ्गात् । अथ पूर्वक्षणवर्तित्वमेव हेतुत्वं, तर्हि कश्चिदेव घटक्षणस्तदुत्तरभाविनां सर्वेषां गोमहिषादीनामन्यदेश-वर्तिनामपि हेतुः स्यात् । अथैकजातीयस्यैव पूर्वक्षणवर्तिनो हेतुत्वं, तदापि सर्वदेशवर्तिनामुत्तर-क्षणभाविनां घटानां स एवैको हेतुः स्यात् । अथैकस्यैक एव हेतुस्तदापि कः कस्येति न ज्ञायते । अथ यो यस्मिन् देशे घटक्षणे स्थितः स तद्देशीयस्यैवोत्तरघटक्षणस्य हेतुः । तर्हि देशस्य स्थिर-त्वापत्त्या सर्वक्षणिकत्वप्रतिज्ञाहानिः । किंच । चक्षुरादिसंप्रयुक्तस्यार्थज्ञानोत्पत्तिकाले अन-वस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं स्यादित्याहुः । भाष्यान्तरे तु न किंचिदितोऽ-धिकम् । एतानि तु दूषणानि सूत्रेष्वेवाग्रे प्रतिपत्स्यन्त इत्याचार्यैर्भाष्य उपेक्षितानि ॥ २० ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥ पूर्वसूत्रैः क्षणभङ्गवाद्यभिमता

रश्मिः ।

जननस्वभाव एवाभ्युपेयते तदापि दोषमाहुः असमानेति । पूर्वेति त्रयाणां क्षणानाम् । तथात्वेति समानसंतानजननस्वभावत्वप्रसङ्गः । तथा च व्रीहिरूपक्षणे स्वस्वरूपेऽसमानसंतान-जननात्प्रत्यक्षविरोधः । सहकारीति पृथिव्यादिषड्धातुवशाद्व्रीह्यादेरङ्कुरादिजननस्वभाव इति सह-कारिवशात् । अस्माकमिति कारणानित्यत्ववादिनाम् । अन्त्य इति व्यतिरिक्तत्वपक्षे । भावस्येति क्षणिकत्वेनैकक्षणरूपस्य । नित्य इति अभावस्य नाशस्यानित्यत्वे उत्पत्तिनाशयोर्भावस्य नित्यत्वा-त्क्षणिकत्वभङ्गस्तस्मादभावो नाशो नित्यः स्यात्प्रतिज्ञाभङ्गको न तु क्षणिक इत्यर्थः । न स्यादिति । भावस्य तदा सत्त्वेन तस्योत्पत्तिप्रतिबन्धादिति भावः । ध्वंसस्य ध्वंसाभावात् । अविरोधादिति क्षणिक-त्वेन भावाभावयोरविरोधात् । य उत्पत्तिक्षणः स एव ध्वंसक्षण इति । सहेतुकत्वादिति हेतुस्तु यस्य नाशः सः । उत्तरोत्पादकाले पूर्वस्य हेतोर्निरोधान्नाशान्न पूर्वस्य हेतुत्वमिति सूत्रार्थमाहुः पूर्वेति । पूर्वस्य क्षणिकत्वेनव्याहतं हेतुत्वमिति शङ्कते अथेति । हेतुत्वमिति । गोमहिषादयस्तु विजातीया इति न घटक्षणस्तेषां हेतुरिति भावः । स्यादिति सजातीयत्वादिति भावः । घटक्षण इति यः इत्यस्य समानाधिकरणात् घटक्षण इति प्रथमान्तं पदमिति प्रतिभाति घटरूपः क्षणः । स्थित इति तद्देशीयस्येत्यस्य विशेषणम् । संपातापातं वा । उत्तरोत्पादे चेति सूत्रस्थचकारार्थमाहुः तर्हीति । पूर्वक्षणोत्तरक्षणयोर्देशस्यैकत्वात्स्थिरत्वम् । संप्रयुक्तत्वं संबद्धत्वम् । भाष्यान्तर इति माध्व-भाष्ये । यस्तु कार्योत्पत्तावेव कारणस्य विनाशश्चेतनविशेषकार्योत्पत्तिरित्युच्यते । अन्यमतानुवादस्य प्रयोजनमाहुः एतानीति ॥ २० ॥



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

प्रतिसंख्यानिरोधः । अयमपि निरुपाख्यम् । निरोधद्वयमपि न प्राप्नोति । संततेरविच्छेदात् । पदार्थानां च नाशकसंबन्धाभावात् प्रतिबन्धसंबन्धाभावः । आद्यनिरोधः पदार्थविषयको व्यर्थः । द्वितीयः क्षणिकाङ्गीकारेणैव सिद्धत्वान्नाङ्गीकर्तव्यः ॥ २२ ॥

---

भाष्यप्रकाशः ।

विसदृशसंतानः स आद्यः । प्रतिक्षणभावी चोपलब्ध्यनर्हः सूक्ष्मश्च यो निरन्वयविनाशः स द्वितीय इति रामानुजाचार्याः । निरुपाख्यमिति अनिर्वाच्यम्, अवस्त्विति यावत् । दूषणं व्युत्पादयन्ति निरोधेत्यादि । कथं संतत्यविच्छेद इत्याकाङ्क्षायां विभजन्ते पदार्थानामित्यादि । तन्मते पदार्थाः सर्वे क्षणिकाः सदृशसंतानजननस्वभावाः । क्षणिकानां च नाशकसंबन्धो न पूर्वं दृष्ट इत्यन्त्यानामपि पदार्थानां नाशकसंबन्धाभावात् पूर्ववदेव संततिप्रतिबन्धाभाव इत्यविच्छेद इत्यर्थः । न च यदा प्रतिसंख्यासंबन्धस्तदा प्रतिभन्त्स्यत इति युक्तम् । तन्मते विज्ञानसंतानात्मकस्य जीवस्य क्षीणे संस्कारे तैलक्षये प्रदीपस्येव निर्वाणेनाभावप्राप्तिर्मोक्षः । संस्कारक्षयश्चार्यचतुष्टयाभ्यासजन्यया प्रतिसंख्यया वाच्यः । तत्राभ्यासस्य पौनःपुन्यरूपत्वेन स्थिरधर्मतया क्षणिके जीवे वक्तुमशक्यत्वेन तज्जन्यप्रतिसंख्यायाः सुतरां तथात्वात् । अतः संततेरविच्छेद एवेत्याद्यनिरोधो विज्ञानपदार्थविषयको व्यर्थः । तथा सति पदार्थान्तरविषयकोऽपि तथा । न च द्वितीयो युक्त इति वाच्यम् । यतो द्वितीयः क्षणिकाङ्गीकारेणैव साधनयोगशून्यतायां संतत्यविच्छेदस्य सिद्धत्वान्नाङ्गीकर्तव्यः । 'अर्हे कृत्यतृचश्च' ।

विसदृशस्य कपालस्य संतानरूपं कपालोत्पत्तेः प्राक् सदृशसंतानाभ्युपगमात् तथा च सदृशघटादिसंतानावधिरित्यर्थः । **विसदृशेति** कपालादिसंताना घटादिविसदृशः । **स आद्य** इति प्रतियोगिव्यतिरेकाव्यतिरेकशून्यः प्रतियोगिसत्ताविरोधी नाश इत्यङ्गीकारात् विसदृशसंतान एव नाश इत्यर्थः । **निरन्वय** इति तप्तायःपतितजलबिन्दोरिव निःशेषनाशः । **निरोधेत्यादि** प्रतिसंख्याप्रतिसंख्यानिरोधद्वयमपि न प्राप्नोति न संभवति । तदुक्तं **प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरिति** । कुतः । **संततेरविच्छेदादिति** सूत्रभाष्यार्थः । **दृष्ट** इति क्षणिकत्वान्न दृष्टः । **अन्त्यानामिति** परिनिष्पन्नावस्थानां पुञ्जानां घटादीनाम् । **आद्यनिरोध** इत्यादि भाष्यं विवरीतुमाशङ्क्य निषेधन्ति स्म न चेति । **प्रतिसंख्येति** सन्तमेनमसन्तं करोमीति प्रतिकूलबुद्धिसंबन्धः । **प्रतिभन्त्स्यत** इति कल्याणप्रतिकूलं नाशं भावः करिष्यते । भदि कल्याणे सुखे च 'कल्याणस्थानमङ्गलम्' स्वरवर्णानुक्रमहैमधातुपाठे भ्वादिः । इडभावस्तु चिन्त्यः । संस्कारमदादिरूपसंस्कारस्कन्धे । **निर्वाणेनेति** 'निर्वाणमस्तंगमने' इति विश्वः । **आर्यचतुष्टयेति** । अग्रे वाच्यम् । तथात्वादिति जीवे वक्तुमशक्यत्वादिति । तथा च प्रतिसंख्यासंबन्धाभावेन प्रतिबन्धाभावान्न युक्तः प्रतिसंख्यानिरोध इति भावः । **अविच्छेद** इति निरन्वयध्वंसाभाव एव । आद्येत्यादिभाष्यं विवृण्वन्ति स्म **आद्येति** । बुद्धिपूर्वको विनाशः । **व्यर्थ** इति यथाद्यनिरोधः स्यात् दृश्येत परं न दृश्यत इत्याद्यनिरोधो व्यर्थः । तथा सति संततेरविच्छेदे सति । **पदार्थेति** रूपस्कन्धादिविषयकोऽपि व्यर्थः । **द्वितीय** इति भाष्यमवतारयन्ति न चेति । द्वितीय इत्यादिभाष्यं विवृण्वन्ति स्म यत इति । द्वितीयो बुद्धिपूर्वको विनाशः । क्षणिकेति भावपदार्थमात्रस्य । साधनेति



RUPNATHJI( DR. RUPAK NATH
w.astrology-tantra.c

## उभयथा च दोषात् ॥ २३ ॥

प्रतिसंख्यानिरोधान्तर्गताविद्याविनाशे मोक्ष इति क्षणिकवादिनो मिथ्यावादिनश्च मन्यन्ते । अविद्यायाः सपरिकराया निर्हेतुकविनाशे शास्त्रवैफल्यम् ।

भाष्यप्रकाशः ।

श' इत्यर्हे तव्यः । नाङ्गीकर्तुं योग्यः । तथा च निरोधद्वयस्याप्ययुक्तत्वाभावविचारेऽप्यसंगतमेव सौगतं दर्शनमित्यर्थः ।

भास्कराचार्यास्तु—तौ संतानगोचरौ संतानिगोचरौ वा । नाद्यगोचरौ । निरोधस्यावस्तुत्वाभ्युपगमान्नित्यत्वापभ्युगमाच्च । नापि संतानिगोचरौ । संतानिनां घटादीनां प्रत्यभिज्ञानात् । त्वत्पक्षे विनाशस्याभावाव्यतिरेकाच्च हेतुनापि नाशः संभवति । यन्मतेऽभावव्यतिरिक्तो विनाशस्तन्मते सहेतुकः । अर्थ्यसत्यचतुष्टयाभ्यासान्मुक्तिः । अर्थ्यसत्यचतुष्टयं तु समुदायसत्यं, निरोधसत्यं, दुःखसत्यं, मार्गसत्यं चेति । सर्वमुत्पत्तिमदस्तीति यन्निर्णयज्ञानं तत् समुदायसत्यम् । सर्वं क्षणिकमिति निरोधसत्यम् । सर्वं दुःखात्मकमिति दुःखसत्यम् । सर्वं शून्यं सर्वं निरात्मकमिति मार्गसत्यमित्येवं भावयतो रागादिनिवृत्त्याभ्युपगम्यमानायां निर्हेतुको विनाश इति प्रतिज्ञा हीयेत । तस्मादसङ्गतं सौगतं मतमित्याहुः ॥ २२ ॥

उभयथा च दोषात् ॥ २३ ॥ एवं पूर्वसूत्रे कार्यविचारेण निरोधद्वयं दूषयित्वाऽत्र स्वरूपविचारेण दूषयतीत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति प्रतिसंख्येत्यादि । उक्तनिरोधैकदेशभूतेऽविद्याविनाशे मोक्षस्तद्दर्शनोक्तरीतिको भवतीति, क्षणिकवादिनो, वैभाषिकाः, सौत्रान्तिका, मिथ्यावादिनो योगाचाराश्च मन्यन्ते । तदसंगतम् । यतोऽविद्यायाः सकार्याया

रश्मिः ।

साधनं नाशकस्तस्य योगः संबन्धस्तच्छून्यतायां सत्याम् । तथा चेति । संततेरविच्छेददर्शने प्रकारे च । ताविति निरोधौ । भावानां हेतुफलभावेन प्रवाहः संतानः । संतानीति संतानिनो घटादयः । अवस्तुत्वेति अवस्तुभूतेन तु संतानादर्शनासंपादनादित्यर्थः । अत एव संतानदर्शनमिति निरस्ते दोषे हेत्वन्तरमाहुः नित्यत्वेति । तथा च संताननाशो नित्य इति द्वितीयक्षण एव संतानानुपलब्धिप्रसङ्ग इति भावः । प्रत्यभीति । निरोधे नाशे सति सोयं घटादिरिति प्रत्यभिज्ञानं न स्यादिति भावः । विनाशस्येति निरन्वयध्वंसस्य । नाशः निरन्वयध्वंसः, संतानिनां घटादीनां संभवति । अन्त्यावयवानां परमाणुत्वेनानाशात् । तथा च प्रतिसंख्याप्रतिसंख्यानिरोधयोरप्राप्तिरसंभवः । अविच्छेदात्, अवस्तुत्वान्नित्यत्वाच्च । घटादीनां प्रत्यभिज्ञानाद्धेति सूत्रार्थश्च संभवति । यन्मत इति नैयायिकादिमते । अभावोत्यन्ताभावः, तद्व्यतिरिक्तः प्रध्वंसो विनाशः । सहेतुक इति हेतुर्मुद्गरादिः । निर्णयेति निर्णयेन ज्ञानम्, निर्णयस्य ज्ञानं वा । निरात्मकमिति । आलयविज्ञानस्याप्रतीयत्वात् । हीयेतेति । भावनारूपस्याभ्यासस्य हेतुत्वात् ॥ २२ ॥

उभयथा च दोषात् ॥ २३ ॥ कार्येति निरोधद्वयकार्यं संततिविच्छेदस्तद्विच्छेदे विच्छेदाभावान्निरोधद्वयं व्यर्थमित्येवं विचारेण । अविद्येति क्षणिकेषु स्थिरत्वबुद्धिरविद्येति । सा च तत्कार्यकविनाश प्रतिसंख्यानिरोधरूपेस्त्वेवेति, प्रतिसंख्यासूत्रोक्तनिरोधैकदेशभूतेऽविद्यानाशे सति । संस्कारनाशे क्षीणे तु संस्कारस्कन्ध इत्यादिनोक्तसंस्कारस्कन्धाभावरूपः । मिथ्यावादिन इति भाष्यं विवृण्वन्ति मिथ्यावादिन इति । योगाचारा इति विज्ञानवादिनः । अविद्याया इत्यादिभाष्यं विवरीतुमाहुः तदसमिति । विवृण्वन्ति स्म यत इति । सकार्याया इति यमनियमादयः



RUPNATH JI( DR. RUPAK NATH)
www.astrology-tantra.com

पदार्थवद् वस्तुत्वव्यवहारस्याविशेषात् ॥ २४ ॥

भाष्यप्रकाशः ।

व्यवहारस्य समानत्वात् । यथा हि पृथिव्यां घटो, जले नौकेत्यादि व्यवह्रियते तथाऽऽकाशेऽप्यत्र गृध्रोऽत्र श्येन इत्याधारता व्यवह्रियते । तथा बहिरन्तरमिति च । न चासौ भूप्रदेशे दिशि वा वक्तुं शक्यते । बाह्यो देशो, बाह्या दिगान्तरो देश, आन्तरी दिगिति बहिरन्तरव्यवहारविषयपरिच्छेदकत्वेनैव तयोरमिलप्यमानत्वात् । अतो बहिरेव धूमो नान्तरिति व्यवहारनियामकोऽवकाश एवायं व्यवहारः । अवकाशश्च प्रत्यक्षः । भूयानवकाशः स्वल्पोऽवकाश इति प्रत्यक्षानुभवात् । नच रूपाभावो बाधक इति वाच्यम् । गन्धर्वनगरादिवद् वस्तुसामर्थ्येन तत्प्रतीत्यङ्गीकारे बाधकाभावात् । तस्यावरणाभावमात्रमाकाशो, नापि निरुपाख्य इत्यर्थः ।

रामानुजाचार्यास्तु त्रिवृत्करणेन पञ्चीकरणस्याप्युपलक्षितत्वादाकाशेऽपि रूपसत्त्वात् तद्धेतुकेऽपि तत्प्रत्यक्षे न विरोध इत्याहुः । तच्चिन्त्यम् । तथा सति वायावपि तदापत्तेः ।

वैशेषिकादयः पुनः शब्दाख्यगुणानुमेयमाकाशमिच्छन्ति शांकराश्च ।

भास्कराचार्यास्तु—शब्दस्याकाशेन सह संबन्धग्रहणादसत्यपि शब्दे नमोविषयकबुद्ध्युत्पत्तेः, श्रूयमाणेऽपि शब्दे तद्द्वारेण तत्र तदनुत्पत्तेर्न तस्य शब्दानुमेयत्वं, किंतु

रश्मिः ।

भाष्येण । इति चेति व्यवह्रियत इत्यन्वयः । बहिरन्तरव्यवहारविषयत्वमाकाशलक्षणे स्पष्टं सुबोधिन्यादौ । असाविति व्यवहारः । बाह्य इत्यन्तरेति बहिरन्तरव्यवहाराभ्यां विशेषेण सिनुतः बध्नतः इति विषयौ, दिग्देशौ तत्परिच्छेदकत्वेन । तयोर्दिग्देशयोः । अवकाश इति अवकाशे सप्तम्यन्तम् । अयमिति अत्र गृध्रोऽत्र श्येन इत्यादिः । नैयायिकाशङ्कामनूद्य परिहरन्ति न चेति । गन्धर्वनगरादिस्तैत्तिरीयादौ प्रसिद्धः । बाधकेति । उपपादितं चैतत्सर्वत्र प्रसिद्धोपदेशादित्यधिकरणे नीरूपो नील इत्यत्र रश्मौ । इत्यर्थ इति । तथा चाकाशेऽपि व्यवहारेण भूतान्तरतुल्यताया अविशेषान्नीरूपाख्यत्वावरणाभावमात्रत्वयोरप्राप्तिरिति प्रतिसंख्यासूत्रादप्राप्तिमनुवर्त्य सूत्रं योजनीयम् । त्रिवृदित्यादि । तासां त्रिवृतं त्रिवृतमेकैकं करवाणि' इति श्रुतत्रिवृत्करणेन पञ्चीकरणमुपलक्ष्यते । पञ्चीकरणं तु आकाशवायुतेजोजलान्नानि तावदविद्यासहायात्परस्मादात्मनः सकाशादनुक्रमेण जातानि तानि सूक्ष्माणि व्यवहाराक्षमाणीति तदीयस्थौल्याकाङ्क्षायां कल्पितव्यवहारनिर्वाहकतदीयधर्माधर्मात्मककर्मापेक्षया तानि पञ्चीकृतानि स्थूलानि भवन्ति । तानि हि प्रत्येकं द्वैविध्यमापद्यन्ते । तत्र चैकैकं भागं परिहायापरेष्वेकैकशश्चातुर्विध्ये सिद्धे तत्तदीयात्मीयमर्धं परित्यज्यार्धान्तरेष्वेकैकस्यानुप्रवेशे प्रत्येकं भूतानि पञ्चतापन्नानि पञ्चीकृतान्युच्यन्ते शांकरैः । एवं च शब्दस्पर्शरूपरसगन्धानां परस्परस्मिन्प्रवेशादाकाशेऽपि रूपसत्त्वात्तद्धेतुके रूपहेतुकेप्याकाशप्रत्यक्षे विरोधो नेत्यर्थः । तदिदं नीरूपो नील इत्याकारेण विरुद्धं तर्करूपमिति लीलाभेदाय चिन्त्यत्वमाहुः तच्चिन्त्यमिति । तदापत्तेरिति रूपापत्त्या चाक्षुषापत्तेः । शब्दाख्येति शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः । अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् सुखवदित्यनुमेयम् । शांकराश्चेति आगमप्रामाण्यात्तावद् 'आत्मन आकाशः संभूतः' इत्यादिश्रुतिभ्यः आकाशस्य वस्तुत्वसिद्धिः । विप्रतिपन्नान् प्रति शब्दगुणानुमेयत्वमिति भाष्ये इच्छन्ति । तदनुत्पत्तेरिति आकाशादिहाकाश इति बुद्ध्यनुत्पत्तेः । न तस्येति भवेच्छब्दाश्रयत्वेनाकाशसिद्धिर्यद्याकाशे शब्द-



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.c

## अनुस्मृतेश्च ॥ २५ ॥

सर्वोऽपि क्षणिकवादो बाधितः । स एवायं पदार्थ इत्यनुस्मरणात् । अनुभवस्मरणयोरेकाश्रयत्वमेकविषयत्वं च ॥ २५ ॥

---

भाष्यप्रकाशः ।

रूपिद्रव्यसमवायित्वात् त्रिवृत्करणेन रूपसंबन्धाच्च प्रत्यक्षमित्याहुः । तत्रापि अनुमेयत्वखण्डनमात्रं युक्तम् ।

शंकराचार्यो भास्कराचार्यश्चाकाशसत्त्वे वृद्धवाक्यसंमतिमप्याहुः 'पृथिवी भगवन् किं निःसंश्रया' इत्येवं प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनामन्तः 'वायुः किं निःसंश्रयः' इत्यस्य प्रश्नस्य प्रतिवचनं 'वायुराकाशसंश्रयः' इति बुद्धेनोक्तम् । तथा,

'आकाशस्य स्थितिर्यावद् यावच्च जगतः स्थितिः । तावन्मम स्थितिर्भूयाज्जगद्दुःखानि निघ्नतः'

इति च बुद्धेनोक्तमिति । तथा चाकाशस्यावस्तुत्वे तदसमञ्जसं स्यादिति ॥ २४ ॥

अनुस्मृतेश्च ॥ २५ ॥ एवं क्षणिकवादं विशेषतो निराकृत्येदानीं संक्षेपेण निराकरोतीत्याशयेनाहुः सर्व इत्यादि । अयमर्थः । क्षणिकवादी हि सर्वस्य क्षणिकत्वं मन्यमानोऽनुभवितुरनुभूतिविषयस्य च सदृशसंतानेन प्रत्यभिज्ञानमुपपादयति । तदसंगतम् । प्रत्यभिज्ञाने हि यः पूर्वं दृष्टः स एवाऽयं पदार्थ इति, योऽहं पूर्वमद्राक्षं स एवाहमिदानीं पश्यामीत्याकारः । तत्र च, स इत्यनेन पूर्वकालवर्तिनोऽयमहमित्यनेनोत्तरकालवर्तिनोऽनुभूतिविषयस्यानुभवितुश्चैक्यस्य परामृश्यमाणतया पूर्वापरकालवर्तिन एकस्य सिद्धत्वेन क्षणिकसंतानस्य वक्तुमशक्यत्वात् । न च तत्र संताने स इति पूर्वकालवर्तित्वाभिमानात् सर्वमुपपद्यत इति वाच्यम् । अनुभवस्मरणयोरेकाश्रयत्वैकविषयत्वनैयत्यात् संतानेन च पूर्वकालस्याननुभूतत्वात् ॥

संबन्धो वृत्तिनियामकः स्यात् स तु नास्तीति न तस्याकाशस्य शब्दानुमेयत्वमप्रयोजकत्वादित्यर्थः । रूपीति पञ्चीकरणेन रूपिद्रव्यावयवसंबन्धित्वेनावयवाकाशयोस्तादात्म्यं मन्यन्त इति ज्ञायते । रूपाण्याकाशगुणत्वाद् द्रव्याश्रितानि तादृशद्रव्यवायुसमवायित्वादिति वा । तत्रापीति एवं मतेऽपि । अनुमेयत्वेऽपि । न तु रूपिद्रव्यसमवायित्वमण्डनम् । 'आकाशाद्वायुः' इति श्रुतेः । त्रिवृत्करणस्याकार व्यवस्थापनेन रूपसंबन्धाभावात् । प्रत्यक्षत्वमपि न रूपसंबन्धेन किंतु रूपत्वेन । नीरूपे नील इत्याकाशव्यवस्थापनात् । अप्याहुरिति अपिशब्देन श्रुतिसंमतिः । प्रश्नप्रतीति एवमवान्तरा प्रश्नप्रतिवचनेन प्रवाहे । ममेति बुद्धस्य । तदित्युक्तवाक्यद्वयम् । माध्यास्तु दीपादिषु विशेषदर्शनात् क्षणिकत्वेनान्यत्र क्षणिकत्वमनुमीयते चेदाकाशादिष्वविशेषदर्शनादन्यत्रापि तदनुमीयत इत्याहुः ॥ २४ ॥

अनुस्मृतेश्च ॥ २५ ॥ अनुभवितुरिति विज्ञानस्कन्धस्य । अनुभूतीति रूपस्कन्धादेः । प्रत्यभिज्ञानम् तत्तेदंताप्रकारकं ज्ञानम् । एवं वादस्वरूपमुक्त्वा बाधित इतीदं भाष्यं विवृण्वन्ति स्म तदसमिति । सूत्रार्थभूतं स एवेत्यादिभाष्यं विवृण्वन्ति स्म प्रत्यभिज्ञान इति । पूर्वकालेति । घटादेरात्मनश्च तदुक्तमग्रेनुभूतिविषयस्यानुभवितुश्चेति । अनुभवेत्यादिभाष्यं विवरीतुमाशङ्कामाहुः न च तत्रेति । सर्वमिति यद्यत्प्रत्यभिज्ञोपयोगि तत्सर्वम् । अनुभवेत्यादिभाष्यं विवृण्वन्ति अनुभवेति । एकाश्रयत्वं च तादात्म्येन बोध्यम् । एकं च मन

DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

तया तस्य तत्स्मरणायोगेन तत्र तथाभिमानस्य वक्तुमशक्यत्वात् । संतानिनोऽपि तदानीं तस्मिन् काले पूर्वकालत्वयुक्तभावेन तत्संताने तादृशबुद्धिवैशिष्ट्यस्यापि वक्तुमशक्यत्वाच्च । न चाकस्मिकमेव स इति ज्ञानमिति युक्तम् । तथा सति सर्वदा तदापत्तेः । न च सादृश्येन तथा ज्ञानं भवतीति वाच्यम् । अज्ञातस्य सादृश्यस्य तादृशज्ञानानुत्पादकतया सादृश्यज्ञानार्थं यतमानस्य पूर्वापरकालवर्तिवस्तुद्वयानुसंधानं पूर्वकालानुसंधानं चावश्यकमिति तदनुसंधातुः स्थिरत्वापत्त्या सादृश्यस्यापि पूर्वापरकालवृत्तिवस्तुद्वयनिष्ठतया स्थिरत्वापत्त्या क्षणिकत्वहानिप्रसङ्गात् । न च सादृश्यसंतानात् सर्वं सेत्स्यतीति वाच्यम् । सादृश्यस्य सदृशबुद्धिबोध्यत्वेन सदृशबुद्धेश्च पूर्वापरकालवृत्तिवस्तुद्वयविषयीकरणं विना असंभवेन तत्संतानाङ्गीकारेऽपि बुद्धेस्तद्विषयस्य च स्थिरत्वापत्तेरनिवार्यत्वेन क्षणिकवादबाधस्य दुर्वारत्वात् । अतस्तत्तेदंतात्वाहंतासामानाधिकरण्यावगाहिप्रत्यभिज्ञानात्मकानुस्मृत्यन्यथानुपपत्त्या सिद्धे बाह्यार्थानामात्मनश्च स्थैर्ये सर्वोऽपि क्षणिकवादः सर्वत्र बाधित इत्यर्थः । उक्तं च,

'नित्यदा ह्यङ्ग भूतानि भवन्ति न भवन्ति च । कालेनालक्ष्यवेगेन सूक्ष्मत्वात् तन्न दृश्यते ।
यथार्चिषां स्रोतसां वा फलानां वा वनस्पतेः । तथैव सर्वभूतानां वयोवस्थादयः कृताः' इति

रश्मिः ।

आश्रयो यस्य । 'कामः संकल्पो विचिकित्सा' इति श्रुतेः । वृत्तिवृत्तिमतोरभेदान्मन एव धीः । किंच । विषयविषयिभावसंबन्धेन तेनैकानुभवोत्तरं विषयविरहदशायां मानसीनतत्स्मरणेऽपि न क्षतिरिति चेन्नेत्याहुः एकविषयत्वेति । तत्स्मरणायोगेनेत्यत्र हेतुत्वेनान्वेति । पूर्वकालस्येति यत्र तिङन्तं नास्ति तत्रापि तत्परिकल्प्य काल उन्नेयः 'वर्तमाने लट्' इत्यादिभिः सूत्रैः । अननुभूतेति भिन्नत्वात्तथा । तस्य तदिति पूर्वकालाननुभवितुर्जीवस्य विज्ञानस्कन्धस्य । तत्रेति । उत्तरकालिके । स इत्येवंरूपः पूर्वकालवर्तित्वाभिमानस्तस्य । संतानिन इति विज्ञानस्कन्धस्य, रूपस्कन्धसेन्द्रियविषयात्मनश्च स्थिरत्वाभिमानविषयस्य । तदानीमिति वाक्यालंकारे । तदर्थकस्य तस्मिन्काल इत्यस्यापि दर्शनात् । तस्मिन्निति प्रत्यभिज्ञाकाले । पूर्वकालत्वेति । सूक्ष्मत्वादिति भावः । तादृशेति । वैशिष्ट्यं पदार्थान्तरमिति शिरोमणिः । आकस्मिकमिति । न तु विषयादिहेतुकम् । स इतीति स इत्यनेन पूर्वकालवर्तित्वाभिमानम् । सर्वदेति अनुभवकालेऽपि स्मरणापत्तेः, घटमनुभवतः पटस्मरणापत्तेश्च । ननु मास्तु वस्तुविषयिणी प्रत्यभिज्ञा सादृश्यविषयिणी तु स्यादित्याशङ्क्य निषेधन्ति स्म न च सादृश्य इति । 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं' तादृशेन तद्विषयकं तथा ज्ञानं तत्तेदंताप्रकारकं ज्ञानं भवति । तथा च सादृश्यमात्रहेतुकं न च वाच्यमित्यर्थः । तादृशेति प्रत्यभिज्ञात्मकज्ञानानुत्पादकतया । सादृश्यं संबन्धवदभयाश्रितमित्याहुः पूर्वापरेति । यथा चन्द्रसदृशं मुखमित्यत्र । पूर्वकालेति अधिष्ठानतया । तदनुसंधातुरिति विज्ञानस्कन्धस्य । सदृशेति कतिपयैर्धर्मैर्यः सदृशस्तद्विषयबुद्धिबोध्यत्वेन । वस्तुद्वयं सादृश्यनिरूपकं सादृश्याधिकरणं च । तत्संतानेति सादृश्यसंतानाङ्गीकारे । बुद्धेः सदृशबुद्धेः । तद्विषयस्येति पूर्वापरकालवर्तिसादृश्यनिरूपकसादृश्याधिकरणरूपवस्तुद्वयस्य । सिद्धमाहुः अत इति । सोयमिति तत्तेदंता । सोहमिति तत्ताहन्ता । इत्युभयत्र सामानाधिकरण्येत्यादिः । सर्वत्रेति पृथिव्यादिषु पञ्चस्कन्धेषु च । प्रसङ्गात्कञ्चीधरीं दूषयन्ति स्म एवं चेति । कृता



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.c

**कार्यं स्यात् तन्न । अदृष्टत्वात् । न हि शशशृङ्गादिभिः किंचित् कार्यं दृश्यते ।**

---

भाष्यप्रकाशः ।

एवावशिष्यत इत्यभावादेव भावोत्पत्तिरिति मन्यन्ते । तथा सत्यसतोऽलीकादेव कार्यं स्यात् । यदि हि बीजादिप्रतियोगिकादभावादङ्कुराद्युत्पत्तिरिष्यते तदा तस्याभावस्य बीजादिध्वंसरूपत्वेन तदवस्थाविशेषरूपतयाऽवस्थाविशेषविशिष्टाद् बीजादेरेवोत्पत्तिरिति स्यादत-स्तदभावाय वैनाशिकेन निःस्वभावादेवाभावाङ्गावकार्योत्पत्तिरङ्गीकार्या । तथा सति तस्या-भावस्य निःस्वभावतया शशशृङ्गतुल्यत्वादलीकादेव कार्योत्पत्तिरिति सिध्यति । तच्चासंगतम् । दृष्टविरोधात् । न हि तादृशात् कार्योत्पत्तिः क्वापि दृष्टा । न वा तादृशोऽभावः क्वापि दृष्टः । नाप्यनुमातुं शक्या । यदुत्पद्यते तदभावजन्यं यथा बीजाद्युपमर्दादङ्कुरादीति प्रयोगे दृष्टान्तस्यावस्थाविशेष एव पर्यवसानेन त्वदभिमताभावासाधकत्वात् । तादृशादभावाद्भावो-त्पत्त्यङ्गीकारश्च सर्वत्र सर्वतः सर्वोत्पत्तिप्रसङ्गादपि बाधितः । किंच । अभावाद्भावोत्पत्तौ कार्य-मभावान्वितं दृश्येत । सर्वस्य कार्यस्य कारणान्वितत्वदर्शनात् । किंच । उपमृद्य प्रादुर्भावोऽपि न सार्वत्रिकः । सुवर्णजन्यकटकादौ तन्तुजन्यपटादौ च तददर्शनात् । एवं चाङ्कुरादावपि बीजस्थूलांशस्यैवोपमर्दो न तु सूक्ष्मांशस्य । तदन्तस्त एव सूक्ष्मांशानामङ्कुरीभावात् । अतः

रश्मिः ।

किमपि भगवः' इति श्रुतिसाहाय्यादेवकारः । तत्रेति भाष्यं विवृण्वन्ति स्म तथा सतीति । अभावं निश्चिन्वन्ति स्म यदि हीति । बीजाद्यभाव इत्यत्र बीजादीति । अभावत्रयासंभवाद् ध्वंस उपात्तः । अङ्कुरादिप्रागभावो यद्यपि संभवति तथापि तत्खण्डनान्नास्ति स इति ज्ञेयम् । सहकारिकारणाभावान्न प्रागभावः प्रतीतिविषयो वा । तदवस्थेति बीजावस्थाविशेषरूपतया । एवमेव सर्वोपि प्रत्येति कार्यस्थितिप्रतिकूलां कारणावस्थां पश्यन्निह घटो ध्वस्त इति । तद-भावायेति भावादुत्पत्त्यभावाय । निःस्वभावादिति निरन्वयात् । सूत्रार्थविवरकं तच्चेति भाष्यं विवरीतुमाहुः तच्चेति । अदृष्टत्वादित्यत्र विरोधो नञर्थः अधर्म इतिवत्, अन्ये त्वभाव-मात्रं नञर्थः अब्राह्मण इत्यादयस्त्वर्थे कार्थं स्पृशन्तीति वदन्ति तदाहुः दृष्टेति । नहीत्यादि भाष्यं विवृण्वन्ति स्म नहीत्यादिना । तादृशादिति अलीकात् । तादृश इति निःस्वभावः । दीपनाशस्याप्यनिरन्वयत्वात् स्वकारणे वायौ लयात् । अनुमातुमिति यदुत्पद्यते तदभावजन्य-मुत्पद्यमानत्वात् यथा बीजाद्युपमर्दादङ्कुरादि, इत्यनेनानुमानेनानुमातुम् । व्याप्तिमनूद्य दृष्टान्तमनुमान-रचनायाहुः पर्यवेति । उपमर्दस्य ध्वंसरूपत्वात् । त्वदभीति निरन्वयनाशासाधकत्वात् । दृश्येतेति समवायित्वादभावस्य दृश्येत । कारणेति समवायिकारणेत्यर्थः । उपमर्द्येति ध्वंसं प्राप्य । ननु न सुवर्णमनुपमृद्य कटकादि दृश्यत इत्यत आहुः तन्तुजन्येति । तददर्शना-दिति तन्तुसुवर्णयोरुपमर्दादर्शनात् । बीजाद्युपमर्दः षड्भावविकारान्तर्गतापक्षय एव न निरन्वयो नाश इत्याहुः एवं चेति । न तु सूक्ष्मेति । न च 'किमत्र पश्यसीति न किंचन भगवः' इति श्रुतिविरोध इति वाच्यम् । न भावयितुं केनापि शक्य इत्यभाव इति व्युत्पत्तेः सूक्ष्मांशाभावरूपत्वात् । एतदेवाहुः तदन्तस्त इति तसिलन्तम् । सार्वविभक्तिकत्वात्त-दन्तर्गतानामित्यर्थः । इदं तु पत्रनवदलेष्वभावरूपसमवायिशून्येषु दृश्यते । अभावस्तु न दृश्योऽत आहुः अङ्कुरीभावादिति । अत इति मूलाद्युत्पत्तावपि मूले वैलक्षण्योपलब्धेः ।



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

कारणत्वेन स्वीकृत्य तन्निवृत्त्यर्थं जातिभ्रंशरूपं संन्यासपाषण्डं प्रसार्य सर्वमेव लोकं व्यामोहितवन्तः । व्यासोऽपि कलहं कृत्वा शंकरं शप्त्वा तूष्णीमास । अतो ऽग्निना मया सर्वतः सदुद्धारार्थं यथाश्रुतानि श्रुतिसूत्राणि योजयता सर्वो मोहो

---

भाष्यप्रकाशः ।

वाक्यानामर्थः संगृहीतः । असदपरपर्यायामित्यनेनैतत्सूत्रोक्तदूषणवृष्यता स्फुटीकृता । व्यासकलहादिकं तु,

'व्यासो नारायणः साक्षाच्छंकरः शंकरः स्वयम् । तयोर्विवादे संप्राप्ते किंकरः किं करोम्यहम्' इति

तत्संप्रदाये प्रसिद्धाद् गणेशोक्तात् ।

'वासना यदि भवेत् फलदात्री किं करिष्यति तदा मम काशी ।
व्यापको यदि भवेत् परमात्मा तारकं किमिति नोपदिशेन्माम्' इति ।

कीकटे मरणावसर उक्ताच्छंकराचार्यश्लोकाच्चावगन्तव्यम् । शेषं स्फुटम् । एवं च

रश्मिः ।

निबोध मे' इति ग्राह्यम् । स्फुटीकृतेति अन्यत्रापि भाष्ये । तन्निवृत्त्यर्थमित्यादि अविद्यानिवृत्त्यर्थम् । 'वेदान्तविज्ञान' इति श्रुत्या संन्यासः स पाषण्डं पापस्य खण्डम् 'त्रिदण्डं परिगृह्णीत सर्वशाखाविरोधि तत्' इत्येकदण्डे पापस्य खण्डम् । 'श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः । स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः' इति पाद्मात् । विकर्मत्वात् 'धर्मेण पापमपनुदति' इति श्रुत्यविषयत्वेन पापखण्डसमन्वितत्वं संन्यासे । अस्माकं तु प्रतिमासेवाख्यं कर्मास्त्येव, परं मानसमूर्तेः । तच्च कीदृशं जातिपरिभ्रंशरूपम्, जातेर्ब्राह्मण्यरूपायाः परितो भ्रंशस्तस्य रूपं यत्रेति । 'सप्ताहाच्छूद्रतां व्रजेत्' इति वाक्ये सप्ताहसन्ध्याऽकरणे ब्राह्मण्यपरिभ्रंशोक्तेः । तदुक्तम् । सर्वकर्मपरिभ्रष्टमिति । लौकिकी व्युत्पत्तिस्तु षण दाने भ्वादिः । 'अमन्ताड्डः' इति सूत्रेण डप्रत्ययः औणादिकः । षण्डः संघातः । बाहुलकाद्धात्वादेः षस्य सत्वाभावः । तालव्यादिरयमिति केचित् । सर्वमेवेत्यादि उक्तवाक्येभ्यः । ममेति वासनावासितस्य । तारकमिति 'रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षीभवति' इति जाबाले रुद्रस्य तारकब्रह्मोपदेशकत्वं श्रूयते । अतिरोहितार्थमिति । तदित्थम् । अतोऽग्निनेत्यादि । यतो व्यामोहार्थं रुद्रः सृष्टौ सत्यां क्रीडति अतो द्वितीयरुद्रो मोक्षक्रीडार्थमग्निरूपः । रुद्रोऽग्निरग्नी रुद्र इति । 'तस्मादुच्यते रुद्रो यस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्य रूपमुपलभ्यते । तस्मादुच्यते रुद्रः' इत्यथर्वशिर उपनिषदः । सर्वत इत्याद्यर्थः युक्तः । तेन मया 'पूर्णा भगवदीयास्ते शेषव्यासाग्निमारुताः, अग्निरूपत्वम् । 'यो यच्छ्रद्धः स एव सः' इति वाक्यात् । सर्वत इति 'मुक्तस्य कार्यमत्रेदं मुमुक्षोर्भवनाशकम् । विषयोत्तमतश्चापि विरक्तोस्मिन्पतेद् ध्रुवम्' इति सुबोधिन्याम् । अत्र च 'नानामतध्वान्तविनाशनक्षमो वेदान्तसिद्धान्तविकाशने पटुः । आविष्कृतोयं भुवि मध्यमाकरो मुधा मुधा धावत नान्यवर्त्मसु' इति । सर्वो मोह इति । अत एव 'हरिणा ये विनिर्मुक्तास्ते मग्ना भवसागरे । ये निरुद्धास्त एवात्र मोदमायान्त्यहर्निशम्' इति । तथा च हरिणा ये निरुद्धास्तेषां मोहो निराकृत इत्यर्थः । दैवीसंपद्वतां वा सर्वो मोहो निराकृतः । तदुक्तम् 'अयमेव महामोहो हीदमेव प्रतारणम् । यत्कृष्णं न भजेत्प्राज्ञः शास्त्राभ्यासपरः कृती' इति । विगतमोहाः श्रीमत्प्रभ्वादयः मर्यादायाम् । विद्वन्मण्डने 'अतो मर्यादायामेव स्वेयम्'

RUPAK NATH (DR. RUPAKNATH
www.astrology-tantra.com

निराकृतो वेदितव्यः । प्रथमाध्याय एव तन्मतमनूद्य विस्तरेण निराकृतमिति नात्रोच्यते ॥ २६ ॥

भाष्यप्रकाशः ।

पञ्चमस्कन्धीयेषु जडभरतवाक्येषु, 'अयं जनो नाम चलन् पृथिव्याम्' इत्यनेनावयवित्वमाभासमानमात्रादेवेत्युक्त्वा,

'एवं निरुक्तं क्षितिशब्दवृत्तमसंनिधानात् परमाणवो ये ।
अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः'

रश्मिः ।

इत्युक्तेः । 'अस्मत्कुलं निष्कलङ्कं श्रीकृष्णेनात्मसात्कृतम्' इति स्तोत्रे । पुष्टौ तु द्वादशाध्यायोक्ता 'वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः' इत्युक्ताः । सर्वात्मभावे मर्यादायामम्बरीषप्रभृतयः । पुष्टौ व्रजरत्नप्रभृतयः । सल्लक्षणं च तैत्तिरीये 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति । प्रथमाध्याय इति तृतीयपादे दहराधिकरणे । आचार्यान्तरस्य उत्कर्षसाम्यं वल्लभाष्टकविवृतिविवृतौ ग्रन्थकृद्भिरेवोक्तमित्येवं शेषं स्फुटमित्यर्थः । पृथिव्यामिति जनरूपविकारवत्याम् । परमाणुपुञ्जादिति । क्षितिशब्दस्य वृत्तं प्रतिपादकतया वर्तनं यत्र । तदपि क्षितिवस्तु । असत्सु सूक्ष्मपरमाणुषु स्वकारणेषु निधानाल्लयात् । अतः परमाणुव्यतिरेकेण क्षितिरपि न देहादिरपि नास्तीति पूर्वार्धात्तथेत्यर्थः । यदुक्तमिति अवयविखण्डनं यदुक्तं तदवयविखण्डनमपि बाहिर्मुख्यं गमिष्यतीत्येतदर्थं वैराग्यार्थमित्यन्वयः । अध्याय इति द्वादशेऽध्याय इदमस्ति । अध्यायार्थस्तु वैराग्यम् । 'ततो वैराग्यमुत्कृष्टं परोक्षकथनेऽपि च' । योगवैराग्यबाहुभ्यां भक्तिरत्र निरूपिता । परोक्षकथनं सर्वमधिकारिपरीक्षकम् । रहूगणस्याधिकारो यादृशश्च परीक्षिति' इति पञ्चमस्कन्धनिबन्धात् । ततोऽग्रेपि द्वादशेध्यायेऽवान्तरप्रकरणविचारे षष्ठेऽध्याये परोक्षकथनेपि वैराग्यं तत्साधनत्वेनोक्तम् । भगवत्येव रागजननादुत्कृष्टमिति निबन्धार्थः । षडध्यायी कृष्णेन स्वरूपस्थितिनिरूपणम् । अग्रे योगेन स्वरूपस्थितिप्रकरणं पञ्चदशाध्यायपर्यन्तम् । अग्रे देशस्थितिप्रकरणं षड्विंशत्यध्यायपर्यन्तमिति प्रकरणत्रयं षड्विंशत्यध्यायाः । न च योगवैराग्यबाहुभ्यां भक्तिरत्रनिरूपितेति निबन्धे । अत्रोपदेशफलितमाह सर्वोपसंहारे । 'रहूगण' इत्यादिना त्रयोदशे । 'गुरो हरेश्चरणोपासनास्त्रः' इति एकादशे । 'हरिं तदीहाकथनश्रुताभ्याम्' इति द्वादशसमाप्तौ । 'हरिसेवया शितं ज्ञानासिम्' इति प्रथमस्यावयवस्तैर्वाक्यैर्भक्तिनिरूपणात्तस्या एव प्राधान्यम् । तेन भगवच्छास्त्रानुसारी योग इति युक्तम् । तदुक्तं भगवता 'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान्भजते यो मां स मे युक्ततमो मतः' इति । तथा च भगवति मनोनिग्रहस्तदत्र वैराग्यमेतत्सहितस्तत्र स्नेहोऽत्र कर्तव्यत्वेनोक्तः । साधकत्वेन बाहुत्वमिति तत्त्वदीपे च । भक्तिर्वैराग्यशेषिणी निरूप्यतेऽत्राध्याय इत्यवैराग्यमध्यायार्थ इति ध्रुवम् । भक्तिजनकसंहितायां भक्तेरविशेषेण शास्त्रे प्राधान्याद्वैराग्ये विशेषेण प्राधान्यस्याक्षतेः । इह परोक्षवादप्रयोजनं वदंस्तदन्यत्राप्यतिदिशति 'परोक्षकथनं सर्वमधिकारिपरीक्षकम्' इति । परोक्षकथनमेव द्वादशेऽध्याये । अत्र परीक्षाफलितमाह 'रहूगणस्याधिकारो यादृशश्च परीक्षिति' तज्ज्ञापकमाह 'अतः परोक्षशब्दानां व्याख्यानं पृष्टवान्नृपः' न तूक्तार्थावबोधनं हि मुख्याधिकारः । स च व्याख्यानेऽपि तुल्य इत्यत आह 'वर्णितो बोध एव स्यात्राधिकारस्तु सिध्यति' इति । यथा कयाचिद्विरहिण्या नाम्नामेव प्रीतिमत्सपत्नीं प्रति स्वैरचारी मधुपः संप्रति दहतीत्युक्ते कयाचित्पृष्टयान्यया प्रियपरत्वेन व्याहृतेपि न तद्विप्रयोगरसविशेषानुभवाधिकाररूपप्रीत्यभावात्तद्व्याख्यातस्या न वा प्रीत्युत्पत्तिस्तथे-



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

इत्यनेन परमाणुपुञ्जाद्विशेषाख्यदेहोत्पत्तिः, परमाणूनामविद्याकल्पितत्वं च [illegible]क्तं [illegible]दपि रहूगणस्य बाहिर्मुख्यं दूरीकर्तुम् । बहिर्मुखप्रतिपन्नाविद्याकल्पितपरमाणुकारणवा[illegible]त्वा- त्तमादाय बहिर्मुखव्यवहारविषयस्य प्रपञ्चस्य हेयत्वे बोधिते बाहिर्मुख्यं गमिष्यतीत्य[illegible]र्थः, न तु कारणतत्त्वबोधनार्थम् । तदर्थमप्रवृत्तत्वात् । अत एवाग्रे निगमनावसरे, 'ज्ञानं विशुद्धं परमार्थमे- कम्' इत्यादिभिर्ब्रह्मस्वरूपतद्दुष्प्रापत्वभगवद्विषयकमतिप्राप्त्युपायस्वजन्मत्रय[illegible]न्तान्यु(नु)क्त्वा ।

'तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनैवेह विवृक्णमोहः ।
हरिं तदीहाकथनश्रुताभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः'

रश्मिः ।

ह्यपि । किंच न बोधकृतोधिकारः किंतु वैपरीत्यं 'अधिकारकृतो बोधः' इति बोधोधिकारज्ञापकः पर- मिति भावः । परीक्षार्थमेव तथोक्तिरित्यत्र प्रमाणमाह 'अतः स्कन्ध[illegible]ये प्रोक्तं परोक्षकथनं तथा 'आद्या- वबोधो मध्येन सुगमत्वाद्धि बुध्यते । उत्तमस्त्वधिकारोऽग्रे [illegible]न [illegible]टनिरूपणम्' इति । चतुर्थादित्रयेण तथा तत्परीक्षकमित्यर्थः । अधिकाराज्ञापकपरमिति भावः । प[illegible]र्थमेव तथोक्तिरित्यत्र प्रमाणमाह 'अतः स्कन्धत्रये प्रोक्तं परोक्षकथनं तथा' । अधिकार[illegible] यतोऽतस्तथा । तत्रादौ प्राचीनबर्हिषः कर्मासक्त्या हीनाधिकारत्वादबोध उक्तः । तत्त्वजि[illegible]स[illegible]पि कर्मासक्त्यभावेप्यभिमानसत्त्वात्त्यागा- भावादुपदेशार्थमपि राजसभावेन चलनाच्च रहूगणो [illegible]धिकारी । सोपि 'दुरत्ययेऽध्वनि' 'रजस्तमः- सत्त्व' इत्यादिना सुगमत्वेनोक्तमिति बुद्धवान् [illegible]कूटवा[illegible]बोधे त्वस्य नाधिकारः । हर्यश्वानां मुक्तत्वादु- त्तमाधिकारस्तेन तथा । तर्हि व्याख्यानं व्यर्थमत आह 'रहूगणोत्तमत्वाय व्याख्यानं तेन यत्स्वतः । बुद्धं तत्रापि निःशङ्कं तद्वाक्यं जगृहे पुनः' इति तत्परीक्षितस्तात्पर्यज्ञानार्थमित्यर्थः । क्वचित्तु तारतम्य- ज्ञानार्थमिति पाठः । तेन रहूगणेन [illegible]स्वतो व्याख्यानं विना बुद्धं तदत्र व्याख्यातमिति योजना । निःशङ्कं मननानपेक्षमित्यर्थः । शि[illegible]यैव तत्प्रयोजकगुरोरपि तत्त्वमुक्तमेवेत्याह 'भरतस्योत्तमत्वं च तेनैवोक्तमिति स्थितिः' इति । [illegible] तेन रहूगणेनैवेत्यर्थः । 'नमो नमः कारण' इति 'अहो नृजन्म' इत्यादिना चेति शेषः । यद्वा रा[illegible]: उत्तमत्वं शुकेनैव भरतस्त्वित्यादिनोक्तमित्यर्थः । तज्ज्ञानो- क्तिप्रयोजनमाह 'तस्य ज[illegible]मत्रय[illegible] द्वयं व्यर्थं न सर्वथा । अतो जन्मद्वयोत्कर्षस्तस्यैवं विनिरूपितः' इति । अमुक्त्या तद्वैयर्थ्य[illegible] । ततोधिकरसरूपभक्तिसाधकत्वेन तदभावः । आद्यन्तयोः प्रियव्रत- विरजयोरुत्तमत्वकथ[illegible]न्यायेन सर्वेषां तथात्वमुक्तं भवतीत्याह 'तस्य पुत्रस्तु पाषण्डेप्यत्यन्तं फल- दायकः । कृपावे[illegible] ग[illegible]पि तद्वंशेऽवततार ह । सर्व एवोत्तमा वंशे ततोन्तिमकथा तथा' इति । एवं च रहूगणस्य मध्यमा[illegible]रार्थं प्रति परमाणुपुञ्जकारणवादः परमतभाषेति तदेतदुक्तम् । तदपीति बाहिर्मुख्य[illegible] । तथा च मध्यमाधिकारी रहूगणः परीक्षितवत् । बहिर्मुखेति वेदबहिर्मुखसौग- तेत्यर्थः । [illegible]र्थमिति प्रपञ्चस्य नित्यत्वेन वस्तुत्वबोधनेऽवयविमण्डनं भवति तदा तु राजसस्य रहू- गणस्य [illegible] वैराग्ये नोपकुर्युरिमे श्लोका इति भावः । तदर्थमिति । किंतु 'अध्यात्मयोगग्रथितं तवोक्तमाख्याहि' इति रहूगणप्रश्नादेकादशोक्तस्ववाक्यान्याख्यातुं ब्राह्मणस्य प्रवृत्तत्वादित्यर्थः । [illegible] इति द्वादशाध्याये एव । ब्रह्मस्वरूपेत्यादि 'रहूगणैतत्तपसा न याति' इति दुष्प्रापत्वेत्यर्थः । '[illegible] महत्पादरजोभिषेकम्' इति रजोभिषेकजपापाभावं विना दुष्प्रापत्वं बोध्यम् । भगवद्विषयकेति 'यत्रोत्तमश्लोकगुणानुवादः' इत्यनेन । स्वजन्मेति । 'अहं पुरा भरतो नाम राजा' इति द्वयेन ।



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

**यस्तूपलभमान एव नाहमुपलभ इति वदति स कथमुपादेयवचनः स्यात् ॥ २८ ॥**

भाष्यप्रकाशः।

पपत्तये बाह्यार्थापेक्षा तस्यावश्यमभ्युपेया। तथा सति सिद्ध एव बाह्योऽर्थः प्रपञ्चरूपः। सहोपलम्भनियमादभेदस्तु सहपदार्थविचारादेवासंगतः। सहत्वं हि द्वयोर्भिन्नयोः पदार्थयोरेकदेशवर्तित्वमेककालवर्तित्वं वा। उभयथापि हेतुतावच्छेदकतया प्रविष्टे पदार्थान्तरे भिन्नोपलम्भनियमादित्येव हेत्वर्थो भवति। तदेवं प्रतिज्ञाहेत्वोर्विरोधे यदि हेतुरादरणीयस्तदा प्रतिज्ञाबाधः। यदि प्रतिज्ञादरणीया तदा साधकं विना तदसिद्धिः। किंचाभेदोऽपि किमेकत्वमुत भेदाभावः। आद्येपि संख्या वा धर्मान्तरम्। आद्ये नीलतद्धियोरेकत्वसंख्याविशिष्टत्वमित्यर्थो भवति। तेन न बाह्यार्थबाधः। यथा घटपटयोरेकत्ववैशिष्ट्येपि नान्यतरबाधस्तद्वत्। एवं द्वितीयेपि। यदि भेदाभावपक्षस्तदा अभावस्य प्रतियोगी भेदस्त्वयावगतो, न वेति वक्तव्यम्। यदि नावगतस्तर्हि भेदस्य सर्वथा बुद्ध्यनारूढत्वेन नीलमात्रस्य भानाच्च भेदस्य निषेधार्हत्वमित्यभेदासिद्धिः। अथावगतस्तथा सति संवित्तिवत् प्रत्यक्षत्वाद्धेत्वन्तरस्य तत्प्रतिक्षेपकस्याभावात् सिद्ध एव भेद इत्यभेदप्रतिज्ञा असंगतैव। तदेतदुक्तम्। यस्तूपलभमान एव नाहमु-

रश्मिः।

तस्येति ज्ञानस्य। बाह्य इति। एतावतास्य प्रपञ्चस्य नाभावः उपलब्धेरिति भाष्यं प्रपञ्चितम्। अस्येति इदमा प्रत्यक्षस्य सदात्मकस्येत्युच्यते। नाभावो न भावाभावः, सत्त्वमिति यावत्। उपलब्धिविषयत्वादित्युपलब्धेरिति भाष्यार्थः। इन्द्रियसंनिकर्षे बाह्यप्रपञ्चस्योपलभ्यमानत्वादित्युपलब्धेरित्यस्यार्थ इति वृत्तौ श्रीकृष्णचन्द्राः। उपलभ्यते हि प्रपञ्च इति तु भाष्यं उपलब्धेरित्यस्य विवरकम्। किंचेत्यादिना पूर्वमनूदितात्सहोपलम्भनियमादभेदस्तत्र हेतोरप्रसिद्ध्या साधनाप्रसिद्धिर्यथा काञ्चनमयधूमादित्यादौ। तस्याश्च हेतुतावच्छेदकविशिष्टहेतुज्ञानाभावाद्व्याप्तिज्ञानादेरभावः फलमिति कथं व्याप्तिग्रह इत्याहुः सहोपेति। ज्ञानविषयौ भिन्नौ। सहोपलम्भनियमात्। अयं घट इतिवदिति। उभयथेति भिन्नपदार्थैकदेशवर्तित्वादिलक्षणद्वयेऽपि। हेतुत्वेति हेतु भिन्नपदार्थैकदेशवर्तित्वोपलम्भनियमादिति भिन्नपदार्थैककालवर्तित्वोपलम्भनियमादिति च जातौ तत्र भिन्नोपलम्भनियमत्वं हेतुतावच्छेदकं पदार्थस्य भिन्नशब्देन देशकालवर्तित्वस्यापि भिन्नशब्देन लाभाद्धेतुघटके न भवतः। एवं च तत्तया प्रविष्टे पदार्थान्तरे भिन्नरूपे सति भिन्नोपलम्भनियमादित्यर्थो भवति। हेतुस्तु भिन्नोपलम्भनियमादित्येवेत्यर्थः। नियमोपि नियतोपलम्भ इत्येवमुपलम्भविशेष एवेति यदि तदा तु भिन्नोपलम्भादित्यपि हेतुर्लाघवादेव। विरोधेन इति अभेदप्रतिज्ञा ज्ञानविषयावभिन्नाविति साध्यरूपा भेदघटितो हेतुरिति विरोधस्तस्मिन्। आदरणीय इति अशुद्ध एवादरणीयो न तु शोधनीयः। प्रतिज्ञेति अभेदबाधः। नहि गोत्वमश्वत्वेन सिध्यतीति। साधकमिति हेतुं विना। तदसिद्धिरिति अभेदप्रतिज्ञाया असिद्धिः। तथा च भेदसिद्ध्या सूत्र उपलब्धिविषयत्वरूपहेतुसिद्ध्या सूत्रीयसाधनाप्रसिद्धिर्नेति भावः। प्रकारान्तरेणापि साधनाप्रसिद्धिं वारयन्ति किंचेति। अभेदो नीलतद्धियोः। एकत्वेति। तदतिरिक्तमते तु संख्यायाः नीले द्रव्ये समवायसंबन्धस्तद्धियां स्वसमवायिसमवेतत्वसंबन्धः। तेनेति बहुतरप्रसिद्धेनाङ्गीकारेण। एकत्वेति घटश्च पटश्च तयोः समाहारो घटपटमित्यत्रैकत्ववैशिष्ट्येपि। नीलेति नीलमिव तद्धीरपि नीलभिन्ना नेति नीलमात्रस्य। न निषेधार्हत्वमिति प्रतीतं हि निषेध्यमिति न्यायत्वान्न निषेधार्हत्वम्। प्रत्यक्षत्वादिति संवित्तौ प्रत्यक्षत्वं भेदे स्वाश्रयविषयतासंबन्धेन वर्तते। हेत्वन्तरस्येति प्रत्यक्षत्वेतरहेतोः। तत्प्रतीति भेदापाकारकस्य। तथापि यदि गणिता



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

## वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

ननूपलब्धिमात्रेण न वस्तुसत्त्वम् । स्वप्नमायाभ्रमेष्वन्यथादृष्टत्वादित्याशङ्क्याह न । वैधर्म्यात् स्वप्नादिषु तदानीमेव स्वप्नान्ते वा वस्तुनोऽन्यथाभावोपलम्भात् । न तथा जागरिते । वर्षानन्तरमपि दृश्यमानः स्तम्भः स्तम्भ एव । स्वप्ने मोक्षे प्रवृत्तिव्याघातश्चकारार्थः ॥ २९ ॥

भाष्यप्रकाशः ।

पलभ इति वदति स कथमनुपादेयवचनः स्यादिति । उपलभन्नेवेति पाठे तु औणादिकोऽतिप्रत्ययः । उणादीनां सर्वधातुभ्यो भवनात् । 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' इति शतृवद्भावाच्चुम् ।

'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे । कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु' इति भाष्यानुशासनात् ॥ २८ ॥

वैधर्म्याच्च न स्वप्नादिवत् ॥२९॥ पूर्वसूत्रोक्तस्य हेतोरनैकान्तिकत्वं वारयितुं तद्दृष्टान्तासंगतिं वदतीत्याशयेन सूत्रमुपन्यस्य व्याकर्तुमवतारयन्ति नन्वित्यादि । अन्यथा

रश्मिः ।

एवातिप्रत्ययान्ता निपातिता इति कथं लभधातोरतिप्रत्यय इत्यत आहुः संज्ञास्विति । अनूबन्धमिति 'उपसर्गस्य घञि'इति दीर्घः । शास्त्रमिति अनुशासनीयमित्यर्थः । तथाचोपलभेरनुदात्तेतश्चातिर्नुम् । इति लभधातुरतिप्रत्ययः शतृवदिति उपलभन्निति भाष्यप्रयोगरूपकार्याद्विद्यादिति साधुरित्यर्थः । किंच रञ्जेः क्युनिति रञ्जेर्विहितः क्युन् कुपेरपि दृश्यते कृपण इति । तथा पृषदादिभ्यो निपातितः शतृवदिति लभेरपि भाष्ये दृश्यत इत्युपलभन्निति साधुः । अत्र उपाच्चेति सूत्रेण परस्मैपदप्रक्रियास्थेनोपपूर्वकालभेः परस्मैपदम् । वृत्तौ तु रभिरनुवृत्तः तत्प्रामादिकम् । सूत्रप्रणयनवैयर्थ्यापातात् । उपसंख्यानप्रसङ्गात् । तत्स्वरूपं तु 'व्याङ्परिभ्यो रमः' इति सूत्रादनु 'उपाच्च' उपसंख्यानमित्यनुशासनादिति । तथाच प्रपञ्चः सन् उपलब्धिविषयत्वात् घटवदिति सूत्रार्थः ॥ २८ ॥

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥ अनैकान्तिकत्वमिति । प्रपञ्चोऽसन् उपलब्धिविषयत्वात् स्वप्नवत् शुक्तिरजतवच्चेति दृष्टान्तान्तरेण पूर्वोक्तस्योपलब्धिविषयत्वस्य हेतोः स्वप्ने साध्यवदन्यस्मिन् वृत्तिमत्त्वाद्यसाधारण्यम् । तत्रैव साध्यासामानाधिकरण्यादसाधारण्यम्, तद्वन्निष्ठात्यन्ताभावप्रतियोगिसाध्यकादिरनुपसंहारीत्यनुपसंहारित्वं च । तद्वान् हेतुमान् स्वप्नादिस्तन्निष्ठोत्यन्ताभावः सत्त्वात्यन्ताभावस्तद्देशाभावप्रतियोगिसाध्यं सत्त्वं यस्य विपक्षस्य स्वप्नादेरिति लक्षणसमन्वयः । साधारणाद्यन्यतमत्वमनैकान्तिकत्वमित्यनैकान्तिकलक्षणादनैकान्तिकत्वमुक्तम् । किंच विरुद्धत्वमपि । 'साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धत्वम्'[1] । साध्याभावसाधको हेतुर्यथोक्ते प्रपञ्चः असन्नित्यत्र प्रपञ्चः असन् प्रत्ययत्वात् स्वप्नप्रत्ययवदिति सत्प्रतिपक्षत्वमपि । तथा प्रपञ्चस्य पक्षत्वे आश्रयासिद्धत्वमपि । पक्षे पक्षतावच्छेदकाभावात् । व्याप्यत्वासिद्धत्वं च । पक्षस्य ज्ञानात्मकत्वेनोपलब्धिविषयत्वानङ्गीकारात् । एवं साध्याप्रसिद्धिरपि । सत्त्वे सत्त्वत्वाभावात् । सत्पदार्थानङ्गीकारात् । स्वरूपासिद्धत्वमपि । हेतुतावच्छेदकस्योपलब्धिविषयत्वत्वस्य हेतौ ज्ञानातिरिक्तविषयाभावेनाभावात् । किंच बाधोपि । पक्षे साध्याभावात् । प्रपञ्चस्यासत्त्वादिति परोद्भावितं वारयितुमित्यर्थः । तद्दृष्टान्तेति

1. साध्यव्यापकीभूतस्य हेतोर्योऽभावस्तस्य प्रतियोगित्वम् ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

दृष्टत्वादिति वस्त्वसत्त्वस्य दृष्टत्वात् । तथा च पूर्वोक्तो हेतुः साधारण इत्यर्थः । स्वाद्वन्ति नेत्यादि । तथा च स्वप्नदृष्टजागरितदृष्टयोस्तात्कालिकाऽन्यथात्वतात्कालिकान्यकालिकान्यथात्वाभावरूपवैधर्म्याच्च स्वप्नजागरितदृष्टयोस्तुल्यत्वमित्यर्थः । अन्ये तु बाधाबाधाभ्यां दुष्टकारणजन्यत्वशुद्धकारणजन्यत्वाभ्यां च वैधर्म्यमाहुः । एवंच मायास्थलेऽप्येतत् तुल्यम् । तत्र

रश्मिः ।

तस्य सौगतस्य यौ दृष्टान्तौ स्वप्नवत् शुक्तिरजतवदिति तयोरसंगतिम् । पूर्वोक्त इति उपलब्धिविषयत्वहेतुः । साधारण इत्युपलक्षणमसाधारणादीनाम् । सूत्र आदिशब्दो जागरितदृष्टान्तं वक्ति । 'स्वप्नः सुप्तस्य विज्ञाने' इति । षष्ठ्यन्ताद्वतिः तुल्यार्थ इत्याशयेनाहुः स्वप्नदृष्टेति । तात्कालिकान्यथात्वं च तात्कालिकान्यकालिकान्यथात्वाभावश्च तौ ताभ्यां रूप्यते बाध्यते इति तद्रूपं वैधर्म्यम् । तात्कालिकान्यथात्वतात्कालिकान्यकालिकान्यथात्वाभावरूपवैधर्म्यं तस्मादित्यर्थः । इत्यर्थ इति तथा च जागरितस्यादिशब्दार्थत्वेन भाष्ये स्वप्नमायाभ्रमेष्वित्युक्त आदिशब्दार्थो न सिद्धान्ते अपि तु पूर्वपक्ष इति ज्ञापितम् । तथा चोक्तसूत्रार्थादिदं लभ्यते । स्वप्नजागरितदृष्टयोस्तुल्यत्वम् । स्वप्नदृष्टविषयत्वतुल्यं जागरितदृष्टविषयत्वं यदुक्तं तन्न संभवति । भ्रमप्रमयोर्विषयभेदात् । तथा च प्रमाविषयत्वस्य हेतुतावच्छेदकत्वान्नोपलब्धित्वेन सामान्यरूपेणोपलब्धिः सूत्रे विवक्ष्यते अपि तु प्रमात्वेन रूपेणातो न साधारणादय इति । तदित्थम् । प्रपञ्चः असन्, उपलब्धिविषयत्वात्, स्वप्नवदित्यनेनानुमानान्तरेण दोषा उद्भावितास्ते न सन्ति स्वप्नादेः सत्त्वरूपसाध्यवदन्यत्वेपि तत्र प्रमाविषयत्वरूपहेतोरभावान्न हेतोः साधारण्यम् । एवं स्वप्नादौ साध्यसामानाधिकरण्यविरहादसाधारण्यमपि न । एवं स्वप्नमायादौ हेतुमत्त्वाभावेन तद्वन्निष्ठात्यन्ताभावप्रतियोगित्वाभावात्साध्ये हेतोर्नानुपसंहारित्वम् । किंच संस्तूपलभ्यत इति सत्त्वव्यापकीभूतेऽस्त्यभाव उपलब्ध्यभावो न जातः किंत्वन्याभावस्तादृशाभावप्रतियोगी अन्यः । न तूपलब्धिविषयत्वमितीदं न विरुद्धम् । तथा असन् प्रत्ययत्वात्, स्वप्नप्रत्ययवदित्यस्य प्रतिपक्षस्य 'अत्रात्मा स्वयंज्योतिर्भवति' इति श्रुतेरात्मभिन्नस्य विषयस्य मिथ्यात्वेन प्रत्ययत्वहेतोः स्वप्नसृष्टिविषयकज्ञाने साधारण्यमिति न सत्त्वसाध्यकोपलब्धिविषयत्वहेतुकमनुमानं सत्प्रतिपक्षम् । किंच प्रपञ्चे पक्षतावच्छेदकाभावादाश्रयासिद्धत्वं यदुक्तं तन्न पूर्वसूत्रे एवायमर्थ इत्यादिना बाह्यार्थसाधनान्नित्ये प्रपञ्चे प्रपञ्चत्वमस्तीति न संभवति । एतेन बाह्यार्थसाधनेनैवोपलब्धेर्विषयत्वस्यैव प्रपञ्चेऽङ्गीकार्यत्वाज्ज्ञानाकारत्वाभावेन हेतोः पक्षसत्त्वान्न व्याप्यत्वासिद्धत्वम् । किंच बाह्यार्थसाधनेन प्रपञ्चस्य सत्त्वात्साध्याप्रसिद्धिरपि नास्ति । तथा प्रपञ्चस्य सत्त्वादेवोपलब्धिविषयत्वस्य हेतुतावच्छेदकस्य हेतौ सत्त्वान्नासाधारणाप्रसिद्धिः । बाधोऽपि नास्ति । प्रपञ्चस्य सत्त्वात् । ब्रह्मकार्यत्वात् । किंच प्रपञ्चः असन्, उपलब्धिविषयत्वात् स्वप्नवदिति । व्याप्यत्वासिद्धम् । कथम् । इत्थम् । मायिकत्वमुपाधिः । यत्र यत्रासत्त्वं तत्र तत्र मायिकत्वमिति साध्यव्यापकत्वम् । यत्र यत्रोपलब्धिविषयत्वं तत्र तत्र मायिकत्वमिति नास्ति । प्रपञ्चे मायिकत्वाभावात् । तस्मान्निर्दुष्टं सत्त्वसाध्यकमुपलब्धिविषयत्वलिङ्गकमनुमानमिति भावः । अन्ये त्विति शंकररामानुजमाध्वाचार्याः । स्वप्नजागरितयोर्बाधाबाधाभ्याम् । रामानुजाचार्यमते तु विशेषमाहुः दुष्टेति, निद्रादयो दोषाः । आहुरिति । सिद्धान्ते तु निर्हेतुकतात्कालिकान्यथात्वनिर्हेतुकतात्कालिकान्यकालिकान्यथात्वाभावाभ्यां वैधर्म्यमिति तुकम् । जागरितदृष्टेऽपि क्वचिदतिदिशन्ति स्म एवं चेति । मायास्थले इति शुक्तिरजतादिस्थले ।



DR. RUPNATHJI ( DR. RUPAK NATH )
w.astrology-tantra.c

भाव्यप्रकाशः ।

मायायास्तत्कृतनेत्रबन्धस्य वा दोषत्वात् । तदुक्तमष्टमस्कन्धे, 'जित्वा बलान्निबद्धाक्षान्नटो हरति तद्धनम्' इति । सर्वेषां तथा प्रतीतेश्च । मरीच्युदकस्थलेऽपि तेजःप्राबल्यस्यैव दोषत्वम् । तथा गन्धर्वनगरस्थले वस्तुसामर्थ्यस्यैव दोषत्वम् । एवमन्यत्रापि ।

भास्कराचार्यास्तु—स्वप्नप्रत्ययस्य मिथ्यात्वं त्वया जाग्रत्प्रत्ययबाध्यत्वाद्वक्तव्यम् । तत्र स्वप्नसत्यत्वबाधकीभूतप्रत्ययेऽपि मिथ्यात्वमेवाङ्गीकृतमिति तस्य तेन बाधाभावात् स्वप्नस्य मिथ्यात्वासिद्धौ दृष्टान्तासिद्ध्या तेनानुमानेन जाग्रत्प्रत्ययस्य मिथ्यात्वं न साधयितुं शक्यमित्यपि दूषणमाहुः ।

पार्थसारथिमिश्रास्तु—नीलज्ञानस्यात्मावसायित्वं केन गृह्यते, नीलस्य विज्ञानाकारत्वं च । न तावन्नीलज्ञानेन । नीलमात्रप्रकाशनात् । अथ विमतं नीलादिकं स्वात्मांशभूतज्ञानाकारः । स्वसंवेद्यत्वात् । बाह्यत्वघटितग्राह्यलक्षणायोगादित्याद्यनुमानात् । तर्हि तदनुमान-

रश्मिः ।

'ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथाभासो यथा तमः' इति वाक्यात् माया विषयदोषः । नेत्रबन्धः करणदोषः । अष्टमेति एकादशाध्यायेऽस्ति 'बलान्निबद्धाक्षान्' इति । बालानित्यपि पाठः । निबद्धान्यक्षीणि येषां तान् । विषयगतदोषस्तु न भवतीत्याहुः सर्वेषामिति, निबद्धाक्षभिन्नानां तथा नाम शुक्तिरजतादौ शुक्तित्वाविषयकप्रतीतेरित्यर्थः । तेज इति तथा चात्रापीन्द्रियगतो दोषो न विषयगतस्तथा सति समीपगतावपि मरीच्युदकं दृश्येतेत्यर्थः । करणगतदोषमुक्त्वा विषयगतमाहुः तथेति वस्तुविषयः । एवमन्यत्रेति प्रतिबिम्बे तमसि च विषयगतो दोष इन्द्रियगतो दोषश्च ज्ञातव्य इत्यर्थः । अत्र मुखाद्यभिन्नः प्रतिबिम्बः दर्पणादिसंनिधानदोषप्रतिहतपरावृत्तनयनकिरणस्य स्वमुखदर्शनमात्रेण दर्पणादौ प्रतिबिम्बाभिमानात् । अतोऽवस्त्विति मन्यन्त इन्द्रियदोषजन्यत्वं च तत्र । प्रतिबिम्बस्य पदार्थान्तरत्वात् । विषयदोषजन्यत्वस्य चावश्यकत्वात् 'तत्त्वं तु प्रतिबिम्बोऽस्ति शब्दात्प्रत्ययतस्तथा । विलक्षणत्वाद्विज्ञेयमन्यो मायिकोऽस्त्यसौ । किंचादर्शविशेषेऽपि चातुर्येण विनिर्मिते । प्रत्यक्षं स्वमुखं भाति तत्रोक्तोपायकुण्ठता । यतोऽस्तेभ्यः प्रतिहताः परावृत्य दृगंशवः । संसृष्टाः स्वमुखेनैकमीक्षेरन्न बहूनि तु' । प्रत्यक्षं प्रतिबिम्बं तु । उक्तोपायकुण्ठता तु 'यतोऽस्तेभ्यः' इति कारिकया दर्शिता । एकं मुखम् । बहूनि मुखानि । विस्तरस्तु प्रतिबिम्बवादे द्रष्टव्यः । तथा न तमस्तेजःसामान्याभावः । तमश्चलतीति भावत्वप्रतीतेः । तच्च मायापरिणामविशेषरूपं भावातिरिक्तं पदार्थान्तरम् । 'तद्विद्यादात्मनो मायां यथाभासो यथा तमः' इति वचनात् । तच्च तेजोभावे मायया मनुष्यादीन्प्रत्येव जन्यते न सर्वान्प्रति । अत एवोलूकबिडालादयस्तेजोभावमेव गृह्णन्ति न तमः । अत एवोलूकरूपिणा कणादेन वैशेषिकदर्शनस्य कृतत्वात् । तस्य तमश्चाक्षुषाऽभावेन तत्सूत्रे भावाभावस्तम इत्युक्तिरपि युज्यते । एवमस्मदादीनां दृष्टीनां तमोवृतत्वात्तमस एव ग्रहस्तथा तद्दृष्टेः कोमलत्वाद्बलवत्तेजसा प्रतिघातसद्भावे च सुखेन तेषां विषयग्रह इति । विस्तरस्त्वन्धकारवादे द्रष्टव्यः । तेनेति मिथ्याभूतेन प्रत्ययेन । अनुमानेनेति स्तम्भादिप्रत्ययाः स्वात्मांशमेव बाह्यतयाध्यस्यन्तो मिथ्याभूताः प्रत्ययत्वात्, स्वप्नप्रत्ययवदित्यनुमानेन । आत्मावेति स्वात्मांशमिति साध्यविशेषणेनोक्तं स्वात्मविषयत्वमित्यर्थः । केन हेतुना । नीलमात्रेति मात्रशब्देनात्मांशविज्ञानाकारत्वयोर्व्युदस्तिः । सौगताशङ्कामाहुः अथेति । विमतं बौद्धमतम् । आदिशब्देन पीतं स्तम्भः कुड्यं च । स्वात्मेति स्वं ज्ञानं तस्यांशो बाह्यस्तद्भूतं ज्ञानं तस्याकारः स्वं ज्ञानं नीलमित्याकारकं तस्य संवेद्यत्वं सम्यक् बाह्यत्व-



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

न भावोऽनुपलब्धेः ॥ ३० ॥

यदप्युच्यते, बाह्यार्थव्यतिरेकेणापि वासनया ज्ञानवैचित्र्यं भविष्यतीति तन्न । वासनानां न भाव उपपद्यते । त्वन्मते बाह्यार्थस्यानुपलब्धेः । उपलब्धस्य हि वासनाजनकत्वम् । अनादित्वेऽप्यन्धपरंपरान्यायेनाप्रतिष्ठैव । अर्थव्यतिरेकेण वासनाया अभावाद् वासनाव्यतिरेकेणाऽप्यर्थोपलब्धेरन्वयव्यतिरेकाभ्यामर्थसिद्धिः ॥ ३० ॥

भाष्यप्रकाशः ।

मात्मांशग्राहि वा न वा । आद्ये तस्य तथात्वे हेत्वन्तराकाङ्क्षा, तस्य हेतोरित्यनवस्थानादसिद्धिः । द्वितीये तु नीलादिज्ञानैः किमपराद्धं येन स्वानुमाने तथात्वमङ्गीकृत्यापि बाह्यप्रकाशकानि तान्यात्मन्यवरुध्यन्ते । किंच । अज्ञानविपर्ययज्ञानस्य ज्ञानाभाव एव ग्राह्यः । न च ज्ञानाभावस्य ज्ञानात्मता संभवति । अत्यन्तविरुद्धत्वादित्यादीनि बहूनि दूषणान्याहुरित्युपरम्यते । चकारसूचितं दूषणान्तरमाहुः । स्वस्येत्यादि । प्रवृत्तेर्मोक्षार्थात् तदालयत्वस्य चानङ्गीकारात् तथेत्यर्थः । तेन प्रपञ्चस्य न स्वमादितुल्यत्वमिति सिद्धम् ॥ २९ ॥

न भावोऽनुपलब्धेः ॥ ३० ॥ क्षणिकविज्ञानवाद्युक्तं ज्ञानवैचित्र्यहेतुं दूषयतीत्याशयं स्फुटीकुर्वन्ति यदपीत्यादि । अयमर्थः । वासना हि अनुभवजनितः स्मृतिजनकः संस्कारः

रश्मिः ।

घटितं वेद्यस्यं संवित्तिः तस्मात् । स्वसंवित्तित्वं हेतुतावच्छेदकम् । एतच्च ग्रन्थे द्रष्टव्यम् । हेतुं विवृणोति स्म बाह्यत्वेति बाह्यत्वघटितग्राह्यलक्षणयोगेन इत्यत्र ज्ञाने बाह्यत्वेन घटितं ग्राह्यं गोचरस्वलक्ष्यतेऽनेन ग्राहकेण स ग्राहकः बाह्यत्वघटितग्राह्यलक्षणः तस्य योगो विषयितया संवित्तौ तस्मात्, संवित्तिप्रोक्तज्ञानात् । आदिशब्दार्थो द्रष्टव्यः । अनुमानादिति गृह्यत इति संबन्धः । दृष्टान्तस्तु स्वप्न एव । आत्मांशेति बाह्यत्वघटितग्राह्यग्राहि । तस्येति अनुमानं व्याप्तिज्ञानं न तु नीलादिकम् । ज्ञानात्मांशभूतज्ञानाकार इत्यनुमितिमुद्राव्य सनाथं न नीलज्ञानात्मांशभूतज्ञानाकारं गृह्णाति विषयीकरोति तस्मादनुमानस्य आत्मांशग्राहित्वे विषयीकरणे हेत्वन्तरस्य परंपरारूपस्याकाङ्क्षा भवति । हेत्वन्तरे परंपरारूपे पूर्वोक्तन्यायाविरोधरूपस्य । यद्वा हेतोरनुमानतयोक्तविकल्पे प्राप्ते पुनः पुनराद्ये तस्य तथात्वे हेत्वन्तराकाङ्क्षा पूर्वोक्तप्रकारेण भवत्येवं तस्य तस्यापीत्यनवस्थानादात्मांशग्राहित्वासिद्धिरित्यर्थः । किमपराद्धमिति आत्मांशाग्राहित्वे तुल्ये येनापराधेन नीलज्ञानस्य प्राथम्यमपहृतम् । प्रत्यक्षानुमानेत्यादिक्रमाद् एतदेवाहुः येनेत्यादिना । येन अपराधेन । तथात्वं आत्मांशाग्राहित्वम् । बाह्येति अर्थप्रकाशकानि । तानीति नीलादिज्ञानानि । आत्मनि ज्ञानस्वरूपविषयेऽवरुध्यन्ते संकुचितानि क्रियन्ते । एवेति अयं ज्ञानात्मकत्वं व्यवच्छिनत्ति । विरुद्धत्वं सहानवस्थायित्वम् । सूचितमिति । तथा च व्यञ्जनया चकारार्थ इति भाष्येऽर्थः । तदस्तीति आलयविज्ञानास्तित्वस्य । तदिति मोक्षार्थां या प्रवृत्तिस्तस्या व्याघातः । चैत्रस्य गुरुकुलमितिवदन्वयः । स्वप्नादीति । आदिशब्देन मायाभ्रमौ ॥ २९ ॥

न भावोऽनुपलब्धेः ॥ ३० ॥ क्षणिकेति । ननु वैधर्म्यमप्रयोजकं स्वप्नेपि स्वप्नान्तरवैधर्म्यदर्शनात् । अतो विचित्रवासनाभ्यो विचित्राणि ज्ञानानि तेभ्यः पुनस्ता इति चक्रवत्परिवृत्त्यङ्गीकृतौ न किमपि दूषणमित्येवमुक्तम् । हेतुं वासनाम् । त्वन्मत इत्यादिभाष्यतात्पर्यमाहुः अयमिति ।



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

## क्षणिकत्वाच्च ॥ ३१ ॥

**वासनाया आधारोऽपि नास्ति । आलयविज्ञानस्य क्षणिकत्वात् । प्रवृत्तिविज्ञानवत् । एवं सौत्रान्तिको विज्ञानवादी च प्रत्युक्तः ।**

---

भाष्यप्रकाशः ।

कार्यलिङ्गकानुमानात् सिद्ध्यति । अनुभवं विना तु न तस्या उत्पत्तिः । अनुभवस्य चार्थं विना । अर्थस्तु त्वन्मते नास्त्येवेति तज्जनकाभावे कथं तस्याः सिद्धिः । अथ विचित्राज्ज्ञानाद् वासना, विचित्राभ्यो वासनाभ्यो ज्ञानानीति हेतुहेतुमद्भावेन विज्ञानवासनाचक्रमनादि परिवर्तत इति वदसि तदाप्यन्धपरंपरान्यायेन तस्य ज्ञानस्याप्रतिष्ठैव । अर्थव्यतिरेकेण वासनाया अभावात् । यदि ह्यर्थव्यतिरेकेण वासनाः स्युस्तदा स्वप्नं दृष्ट्वोत्थितस्य तदनुभवजन्या वासनास्ताभ्यश्च तादृशानि विज्ञानान्येव सर्वदानुवर्तेरन् न तु तद्विसदृशानि जाग्रद्विज्ञानानि भवेयुः । तदुपमर्दकस्य बाह्यार्थस्य त्वन्मते अभावात् । अस्मन्मते तु अन्यथा, अतोऽर्थव्यतिरेकेण वासनाया अभावादन्वयेन वासनाव्यतिरेकेणार्थोपलब्धेर्व्यतिरेकेणेत्यन्वयव्यतिरेकाभ्यामर्थसिद्धिरिति न बाह्यापलापः शक्यः ॥ ३० ॥

क्षणिकत्वाच्च ॥ ३१ ॥ प्रकारान्तरेणापि वासनां निराकरोतीत्याशयेनाहुः वासनाया इत्यादि । अयमर्थः । वृत्तिविज्ञानं वासनाजनकं पूर्वक्षणवृत्ति । तदाधारश्चालयविज्ञानं तत्समानकालम् । एवं सति वृत्तिविज्ञानेन यदा वासनोत्पादनीया तदानीं वृत्तिविज्ञानाधारस्यालयविज्ञानस्य नष्टत्वादाधाराभावेनापि वासनानुपपत्तिः । तदानीमालयविज्ञानसत्ताङ्गीकारे क्षणिक-

रश्मिः ।

आर्थेतरे प्रत्यक्षाभावादाहुः कार्येति देवदत्तो वासनावान्, स्मृतेः, अस्मदादिवदित्यनुमानात् । विनेति नोत्पत्तिरित्यर्थः । तज्जनकेति वासनाजनकानुभवाभावे । तस्या इति वासनायाः । तथा चोपलब्धस्य बाह्यार्थस्य विषयस्यानुभवद्वारा वासनाजनकत्वं हि निश्चयेनेतिभाष्यार्थः । अनादित्व इत्यादि भाष्यं विवृण्वन्ति स्म अथेति । विचित्राज्ज्ञानादिति स्मार्तः प्रयोगः । अप्रतीति युक्तेरप्रतिष्ठा । तर्काप्रतिष्ठानसत्त्वादेवाकारः । अर्थेत्यादि । इदं व्याख्येयं भाष्यम् । उक्तं भाष्यं विवृण्वन्ति स्म यदि हीति । तदुपेति स्वप्नोपमर्दकस्य । सिद्धान्ते त्वयं दोषो नास्तीत्याहुः त्वन्मत इति । अन्यथेति स्वप्नविज्ञानोपमर्देनेन विसदृशानि विज्ञानानीत्यर्थः । अन्वयेनेति अर्थसत्त्वे वासनासत्त्वमित्यनेन । वासनेत्यादिभाष्यं विवृण्वन्ति स्म वासनाव्यतीति अर्थाभावे वासनाभाव इति व्यतिरेको न तु वासनाभावेऽर्थाभाव इति । ननु किमनेन न त्वित्युक्तपक्षेणार्थाभावे वासनाभाव इत्यस्यैव सुवचत्वादिति चेन्न । चक्रवत्परिवृत्तौ वासनाया अपि कारणत्वसंभवो न भवतीत्यस्य कारणताग्राहकव्यतिरेकस्यावश्यवक्तव्यत्वाल्लाघवमत्र शरणम् । अर्थसिद्धिरिति विषयसिद्धिः ॥ ३० ॥

क्षणिकत्वाच्च ॥ ३१ ॥ वृत्तिविज्ञानक्षणिकत्वतुल्यमालयविज्ञानस्य क्षणिकत्वम् । तस्माद्वासनाया आधारोऽपि नास्तीति भाष्यार्थमाहुः अयमिति । वृत्तिविज्ञानमिति । वृत्तौ तु प्रवृत्तिविज्ञानमुक्तं शंकरभाष्येपि तथोक्तम् । तत्र प्रवृत्तेर्वासनाजनकत्वं दुरूहमिति तत्त्यक्तम् । पूर्वेति वासनायाः पूर्वक्षणवृत्ति । तदाधारः वासनाधारः । तत्समानेति क्षणिकत्वेऽपि वृत्तिविज्ञानसमकालं भवति । यदेति द्वितीयक्षणे । तदानीमिति आलयविज्ञानतृतीयक्षणे । एवमेतावता भाष्यं व्याख्यातम् । अन्यदाहुः तदानीमिति । क्षणिकेति । आधारस्यालयविज्ञानस्य द्विक्षणावस्थायित्वात् ।

RUPNATHJI( DR. RUPAK NATH)
www.astrology-tantra.com

माध्यमिकस्तु मायावादिवत्त्वसंबद्धभाषित्वादुपेक्ष्य इति न निराक्रियत आचार्येण ॥ ३१ ॥

भाष्यप्रकाशः ।

वादहानिः । यदि च संतानिन आलयविज्ञानस्य वृत्तिज्ञानाधारत्वं तत्संतानस्य वासनाधारत्वमित्युच्यते, तदापि वृत्तिविज्ञानवैसादृश्यहेत्वभावादसंगतिः । यदि च संतानप्रवाह एव वासनेत्युच्यते, तदापि, उत्तरोत्पादे च पूर्वनिरोधादिपक्षोक्तानां दूषणानामापत्तिः । तस्मादसंगतमेवेदं मतमिति । उपसंहरन्ति एवमित्यादि । तर्हि माध्यमिकः कुतो न दूष्यत इत्यत आहुः माध्यमिकेत्यादि । यथा हि मायावादिनः श्रुतिच्छायामादाय सर्वं विप्लावयन्ति तथा सोऽपि युक्तिच्छायामादाय सर्वं नाशयतीत्यसंबद्धभाषित्वात् स्वयुक्तिभिरेव दूषितप्रायः । स हि सर्वशून्यवादी येन प्रमाणेन शून्यतां साधयति तत् प्रमाणं वर्तते, न वा । यदि वर्तते तदा सर्वशून्यत्वप्रतिज्ञाहानिः । यदि नास्ति तदा तदभावे कथं सर्वशून्यतां साधयेत् । किंच, स ह्येवं वदति । यदसत् तन्न कारणैर्जायते । यथा शशविषाणम् । यत् सत् तदपि भावान्न नोत्पद्यते । तथाहि । न तावद्भावात् । पिण्डबीजाद्युपमर्देनैव घटाङ्कुराद्युत्पत्तिदर्शनात् । नाप्यभावात् । अभावात्मकत्वस्याभावान्वयस्य च कार्येष्वदर्शनात् । न स्वतः । आत्माश्रयप्रसङ्गात्, प्रयोजनाभावाच्च । न वा परतः । परतः परोत्पत्तौ परत्वाविशेषात् सर्वतः सर्वोत्पत्तिप्रसङ्गात् । एवं जन्मनि निरस्ते जन्माभावादेव विनाशस्यापीति ।

संतानिन इति विज्ञानप्रवाहिणः । संतानस्य प्रवाहस्य । वृत्तीति । घटवृत्तिविज्ञानस्य पटवृत्तिविज्ञानवैसादृश्ये हेतोरभावादालयविज्ञानस्य प्रकाशकस्यैकविधत्वेन विचित्रवासनासंगतिः । संतानेति वासनायाः संतानप्रवाहः । श्रुतीति 'यतो वाचो निवर्तन्त' इति 'एकमेवाद्वितीयं ब्रह्म' इति 'सैषाविद्या जगत्सर्वम्' इत्येवंजातीयश्रुतीनाम् । छायामर्थाभासमादायेत्यर्थः । कथम् । इत्थम् । पूर्वस्यास्तैत्तिरीयस्थाया उत्तरार्धाविचारात् । तत्र ब्रह्मण आनन्दज्ञानमुक्तम् 'आनन्दं ब्रह्मणो विद्वान्' इति । तत्र प्रत्यक्षं भयाभावलिङ्गकम् । तत्र शाब्दमपि पक्षे कारणम् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतेः । शाब्दं शब्दनिवृत्तौ न संभवति । तथा 'सत्यं ज्ञानम्' इति श्रुतिव्यापारस्य स्वयमङ्गीकारादनङ्गीकारे ब्रह्माज्ञानं प्रसज्येत । द्वितीयस्यां नानात्वमिह प्रपञ्चे परिदृश्यमानं यत्तन्नास्ति किंत्वेकमेव ब्रह्म साकारं व्यापकमित्येवैकमिति स्फुटप्रतीतेः । सत्यत्वादिधर्माणां नित्यानां स्वस्थितानां स्वयमङ्गीकाराच्च । अत एव न तृतीयस्यामपि नृसिंहोत्तरतापनीयस्थायामविद्यात्मकत्वं जगतोऽपार्थे द्वैतस्य पूर्वं सत्यस्यादिनैवाविद्यायाः असत्याया न समवायित्वम् । शशशृङ्गवत् । अतः प्रकरणानुरोधाद्ब्रह्मविष्णुशिवरूपिणी सा गम्यत इत्यादि स्फुटं पण्डितकरभिन्दिपाले । विशेषस्तु दहराधिकरणे स्फुटः । सर्वमिति प्रमाणम् । विप्लावयन्तीति न सन्नासन्न सदसन्न सदसद्विलक्षणं किंतु शून्यमस्थूलादिश्रुतेरित्येववादिनः । न च 'शून्यभावेन युञ्जीयात्' इत्यमृतबिन्दूपनिषद्विरोध इति वाच्यम् । भावशब्दार्थः केनापि भावयितुं शक्य इति व्युत्पत्तेः, शून्यशब्दस्यापि । युक्तीति इयमग्रे स्वयमेव वक्तव्या । किंच स हीत्यादिना । एवेति नीलादिप्रकाशकज्ञानं व्यवच्छिनत्ति । अभावेति समवायिकारणतागमकस्येत्यर्थः । आत्मेति यथा घटाद् घटोत्पत्तौ । प्रयोजनं प्रवर्तकं फलं, तदभावान्न स्वत उत्पत्तिः । परत इति शून्यतत्त्वात् । कारणतावच्छेदकदेशकृतकालकृतपरत्वस्य यथाकथंचित् सर्वत्र सत्त्वाविशेषात्सर्वतः कारणेभ्यः कार्यमात्राधिककार्येभ्यश्च सर्वोत्पत्तेर्घटातिलङ्घनेन प्रसङ्गात् ।



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

प्यभावः । नापि सदसत् । सदसतोरितरेतरविलक्षणत्वादेकस्य सदसद्भावानुपपत्तेः । नापि सदसद्विलक्षणम् । एकस्य तथात्वानुपपत्तेः अदर्शनाच्च । अतः कोटिचतुष्टयनिर्मुक्तं शून्यमेव तत्त्वम्, अभावापत्तिरेव मोक्ष इति । तदिदमसंगतम् । तथाहि । यत्त्वया चतुष्कोटिनिर्मुक्तं शून्यं तत्त्वं व्यवस्थाप्यते, तत् केनचित् प्रमाणेनावगतमुत प्रमाणं विना वस्तुसामर्थ्यात् । नान्त्यः । तथा सत्याकाशवत् सार्वजनीनं स्याद् न वादिनो विप्रतिपद्येरन् । किञ्च, तत् सामर्थ्यं तत्रास्ति न वा । यद्यस्ति तर्हि तदाधारं शून्यमप्यस्त्येवेति न चतुष्कोटिनिर्मुक्तता । अथ नास्ति, तदापि तथा । नाद्यः । प्रमाणेऽप्यस्तिनास्तिभ्यां विकल्पिते चतुष्कोटिविधुवनासिद्धेः । किंच । येनावगतं तत् किंप्रमाणं, प्रत्यक्षमनुमानं वा । नाद्यः । सार्वजनीनत्वाभावेन तव प्रत्यक्षस्य प्रतिवाद्यनादरणीयत्वात् । अथ यद्विचारासहं तच्छून्यमित्यनुमातव्यं तदा तवो-दाहरणाभावः । सर्वस्यैव पक्षीकरणात् । तथा च नानुमानस्य सिद्धिः । अथ, घटः शून्यः उक्तरीत्या विचारासहत्वात् पटवत्, इति परोक्तरीतिकप्रयोगेणानुमातव्यं तदा तु सुवर्ण-जन्यकटकादौ तन्तुजन्यपटादौ च व्यभिचारेणोपमृद्य प्रादुर्भावस्य निरस्तत्वाद्भावादेव भावोत्पत्तिः सिद्धैवेति न विचारासहत्वस्य सिद्धिरिति स्वयुक्तिभिरेव दूषितत्वान्न निरा-क्रियत इत्यर्थः ॥ ३१ ॥

रश्मिः ।

अभाव इति । 'जातस्य हि ध्रुवो मृत्युः' इति । नश्यतीति उत्पद्यत इत्यन्वयः पूर्ववत् । एकस्येति सत्त्वमसत्त्वं चैकस्य नास्तीति नापीति उत्पद्यत इत्येव पूर्ववत् । एकस्येति सद्विलक्षणमसत्, असद्विलक्षणं सदिति द्वैतं त्वेकमिति भावः । भिन्नमुभयादेकमिति चेत्तत्राह अदर्शनादिति । कोटीति सदसत्सदसत्सदसद्विलक्षणरूपकोटिचतुष्टयं तेन निर्मुक्तम् । नन्वाकाशवत्सार्वजनीनत्वेपि वादि-विप्रतिपत्तिर्दृश्यत इत्यत आहुः किंचेति । न चतुरिति असत्कोट्यभावादिति भावः । किंतु सत्कोटौ निवेशः । तथेति अभावाधारः शून्यमस्तीति सत्तया न चतुष्कोटिनिर्मुक्तता । नाद्य इति शून्यं प्रमाणेनावगतमिति पक्षो नेत्यर्थः । चतुरिति चतुष्कोटिनिर्मुक्ततासिद्धेः । प्रमाणमपि शून्यमिति शून्येनावगतं शून्यमिति वक्तुं योग्यं नेत्यर्थः । धुञ् कम्पने स्वादिः ल्युट् । उवङ् । धू विधूनने तुदादिर्वा । चलनशब्दार्थादकर्मकाद्युजिति युच् तु न । अकर्मकत्वाभावात् । चतुष्कोटेः कर्मत्वात् । पठिताविद्यामितिवत् । सार्वेति शून्यस्य सार्वेत्यादिः । अनुमातव्यमिति । सर्वं शून्यं विचारा-सहत्वादित्यत्र केवलव्यतिरेकिणि व्याप्तिज्ञानविषयं कर्तव्यं शून्यमित्यर्थः । उदाहरणमन्वये दृष्टान्तस्तदभावात् । तथा चेति सामानाधिकरण्यग्रहे स्थलान्तराभावे च दृष्टान्ताभावेन व्याप्तिज्ञानस्या-सिद्धिः । तथा च ज्ञानरूपा सिद्धिरेव न हेत्वाभासत्वमस्येति स्थितमनुमानपरिच्छेदसमाप्तौ मुक्ताव-ल्याम् । द्वितीयमाथ यतते स्म अथेति । उक्तरीत्येति कोटिचतुष्टयखण्डनरीत्या । परोक्तेति सामान्यतः पक्षासंभवे विशिष्य पक्षसंभव इति नैयायिकोक्तरीतिकप्रयोगेण । व्यभीति उपमृद्या-भावं प्राप्य प्रादुर्भावस्य व्यभिचारेणेत्यर्थः । उपमृद्येति अभावं प्राप्य । निरस्तत्वात् 'नासतो दृष्टत्वात्' इति सूत्रे । स्वेति नाप्यभावाद् अभावात्मकत्वस्याभावान्वयस्य च कार्येष्वदर्शनादिति युक्त्या । एवं भावात् स्वतः परतश्चोत्पत्तिः । स्वयुक्तिभिर्दूषितेति बहुवचनात् । इत्यर्थ इति । आचार्येण व्यासेनेत्यर्थो भाष्ये । आर्हतास्तु द्वितीयाधिकरणे निरसीकरणीयाः । चार्वाकस्त्वग्रे प्रतिवक्तव्य इति षट् सौगताः ॥ ३१ ॥



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## सर्वथानुपपत्तेश्च ॥ ३२ ॥

किं बहुना बाह्यवादो यथा यथा विचार्यते तथा तथा असंबद्ध एवेत्यलं विस्तरेण । चकारात् वेदविरोधो मुख्यः ॥ ३२ ॥

इति द्वितीयाध्याये द्वितीयपादे पञ्चमं नाभाव उपलब्धेरित्यधिकरणम् ॥ ५ ॥

---

भाष्यप्रकाशः ।

**सर्वथानुपपत्तेश्च ॥ ३२ ॥** भाष्यमत्र निगदव्याख्यातम् । लोकैरत्यसंबद्धत्वबोधनेन केवलदृष्टमात्रानुसारी चार्वाकोपि प्रत्युक्तो ज्ञेयः । ननु यद्यप्यत्र विज्ञानातिरिक्तप्रपञ्चसत्त्वं साधितं, तथापि तृतीयस्कन्धे कापिलेये,

'ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् । अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा'

इत्यत्र, तथा दशमस्कन्धे

'सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः । त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ।

तस्मान्न सन्त्यमी भावा यर्हि त्वयि विकल्पिताः' इत्यादावन्यत्र च

प्रपञ्चस्य ज्ञानमात्रत्वं कल्पितत्वं चोच्यत इति कथं तद्विरोधः परिहर्तव्य इति चेत् । उच्यते । कपिलेन हि प्रपञ्चं ब्रह्मात्मकत्वेनाजानतां बहिर्मुखानां ब्रह्मभिन्नगुणजन्यपृथगर्थत्वेन जानतां प्रतीतिमादाय तस्या एकदेशस्वस्वभावग्राहित्वेन तत्प्रतीतिविषयमर्थत्वमपोह्य ज्ञानात्मकब्रह्मरूपता बोध्यते वैराग्यार्थं, न तु ब्रह्मोपादेयार्थरूपताप्यपोह्यत इति ब्रह्मनिर्गुणपदाभ्यामवसीयते ।

रश्मिः ।

**सर्वथानुपपत्तेश्च ॥ ३२ ॥** निगदेति । चकारादित्यादिभाष्ये चकारोनुक्तस्य वेदविरोधस्य समुच्चायक इति हृदयम् । एतेनैवेति भाष्येणैव । एवकारेण युक्तिव्यवच्छेदः । रामानुजाचार्यैरस्मिन्सूत्रे माध्यमिको निराकृतः । तथा सति षट्सु सर्वथानुपपत्तिर्न संभवति । या तु 'स्मृतेश्च' इति सूत्रेणानुस्मृतिमात्रेण निराकृतास्त आचार्यैः षट्सु सर्वथाऽनुपपत्तिं बोधयितुं बाह्यवाद इत्युक्तं तदाहुः अत्यसंबद्धेति । चार्वाक इति । अयं तु लोकायतदर्शनं बृहस्पतिप्रणीतमनुसरति देहात्मवादी प्रत्यक्षैकप्रमाणवादी च । अस्य देहात्मविवेकदर्शनज्ञानिप्रत्यक्षाननुसंधानात्प्रत्यक्षैकप्रमाणवादित्वेऽत्यसंबद्धभाषित्वम् । पराचीनैरिति पराङ्मुखैः केवलदृष्टमात्रग्राहकैः । शब्दादीति शब्दादिधर्मो यस्य विद्यते स शब्दादिधर्मी तेनार्थरूपेण । द्वात्रिंशेस्ति श्लोकः । दशमेति पञ्चाशीतितमेध्याये । तद्वृत्तय इति प्रकृतिपरिणामादयः । उच्यत इति इयं मतान्तरभाषेत्युच्यते । अर्थमिति प्रकृतिजन्येत्यर्थः । जानतामिति सांख्यानाम् । एकोनत्रिंशत्तमे देवहूतेः 'यथा सांख्येषु कथितम्' इति प्रश्नात् । उत्तरस्यापि सांख्यानुसारित्वात् । तस्या इति ब्रह्मात्मकेऽन्यथाबुद्धिर्भ्रान्तिरित्यतो भ्रान्तेरित्यर्थः । सर्वजनीना प्रतीतिः कथं भ्रान्त्येत्यत आहुः एकेति व्यापकस्याकारान्तरस्य ज्ञानस्यैकदेशः कश्चिदाकारः परिच्छेदश्च तद्ग्रहणेनं स्वस्येन्द्रियस्य यः स्वभावः पराक्त्वं तद्ग्रहणेन च ब्रह्मात्मकं निर्गुणं ज्ञानमन्यथागृहीतं भवतीति भ्रान्तिरित्यर्थः । तादृशेति भ्रान्तप्रतीतिविषयम् । अपोह्येति विशेषदर्शनवद्दृश्यमानघटत्वादिप्रकारकं ज्ञानमपोह्य ब्रह्मत्वेन ज्ञानात्मकत्वेन घटादीनां बोध्यते इति । वैराग्यार्थमिति 'विरागो येन पुरुषो भगवन्सर्वतो भवेत्' इति देवहूतिप्रश्नादिदं कपिलवाक्यं वैराग्यार्थम् । स्फुटं चेदमाकरे । ब्रह्मोपेति ब्रह्म उपादेयार्थः ब्रह्मोपादेयार्थस्तद्रूपतापीत्यर्थः । ब्रह्मनिर्गुणेति । अत्र ज्ञानमर्थरूपेण भ्रान्त्यावभातीत्युच्यते । तत्र

www.astrology-tantra.com
RUPNATHJI( DR.RUPAK NATH )

## नैकस्मिन्नसंभवात् ॥ ३३ ॥ (२-२-६)

विवसनसमयो निराक्रियते । ते ह्यन्तर्निष्ठाः प्रपञ्चे उदासीनाः सप्त [illegible] नीः

### भाष्यप्रकाशः ।

तथा सति कस्तत्र विरोधः । एवमेव दशमस्कन्धीये वाक्येऽपि ज्ञेयम् । तत्रापि सांख्यसिद्धानामेव योगमायाकल्पिततया अभावविधानात् । एवं सर्वत्रावान्तरप्रकरणबलेन वैराग्यार्थं महेन्द्रजालपक्षमिन्द्रियायनसृष्टिपक्षं चादाय मतान्तरसिद्धस्यैव बोधकं ज्ञेयम् । अतो न कोपि क्वापि विरोध इति सर्वं सुस्थम् ॥ ३२ ॥ इति नाभाव उपलब्धेरित्यधिकरणम् ॥ ५ ॥

नैकस्मिन्नसंभवात् ॥ ३३ ॥ अधिकरणमवतारयन्ति विवसन इत्यादि । एत एवं क्षपणका आर्हता जैनाश्चोच्यन्ते । मुक्तकच्छाः पूर्वं दूषिताः, इदानीं विवसना दूष्यन्त इति वाचस्पतिमिश्राः । सौगतवज्जैना अपि परमाणुकारणत्वादिकं जगतो वदन्तीत्यनन्तरं जैनपक्षो दूष्यत इति रामानुजाचार्याः ।

वस्तुतस्तु विरुद्धधर्माधारत्वं ब्रह्मण्येव प्रमाणसिद्धं, नान्यत्रेति स्थापयितुं तद्दूषणम् ।

### रश्मिः ।

ज्ञानं न भ्रमः । नाप्यर्थानुपादानम् । ब्रह्मेति ज्ञानविशेषणात् । ब्रह्मणः समवायित्वं समन्वयाधिकरणे सिद्धम् । अर्थरूपेणेत्यानन्दसंवलने साकारो भवति । अनेन इन्द्रियेण गृहीतं सयथार्थो भवति । पराचीनैरिन्द्रियैस्तु जनितया भ्रान्त्या गृहीतं भवति । ब्रह्माभिन्नगुणजन्यपृथगर्थत्वेन ग्रहणात् । पृथक्त्वं भ्रान्तिविषयः । तदेतत्पराचीनैरितीन्द्रियविशेषणाल्लभ्यते । पराक्त्वं पृथक्त्वापरपर्यायम् । जगत्यारोप्य गृह्णत इतीन्द्रियधर्मो भ्रान्त्या गृह्णन्तीति । इयं भ्रान्तिरपि सांख्यानां न ब्रह्मवादिनामिति वदति एकमित्यनेन । अस्त्वेवं तथापि ब्रह्मोपादानत्वं त्वपोषमेव सत्त्वादिगुणानां जगति दर्शनादत आह निर्गुणमिति । एते गुणा ब्रह्मण एव न प्रकृतेः । 'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः' इति वाक्यात् । एतेनदपि पर्यायोक्तं ब्रह्मनिर्गुणपदाभ्यामवसीयत इति । अन्यथैकं वदेत् । तथा च गुणा भ्रान्त्या सांख्यानां, निर्गुणं तु ब्रह्म ब्रह्मवादिनामिति सिद्धम् । सांख्यसिद्धानामिति । अयमर्थः । इदं हि वसुदेववाक्यम् । इदमपि भगवतोपगतम् । तातत्वेन वसुदेववरणात् । परं सुचितमत्र । उदाहृतं 'तत्त्वसंघः सांख्यसिद्ध' इति 'वचो वः समवेतार्थं तातैतदुपमन्महे । यन्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः' इति भगवद्वाक्यात् । तत्त्वसंघस्तत्त्वग्रामः । निबन्धेऽपि 'गुरुत्वं देवतात्वं वा न स्वीकृत्य सुतत्वतः । तदुक्तमेव निखिलं सर्वं ब्रह्मेति बोधितम्' । 'तदुक्तम्' वसुदेवोक्तम् । भगवता इति पूरणीयम् । अतिदिशन्ति स्म एवमिति । अवान्तरेति तानि प्रकरणानि निबन्धतत्त्वदीपावरणभङ्गेषु प्रसिद्धानि । इन्द्रियायनेति आन्तरालिकसृष्टिपक्षम् । मतान्तरेति । प्रकृते तु मतान्तरं सांख्यमित्युक्तम् ॥ ३२ ॥

इति पञ्चमं नाभाव उपलब्धेरित्यधिकरणम् ॥ ५ ॥

नैकस्मिन्नसंभवात् ॥ ३३ ॥ एत इति विवसनाः । संगतिं वक्तुमाहुः मुक्तेत्यादि । वाचस्पतीति । तथा चावसरः संगतिः, सामान्या तु प्रसङ्गसंगतिरिति भावः । रामानुजेति । तथा च प्रसङ्गः संगतिरित्येषामाशयः । ननु संगतिरन्याधिकरणवदवक्तव्येति चेत्तत्राहुः वस्तुतस्त्विति । 'आत्माऽकार्त्स्न्यम्' इत्यत्रात्मस्मारणादाहुः विरुद्धेत्यादि । एवकारेणैकस्मिन्संसप्रकारयोजनमन्यत्र व्यवच्छिद्यते । नान्यत्रेति नीले पीते स्तम्भे कुम्भे । तद्दूषणमिति अन्यत्र विरुद्धसत्तविभागदूषणम् ।



www.astrology-tantra.com
DR. RUPAK NATH

भाष्यप्रकाशः ।

यदि च सर्वं वस्तुजातं द्रव्यपर्यायात्मकमिति द्रव्यात्मना सत्त्वैकत्वनित्यत्वादिकं व्युत्पाद्यते । पर्यायात्मना च तद्विपरीतं व्युत्पाद्यते पर्यायाश्च द्रव्यस्यावस्थाविशेषास्तेषां भावाभावत्वादिकं सर्वमुपपन्नमित्युच्यते तदाप्येकस्य वस्तुन एकस्मिन् कालेऽस्तित्वनास्तित्वयोरसंभव एव । उत्पादविनाशशालित्वतद्वैपरीत्यरूपानित्यत्वनित्यत्वयोश्चासंभव एव । इदं च कालभेदेऽपि न संभवतीत्ययुक्त एवायमभ्युपगमः । यत्तु कश्चिदनन्तवीर्यनामा स्याद्वादी —

‘तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत् । स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते ॥

क्रमेणोभयवाञ्छायां प्रयोगः समुदायवान् । युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥

आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते । अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥

समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यते’ ।

इति परेच्छाकृतव्यवस्थया सप्तभङ्गान् प्रतिपादयामास । युगपदस्तित्वनास्तित्वयोर्विवक्षायां क्रमवर्तित्वादुभयं युगपदवाच्यम् । आद्यास्तित्वभङ्गोऽन्त्येन नास्तित्वेन सह युगपदवाच्यः । अन्त्य-आद्येन भङ्गेन सह युगपदवाच्यः । समुचितरूपश्चान्य एकैकेन सह युगपदवाच्य इति तदर्थं चाह ।

अत्रोच्यते । ये एते सप्तभङ्गा विवक्षाभेदेनोपपादितास्ते किं वस्तुनो नैसर्गिका धर्मा, आगन्तुका वा, आरोपिता वा, तद्विषया वा । नाद्यः । नैसर्गिकस्य धर्मस्य स्वभावत एव वस्तुषु

रश्मिः ।

रित्यर्थः । अनुमानं तु सर्वः प्रथमभङ्गः स्यादस्ति, प्रकारान्तरदर्शनात् । घटादिवत् । न चात्र पक्षतावच्छेदकसाध्यतावच्छेदकयोरैक्यमिति सिद्धसाधनमिति वाच्यम् । सिषाधयिषासत्त्वेन सिषाधयिषाविरहविशिष्टायाः सिद्धेरभावो वर्तत इति पक्षतासत्त्वे सर्वत्वस्य पक्षतावच्छेदकत्वेन तयोर्भेदात् । एवं शब्दप्रमाणेनापि [illegible] प्रथमभङ्गः स्यादस्तीति । एवमुपमानमपि । प्रथमभङ्गस्तृतीयभङ्गसदृश इति प्रथमभङ्गपदार्थमजानन्तं प्रत्युक्ते प्रथमभङ्गदर्शने नास्ति चेत्यंशाभावादयं प्रथमभङ्गपदवाच्य इत्युपमितिरिति । द्रव्येति । अवस्थात्र पर्यायः कललबुद्बुदादिः शक्तिरूपा आयुःकथनरूपा च । इदं चेति उत्पादविनाशशालित्वरूपमनित्यत्वं तद्वैपरीत्यरूपं नित्यत्वं चैकस्मिन्वस्तुनि कालभेदेऽपि न संभवतीत्यर्थः । तद्विधानेति वस्तुविधानकथनपरवाञ्छायाम् । स्यादस्तीति घटादिः कथंचिदस्तीति । तन्निषेध इति वस्तुनिषेधे । उभयेति वस्तुविधाननिषेधवाञ्छायाम् । समुदायवान् तृतीयभङ्गवान् । चतुर्थमाह युगपदिति । तद्विवक्षायां भावाभावविवक्षायाम् । पञ्चम इति स्यादस्ति चावक्तव्यः । अन्त्येति स्यादस्ति स्यान्नास्तीत्येनयोरन्त्यः स्यान्नास्तीति तस्यावाच्यविवक्षायाम् । षष्ठेति स्यान्नास्ति चावक्तव्य इत्यस्य भङ्गस्य समुद्भवः । समुच्चयेनेति । षष्ठपञ्चमौ चकारेणोक्तौ अवक्तव्यसमुच्चये एकेनाव्यक्तेनायुक्तः । सप्तम इति स्यादस्ति च स्यान्नास्ति चावक्तव्यः । परेच्छेति स्वस्येच्छायां तु हृदये व्यवस्था कृता स्यात् । क्रमेति उभयोः क्रमवर्तित्वात् । अस्त्येति द्वितीयभङ्गेन । समुचितेति । पञ्चमषष्ठावाच्यसमुच्चयरूपः । अन्य इति सप्तमः । एकैकेनेति आद्येन सहान्त्यस्यान्त्येन सहाद्यस्य । तदर्थमिति । युगपदिति कारिकाद्वयार्थः । नैसर्गिका इति घटत्वादय इव । आगन्तुका इति सच्छिद्रत्वादय इव । आरोपिता इति शुक्तिरजतादय इव । तद्विषया आरोपविषयाः ।



RUPANATHJI ( DR. RUPAK NATH )
www.astrology-tantra.c

एवं चात्माऽकार्त्स्न्यम् ॥ ३४ ॥

ननु कथं बहिरुदासीनस्य तद्दूषणमत आह । एवमपि सति आत्मनो वस्तुपरिच्छेदादकार्त्स्न्यं न सर्वत्वम् । अथवा शरीरपरिमाण आत्मा चेत्, तदा सर्वशरीराणामतुल्यत्वादात्मनो न कार्त्स्न्यं न कृत्स्नशरीरतुल्यत्वम् ॥ ३४ ॥

---

भाष्यप्रकाशः ।

सत्ताया नियततया सप्तानामपि भङ्गानां विवक्षां विनापि सत्त्वप्राप्तेर्विवक्षाविशेषस्य तत्राप्रयोजकत्वात् । न द्वितीयः । एकान्तस्य कस्यापि नैसर्गिकस्याभावे आगन्तुकस्यापि दृष्टविरोधेनाशक्यवचनत्वात् । अत एव न तृतीयोपि । आरोपितैर्भङ्गैर्वास्तवधर्मानैकान्त्यस्य कर्तुमशक्यत्वेन तस्य वैयर्थ्याच्च । न तुरीयः । अनया भङ्गकल्पनया नैसर्गिकस्यानैकान्तिकत्वायोगात् । नाप्येषां नैसर्गिकत्वम् । परस्परविरोधप्रदर्शनेन प्राचीनैरेव दूषितत्वात् । अतः सप्तानां भङ्गानामितरेतरविरोधेनासंभवादयुक्तमेवैकत्र निवेशनम् ॥ ३३ ॥

एवं चात्माऽकार्त्स्न्यम् ॥ ३४ ॥ सूत्रमवतारयन्ति ननु कथमित्यादि । व्याकुर्वन्ति एवमित्यादि । एवमात्मनिष्ठतया तद्दूषणेनाङ्गीकृतेपि सति परमाणुभ्य एव सृष्ट्यङ्गीकारेणात्मनो वस्तुपरिच्छेदाङ्गीकारात् अकार्त्स्न्यं सर्वत्वं न भवति । तथा च मोक्षदशायामलोकाकाशवर्तित्वेन तत्कृतावरणसंभवान्निरावरणप्रतिज्ञाहानिः । किंच । सर्ववस्तुष्वात्माभावादात्मनामस्तिकायत्वप्रतिज्ञाहानिश्चेत्यर्थः । अथ काशावरणं नावरणम् । दिगम्बरेष्वनावृतत्वव्यवहारात् । आत्मनामसर्वत्वेपि जातिरूपेण तत्र तत्र व्याप्तेः सुवचनत्वेन जीवास्तिकायस्य न हानिरित्याशङ्क्य पक्षान्तरमाहुः अथवेत्यादि । यथा बहिर्विरोधेन सप्तभङ्गयोगो दूषणम्, एवमेव देहपरिमाणात्मवादाङ्गीकारेण देहानां सर्वेषां व्यक्तिभेदेनावस्थाभेदेन च

रश्मिः ।

अप्रयोजकेति अप्रयोजकत्वप्रापातात् । एकान्तस्येति निश्चितस्य धर्मस्येत्यर्थः । अभाव इति यथा ब्राह्मण्यादेः 'त्रिभिर्नश्यति ब्राह्मण्यं हालाहलहलाहलैः' इति वाक्यात् । दृष्टेति दृष्टसच्छिद्रत्वादि । अत एवेति आरोपितानामागन्तुकत्वविशेषत्वादेव । वास्तवधर्मेति वास्तवधर्माणामनिश्चितत्वस्य । तस्येति आरोपितभङ्गस्य । अनयेति आरोपविषयभूतया । नैसर्गिकस्येति नैसर्गिकस्य घटत्वादेः । अनैकान्तिकत्वमनिश्चयविषयत्वं तस्यायोगात् । भङ्गानामेवारोपविषयत्वात् । आरोपविषयः सोऽनैकान्तिक इति शुक्तिरजतादौ दर्शनात् । तथा चानैकान्तिकवादार्थं भङ्गाङ्गीकारो व्यर्थ इत्यर्थः । एषामिति भङ्गानाम् । प्राचीनैरिति । एकत्रेति ब्रह्मणि तु सर्वं विरुद्धं संभवति । विरुद्धप्रत्यक्षात् 'नहि विरोध उभयं भगवति' इति श्रुत्वा ॥ ३३ ॥

एवं चात्माऽकार्त्स्न्यम् ॥ ३४ ॥ तद्दूषणे तन्मते दूषणे । आत्मन इति । जगति समवायेनाकाशपूरणात्तथेत्यर्थः । वस्तु शरीरं तेन परिच्छेदस्तस्याङ्गीकारात् । वस्त्वात्मा वा । सर्वत्वमिति । तथा च देहमात्रमात्मेति घटपटादिरूपताकाशरूपता च न भवति । अलोकेति लोकोत्तराकाशवर्तित्वेन । तत्कृतेति आकाशकृतेत्यर्थः । तत्र जीवभिन्नमिलावरणं संभवति । अस्तिकायस्येति जीवोस्तिकायः जीवोनेकदेशवर्ति द्रव्यमिति प्रतिज्ञाया हानिः । जातित्वादिति । एवं सामान्यं विकल्पमात्रमभ्युपगच्छति न वस्तु तथा च विकल्पवदित्यर्थः । तत्र तत्र घटपटादौ ।



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

शरीराणामवयवोपचयापचयानुसारेणात्मनोपि देवतिर्यङ्मनुष्येषु अवयवोपचयापचयाभ्यां तत्तुल्यता स्यात् । तथा सति पर्यायेणाविरोध इति न वक्तव्यम् । तथा सति विकारापत्तेः । संकोचविकासेपि विकारस्य दुष्परिहरत्वात् ॥ ३५ ॥

भाष्यप्रकाशः।

अतुल्यत्वान्मनुष्यजीवस्य केनचित् कर्मणा गजशरीरे प्रवेशे शरीरैकदेश एव स जीवः स्यादेकदेशान्तरं च जीवशून्यं स्यात् । न च सिद्धान्तवद्गुणव्याप्त्या दोषः परिहर्तव्य इत्यपि युक्तम् । तथा सत्यणुत्वत्यागायोगात् । चकारात् पिपीलिकादिदेहे प्रविशँस्तत्र न संमीयेतेत्यपि सूच्यते ॥ ३४ ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥ किंचिदाशङ्क्य परिहरतीत्याशयेन व्याकुर्वन्ति शरीराणामित्यादि । अयमर्थः । जीवो हि नानाविधेन कर्माष्टकेन ज्ञानावरणीयादिना तत्तच्छरीरेषु प्रविशति ततो निर्गच्छति च । तानि च शरीराणि नानापरिमाणानीति तेषां शरीराणामवयवोपचयापचयानुसारेण देवादिशरीरप्रविष्टस्य जीवस्याप्यवयवोपचयापचयाभ्यां तत्तच्छरीरपरिमाणता वक्तुं शक्यते । तथा सति पर्यायाख्येनावस्थाविशेषेण क्रमिकेण प्रवेशेन वा परिमाणसाम्येनाविरोध इति सूत्रांशेनाशङ्क्य, न चेति परिहरति । एवं न वक्तव्यम् । कुतः । विकारादिभ्यः । विकारसावयवत्वानित्यत्वानां प्राप्तेर्लोकायतमतादविशेषः । किंच । तेऽवयवाः कुत्र गच्छन्ति, तिष्ठन्ति च महान्तं कालं, कुतश्चायान्तीत्यपि निर्धारयितुमशक्यम् । अतो न ततोऽपगच्छन्ति, किंतु स्वल्पशरीरप्राप्तौ घटे रश्मिः ।

जीवेति जीवोस्तिकायोनेकदेशवर्ति द्रव्यं तस्येत्यर्थः । सिद्धान्तेति अस्मत्सिद्धान्तवत् । गुणचैतन्यम् तस्य व्याप्त्या । तथा सतीति असत्सिद्धान्ताङ्गीकारे । अत्र पक्षे सौत्रश्चकारो नाप्यर्थः । अनन्वयप्रसङ्गादित्याशयेनार्थान्तरबोधकत्वमाहुः चकारादिति । न संमीयेत इति असङ्कुचितामवस्थां न लभेतेत्यर्थः । 'मीङ् गतौ' दिवादिरात्मनेपदी । उपसर्गोन्यार्थः देहाद्बहिरपि जीवेदित्यर्थः । सूच्यत इति । शंकराचार्यैरकार्त्स्न्यं मध्यमपरिमाणत्वं तेन चानित्यत्वं स्यादित्युक्तं तदुपेक्ष्यम् । आत्मनोऽनित्यत्वापादने जैनेष्टापत्तिस्वीकारः स्यादिति ॥ ३४ ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥ कर्मेति नैकस्मिन्सूत्रे बन्धस्त्वष्टविधं कर्मेत्यादिना दर्शितेन । किंरूपेणेत्याकाङ्क्षायामाहुः ज्ञानावरणीयादिनेति । तथा सतीति भाष्यं विवृण्वन्ति स्म तथा सतीति । प्रवेशेणेति णत्वं रभसात् । परिमाणस्य मध्यमपरिमाणस्य । न वक्तव्यमिति इति भाष्यार्थ इत्यर्थः । व्याख्येयसूत्रांशोपन्यासपूर्वकं तथा सतीत्यादि भाष्यं विवरीतुमाहुः कुत इति । भाष्यस्थं विकारशब्दमादिशब्दार्थेन सह व्याकुर्वन्ति स्म विकारेति । अत्रेष्टापत्तिरपि कर्तुं न शक्यत इत्याहुः लोकायतेति, बृहस्पतिप्रणीतात् । महतीति पिपीलिकादेहादधिका गजदेहान्न्यूना मानवीयजीवस्यावयवाः । कालमिति अत्यन्तसंयोगे 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेण द्वितीया । कुतश्चेति पुनर्मानवीयजीवस्य मानवीयदेहप्राप्तौ च कुत आयान्तीत्यर्थः । संकोचेत्यादिभाष्यं विवरीतुमाहुः अथेति । तत इति जीवतः ।



RUPNATHJI ( DR. RUPAK NATH)
www.astrology-tantra.com

## पत्युरसामञ्जस्यात् ॥ ३७ ॥ ( २–२–७ )

### पराभिप्रेतान् जडजीवान् निराकृत्येश्वरं निराकरोति ।

---

भाष्यप्रकाशः ।

स्थादतोऽविशेषः । उभयथापि जीवः शरीरपरिमाणो न सेत्स्यतीति न तवाभिमतार्थासिद्धि-रित्यर्थः । एवमार्हतान् यौक्तिकानवगत्य कश्चित्तद्दर्शने श्रद्धालुर्भवेदिति तस्यापि निवारणं कृतम् ।

एतेषु षट्स्वप्यधिकरणेषु ब्रह्म जगदुपादानं न वेति संदेहस्तत्तन्मतविरोधः संदेहबीजं, नेति पूर्वः पक्षः सर्वसमयानामयुक्तत्वाद् ब्रह्मैवोपादानमिति सिद्धान्तो ज्ञेयः । षष्ठे तु ब्रह्मैव विरुद्धधर्माधारं, नेतरदिति नियमो युक्तो न वेति संदेहे स्याद्वादिभिः सर्वत्र तथाभ्युपगमा-न्नेति पूर्वः पक्षः । स्याद्वादस्यासंगतत्वाद् ब्रह्मैव तथेति नियमो युक्तः श्रुत्या भक्तप्रत्यक्षेण च प्रमितत्वादिति सिद्धान्त इति प्रकारान्तरमधिकं ज्ञेयम् ॥ ३६ ॥

इति षष्ठं नैकस्मिन्नसंभवादित्यधिकरणम् ॥ ६ ॥

पत्युरसामञ्जस्यात् ॥ ३७ ॥ अधिकरणमवतारयन्ति परेत्यादि । तथा च पत्यु-रिति पदमेवात्राधिकरणभेदकम् । पूर्वमते पत्युरभावात् तेन स्मृतिसिद्धस्य पत्युरिदानीं

रश्मिः ।

वदिति विपरीतानुमाना । सूत्रशेषोपन्यासपूर्वकमुभयथेति भाष्यं विवृण्वन्ति स्म अत इत्यादि । अविशेष इति संसाराऽवस्थातोऽविशेषः । अणुत्वमहत्त्वाभ्यां परिमाणाभ्यामवस्थाद्वयसिद्धेर्मध्यम-परिमाणेऽविशेषः । उभयथेति अन्त्यावस्थितेश्चाद्ययोर्नित्यत्वापत्तेश्चेत्यर्थः । कृतमिति । अन्त्याव-स्थितेरन्त्यपरिमाणनित्यतायाः । पञ्चम्यन्तमिदम् । अस्माद्दृष्टान्तात्सिद्धं यन्नित्यद्रव्यपरिमाणत्व-लिङ्गकमनुमानं तेनोभयनित्यत्वात् । उभयोर्मोक्षसंसारावस्थपरिमाणयोर्नित्यत्वं ततश्चाविशेषस्तवा-भिमतशरीरपरिमाणासिद्धिरिति सूत्रार्थः । क्षणं त्वतिरिक्तं भावाभावेभ्यो नैयायिका इच्छन्ति कालो-पाधिम् । विभागप्रागभावविशिष्टं कर्मैव क्षण इति चेन्न । उदीच्यकर्मजन्यविभागप्रागभावविशिष्ट-कर्मणः क्षणचतुष्टयावस्थायित्वात् । तज्जन्यविभागप्रागभावविशिष्टं स्वत्वं क्षण इति चेत्तर्हि स्वत्वस्या-ननुगमादननुगमः । जायमाने च विभागे कुतः क्षणव्यवहारः विभागपूर्वसंयोगविशिष्टात् कर्मण एवेति चेत्तर्हि सुतरामननुगमः । एवं पूर्वसंयोगनाशे उत्तरकालेपि कर्मसत्त्वे वक्तव्यमिति । तृतीयस्कन्धे एकादशाध्याये 'चरमः सद्विशेषाणामनेकोऽसंयुतः सदा' इति परमाणुलक्षणानन्तरं 'अणु-र्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः । जालार्करश्म्यवगतः खमेवानुपतन्नगात् । त्रसरेणुत्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः । शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः । निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः' इति । अर्थस्तु स्फुट आकरे । अत्र सिंहावलोकनन्यायेनाधिकरण-माहुः एतेष्विति । विरुद्धेति । यद्यपि 'घञबन्त' इति सूत्रेण पुंस्त्वं भवति । तथापि 'कर्मण्य-ण्'इत्यण् । किंच भावे घञि पुंस्त्वं भवति न तु कर्मणि घञि कृतेऽत आध्रियन्ते आधाराः विरुद्धधर्माश्च आधाराश्चेति विग्रहीतव्यम् । तथा महाभाष्यम् । 'संबन्धमनुवर्तिष्यते' इति । विशे-ष्यमनुवर्तिष्यत इति । सर्वत्रेति घटपटादावपि । श्रुत्येति 'तदेजति तन्नैजति' इति श्रुत्या । भक्तेति विरुद्धविषयकेण । गीतायां स्पष्टम् ॥ ३६ ॥ इति षष्ठं नैकस्मिन्नसंभवादित्यधिकरणम् ॥ ६ ॥

पत्युरसामञ्जस्यात् ॥ ३७ ॥ अवतारयन्तीति प्रसङ्गसंगत्यावतारयन्ति । लुञ्चित-केशमतनिरासानन्तरं तार्किकयोर्जटाधारिशैवस्य च मतस्य बुद्धिस्थत्वात् । पूर्वेति बाह्यमते ईश्वरा-भावात्तथा । तेनेति पत्युरभावेन । वेदेपि 'विष्णोः कर्माणि पश्यत' इति पत्युः सत्त्वेपि ब्रह्मवादिनो



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**वेदोक्तादणुमात्रेऽपि विपरीतं तु यद् भवेत् ।**
**तादृशं वा स्वतन्त्रं चेदुभयं मूलतो मृषा ॥**
**तार्किकादिमतं निराकरोति ।**

---

भाष्यप्रकाशः ।

निराकरणं प्रस्तूयत इत्यर्थः । नन्वीश्वरवादस्य वेदानुसारित्वात् कुतस्तन्निराकरणमित्यत आहुः वेदोक्तेत्यादि तादृशमिति । वेदोक्तात् सर्वप्रकारैर्विपरीतम् । तथा चैतो हेतोर्वाद्यभाव-निराकरणमित्यर्थः । पराभिप्रेतेश्वरनिराकरणेपि विशेषमाहुः तार्किकादीति । तार्किका नैयायिकाः, वैशेषिकाश्च । आदिपदेन हैरण्यगर्भाः, पातञ्जलाः, कापालिकाः, कालामुखाः, पाशुपताः, शैवाश्च । तत्र तार्किकमते नित्यज्ञानेच्छाप्रयत्नाद्यविशेषधर्मवान् स्वाभाविक-शरीररहितो जीवादृष्टसंपादितं शरीरं भूतावेशन्यायेनाविश्य कार्यं जगत् करोति । हैरण्य-गर्भादीनां मते 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' प्रधानपुरुषाभ्यामन्यस्तद-धिष्ठाता शुद्धसत्त्वशरीरो जगन्निर्मिमीते । कापालिकादीनां चतुर्णां मते तु निमित्तकारणं पशुपतिरीश्वरः । सर्वेऽप्येत ईश्वरे जगदुपादानत्वं नेच्छन्ति । निमित्तकारणत्वमात्रमाहुः । तथा तार्किकाः प्रमाणादिषोडशपदार्थतत्त्वज्ञानात् द्रव्यादिसप्तपदार्थानां साधर्म्यवैधर्म्यज्ञानाच्च यथायथं मोक्षमाहुः । योगिनश्च नित्यानित्यवस्तुविवेकमात्रात् । कापालिकास्तु

रश्मिः ।

वदन्तीत्यस्यापि सत्त्वादस्यां विष्णोर्ब्रह्मणि पर्यवसानात् पत्युरभावेन निराकरणप्रस्तावेन च स्मृति-सिद्धस्येत्यर्थः । इत्यर्थ इति इतिप्रयोजनमित्यर्थः । अन्यथा भाष्ये व्यासो निराकरोति इत्यत्र व्यासेन निराकरणं प्रस्तूयत इति विभक्तिविपरिणामापत्तेः । वेदोक्तेत्यादीति । अणुमात्र इति ईश्वरमात्रादौ । वेदोक्तादिति । तादृशं स्वतन्त्रं प्रकारभेदभिन्नं चेद् वा यदि वा भवेदिति योजना । मूलतो युक्तिरूपात् मूलमालोच्येत्यर्थः । नैयायिका इति न्यायं सूत्राणि स्मृतिरूपाण्यधीयते विदन्ति वा नैयायिकाः । 'क्रतूक्थादिसूत्रान्ताट्ठक्' । उक्थादिः । एतेषां लौकिकत्वेनानुमानसिद्ध ईश्वरः पतिर्विष्णुः पातीति पतिरिति । न ब्रह्म लौकिकत्वात् । 'अत एव चानन्याधिपतिः' इति पति-ब्रह्मसूत्रेऽधिविशिष्टः । वैशेषिकाः प्रमाणद्वयवादिन इत्युक्तम् । उक्तसूत्राट्ठक् । हिरण्यगर्भेण पतञ्जलिना च प्रणीतानधीयते विदन्ति ते तथोक्ताः । 'तदधीते तद्वेद' इत्यण् । एवं च सांख्यस्मृत्यनुसारिण उभयेऽपि । कापालिका इति कपालमधीयते विदन्ति वा कापालिकाः । 'क्रतूक्थादि' सूत्रेण ठक् । एते च महेश्वरप्रोक्तागमानुगामिनो माहेश्वरपदवाच्याः । कालामुखा इति कलामुखं वक्ष्यमाणकपालपात्रेत्यादिकमभिदधति ये ते । शैषिकोऽण् । 'तदधीते तद्वेद' इति वाऽण् । एवं पशु-पतिमभिदधति शिवमभिदधति पाशुपताः शैवाश्च 'तदधीते तद्वेद'इत्यण् वा । क्लेशेति इदं पातञ्जले योगसूत्रप्रथमे समाधिपादेऽस्ति । प्रधानेति क्लेशेनापरामृष्ट इति प्रधानादन्यः । पुरुषविशेष इति पुरुषादन्यः । तदधीति । पुरुषविशेषपदेन पुरुषो लभ्यते स चाधिष्ठाता सशरीरः । 'द्रष्टा दृशि-मात्रः शुद्धोऽपि प्रत्ययानुपश्यः' इति सूत्रम् । जगदिति । कापिलसाङ्ख्यप्रवचनसूत्रवृत्तौ 'प्रधानाज्जग-ज्जनक' इति । 'उपरागात्कर्तृत्वं चित्सांनिध्यात् चित्सांनिध्यात्' इति च सूत्रेऽत्र । योगिन इति



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**क्षायां त्वमीश्वरत्वं युक्तिमूलत्वाद्दोषः असामञ्जस्याद्धेतोर्न पतित्वेनेश्वरसिद्धिः॥३७**

---

### भाष्यप्रकाशः ।

किंतु दृष्टानुसारेण कल्पनया । श्रुतिसिद्धस्य त्रिगुणातीतसाकारेश्वरस्वरूपस्यानङ्गीकारात् । योगिभिः शुद्धसत्त्वोपाधिकस्य नैयायिकैर्ज्ञानेच्छाप्रयत्नातिरिक्तविशेषधर्मरहितस्याशरीरस्याङ्गीकारेण तद्दर्शनेषु तद्विरोधस्य स्फुटत्वात् । माहेश्वरमतेपि त्रिलोचननीलकण्ठादिविशिष्टरूपाङ्गीकारेण, तादृशस्य च नारायणोपनिषदादौ नारायणादुत्पत्तेरुक्तत्वात् तदनङ्गीकारेण विरोधस्य स्फुटत्वात् । तत् सर्वं मया प्रहस्ते प्रपञ्चितमिति नात्रोक्तम् । अतो यत् तैरङ्गीक्रियते तद् युक्तिमूलमेवाङ्गीक्रियते, न तु श्रुतिसिद्धम् । अतो वेदविरुद्धयुक्तिमूलत्वाद्दोष इत्यर्थः । सूत्रे साध्यनिर्देशस्याभावात् पूर्वाधिकरणात् अमङ्गत्राजदशब्दस्यानुवृत्त्या साध्याकाङ्क्षापूर्तिरित्याशयेनाहुः असामञ्जस्यादित्यादि । सूत्रयोजना तु तार्किकाद्यभिमतः पतिर्नोपपद्यते कुतः असामञ्जस्यात् । तथा च वैषम्यादिरूपात् तस्मात् तथेत्यर्थः ॥ ३७॥

### रश्मिः ।

किंस्विति कल्पनयेत्यन्तस्य वदन्तीत्यन्वयः । योगिभिरिति हैरण्यगर्भैः पातञ्जलैश्च । तद्विरोधस्येति श्रुतिविरोधस्य । माहेश्वरेति कापालिकादिचतुष्टयमते । त्रिलोचनेति आदिशब्देन कपर्दी । कपर्दोस्य जटाजूटः । नारायणादिति । 'एको नारायण आसीन्न ब्रह्मा नेशानः' इति । 'नारायणाद्रुद्रो जायते' इति च । अथर्वशिखया विरोधमाशङ्क्याहुः तदिति । प्रपञ्चितमिति । किंचिल्लिख्यते । महेश्वरपदस्वारस्यान्महेश्वरे पराकाष्ठाविश्रान्तिरभ्युपेयते । तन्महेश्वरपदं त्वेवं प्रयुज्यतेऽथर्वशिरसि 'अथ कस्मादुच्यते भगवान्महेश्वरो यस्माद्भक्ता ज्ञानेन भजन्त्यनुगृह्णाति च वाचं संसृजति विसृजति च' इति भगवच्छब्दप्रवृत्तिनिमित्तकथनोत्तरं पठ्यते 'यः सर्वान् परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते' इति । तथा च योगैश्वर्येणेश्वरः सन् महत्याकरादौ महीयते पूजयति भगवन्तमिति महेश्वरः । अहङ्काराधिकरणात् । यत्तु नारायणः भावान् विषयान् परित्यज्य त्याजयित्वा देवमुपदिश्य तदर्थबोधनद्वारा विषयवैरं समुत्पाद्याधिकारिणं कृत्वा दत्तेनात्मज्ञानेन मनःस्थिरतामेवाष्टाङ्गयोगजनैश्वर्येण च भक्तान्महति कुर्यादिति न्यायेनेदं निर्वन्धनमिति व्याख्यातवान् । तदप्यनुकूलं व्याख्यानान्तरम् । तथा च सर्वसारोद्धारे भागवते 'वैष्णवानां यथा शंभुः' इति वाक्यम् । युक्तीत्यादि भाष्यं विवृण्वन्ति स्म अतो वेदेति । साध्येति ईश्वरः न पतिः न कर्तृमात्रः असामञ्जस्यात् । यत्नैवं तन्नैवं कुलालवत् । पतिरिति । ननु पत्युरिति षष्ठ्यन्तं सूत्रं कुतो विभक्तिविपरिणाम इति चेच्छृणु । पत्युर्नासामञ्जस्यदोषादित्यर्थे विचार्यमाणेनुमानमिव भवतीति विचारितार्थकथनेन विभक्तिविपरिणामदोषाऽभावात् । विचारस्तु पत्युर्नासामञ्जस्यादिति सूत्रं जातम् । तत्र प्रतियोगितासंबन्धेन पत्युर्नान्वयः । षष्ठ्याः संबन्धद्योतकत्वेन संबन्ध्याकाङ्क्षत्वात् । अनन्वयादेव घटो नेत्यत्र घटस्य नेत्यप्रयोगः । प्रयोगे तु घटस्य न रूपमिति प्रतियोगितासंबन्धेन नञसान्वयः । अत्र तु पत्युः पदस्यार्थः पतित्वमपेक्षिताश्रयं पतिर्भवति । तस्य नञा भेदान्वयो नास्ति पत्युः स्वत्वात् । अतः पतिः बौधपतिमान् असामञ्जस्यात् । इति सूत्रार्थं इति । अतोपत्सूत्राणि भवन्तीति पत्युरिति प्रथमार्थे षष्ठी वा ॥ ३७ ॥



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

**एवं किंचित् करोतीतीश्वरेप्यधिष्ठानमङ्गीकर्तव्यम् । तस्मिन् कल्प्यमाने मतविरोधः, अनवस्था असंभवश्च ॥ ३९ ॥**

भाष्यप्रकाशः ।

मान ईश्वरो लौकिकन्यायेनोपादानगोचरापरोक्षज्ञानचिकीर्षायत्नवत्तया कल्पनीयः । लौकिकश्च कर्ता शरीरमधिष्ठायैव करोतीतीश्वरेपि शरीराधिष्ठानमङ्गीकर्तव्यम् । न चाशरीरस्यैव कर्तृत्वम् । मनसो नित्यत्वेप्यशरीरेषु मुक्तेषु मानसकार्यादर्शनात् तत्र दृष्टान्ताभावेन न्यायानवतारात् । अतः शरीराधिष्ठानमवश्यमङ्गीकर्तव्यम् । अन्यथा दृष्टविरोधेन प्रतिवादिनं पर्यनुयुञ्जानस्य तवैव निग्रहात् । तस्मिंश्च कल्प्यमाने नित्यानित्यविकल्पेन मतविरोधः । सावयवस्य शरीरस्य नित्यत्वे जगतोपि नित्यत्वविरोधादीश्वरासिद्धेः । नच तन्निरवयवम् । अदर्शनादसिद्धेः । अथानित्यम् । तर्हि तस्य कः कर्ता । न तावज्जीवः । तस्याशरीरस्य तत्रासामर्थ्यात् । सोपि सशरीरश्चेत् तस्यापि कर्त्रन्तरविचारेनवस्थाप्रसङ्गः । अथ स्वयमेव स्वशरीरं करोति इति चेन्न अशरीरस्य तदयोगेनासंभवः । अथ जीवादृष्टसंपादितशरीरं भूतावेशन्यायेनाविश्य करोतीति चेत् तदाप्युक्तैवानवस्था । अतो वज्रलेपायितैवाधिष्ठानानुपपत्तिः । चकारोनुक्तानां दोषाणां समुच्चायकः । ते च जन्माद्यधिकरणे प्रपञ्चितास्ततोऽवगन्तव्याः ।

माध्वास्तु—अधिष्ठानपदे आधारं व्याकुर्वन्ति, निराधारस्य कर्तृत्वं न दृष्टमिति ॥ ३९ ॥

रश्मिः ।

पूर्वकत्वान्मानसशरीरसत्त्वात् । नित्यत्वेपीति । तथा च शरीरत्वसंभव इति भावः । अशरीरेष्विति जीवन्मुक्तवारणायेदम् । मानसेति एतच्च सर्वसंमतम् । तत्रेति कर्ता शरीरी कुलालवदित्यत्रेव तत्र मानसशरीरे स्वीकृतेपि, गगनमशरीरी कर्ता अशरीरी आत्मत्वादित्यत्र मुक्तात्मवदिति दृष्टान्ताभावेन न्यायोनुमानं मुक्तन्याये वा तस्यानवतारात् । दृष्टेति कुलालादिदृष्टान्तस्य विरोधेन । निग्रहादिति अशरीरिकर्तृत्वप्रतिज्ञासंन्यासरूपनिग्रहस्थानात् । नव्यमतमवतारयन्तीत्याशयेन तस्मिन्निति भाष्यं विवृण्वन्ति स्म तस्मिंश्चेति । कुलालवच्छरीरे कल्प्यमाने नित्यमनित्यं वेति विकल्पेन नित्यं चेदशरीरत्वमतविरोधः । अनित्यं चेज्जीवविलक्षणत्वमतविरोधः । तमेवाहुः सेति । नित्यत्वेति जगन्नित्यं सावयवत्वादीश्वरदेहवदित्यनुमानेन नित्यत्वाविरोधान्नित्यस्य कर्त्रनपेक्षेणादीश्वरासिद्धेः । न चानित्यं सावयवत्वादिति विरुद्धः पूर्वोक्तो हेतुरिति वाच्यम् । घटादेर्जगत्त्वेन दृष्टान्तत्वाभावेन विरुद्धत्वाभावात् । न च पक्षैकदेशस्य दृष्टान्तत्वम् । साधनवेलायामनित्यत्वस्य पक्षेऽनिश्चयात् । असिद्धेरिति शरीरम् अदर्शनवत् निरवयवत्वात् आकाशवदित्यनेनादर्शने सिद्धे, शरीरं न विद्यते अदर्शनात्, अदृष्टघटवत्, इति शरीराऽसिद्धेः । अनवस्थामसंभवं च स्पष्टयितुमाहुः अथेत्यादिना । तस्येति अनित्यस्येश्वरशरीरस्य । सोपीति सृष्टिप्राक्कालिकजीवोपि । तस्यापीति तत्सामयिकजीवदेहस्यापि । अनवस्थेति अन्यो जीवः सशरीरः कर्ता, तस्याप्यन्यो जीवः सशरीरः कर्तेत्येवमनवस्थाप्रसङ्गः । असंभवत्विवरणार्थमथेति भिन्नप्रक्रमेणाहुः अथ स्वयमिति । तदयोगेनेति स्वशरीरकरणायोगेनेत्यर्थः । भूतावेशेति ईश्वरः आविश्य जगत्करोतीति नव्यमतमुक्तम् । जन्माद्यधीति । समासो अवेति । अत्रापि न पत्युरिति पदद्वयसत्त्वे विभक्तिविपरिणामेन योजनीयम् । तार्किकाद्यभिमतः पतिर्नोपपद्यते । अधिष्ठानानुपपत्तेः मुक्तात्मवदिति सूत्रार्थः ॥ ३९ ॥



RUPNATHJI ( DR.RUPAK NATH )
www.astrology-tantra.com

## करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

**करणवदङ्गीकारे असंबन्धदोषः परिहृतो भवति । तच्च न युक्तम् । भोगादिप्रसक्तेः ॥ ४० ॥**

---

### भाष्यप्रकाशः ।

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥ परोक्तं परिहारमाशङ्क्य दूषयतीत्याहुः करणवदित्यादि । करणवदिति द्वितीयार्थे वतिः । तथा च यथा शरीररहितोपि जीवः करणग्रामं मनश्चक्षुरादिकमधितिष्ठति स्वस्वकार्ये प्रेरयति, तथा ईश्वरोप्यशरीरः सर्वाञ्जीवानधिष्ठास्यति । प्रधानपुरुषौ चाधिष्ठास्यति । अधिष्ठानं चात्र स्वस्वकार्ये नियोजनम् । एवं चासंबन्धदोषोपि परिहृतो भवति । श्रेणीमुख्यवत् स्वस्वामिभावेनैव निर्वाहादिति चेन्नेदं युक्तम् । कुतः । भोगादिभ्यः भोगादिदोषप्रसक्तेः । यथा हि करणान्यधितिष्ठञ्जीवः पुण्यपापाभ्यां सुखदुःखभोगभाग् भवति, तत्र रागद्वेषादिवांश्च । तथैवेश्वरोपि भवेत् । तत्र तदसंसर्गे नियामकाभावात् । न चैश्वर्यस्य नियामकत्वम् । लोकिकैश्वर्यवत्स्वपि तेषां दर्शनात् । नापि निरतिशयितरूपाया ऐश्वर्यकाष्ठायाः । केवलाभिर्युक्तिभिस्तस्या एवासिद्धेः । अतो नानेनापि दृष्टान्तेनाधिष्ठानसंभव इत्यर्थः ॥ ४० ॥

### रश्मिः ।

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥ परोक्तं परिहारमिति संबन्धानुपपत्तिसूत्रोक्तसंबन्धानुपपत्तावपि संबन्धान्तरस्य स्वस्वामिभावस्याङ्गीकरणरूपं परिहारमाशङ्क्येत्यर्थः । द्वितीयार्थे इति । 'तेन तुल्यं क्रिया चेद्वतिः' । 'तत्र तस्य' इति सूत्रद्वयेन तृतीयासप्तमीषष्ठ्यर्थेषु वतिर्विहितस्तथापि छान्दसोयं वतिरित्यर्थः । अत्र शंकराचार्यैर्द्वितीयव्याख्याने षष्ठ्यर्थे वतिरुक्तः । करणानां तुल्यमीश्वरस्यायतनं यदि तदा भोगादिदोष इति । रामानुजाचार्यैः प्रथमार्थे वतिरुक्तः । यथा भोक्तुर्जीवस्य करणकलेवराद्यधिष्ठानमशरीरस्यैव दृश्यते तद्वत् ईश्वरस्याप्यशरीरस्य प्रधानाधिष्ठानमुपपद्यत इति । वस्तुतस्तु 'करणवदित्यस्य द्वितीययाधिष्ठास्यति' इत्यन्त आर्यो ग्रन्थः । 'कर्मादीनामपि संबन्धसामान्यविवक्षायां षष्ठ्येव' इति सिद्धान्तात् । एवं च सर्वत्र द्वितीयास्थले षष्ठी प्रयोक्तव्या । षष्ठ्यर्थे वतिरिति । करणग्रामस्य मनश्चक्षुरादिकस्य सर्वेषां जीवानां प्रधानपुरुषयोश्चेति । द्वितीया तु कर्मणोत्र संबन्धसामान्यविवक्षा नेतरस्येति । 'तदर्हम्'इति सूत्रेण द्वितीयान्ताद्वतिस्तु न सादृश्यबोधं जनयति । 'विधिवत्पूज्यते हरिः' इत्यत्र विधिविषययोग्यताकर्तृ हरिकर्मकं देवदत्तकर्तृकं पूजनमिति बोधात् । विग्रहस्तु विधिमर्हतीति विधिवदित्यन्यत्र विस्तरः । यद्वा वास्तु छान्दसो वतिर्मास्तु आर्षो ग्रन्थः । किंतु करणमर्हतीति करणवदिति सूत्रभाष्ये व्याख्यातव्ये । अधितिष्ठतीत्यस्याहुरीत्यर्थः । अधिष्ठास्यतीत्यनयोरर्हिष्यतीत्यर्थः । शरीररहित इति 'कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये' इति गीतायां पञ्चमेध्याये । प्रत्येकं ष्ठाधातुरत्र लिखितस्तदर्थमाहुः अधिष्ठानमिति । असंबन्धेति । संबन्धानुपपत्तिसूत्रोक्तो योऽसंबन्धः स दोषः सोपि परिहृतो भवतीत्यर्थः । श्रेण्यां पङ्क्तौ मुख्यः स्वामी । अन्ये स्व सेवकास्तद्वत् । तच्च न युक्तमिति भाष्यार्थमाहुः नेदमिति । सूत्रव्याख्येयांशोपन्यासपूर्वकं भोगादीति भाष्यं विवृण्वन्ति स्म भोगादिभ्य इति । अधितिष्ठन्निति अर्हन्नित्यर्थः । तदसंसर्गे इति दोषाणाम् । तथा चैश्वर्यस्य दोषासंसर्गनियामकत्वे दोषदर्शनं तस्मादिति भावः । निरतिशयितेति ईश्वरे करणकृतदोषासंसर्गः । असिद्धेरिति निरतिशयितैश्वर्यकाष्ठायाः क्वापीश्वरातिरिक्तेऽभावात् । दृष्टानुसारिणी युक्तिरिति भावः । अधिष्ठानेति स्वस्वकार्ये नियोजनसंभवः ॥ ४० ॥



DR. RUPAK NATH
www.astrology-tantra.com

भाष्यप्रकाशः ।

त्पत्तिमिति चतुर्भ्यो व्यूहेभ्य उत्पत्तिम् । तथाचायमंशो निराकार्य इत्यर्थः । ननु 'बहोऽहं बहु स्याम्' इति, 'स एकधा भवति' इत्यादिश्रुतावेकस्यानेकव्यूहता 'तस्माद्वा एतस्मात्' इत्यादौ क्रमसृष्टिश्च श्राविततैवेति किमत्र विसंवादस्थानमित्यत आहुः तत्रेत्यादि । अन्यत्वमन्यत्वमिति अन्ययोः प्रद्युम्नानिरुद्धयोरन्यत्वं जडत्वम् । तथा च श्रुतौ यत्रानेकव्यूहतोक्ता, न तत्रोच्चनीचत्वम् । यत्रोच्चनीचत्वं बोधितम्, तत्र नानेकव्यूहता । इह तु साम्यमुच्चनीचत्वं चोच्यते । अथवा यत्रानेकव्यूहता तत्र सा । अत्र तूभयमेकत्रेति विसंवादस्थानमित्यर्थः । ननु 'आसीनो दूरं व्रजति' इत्यादौ विरुद्धधर्माश्रयत्वस्य ब्रह्मणि सिद्धत्वाद्, 'अजायमानो बहुधा विजायते' इति श्रुत्यानेकव्यूहतायामप्युत्पत्तेः श्रावणाच्च नात्रापि श्रुतिविरोध इत्यत आहुः उत्पत्तीत्यादि । 'न जायते म्रियते वा विपश्चित्' इति श्रुत्या जीवस्य जन्मभयनिषेधादुत्पत्त्यङ्गीकारे च तस्यानित्यतायां मोक्षाभावः । कार्यस्य कारणे लयप्रसङ्गात् । ततो मोक्षशास्त्रवैफल्यं च स्यात् । ब्रह्मवद् विरुद्धधर्माधारत्वस्य जीवे श्रुत्या अनुक्तत्वात् । व्युच्चरणं तु नोत्पत्तिः, किंतु विभागमात्रमतो न दोषः । न च तस्य तन्त्रस्य भगवत्प्रणीतत्वादस्मिन्नप्यंशे कथं विरोध इति शङ्क्यम् । कौर्मे चतुर्दशाध्याये गौतमशप्तानां मुनीनामर्थे

'तस्माद्वै वेदबाह्यानां रक्षणार्थाय पापिनाम् । विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ।

रश्मिः ।

श्रुतिविरुद्धमंशम् । व्यूहेभ्य इति ऊह वितर्के विशेषेणोह्यन्ते समतया ये ते व्यूहाः स्वरूपव्याख्यानायेति । उत्पत्तिमिति क्रमेणोत्पत्तिम् । विसंवादेति श्रुतौ विगतो यः संवादस्तस्य स्थानम् । जडत्वमिति अनेकेश्वरापत्त्योत्पन्नानां जीवत्वं जडत्वं च । न च 'सरूपाणामेकशेष एकविभक्तौ' इत्यस्य प्रवृत्तिरिति शङ्क्यम् । एकशेषस्य द्वन्द्वापवादत्वेन तत्पुरुषेऽप्रवृत्तेः । तत्रेति 'स एकधा भवति' इत्यादिश्रुतौ । यत्रेति 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यादौ । इहेति पञ्चरात्रे । साम्यमिति व्यूहानां साम्यमुच्चनीचत्वं चोच्यत इति विसंवादस्थानमत्रेत्यर्थः । अत्रोच्चनीचत्वं 'अखण्डं कृष्णवत्सर्वम्' इत्यस्य विरोधीति साम्यमात्रान्न विसंवादस्थानमित्याशङ्क्याहुः अथवेति । यत्रानेकेति स एकधेत्यादौ । उत्पत्तिरिति । भवतीति । यत्रेति 'तस्माद्वा' इत्यत्र । सेति अनेकव्यूहता । अत्रेति पञ्चरात्रे उत्पत्तिरनेकव्यूहत्वं चेत्युभयम् । आहुरिति सूत्रव्याख्यानमाहुरित्यर्थः । भाष्ये पक्षशब्दोऽनुत्पत्तिपक्षं द्योतयति तमाहुः नेति । तदुभयेति जननमरणोभयेत्यर्थः । उत्पत्त्यङ्गीकार इति उत्पत्तिपक्षे इति भाष्यविवरणम् । तस्येति जीवस्य । उत्पत्तिर्न संभवतीति भाष्येणान्वयः । तथा चानित्यतायां सत्यामिति तथा सतीति भाष्यविवरणम् । अनित्यत्वे सतीति तस्यार्थः । मोक्षेति भगवत्प्राप्तिर्मोक्षस्तस्याभावः । पूर्ववदिति भाष्यं विवृण्वन्ति स्म कार्यस्येत्यादिना । कार्यस्य जीवजडरूपस्य संकर्षणादेः सर्वस्य कारणे वासुदेवाख्ये नाशो लयस्तस्य प्रसङ्गात् । नन्वयं मोक्षः कुतो न भवतीति चेत्तत्राहुर्भाष्ये पूर्ववदिति । बाधेन तुल्यायं मोक्षो न मोक्षो घटादिमोक्षप्रसङ्गादित्यर्थः । घटादयोपि स्वकारणे लीना भवन्तीति । सर्वनाशान्तर्गतार्थनाशमुक्त्वा शब्दस्यापि सर्वान्तर्गतस्य पुनर्नाशमाहुः तत इति । जीवस्यानित्यत्वात् । न च पुनरुक्तिदोष इति वाच्यम् । वैफल्यरूपगौणनाशपरत्वात् । विरुद्धेति । अनित्यत्व मोक्षाश्रयत्वं च विरुद्धधर्मौ तयोराधारत्वस्य 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति' इत्यादिश्रुतिसंमता जीवोत्पत्तिरित्याशङ्क्य वारयन्ति स्म व्युच्चरणमिति । भगवदिति ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

# श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

## भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

## अथ द्वितीयोऽध्यायः ।

### तृतीयः पादः ।

### न वियदश्रुतेः ॥ १ ॥ (२३-१)

श्रुतिवाक्येषु परस्परविरोधः परिह्रियते विप्रतिषेधपरिहाराय । मीमांसाया-

---

भाष्यप्रकाशः

न वियदश्रुतेः ॥ १ ॥ तृतीयपादं व्याचिख्यासवस्तत्प्रयोजनं संगतिं चाहुः श्रुतीत्यादि । द्वितीयपादे श्रुतिविरुद्धस्मृतिनिराकरणेन तद्विरोधस्याकिंचित्करत्वस्थापनात् तासामेव प्रमेयविरोधो न श्रुतेः सः, इत्येवं प्रमेयाविरोधः स्थापितः । तृतीये पादे श्रुतिवाक्येषु परस्परविरोधः परिह्रियते विप्रतिषेधपरिहाराय, विरोधकृतो यः प्रामाण्यप्रतिषेधस्तन्निवृत्तये, न चानावश्यकत्वं शङ्क्यम्, मीमांसायास्तदर्थं प्रवृत्तत्वात् शास्त्रयविरोधाभ्याम् ।

रश्मिः ।

अत्र 'महत्सष्टृ' प्रकरणं संपूर्णं साधकबाधकयुक्तिभिः समन्वयाविरोधाभ्याम्, अग्रे 'द्वितीयं त्वण्डसंस्थितम्' अविरोधेन विचार्यते । 'अणुः पन्था विततः पुराणः' इति बृहदारण्यकशारीरब्राह्मणोक्तश्चाविरोधेन विचारितः, 'प्रथमं महतः सष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थम्' इतिवाक्यात् ।

न वियदश्रुतेः ॥ १ ॥ अवसरसंगत्या तृतीयपादमवतारयन्ति स्म तृतीयेति । तासामेवेति स्मृतीनामेव श्रौतप्रमेयेण साकं विरोधो दुष्टो न तु श्रुतेः स्मार्तप्रमेयेण साकं विरोधो दुष्ट इत्यर्थः । एवकारेणोक्तमर्थमाहुः न श्रुतेरिति । स इति प्रसिद्धः । श्रुतीति व्याख्येयं भाष्यम् । परस्परविरोधो यथा साक्षात्सृष्टौ नाकाशस्य वैलक्षण्यं परंपरासृष्टौ तु वैलक्षण्यमिति, वैलक्षण्यावैलक्षण्ययोः प्रतिपादकत्वेन विरोधः, विरुद्धार्थप्रतिपादकत्वात् । विप्रतिषेधपरिहारपदार्थमाहुर्विरोधेति । विलक्षणाकाशविषयिणी या प्रमा तस्याः करणत्वं साक्षात्सृष्टिविषयकप्रमाकरणभूतश्रुतौ नास्तीति तच्छ्रुतिविरुद्धम् । स्वरूपाकाशविषयिणी या प्रमा तस्याः करणत्वं परंपरासृष्टिविषयकप्रमाकरणभूतश्रुतौ नास्तीति साक्षात्सृष्टिपोषकश्रुतिविरुद्धम् । तादृशविरोधकृतो यः परस्परं मिथोऽर्थे प्रामाण्यमेतस्या नास्ति मिथोऽर्थे प्रामाण्यं द्वितीयाया नास्तीति प्रामाण्यप्रतिषेधः, तन्निवृत्तिस्त्वाकाशोत्पत्तिसमर्थनेन स्वरूपाकाशस्यापि विलक्षणाकाशत्वात् । न च सृष्टिद्वैविध्यबाधः वैलक्षण्यमन्तरा स्वरूपत्वेऽप्यनिर्वाहात् । क्रीडार्थत्वात्सृष्टेः । मीमांसाया इत्यादिकमन्यविपरीतमाहुः न चेत्यादि । मीमांसाया इति इदं व्याख्येयं भाष्यम् । स्वाध्याये च

DR. RUPAK NATH
www.astrology-tantra.com

स्तदर्थं प्रवृत्तत्वात् शक्त्यविरोधाभ्याम् । तथा च ब्रह्मवादे जडजीवयोर्विरुद्धांश-निराकरणाय तृतीयपादारम्भः ।

द्विविधा हि वेदान्ते सृष्टिः । भूतभौतिकं सर्वं ब्रह्मण एव चित्सु...

भाष्यप्रकाशः ।

यदा हि लोकानां मौढ्यकृतसंदेहवशाद् वेदार्थावगमसामर्थ्याभाव आचार्येण दृष्टस्तदा वेदार्थभूतस्य ब्रह्मणः सामर्थ्यं वेदवाक्यानां परस्परविरोधाभावं च स्वयमाकलय्य ताभ्यां कृत्वा प्रमेयाविरोधार्थं मीमांसां प्रवर्तितवानिति, न च प्रथमपाद एवाविरोधस्य विचारितत्वादस्य गतार्थत्वं शङ्क्यम् । यथा तत्र शक्त्यविरोधाभ्यां ब्रह्मणि विरुद्धांशं परिहृतवांस्तथा च तेन प्रकारेणैव, चोवधारणे । ब्रह्मवादे 'सर्वं ब्रह्म' इतिवादे । जडानां जीवानां च ब्रह्मत्वाज्जडजीवयोः संबन्धी यो विरुद्धांशस्तन्निराकरणाय तृतीयपादारम्भ इत्येवं सार्थक्यात्, तथा-चेदं पादस्य प्रयोजनम्, प्रासङ्गिकं पूर्वपादे परिहृत्य पुनः प्रस्तुतस्य श्रुत्यविरोधस्यैव विचारा-दवसरः संगतिरित्यर्थः । ननु यद्यपि ब्रह्मवादे जडजीवयोर्ब्रह्मत्वं तथापि गौणमुख्यभाव-स्त्वसंदिग्धः, पूर्वं तथा निर्णीतत्वात्, अतो मुख्यविचारमतिहाय किमित्येष आरम्यत इत्याकाङ्क्षायामाहुः द्विविधेत्यादि । तथा च जन्माद्यधिकरणविषयपरिशोधार्थ एवायं प्रपञ्च इति नास्य गौणत्वमित्यर्थः । एकः, अपर इति पुँल्लिङ्गपाठे तु प्रकारो विशेष्यत्वेन व्याख्येयः । प्रातिपदिकस्यायाः सुपो लुगुच्यत इति महाभाष्यकारो विभक्तिपदाध्याहारेण योजनया प्राचीन-...

यदेति । मौढ्येति यथार्थसंदेहे दूरत्वं कारणं तथा मौढ्यं मोहः भगवत्प्रसादजन्यवेदार्थज्ञाने संदेहं करोति विरुद्धकोटिसंपादनेन । सा च वेदार्थावगमसामर्थ्याभावरूपा । संदेहस्तु वेदार्था-वगमसामर्थ्यं वर्तते न वेति, मौढ्ययुक्तसामर्थ्यज्ञानमावृणोति । आचार्येणेति भगवता व्यासेन । सामर्थ्यमिति शक्तिम् । ताभ्यामिति शक्त्यविरोधाभ्याम् । प्रमेयेति परस्परं श्रुतिप्रमेयावि-रोधार्थं प्रवर्तितवानिति । अत्र वाक्यानि स्कान्दानि 'नारायणाद्विनिष्पन्नम्' इत्यादीनि जिज्ञासा-धिकरण उक्तानि । तथा चेति भाष्यं विवरीतुमाहुः न चेति । विरुद्धेति समवायित्वाभावा-दिरूपं श्रुतिविरुद्धांशं शक्तिसामर्थ्यं निमित्तत्वोपादानत्वयोरविरोधस्ताभ्यां परिहृतवान् । तथा चेति भाष्यं विवृण्वन्ति तथा चेति । सर्वमिति भावाद्वैते । विरुद्धेति उत्पत्त्यनुत्पत्ति-रूपः । अणुत्वं व्यापकत्वं जीवविषय एव । इदमग्रे स्फुटम् । इदमिति जडजीवयोर्विरुद्धांश-निराकरणम् । प्रासङ्गिकमिति । स्मृत्यनवकाशसूत्रोक्तस्मृत्यविरोधस्मृतावानुमानिकस्मृत्युपेक्षानर्हत्वं प्राप्तं प्रासङ्गिकं स्मृतिविरोधम् । पूर्वेति द्वितीयपादे । प्रस्तुतस्येति द्वितीयाध्यायार्थत्वेन प्रस्तुता-विरोधान्तर्गतस्य प्रस्तुतस्य श्रुत्यविरोधस्य । अवसर इति प्रतिबन्धकीभूतजिज्ञासाद्वितीयपादोक्त-स्मृत्यविरोधजिज्ञासया, सर्वैः कृतत्वात् । तस्याः निवृत्तौ सत्यां जडजीवयोर्विरुद्धांशनिराकरणमवश्यं कर्तव्यमिति तदुक्तमित्यवसरः संगतिरित्यर्थः । पूर्वमिति समन्वयसूत्रे जडजीवान्तर्यामिष्वित्यर्थः । जन्मादीति 'यतो वा इमानि' इति 'तस्माद्वा एतस्मात्' इति विषयवाक्यद्वयम् । व्याख्येय इति । एकापरेति पाठमङ्गीकृत्य पूर्वं व्याख्यातम् । अत्र द्विविधा हि वेदान्ते सृष्टिर्भवति तत्रे-त्यध्याहार्य भाष्यं व्याख्येयम् । सृष्टेर्विशेष्यत्वत्यागेऽध्याहारे चाप्यदोषमाहुः प्रातीति । विभक्तीति 'प्रातिपदिकस्याया विभक्तेः सुपः' इति योजना तथा । ननु पदाध्याहारोर्थाध्याहारो वेति चेन्न अर्थेऽपि पदवन्यपदार्थोपस्थितेः पदाध्याहार इत्याहुः विभक्तिपदेति । जीवेति नाम्नो वर्तुल-



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

वाय्वाकाशयोः । तैत्तिरीयके पुनः 'ब्रह्मविदाप्नोति परम्' इत्युपक्रम्य, 'तस्माद् वा एतस्मादात्मन आकाशः संभूतः' इति आकाशादिसृष्टिरुक्ता । उभयत्रापि क्रमसृष्टिवाचकमित्येकवाक्यता युक्ता । छान्दोग्ये मुख्यतया सृष्टिस्तैत्तिरीये गौणी, मुख्या त्वग्रे वक्ष्यते, 'सोऽकामयत' इत्यादिना ।

तत्र संशयः किमाकाशमुत्पद्यते, न वेति । किं तावत् प्राप्तम् । नोत्पद्यत इति, कुतः, अश्रुतेः । श्रुतिवादिनां श्रुत्यैव निर्णयः । श्रुतौ पुनराकाशस्य क्रमसृष्टौ न श्रूयते ॥ १ ॥

---

भाष्यप्रकाशः ।

सृष्टिस्तैत्तिरीय आकाशादीनां संभवं प्रति कर्तृत्वकथनात् सृष्टिवाचकपदाभावादीक्षाभावाच गौणीति नैकवाक्यतेति शङ्क्यते तदापि मुख्या त्वग्रे वक्ष्यते, 'सोऽकामयत' इत्यादिना, तत्र च 'इदꣳसर्वमसृजत' इतीदमा 'सर्व'पदेन च कर्मतया सर्वपरामर्शादसृजतेति पदाच्छान्दोग्यतुल्यतेति संदेह एव, यदि च तस्याः साक्षात् सृष्टित्वं तदा श्रुत्यन्तरे, 'खं वायुर्ज्योतिरापः' इति वाय्वाकाशोत्पत्तिकथनादत्र च तदकथनात् साक्षात् सृष्टावेव संदेहोऽस्तु । तथा च यथाकाशाद्युत्पत्तिर्ब्रह्मणः सकाशात् सिद्ध्यति तदा जन्माद्यधिकरणप्रभृतिषु यन्निर्णीतं तत् सर्वमुपपन्नं भवति, नो चेन्नेति तद्विषयपरिशोधार्थं एवायं यत्न इत्यर्थः । एवं प्रस्तुतस्यावश्यकत्वं समर्थयित्वा अधिकरणमवतारयन्ति तत्रेत्यादि । आद्याधिकरणारम्भस्य पूर्वपक्षसूत्रे उक्तरीतिकः संशय इत्यर्थः । पूर्वपक्षं विवृण्वन्ति किमित्यादि । नन्वश्रवणेपि स्मृत्या तदुत्पत्तिरादरणीयेत्याकाङ्क्षायामौलूक्यादिभिरादृक उपालभ्यते श्रुतीत्यादि । मुख्ये क्रमसृष्टाविति क्रमसृष्टिविषये ईक्षाप्रतिपादकतया मुख्यं यद्वाक्यं तत्र । तथा च तत्रेक्षाविषयत्वादिना अश्रवणाजोत्पत्तिरादरणीयेत्यर्थः ॥ १ ॥

रश्मिः ।

इति प्रकरूपात्रफलसंबन्धादिविषयः समुच्चयः । संभवगिति 'आत्मन आकाशः संभूतः' इत्युक्त्वा । 'सोऽकामयत' इति ईक्षामकुर्वत । छान्दोग्य इति भाष्यं विवृण्वन्ति स्म तदापीति । मुख्येति पूर्वोक्तं मुख्यत्वमत्रापि ज्ञेयम् । एवकारेण निश्चयव्यवच्छेदः क्रियते । तस्या इति छान्दोग्योक्तया उत्पत्त्या । तैत्तिरीयके तु 'वायोरग्निः' इत्यसाक्षात्सृष्टित्वमिति वैषम्यमिति विभाव्यत इत्यर्थः । खमिति 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति पूर्वार्धः, 'पृथ्वी विश्वस्य धारिणी' इति चतुर्थचरणः । अत्रेति छान्दोग्ये । आवश्यकत्वमिति जन्माद्यधिकरणविषयपरिशोधार्थमवश्यकर्तव्यत्वम् । पूर्वेति 'न वियद्' इति सूत्रे । स्मृत्येति 'आकाशवत्सर्वगतश्च नित्यः' इति स्मृत्या । 'सदेव सोम्येदम्' इत्यत्र सच्छब्देनाकाशोऽप्युत्पन्नो गृह्यते आकाशशरीरत्वाद्ब्रह्मणोऽतस्तदुत्पत्तिरादरणीयेत्याकाङ्क्षायां सत्यामित्यर्थः । औलूक्येति उलूकरूपगौतमादिः । उपेति नैवं स्मृत्या मुख्याकाशोत्पत्तिरादरणीया किंतु श्रुतिवादिनां श्रुत्यैव निर्णयो युक्त इत्युपालम्भं कुर्वन्त इत्यर्थः । मुख्य इति मुख्यक्रमसृष्टावित्युक्तौ साध्यर्थत्वं मत्वा मुख्यक्रमसृष्टाविति पाठमपि व्याकुर्वन्ति स्म क्रमेति ॥ १ ॥

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

अस्ति तु ॥ २ ॥

तुशब्दः पक्षं व्यावर्तयति । तैत्तिरीयके वियदुत्पत्तिरस्ति । यद्यपि वाक्ये नास्ति तथापि विरोधाभावादन्यत्रोक्तमप्यङ्गीकर्तव्यमेकवाक्यत्वाय, एकविज्ञानेन सर्वविज्ञानानुरोधाच्च ॥ २ ॥

गौण्यसंभवात् ॥ ३ ॥

वियदुत्पत्तिर्गौणी भविष्यति, कुतः । असंभवात् । न ह्याकाशस्योत्पत्तिः

भाष्यप्रकाशः ।

अस्ति तु ॥ २ ॥ सिद्धान्तं वदतीत्याहुः तुशब्द इत्यादि । विरोधाभावादिति वियदुत्पत्त्यादरेऽपि मुख्यवाक्येऽनुपपत्त्यभावात् । एकवाक्यतायां को वा आग्रह इत्यत आहुः एकेत्यादि । तथा चैतत्प्रतिज्ञानुरोधात् तैत्तिरीयवाक्यं मुख्यार्थमीषदाकाङ्क्षम्, छान्दोग्यवाक्यं च मुख्यार्थमाकाशादिसाकाङ्क्षम्, क्रमसृष्टिस्तूभयत्राप्यर्थ इत्येकवाक्यतेत्यर्थः ॥ २ ॥

गौण्यसंभवात् ॥ ३ ॥ सूत्रत्रयेण पूर्वपक्षं पुनराह तत् व्याकुर्वन्ति वियदित्यादि । यदुक्तं तैत्तिरीये वियदुत्पत्तिः श्रूयत इति । सत्यं श्रूयते । परं सा आवरणनिवारणरूपतया गौणी भविष्यति, कुतः, असंभवात्, लोके हि सावयवस्यैवोत्पत्तिर्दृश्यते, सजातीयैर्विजातीयैश्च द्रव्यैरवयवभूतैरेकं द्रव्यमुत्पाद्यत इति, आकाशस्य तु निरवयवत्वेन समवाय्यभावात् नोत्पत्तिः ।

अस्ति तु ॥ २ ॥ अनुपपत्तीति अन्वयानुपपत्त्यभावात् । आग्रह इति विधिप्रसङ्गपरिहारे दोषाभावाद् आग्रहपदम् । आहुरिति प्रकारैकवाक्यतायां न काप्याकाशनित्यताभ्रमः श्रौते सिद्धान्ते इत्याहुरित्यर्थः । तथा चेति 'आकाशवत्सर्वगतश्च नित्यः' इति स्मृतौ सर्वगतत्वं नित्यत्वं च सावधिकमिति श्रौते सिद्धान्ते च श्वेतकेतूपाख्याने 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा, तदनुरोधादाकाशस्य सर्वत्र कार्यत्वावयवकत्वे एकवाक्यताप्रयोजकप्रकरणोपादानतो । तैत्तिरीयेत्यादिः । आकाशादीति आदिशब्देन वायुः, वाय्वाकाशसाकाङ्क्षम् । उभयत्रेति छान्दोग्ये तैत्तिरीये च । इत्यर्थ इति तथा चाकाशस्य श्रौते मते कार्यत्वेन 'कार्यकारणयोरैक्यमर्शनं पटतन्तुवत्' कटकं सुवर्णमिति प्रतीत्या च कारणत्वेन रूपेणैकविज्ञाने सर्वविज्ञानोपपत्तिरिति न श्रुतिविरोध इति भावः । तेन द्वितीयस्कन्धनवमाध्याये 'स चिन्तयन् अक्षरम्'इत्यत्राम्भसि जलमध्य इति सुबोधिन्या नाकाशः शब्दगुणकः किं तु लीनो यथा वदति तद्वाक्यमित्यवधेयं बृहदारण्यकात् । द्विर्गदितं अक्षरमुपाशृणोदित्यर्थः । न तु स्मार्तव्यतिरिक्तेनापि प्रकारेण ब्रह्माश्रयत्वेनाकाशो नित्यस्तत्रेत्युक्तम् ॥ २ ॥

गौण्यसंभवात् ॥ ३ ॥ पूर्वेति पूर्वपक्षिण आकाङ्क्षा, गौणीशब्दान्मीमांसकस्य, वाय्वाकाशाभ्यां स्पर्शस्य, युगपद्वृत्तिद्वयविरोधशब्देन माहात्म्यज्ञानरहितलौकिकस्य । नैयायिकपूर्वपक्षस्तु प्रथमसूत्रे नास्ति । आवरणेति प्राकट्यरूपाभिव्यक्त्येत्यर्थः । तथा चाकाशः संभूतो निवृत्तावरणो जातः । तथा च निरावरणत्वमुत्पत्तिमित्याकाशोत्पत्त्यभावादभिव्यक्तिर्गौणीत्यर्थः । अथासंभवविशिष्टेहेतुनिर्णयं भावितः । तत्र निरवयवत्वादसंभवं विवृण्वन्ति स्म लोक इति । सजातीयैरित्यादि । सजातीयैः काष्ठखण्डैर्विजातीयैर्दन्तादशंखखड्गादिभिरेकं मञ्जूषाख्यद्रव्यमित्यर्थः । आकाशं नास्त्यविनाशशालि निरवयवत्वाद् आत्मवदित्यनुमानं सूचयन्ति स्म आकाशस्येति ।



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

संभवति, निरवयवत्वात् व्यापकत्वाच । मुख्ये चाभावात् । एकविज्ञाने सर्वविज्ञानप्रतिज्ञा तु तदधिष्ठानत्वेन जीववत् तदंशत्वेन वा तच्छरीरत्वेन वा एकविज्ञानकोटिनिवेशात् । लोकेऽप्यवकाशं कुर्वित्यादौ गौणप्रयोगदर्शनात् ॥ २ ॥

---

भाष्यप्रकाशः ।

तदभावेनासमवायिनः संयोगस्याप्यभावात् तयोरभावे केवलस्य निमित्तस्येश्वरस्य जीवादृष्टस्य चाकिंचित्करत्वात्, अतो निरवयवत्वादसंभवः । किंच । व्यापकस्योत्पत्तिः प्रत्यक्षविरुद्धा, अन्यथा ब्रह्मणोऽपि स्यात् । किंच ब्रह्मणोऽमूर्तत्वात् तेनाकाशावरणासंभवादुत्पत्तेः पूर्वकाल आकाशाभावोऽप्यशक्यवचन इति व्यापकत्वादप्यसंभवः । यदि च ब्रह्मैव समवायि ततो विभज्योत्पद्यत इति विभाग एव चासमवायीति विभाव्यते, तदाप्युक्तम्, मुख्ये सृष्टिवाक्ये अभावात्, यदि हि मुख्ये उत्पत्तिरुक्ता भवेत् तदैवमपि कल्प्येत, अतस्तदभावादप्यसंभवः । न चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अनुरोधात् साङ्गीकार्येति वाच्यम्, सा त्वधिष्ठेयस्याकाशस्य तदधिष्ठानत्वेन जीववत्तदंशत्वेन वा, पृथिव्यादिवत्तच्छरीरत्वेन वा, विशेषणत्वाजागृहीतविशेषणन्यायेन एकविज्ञानकोटिनिवेशादुपपत्स्यते । अतो गोअश्वा एव पशवोऽन्ये

रश्मिः ।

असंभव इति मुख्यवियदुत्पत्तेरसंभवः । व्यापकत्वादसंभवं विवृण्वन्तः पक्षसाध्ये पूर्वोक्ते व्यापकत्वाद्ब्रह्मवदित्यनुमानं सूचयन्ति स्म किं चेति । इदानीमावरकत्वमनन्वानो ब्रह्मण्यावरकत्वं भावत्वात्संभावितं पराकुर्वन्नावरणनिवारणरूपोत्पत्तिरपि न संभवतीत्याह पूर्वपक्षी किं चेति । अमूर्तत्वादिति, अयमर्थः । लोकेऽवकाशातिरिक्त आकाशो न प्रतीयते अवकाशश्च कुड्यादौ जाते एतावानवकाश इति मूर्तैः कुड्यादिभिरभिव्यज्यते कुड्याद्यभावे तु अवकाशाप्रतीत्या कुड्याभावे नाव्रियते । ब्रह्म तु नाभाव इत्यनावरकं किं चामूर्तत्वादपि । न ह्यमूर्तेन कालादिनाकाश आव्रियते व्यवहारविषयः क्रियते किं तु कुड्यादिना मूर्तेन । कुड्यादौ सत्याकाश इति व्यवहारात् । उत्पत्तेरिति असंभव इत्यनेनान्वेति । किंच कार्यत्वमाकाशे प्रागभावप्रतियोगित्वं तदप्याकाशस्य व्यापकत्वात्पूर्वकालाभावेनासंभवीत्याह पूर्वकाल इति । आकाशाभाव आकाशप्रागभावः । असंभव इति उत्पत्त्यसंभवः । भाष्यीयं मुख्ये चासंभवादित्युक्तमसंभवं विवृण्वन्ति यदि चेति । विभज्येति सिद्धान्ते विभागात्सृष्टेः संयोगस्यासमवायित्वाभावात् । उत्पद्यत इति आकाशः । मुख्य इति छान्दोग्यस्थे ईक्षादिश्रावणान्मुख्ये । एवमिति ब्रह्मणः समवायित्वं विभागस्यासमवायित्वम् । तदभावादिति मुख्ये चाभावात् । एकेति भाष्यं विवृण्वन्ति न चैकेति । साङ्गीति सा वियदुत्पत्तिः । सा त्विति प्रतिज्ञा तूपपत्स्यत इत्यन्वयः । आकाशस्य विषयत्वाभावाद्विशेषणमाहुः अधीति । अधिष्ठातुं योग्यस्याधिष्ठानं कर्तुं यत्र काले योग्यस्य तत्र काले तदधिष्ठानत्वेन ब्रह्माधिष्ठानत्वेनेत्यर्थः । तच्छब्दाः ब्रह्मवाचकाः । 'आकाशः संभूतः' इति श्रुतेराह जीववदिति । अन्तर्यामिब्राह्मणे 'यस्य पृथिवी शरीरम्' 'यस्यापः शरीरम्' इतिवद्याकाशः शरीरमिति श्रावणादाह पृथिव्यादीति, विशेषणत्वाद्धेतोः । नागृहीतेति नागृहीतविशेषणा बुद्धिर्विशिष्ट उपसंक्रामतीति न्यायेन विशिष्टज्ञाने विशेषणज्ञानं कारणम्, अन्वयव्यतिरेकाभ्यां तथावसायात् । इदं ज्ञानं विशेषणज्ञानपूर्वकं विशिष्टज्ञानत्वात्, दण्डीति ज्ञानवदित्यनुमानाच । एकात एकविज्ञानम् 'आकाशशरीरं ब्रह्म' इति विशिष्टं ज्ञानं तच्च विषयविशिष्टमित्याकाशस्यैकविज्ञानकोटिनिवेशादित्यर्थः । सिद्धं वदन् श्रुत्यर्थमुपनिबध्नाति अत इति । गविति गावश्चाश्वाश्चेति द्वन्द्वः



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## शब्दाच्च ॥ ४ ॥

'वायुश्चान्तरिक्षं च एतदमृतम्' इति । 'आकाशवत् सर्वगतश्च नित्यः' इति । न ह्यमृतस्य ब्रह्मदृष्टान्तभूतस्योत्पत्तिः संभवति ॥ ४ ॥

---

भाष्यप्रकाशः ।

त्वपशव इत्यत्र यथा गोअश्वप्रशंसार्थमपशुपदे गौणी, छागादिष्वपशुत्वासंभवादाद्रियते, तथात्राकाश उत्पत्त्यसंभवात् संभूतपदे गौणी आदर्तव्या ब्रह्मप्रशंसार्थम्, लोकेऽप्येवमाकाशं कुर्वित्यादौ गौणप्रयोगदर्शनादित्यर्थः ॥ ३ ॥

शब्दाच्च ॥ ४ ॥ ननु श्रुत्यपेक्षया लोकोऽकिंचित्करः पूर्वकाण्डमपि स्वर्गादिफलकत्वाल्लोकमनुरुन्ध इति न तदनुरोधेनोत्तरकाण्डे व्याकुलीकरणमुचितमित्यत आह शब्दाच्चेति । भाष्यमत्र निगदव्याख्यातम् । तथा चोत्तरकाण्डानुमतेरपि गौण्येवोचितेत्यर्थः ॥ ४ ॥

रश्मिः ।

प्रकृतिभावः । प्रशंसेति पशुत्वेन प्रशंसार्थम् । अपश्विति सिंहो माणवक इत्यत्र क्रौर्या(प्रशस्तत्वा)दिवत्सौम्यादिगुणयोगाच्छागादिषु गौणी । प्राशस्त्यप्राशस्त्यं नञर्थमाहुः । अप्रशस्ताः पशव इत्यर्थः । अन्ये तु पशुपदं प्रशस्तपशौ लाक्षणिकं, अभावो नञर्थः । अर्थस्तु स एव । अप्राशस्त्यमार्थिकमिति भूषणकारः । आद्रियत इति पूर्वपक्षिणा । मीमांसकस्तु 'लक्ष्यमाणगुणैर्योगाद् गौणी वृत्तिः प्रकल्पिता' इति वक्ति । अतस्तेनाप्याद्रियते । पूर्वतन्त्रे प्रथमस्य चतुर्थे पादे 'पूर्ववन्तो विधानार्थास्तत्सामर्थ्यं समाम्नाये' इत्यधिकरणे शास्त्रदीपिकायां, अधिकरणमालायां तु षोडशाधिकरणे 'अपशवो वाऽन्ये गोऽश्वेभ्यः पशवो गोअश्वाः' इति इदमर्थवादः । पशुकार्यं गवाश्वव्यतिरिक्तानामजादीनां प्रतिषेधः प्रतीयते । न चायं वक्तुं शक्यः । पशुकार्येऽजादीनां विहितत्वेन प्रतिषेधस्यासिद्धान्तत्वात् । अतोऽपशुशब्देन पशुव्यतिरिक्ता घटादय उच्यन्ते तस्मादजादिषु प्रयोगः प्रशंसागुणयोगात् । तथाहि श्रुतिगते अपशव इत्यस्मिन्नञ्समासे पशुपदेन प्रथमं गवाश्वगतं प्राशस्त्यमुपादाय पश्चात्तदभावो नञा पश्वन्तरेषु कथ्यते । पशुत्वस्याशक्यप्रतिषेधत्वात् । अवश्यं च पशुशब्दोपात्तोऽर्थो नञा पश्वन्तरे प्रतिषेध्यः, अपशव इति प्रयोगात् । एवं सति पशुशब्दो गवाश्वपदाभ्यामेकवाक्यतया संबद्धस्तद्गतं प्राशस्त्यं लक्षयति । तत्प्राशस्त्यं नञा पर्युदस्यते । तेनैतदुक्तं भवति, गवाश्वेषु यत्प्राशस्त्यं न तदन्येष्वस्ति तस्मादप्रशस्तास्ते पशवः, गवाश्वमेव प्रशस्तमिति सोऽयं गवाश्वगतप्राशस्त्यस्याभावः पश्वन्तराणामजादीनामपशूनां च तुल्य इत्यभिप्रायेण पश्वन्तराण्यपशव इत्युच्यन्ते । संभूतेति 'आकाशः संभूतः' इत्यत्राकाशे संभूतत्वासंभवाद्विवक्षितेन आकाश इत्येवं गौणी । व्यापकोऽपि ब्रह्मण उत्पद्यत इति ब्रह्मप्रशंसा तदर्थम् । लोकेऽपीत्यादि भाष्यं विवृण्वन्ति लोकेपीत्यादिना । गौणेति वस्त्वपसारणे गौणोऽयं प्रयोगः ॥ ३ ॥

शब्दाच्च ॥ ४ ॥ लोकमिति लोके हि ग्रामप्राप्ती राज्ञः परमफलम्, स्वर्गस्य लोकतामात्रवर्णनेनानुरुन्धे । व्याकुलीति उत्पत्तेर्व्याकुलीकरणं गौणीकरणम् । निगदेति वायुश्चेत्यादिकमुत्तरकाण्डस्य । तथा चोत्तरकाण्डानुमतेरिति वक्ष्यमाणत्वात् । 'आकाशवत्' इति गीतापि । ब्रह्मदृष्टान्तभूतस्येति यथामृतं तथा ब्रह्मेति । एवं निगदव्याख्यातमित्यर्थः । गौण्येवेति शब्दादुत्पत्त्यसंभवादाकाशोत्पत्तिर्गौणी, उत्तरकाण्डत्वादेवकारः ॥ ४ ॥

---

१. वाक्यम् ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

ननु कथं वियदुत्पत्तिर्गौणी भविष्यति । तत्र हि संभूत इत्येकमेव पदमुत्तरत्रानुवर्त्यते । तथा सत्युत्तरत्र मुख्या आकाशे गौणीति युगपद् वृत्ति-द्वयविरोध इतिचेन्न । एकस्यापि स्यात् कचिन्मुख्या कचिद् गौणीति । ब्रह्मशब्दो यथा, 'तपसा ब्रह्म विजिज्ञासस्व' 'तपो ब्रह्म' इति । प्रथमवाक्ये मुख्या, द्वितीये गौणी । न चात्र प्रयोगभेदोऽस्तीति वाच्यम् । संभूतशब्दोऽप्यावर्त्यते न तु तादृशार्थयुक्तोऽपि । आत्मसत्त्वैनेव तत्सत्त्वमिति सादृश्यं वचनहेतुः ।

---

### भाष्यप्रकाशः ।

स्याचैकस्य ब्रह्मशब्दवत् ॥ ५ ॥ पुनरपि गौण्यनुपपत्तिमाशङ्क्य परिहरति स्यादि-त्यादि । तद् व्याकुर्वन्ति नन्वित्यादि । एकस्येति शब्दस्य । ननु ब्रह्मशब्दस्य दृष्टान्तता न युक्ता, तपोवाक्ये तस्य प्रयोगभेदेन वृत्तिद्वययौगपद्याभावात्, 'तस्माद्वा' इति वाक्ये तु सं-भूतशब्दस्य सकृत्प्रयोगेण यौगपद्यस्य दुर्वारत्वादिशङ्कां न चेत्यादिनानूद्य परिहरति संभूते-त्यादि । तथा चात्राप्यावृत्त्या शब्दव्यक्तिभेदान्न यौगपद्यमिति न दृष्टान्तत्वायोग इत्यर्थः । नन्वस्त्वेवं वृत्तिद्वयोपपत्तिस्तथापि गोअश्वसाधारणलाङ्गलावकत्वरूपमपशुसादृश्यं छागादिषु यथा गौणीवचनहेतुस्तथाऽऽकाशे किं वा संभूतसादृश्यं गौणीवचनहेतुर्येनात्र साऽऽद्रियत इत्यत आह आत्मेत्यादि । सत्कार्यवादे उत्पत्तिपूर्वदशायां कारणभावेनैव कार्यं तिष्ठति, आत्मा चात्र कारणम् । अत उत्पत्तिपूर्वदशायां यथा कार्यमात्मभावेन तिष्ठत्येवमाकाशोऽप्यात्माभूतत्वा-दात्मभावेनैव तिष्ठतीत्यात्मसत्त्वेनैव तत्सत्त्वमाकाशसत्त्वं, न तु पृथक्त्वेन, अतः सृष्टिदशायां कार्यवद् ब्रह्मणः सकाशादाकाशस्य पृथक् सत्त्वं यो य आकाशनिष्ठः सत्त्वगुणः स एव कार्य-सादृश्यरूप आकाशे गौणीवचनहेतुत्वेन साऽऽद्रियत इत्यर्थः । ननु भवत्वेवं तथाप्याकाशं प्रति ब्रह्मणः कारणतानङ्गीकारे तैत्त्यादिवाक्येष्वात्मनः कारणत्वाकथनादाकाशादीनामेव तत्कथनाद् वायुकारणता आकाशासाधारणा अग्निकारणता च वाय्वसाधारणेत्येवं कारणता

### रश्मिः ।

स्याचैकस्य ब्रह्मशब्दवत् ॥ ५ ॥ परीति सूत्रकारः । तदिति तत्सूत्रमाचार्या व्या-कुर्वन्ति । भाष्ये शब्दस्येति 'आकाशः संभूतः' इतिवद्वायुः संभूतोऽग्निः संभूत इत्येवं 'तस्माद्वा एतस्मात्' इति श्रुतावनुवृत्त्यावर्त्यते । प्रकृते शब्दस्येति संभूतशब्दस्य । वृत्तिद्वयेति 'ब्रह्म विजिज्ञासस्व' इत्यत्र मुख्याभिधा, तपसि गौणी, जगज्जन्मादिकर्तृत्वचतुर्भुजत्वतपस्त्वादिगुणयोगाद् अतो यौगपद्याभावात् । परीति मीमांसकः परिहरति । संभूतेत्यादीति । अयमर्थः । शब्दस्य शक्त्या गौण्याभेदलक्षणया वाऽर्थाः । एतादृशः संभूतशब्दः आकाशाद्वायुरित्यत्रावर्त्यते न तु तादृशार्थयुक्तः । उभ-येषामेकतमार्थयुक्तस्त्वावर्त्यते । एतादृशे आवृत्ते शब्देऽपि शब्दस्यान्यस्य संनिधेरुभयेषामेकतमस्यार्थस्य निर्णयः । यथा देवस्य त्रिपुरारातेरित्यत्र त्रिपुरारातिशब्दसंनिधिः । अपश्विति अपशु घटादि तादृश्यम् । अत्रेति आकाशे गौणीत्यर्थः । सादृश्यरूप इति संभूतपदस्याकाशे गौणीवचनहेतु-रित्यर्थः । वाय्वादीति 'तस्माद्वा एतस्मात्' इति 'वायुश्चान्तरिक्षम्' इति एवमन्यत् तेषु । असाधारणेति 'अजाद्यतष्टाप्' इति सूत्रेण 'टाप्' । साधारणीनां परिग्रह इति सुबोधिन्यां तु



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

तत्तद्भावापन्नं ब्रह्मैव सर्वत्र कारणमिति नानेकलक्षणा । तद्भावापत्तिविशेषणा-व्यावृत्त्यर्थमपि न लक्षणा । स्वभावतोऽपि ब्रह्मणः सर्वरूपत्वात् तस्मादु गौणी आकाशसंभूतिश्रुतिरित्येवं प्राप्ते इदमाह ॥ ५ ॥

**प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥**

भवेदेतदेवं यदि छान्दोग्यश्रुतिर्न विरुध्येत । कथम् । एकविज्ञानेन सर्व-

---

भाष्यप्रकाशः ।

अनेकेषां लक्षणभूता स्यात् । ततश्च ब्रह्मणः कारणताभङ्गे ब्रह्मणः प्रशंसा न कापि स्यात् तद्-भावे च तन्निबन्धना गौण्यपि दूरमपेयादतः सर्वापि कल्पना असंगतेत्याशङ्कायामाह तत्त-दित्यादि । वायुसंभूतिवाक्य आकाशभावापन्नम्, अग्निसंभूतिवाक्ये वायुभावापन्नमित्येवं ब्रह्मैव सर्वत्र कारणमिति सा कारणता नानेकलक्षणा, युञ्जतः प्रयोगाः । तथा चैवं ब्रह्मप्रशंसा-सत्त्वान्न गौण्यनुपपत्तिरित्यर्थः । ननु तथाप्याकाशादिपदेषु तद्भावापत्तेरनुक्ताया एव विशेष-णीयत्वात् तेषु लक्षणा तु स्यादेवेत्यत आह तदित्यादि । घटे छिद्रेतरत्ववत् तत्तद्भावापन्न-त्वमर्थबलादेव प्राप्यत इति तद्व्यावृत्त्यर्थमपि नासन्मते लक्षणेत्यर्थः । सिद्धमाह तस्मादि-त्यादि । इदमिति वक्ष्यमाणं दूषणम् ॥ ५ ॥

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥ पृच्छति कथमिति । कथं विरुध्यते ।

रश्मिः ।

ङीप् । लक्षणेति अव्याप्त्यादिरहितासाधारणधर्मस्य लक्षणत्वात् । प्रशंसेति पूर्वं व्याख्याता । 'अपशवो वा' इति श्रुतौ तु गोऽश्वौ प्रशस्तावन्ये त्वप्रशस्ता इति प्रशंसा । तन्निबन्धनेति प्रशंसा-निबन्धना । 'तत्सिद्धिजातिसारूप्यप्रशंसालिङ्गसमभिः । षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिता' इति शास्त्रदीपिकाकारः । उदाहरणानि तु 'पूर्ववन्तो विधानार्थाः' इति सूत्रे प्रथमस्य चतुर्थपादे । इत्येवमिति 'आत्मा वै पुत्रनामासि' इति श्रुतेरिति भावः । नानेकेति अनेकेषामाकाशादीनां लक्षणा लक्षणभूता, नानेकेषामाकाशादिपदानां ब्रह्मणि लक्षणा वा जन्यजनकभावरूपा । युञ्जत इति प्रतिपादितत्वं षष्ठ्यर्थः । युञ्जन्नैयायिकप्रतिपादितः श्रौतः 'आकाशः संभूतः' इति प्रयोगः । अयमर्थः । ननु नैवं वक्तुं युक्तम् । नैयायिका ईश्वरं निमित्तं मन्यन्ते न समवायिनमित्याकाशस्य नित्यत्वेन वाय्वादीनां तु परमाणुरूपत्वं न त्वाकाशादिरूपब्रह्मभावापन्नत्वमित्याकाङ्क्षायामाहुः युञ्जत इति योगं युञ्जतो नैयायिकस्य प्रयोगः समाधानं च योगं कुर्वन्नैयायिक आकाशादौ ब्रह्म पश्यति योगजधर्मेण । परं चिन्ता सहकारिकारणम् । युक्तस्य तु योगिनो न चिन्ताविशेषः सह-कारी । अत्र तु विचारविशेषदर्शनेन चिन्ताप्राप्त्या युञ्जानो योगी । मीमांसकस्तु 'तदात्मानꣳस्वयम-कुरुत' इत्यर्थवादारोपितं मन्यत इति तन्मते तु न विरुद्धं वायुसंभूतिवाक्य इत्याद्युक्तसमाधानम् । विशेषणीयत्वादिति ब्रह्मभावापन्नात् 'आकाशाद्वायुः संभूतः' इत्येवं विशेषणीयत्वात्तेष्वाकाशा-दिपदेषु । घटे इति घटछिद्रेतर इत्यत्र प्रथमान्ताद्वतिः, छिद्रेतरत्ववदिति । अर्थेति युञ्जतो नैयायिकस्य 'मनसैवानुद्रष्टव्यम्' इति श्रुतेर्मनोबलादपि, मीमांसकस्य तु 'सर्वं खल्विदं ब्रह्म' इति श्रुतिबलादेव । तद्व्येति ब्रह्मभावापन्नविशेषणेन ब्रह्मेतरत्वव्यावृत्त्यर्थम् । सूत्रं तु एकस्येत्यारभ्य तपो ब्रह्मेत्यन्तेन भाष्येण स्फुटं व्याख्यातम् ॥ ५ ॥

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥ विभ्वोः संयोगतादात्म्यसंबन्धाभावादाहुः



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.c

विज्ञानप्रतिज्ञा बाध्येत, अव्यतिरेकात् अनुदुगमात् । यदि संबद्धमेव ब्रह्मणा आकाशं तिष्ठेत्तदा ब्रह्मविज्ञानेनाकाशविषयीकरणे तदेकविज्ञानम् । आकाशस्य च लौकिकत्वात् तज्ज्ञानं सर्वज्ञतायामपेक्षितमेव । न च जीववद्

---

भाष्यप्रकाशः ।

तत्रोपरमाहुः एकेत्यादि । अनुद्गमादिति कार्यत्वेन रूपेणाभ्युपगमात् । एतदेव विभजन्ते यदीत्यादि । यदि स्वरूपसंबन्धेनाविभक्तमेव ब्रह्मणा आकाशं तिष्ठेत् तदा विभुत्वादिसाधर्म्याद् ब्रह्मविज्ञानेनाकाशविषयीकरणे तदेकविज्ञानं, विषयद्वयमहिम्ना जायमानत्वात्, न च तत्र आवश्यकतेति शङ्क्यम्, यत आकाशस्यापि लौकिकत्वाल्लौकिकसर्वविषयकज्ञानस्यैव प्रतिज्ञायां विवक्षितत्वात् तज्ज्ञानं सर्वज्ञतायामपेक्षितमेव, न चांशत्वेन यथा जीवज्ञानं ब्रह्मज्ञानाज्जायते तद्वदाकाशज्ञानमपि भविष्यतीति शङ्क्यम्, आकाशस्य लौकिकत्वात्, न च लौकिकप्रत्यासत्त्यविषयत्वेनातीन्द्रियत्वादाकाशोऽप्यलौकिक एवेति शङ्क्यम् । यदि ह्यतीन्द्रियः स्याल्लौकिकव्यवहारविषयो न स्यात् यथा विविक्तात्मा । वर्तते च लौकिकव्यवहारविषय आकाशः । अतो व्यवहारमात्रविषयत्वाज्जातीन्द्रियत्वाद्भिन्ता तस्य युज्यते । तथा च तस्य लौकिकत्वात् तज्ज्ञानं सर्वथापेक्षितम् तदेव स्यात् प्रतिज्ञा हीयेतैवेत्यर्थः । अत्र चोदयति

रश्मिः ।

स्वरूपेति । विभुत्वादीति आदिना सत्ता । एकविज्ञानमिति एकस्य विज्ञानमेकविज्ञानं तेन, नागृहीतविशेषणन्यायेनाकाशज्ञानमित्युक्तम् । आकाशस्येति भाष्यं विवरीतुं शङ्कामाहुः न चेति । विवृण्वन्ति स्म यत इति । तज्ज्ञानमिति स्मार्तः प्रयोगः इत्यसकृदुक्तम् । न चेत्यादिभाष्यं विवृण्वन्ति न चेति । जायत इति सामान्यलक्षणया प्रत्यासत्त्या श्रुते पश्चाद्यदितिवज्जायते जीवा इति । अंशत्वं सामान्यस्थानीयम् । इदं ज्ञानमावद्दशायाम् । विद्वद्दशायां तु प्रत्यक्षम् 'अनागतम्' इति वाक्यात् । तद्वदित्यंशत्वेन । लौकिकत्वादिति । तथा च तद्वदिति दृष्टान्तविरोध इति भावः । व्यवहारेत्यादि भाष्यं विवरीतुमाहुः न च लौकिकेति । लौकिकप्रत्यासत्तयः षट्, अलौकिकास्तिस्रः । तेन नैयायिकाशङ्का । एवेति योगजधर्मरूपालौकिकप्रत्यासत्त्या भविष्यति तज्ज्ञानम्, अयोगिनस्तु ज्ञानलक्षणया प्रत्यासत्त्या भविष्यत्यस्मन्मते इत्येवकारः । लौकिकेति भूतानां छिद्रदातृत्वादिर्व्यवहारस्तद्विषयः । ननु लौकिकानां लोके भवत्वं तादृशव्यवहारविषयत्वं कालपरमाण्वादावप्यस्तीति तस्यानतीन्द्रियत्वापत्तिरिति चेन्न । कालादौ रूपाभावात्परमाण्वादौ महत्त्वाभावाच्चातीन्द्रियत्वेनोद्भूतरूपमहत्परिमाणाधिष्ठानत्वेन लौकिकत्वहेतोर्विशेषणीयत्वात् । न चैवमाकाशेऽपि रूपाभावादनतीन्द्रियत्वासिद्धातीन्द्रियत्वं सिद्धमेवेति शङ्क्यम् । सर्वत्रप्रसिद्धोपदेशाधिकरणे आकाशात्मेति भाष्यस्य प्रकाशे 'नीरूपो नील' इति तस्य रश्मौ नीलात्मतायाः आकाशस्य समर्थनात् । विविक्तेति । अहं सुखीत्यादिप्रतीतिस्तु स्वन्मते सुखाद्यवगाहत इति वक्तव्यं, सुखाद्यतिरिक्ताभावात् । सुखादीनां गुणत्वेन तदाश्रयतयात्मसिद्धिवार्यं न तु भानम् । वर्तते चेति । अयमर्थः । मीमांसकस्यार्थवादे अर्थविशेषाग्रहाभावादाकाशज्ञानं भवतु न वा । नैयायिकानां तु ज्ञानलक्षणयाकाशज्ञानं न भविष्यति । ज्ञानलक्षणाया यद्विषयकं ज्ञानं तत्रैव प्रत्यासत्तित्वात् । ज्ञानं तु ब्रह्मविषयकमत आकाशे ज्ञानलक्षणाप्रत्यासत्तिर्न भविष्यतीत्यवक्तव्यमाकाशस्य व्यवहारविषयत्वम्, बहिरन्तर्व्यवहारदर्शनात् । वर्तते च लौकिकव्यवहारविषय आकाश इति । व्यवहारेति भाष्यं विवृण्वन्ति स्म अत इति । कात्स्न्यें मात्रच् । एवेति श्रुतेरुक्तत्वादेवकारः ।



RUPNATHJI ( DR. RUPAK NATH )
w.astrology-tantra.c

लौकिकत्वात्, व्यवहारमात्रविषयत्वाज्जातीन्द्रियत्वादिचिन्ता । अनुक्रमे कथं वस्तुसामर्थ्यात् कथं प्रतिज्ञा हीयते इत्यत आह शब्देभ्यः । 'येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति' इति शब्दात् प्रकृतिविकारभावे-नैव व्युत्पादयति ज्ञानम् । शब्देभ्यो हेतुभ्यः प्रतिज्ञाहानिरिति योजना ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

तुशब्द आकाशोत्पत्त्यसंभावनशङ्कां वारयति । यद्यद् विकृतं तस्य सर्वस्य

---

भाष्यप्रकाशः ।

अनुक्रमे इत्यादि । वस्तुसामर्थ्यादिति, ज्ञानं भविष्यतीति शेषः । अग्रेऽपरं व्युत्पादयन्ति येनेत्यादि । शब्दादिति वाक्यात् । तथा च यद्यविभक्तस्याकाशस्य वस्तुसामर्थ्येन ज्ञानं विवक्षितं स्यात्, अश्रुतं श्रुतमित्यादि न वदेत्, शाब्दस्य मननात्मकस्य च ज्ञानस्य वस्तु-सामर्थ्यजन्यत्वाभावात् । अग्रे च, यथा सौम्यैकेन मृत्पिण्डेनेत्यादिना प्रकृतिविकारभावेन न ज्ञानं व्युत्पादयेत्, वदति त्वेवं, व्युत्पादयति चैवमतः कार्यरूपेण व्यतिरेकानङ्गीकारे शब्देभ्यो हेतुभ्यः सिद्धायाः प्रतिज्ञाया हानिरित्यर्थः ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥ अस्मिन् सूत्रे व्याप्तिदृष्टान्तबोधक

रश्मिः ।

ज्ञानमिति आकाशस्य व्यापकत्वेन वस्तुसामर्थ्येन सर्वत्र सत्त्वाज्ज्ञानं लक्षणया भविष्यति ज्ञानमिति । न वदेदिति । तथा च ज्ञानलक्षणया प्रत्यासत्त्या ज्ञाताऽविज्ञातत्वाभावेनाविज्ञातं विज्ञातमिति विरुध्येतेति भावः । किं चाऽऽकाशप्रत्यक्षे योगजधर्मप्रत्यासत्तिरङ्गीकृता तद्धानिः । ज्ञानलक्षणाङ्गी-कारात् । किं च यद् यदुपादेयं तत् तज्ज्ञानेन ज्ञायत इति नियमोऽवश्यमभ्युपेयोऽन्यथा सुवर्णज्ञाने सति घटादयोऽपि ज्ञाता भवेयुः कुण्डलादिवत् । आकाशं तु न ब्रह्मोपादेयमिति ब्रह्मज्ञानेऽपि ज्ञायेतेति-श्रुतिर्न वदेदित्यर्थः । ननु दर्शितो नियमो ज्ञानलक्षणायाः प्रत्यासत्तेः स्थले संभवति प्रकृते तु योगजधर्मः प्रत्यासत्तिस्तया तु ब्रह्मानुपादेयमपि ज्ञायते विषयमात्राधीनत्वादित्यत आहुः शाब्दस्येति । वस्त्विति वस्तुसामर्थ्येन विषयविधया वस्तुसामर्थ्यजन्यत्वम्, अभावस्तु पदादिज्ञानजन्ये शाब्दे श्रुत्यनुभवप्रतिभादिजन्ये मनने च । तथा च भवेद्योगजधर्मेणाकाशज्ञानं यदि तन्मानसं भवेन्न त्वेवं किं तु शाब्दम् । 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्' इति श्रुतेः । तत्र तु पदज्ञानं तु करणम् तज्जन्यपदार्थस्मरणं व्यापारः । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेत-रूपेच्छा सहकारिणी । कथं त्वत्र योगजधर्मप्रत्यासत्तिरित्यर्थः । श्रुतौ दृष्ट इति चाक्षुषविषयताप्युच्यते परं सा मोक्षोपयोगिनि विद्वद्दशायां विचारः । प्रकृतीत्यादिभाष्यं विवृण्वन्ति स्म अग्रे चेति । आदिनेति मृत्पिण्डेन । प्रकृतिविकारभावेन प्रकृतिविकृतिभावेन कार्यकारणभूतेन । ज्ञानमेक-विज्ञानेन सर्वविज्ञानम् । शब्देभ्य इति भाष्यं विवृण्वन्ति स्म अत इति । किं तु नित्यत्वेन ब्रह्माव्यतिरेकेणाकाशाङ्गीकारे शब्देभ्यो येनाश्रुतं श्रुतं भवतीत्यादिभ्यो हेतुभ्यो व्यतिरेकात् कार्यत्वे-नाव्यतिरेकमाश्रित्य सिद्धायाः प्रतिज्ञायाः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः हानिरित्येक-देशान्वयेन योजना । वृत्तौ तु प्रतिज्ञापदे 'सुपां सुलुक्' इति सूत्रेणैकदेशान्वयभिया षष्ठ्या लुगुक्तः । अत्र गौण्यसंभवसूत्रोक्तं निरसनीयम् ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥ अस्मिन्निति । यावन्तो विकारास्तावन्तो-



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

**विभाग उत्पत्तिः । आकाशमपि विकृतं, लौकिकव्यवहारविषयत्वात् । यथा लोके विकृतमात्रमुत्पद्यते ।**

---

भाष्यप्रकाशः ।

न्यासेनाकाशोत्पत्तावनुमानमेवोपन्यस्तमित्याशयेनाहुः यद्यदित्यादि । तथा चाकाश उत्पादविनाशशाली, विकृतत्वात् । विकृतो, लौकिकव्यवहारविषयत्वात्, लोकवदिति । तस्मादाकाश उत्पद्यत इति सिद्धम् । नन्वाकाशोत्पत्तिर्विभागशब्दमहिम्ना विभागद्वारा वक्तव्या, स तु ब्रह्मणो व्यापकत्वादशक्यवचन इति कथमुत्पत्तिरिति चेत्, न । बृहदारण्यके मैत्रेयीब्राह्मणे ब्रह्मणः प्रज्ञानघनत्वश्रावणाद् ब्रह्म तादृशं, यदा सृजति, तदा घनत्वं तिरोभावयतीत्याकाशो विभज्यत इत्यनुपपत्त्यभावात् । एवमन्यदपि बुद्धिदोषोद्भवं परिहर्तव्यमित्या दिक् ।

रश्मिः ।

च्युतकार्याणीति यावद्विकारं । 'यावदवधारणे' इति सूत्रेण समासः । 'नाव्ययीभावादतोम् त्वपञ्चम्याः' इत्यनेन षष्ठ्या लुकं बाधित्वाऽमादेशः । यावद्विकाराणां विभागः उत्पत्तिः । विभागादुत्पत्तिरिति विशेषेण भागः । आद्यक्षणसंबन्धः उत्पत्तिः विभागः इति व्युत्पत्तिः । तृतीये स्कन्धे- प्युत्पत्तिस्वरूपमस्ति । लोकवत् घटादिवदित्यर्थेकेस्मिन्सूत्रे व्याप्तीति यद्यद्विकृतं तत्तदुत्पत्त्यादिमदिति व्याप्तिः, लोकवदिति दृष्टान्तस्तयोः । अनुमानमिति गौण्यसंभवसूत्रे आकाशं नोत्पादविनाशशालि निरवयवत्वाद्व्यापकत्वाच्च ब्रह्मवत् । यन्नैवं तन्नैवं घटादिवदित्यनुमानं सूचितम् । तन्निरासायात्र प्रतिपक्षमनुमानम् । अनुमानं ब्रुवते यद्यदित्यादीति । उक्तसमासमभिप्रेत्याहुः यद्यदिति । भाष्ये विकृतत्वहेतौ स्वरूपासिद्धिं निरस्यन्ति आकाशमित्यादि । दृष्टान्तं व्याकुर्वन्ति यथेति । आकाशे विकृतत्वाभावात्प्राप्तां स्वरूपासिद्धिं परिहरन्ति स्म विकृत इति । ननु लौकिकव्यवहारविषयत्वेन विकृतत्वेन न व्याप्तिः । कालदिगात्ममनःसु परमाणुषु च विकृतत्वापत्तेरिति चेन्न । 'दिक्कालावीश्वरान्नातिरिच्येते' इति दीधितिकृतोक्तस्य सिद्धान्तेप्यविरुद्धत्वान्मनसोऽन्नमयत्वेन जन्यत्वात् परमाणूनां द्व्यणुकजन्यत्वादिदृष्टापत्तेः । यादृशात्मनो व्यवहारविषयत्वं तादृशस्य विकृतत्वात् । जीवात्मनां तु आनन्दांशतिरोभावो ब्रह्मधर्मविपरीतधर्मवत्त्वं च विकारः । तेन जीवो ब्रह्मांश इत्यादिव्यवहारविषयत्वेऽपि न क्षतिः । विभागद्वारेति विभागमसमवायिनं मत्वा वक्तव्या । स इति विभागः । कथमिति असमवायिकारणविरहात्कथम् । तादृशमिति छिद्रदात्राकाशरहितत्वं घनत्वं प्रचयाख्यसंयोगरहितत्वं वा प्रज्ञानघनत्वं वा श्रीगोवर्धननाथवत्तत् दृश्यते यत्र । तिरः इति 'हन्त तिरोऽसानि' इति श्रुतेस्तिरोभावयतीत्यर्थः । 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्याच्च । अन्यदपीति यथा विभाग एवोत्पत्तिः । उत्पन्ने स्वरुशरावादौ विभक्त इति व्यवहारः, विभक्ते स्वरुशरावादौ उत्पन्न इति व्यवहारः, मृदो मृत्पिण्डमुद्धृत्य शरावादौ विभागजे विभागे एवोत्पत्तिः । विभक्तत्वव्यवहारासाधारणं कारणं विभागो मृत्पिण्डे शरावसमवायिनि वर्ततेऽतो विभागविशिष्टमृत्पिण्डे विभागसत्त्वात्स एवोत्पत्तिः प्रथमज्ञानस्योत्पत्तित्ववत् शरीरस्वीकारस्योत्पत्तित्ववच्च । न च मृत्पिण्डोत्पत्तिः सा न शरावस्येति शङ्क्यम् । शरावसत्ता मृत्पिण्ड इति स्वसत्तारूपशरावाद्युत्पत्तिर्विभागः । शरावादावुत्पन्नेऽपि मृत्पिण्डविभागौ तावेव । नामाकृतिविकारभेदेन न द्रव्यविभागयोर्भेद इति । घटमञ्जूषादिषु तु संयोगोऽपि निमित्तान्तर्गतः । विभागस्य सर्वत्र सत्त्वात् । संयोगस्य तु संयोगजकार्य एवेत्यलम् । परीति अचिन्त्यानन्तशक्तिमत्त्वेन विरुद्धधर्माश्रयतया च परिहर्तव्यम् । 'युक्तिभिरतिशिथिलाभिः समादधानो दृढान्दोषान्' । वाचस्पतिरपि



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.c

'आकाशशरीरं ब्रह्म,' 'स यथाऽनन्तोऽयमाकाश एवमनन्त आत्मा वेदितव्यः,' 'आकाश आत्मा' इत्यादिश्रुतयः, 'समोऽनेन सर्वेण,' 'य आकाशे तिष्ठन् सर्वमात्मा' इत्येवमादिभिरेकवाक्यतां लभन्ते । व्यवहारे त्वज्ञबोधनं वाक्यानामुपयोगः ॥७॥ इति द्वितीयाध्याये तृतीयपादे प्रथमं वियदित्यधिकरणम् ॥ १ ॥

भाष्यप्रकाशः ।

दृश्यते' इति साम्यनिषेधश्रुतेर्ज्यायानाकाशादिति नमोज्यायस्त्वश्रुतेश्च । तथा तस्याकाशस्य ब्रह्मित्यविभुत्वं तदन्यापेक्षयैव, न तु ब्रह्मवदिति फलतीति सर्वसाम्यश्रुत्यैकवाक्यतां लभते । एवमाकाशशरीरत्वश्रुतिर्य आकाशे तिष्ठन्नित्यन्तर्यामिब्राह्मणश्रुत्या, बहुव्रीहिविग्रहेण तस्यैवार्थस्य लाभात्, एवं सति यथा पृथिव्यादीनामाधारतामात्रं, न तु नित्यत्वादिकमपि, तथैवाकाशस्येति फलति । एवमनन्तत्वोपमानश्रुतावप्यापेक्षिकमेवानन्तत्वमाकाशस्येति पूर्ववत् सर्वसाम्यश्रुत्यैवैकवाक्यतां लभते, उत्पत्तिमत्त्वेनैवान्तवत्त्वस्य प्राप्तत्वात्, 'नभस्तमनुलीयते' इत्यादिस्मृतेश्च । एवम्, 'आकाश आत्मा' इति प्राणमयवाक्यस्थश्रुतिरपि, 'इदं सर्वं यदयमात्मा' इति मैत्रेयीब्राह्मणश्रुत्या । तत्र सर्वमुद्दिश्यैवात्राकाशमुद्दिश्यात्मत्वविधानात् । अतस्तत्र सर्वस्येवात्राकाशस्यापि न नित्यत्वादौ तात्पर्यमपि तु ब्रह्मात्मकत्वे, वस्तुतस्तु प्राणसंचारायाकाशस्यात्मत्वमुच्यते इति तत्रायमर्थ एव न भवतीति, न चाशङ्का न परिहारमिति । ननु भवत्वेवमेतासां श्रुतीनां गतिस्तथाप्येवं कथनस्य प्रयोजनं तु किंचिद् वक्तव्यम् । अन्यथा, एवं तात्पर्यकत्वमपि संदिग्धमेव तिष्ठेदित्यत आहुः व्यवहारे त्वित्यादि । 'आकाशशरीरम्' इति श्रुतिर्हि उपासनार्था । 'इति प्राचीनयोग्योपास्स्व' इत्युपसंहारात्, यदि ब्रह्माकाशं तथा न जानीयात् कथं ब्रह्मशरीरत्वेनोपासीत, अतोऽज्ञानां बोधनमेव वाक्यप्रयोजनम् । एवमन्यत्रापि द्रष्टव्यम् । अतो न तात्पर्ये संदेह इत्यर्थः ।

रश्मिः ।

अन्येति । आकाशवच्छ्रुतेः । आकाशं शरीरमस्येति शरीरापेक्षया श्रुत्यन्तरस्यारस्यस्य वक्ष्यमाणत्वादेवकारः । लभत इति तथा च 'वायुश्चान्तरिक्षं चैतदमृतम्' 'आकाशवत्' इति श्रुत्योश्चतुर्मुखाजन्यायेनामृतादिपदप्रवृत्तिरिति भावः । आकाशं शरीरमस्येति विग्रहादाहुः बहुव्रीहीति । सुबोधिन्यामाकाशशरीरश्रुतेरेवकारः । आधारतेति । 'यः पृथिव्यां तिष्ठन्' इत्यादिश्रुतिजाले । फलतीत्याकाशशरीरश्रुतौ फलति । आपेक्षिकमिति वाय्वाद्यपेक्षिकम् । आकाशवच्छ्रुतिवत् । प्राप्तत्वादिति । अतोऽनन्तपदेन तस्य निषेध इति भावः । प्राणमयेति ब्रह्मविद्पाठके । नित्यत्वाद्ाविति आदिशब्देन सर्वगतत्वम् । ब्रह्मात्मेति उभयत्रात्मपदवत् एवमादिशब्दार्थौ वेदितव्यौ । प्रयोजनाभावाच्चोदाहृतौ । प्राणेति । आकाशाद्वायुरित्युक्तवायुरूपविराट्प्राणसंचाराय । तत्रायमिति श्रुतिष्वयं नित्यत्वादिलक्षणः । एवं कथनस्येति आकाशशरीरत्वादिकथनस्य । प्रयोजनमात्रप्रश्नोयं प्रासङ्गिकः । संदिग्धमिति आकाशवदित्यादिनिर्णीतत्वम् । अज्ञानामित्यादि अशुद्धचित्तानां चित्तशुद्ध्यर्थमुपासनबोधनम् । एवकारस्तु भक्त्येकलभ्यत्वात् । ज्ञानात्तु दार्ढ्यार्थं स्थूणाखननवदिति ज्ञेयम् । अन्यत्रेति । आकाशवदित्यादिवाक्येषु सर्वगतत्वेन नित्यत्वेनामृतत्वेनानन्तत्वेनात्मत्वेन ब्रह्मधर्मेण जगत उपासनं प्रयोजनं द्रष्टव्यम् । तदुक्तं 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति । अत इति उपासनार्थत्वेन निरवधिनित्यत्वादौ मिथ्यात्वे च नित्यत्वादेस्तात्पर्याभावात् । न तात्पर्येति पूर्वोक्तार्थे न तात्पर्यसंदेहः । इत्यर्थ इति 'सावैकस्य ब्रह्मशब्दवत्' इति सूत्रोक्ता 'तस्माद्वा एतस्मादात्मनः आकाशः संभूतः'

१. द्वितीयसूत्रोदाहृतौ ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ ( २-३-२ )

आकाशोत्पत्तिसमर्थनेन मातरिश्वोत्पत्तिः समर्थिता । 'सैषाऽनस्तमिता देवता' इति भौतिकवाय्वुव्यावृत्त्यर्थमलौकिकपदम् ॥ ८ ॥

इति द्वितीयाध्याये तृतीयपादे द्वितीयमेतेन मातरिश्वेत्यधिकरणम् ॥ २ ॥

भाष्यप्रकाशः

तस्मादाकाशोऽप्युत्पद्यत इति सिद्धम् ॥ ७ ॥ इति प्रथमं वियदित्यधिकरणम् ॥ १ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ ननु वायूत्पत्तिः श्रुत्या प्रत्यक्षसंवादिनी चेति संदेहाभावात् किमस्याधिकरणस्य प्रयोजनमत आहुः सैषेत्यादि । श्रुतिस्तु बृहदारण्यके सप्तान्नब्राह्मणे व्रतमीमांसाख्या । म्लोचन्ति ह्यन्या देवता न वायुः सैषाऽनस्तमिता देवता यद् वायुः' इति । तथा चाऽनस्तमितत्वादेवोत्पत्त्यभावः सिद्ध्यतीति श्रुतिविप्रतिषेधादेव संदेहः श्रुतिविरोधनिराकरणमेव चाधिकरणप्रयोजनम् । ननु तथापि प्रत्यक्षविरोधस्य का गतिरित्यत आहुः भौतिकेत्यादि । तथा च प्रत्यक्षं भौतिकविषयं, न श्रुतिविषयमित्यदोष इत्यर्थः । शब्दनिर्वचनं तु मातरीति सप्तम्यन्तप्रतिरूपकमव्ययमन्तरिक्षवाचकम्, तत्र श्वयति गच्छतीति

रश्मिः ।

इत्यत्र गौणी सा तु पूर्वमुत्पत्तिसमर्थनाच्छ्रुत्या निरस्तत्वादिति न पृथक् दूषिता । उत्पद्यत इति आत्मा समवायिकारणं विभागोऽसमवायी, आत्मेच्छा निमित्तमाकाशं कार्यमित्युत्पद्यते । लक्षणं तु प्रस्थानरत्नाकरे प्रमेयप्रकरणेऽस्ति । तेनाकाशं नोत्पद्यते अनवयवत्वादित्यनुमानं स्वरूपासिद्धम् ॥ ७ ॥

इति प्रथमं न वियदित्यधिकरणम् ॥ १ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ भाष्ये एतेनेति पदात्सूत्रे मातरिश्वपदे लक्षणेत्याशयवन्त आहुः मातरिश्वोत्पत्तिरिति । मातरिश्वपदं लाक्षणिकम्, तात्पर्यग्राहकादेतेनेति पदात् । पूर्वसूत्रे गौणीत्वस्याप्रथमत्यागे मानाभावाच्च व्याख्यात इत्यत्रैव लिङ्गविपर्यय इत्याशयवन्त आहुः, समर्थितेति छान्दोग्योक्तप्रतिज्ञानुरोधिनीभिः पूर्वोक्तयुक्तिभिरुत्पत्तिः समर्थिता । श्रुतेति आकाशाद्वायुरिति श्रुत्या । किं च प्रत्यक्षेति । म्लोचन्तीति अग्न्यादिदेवता म्लोचन्ति अस्तं यान्ति स्वकर्मसु उपरमन्ति न वायुर्म्लोचति । सैषा 'वायुश्चान्तरिक्षं चैतदमृतम्' इति श्रुत्यन्तरासिद्धत्वाच्छ्रुत्यादिविरोधः । सैषा वायुर्देवताऽनस्तमिताऽविनाशिन्यतेत्यर्थः । वायुलक्षणं 'चालनं व्यूहनं चापि नेतृत्वं द्रव्यशब्दयोः । सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम्' इति वाक्यादधिवेश्ये सति चालनव्यूहनद्रव्यशब्दगन्धनयनसर्वेन्द्रियबलदानाख्यकार्यत्वमेकमेव । रूपरहितः स्पर्शवान्वायुरिति नैयायिकाः । अनस्तेति अविनाशित्वात् । श्रुतीति उत्पत्तिश्रुतिप्रतिषेधात् । वायोरुत्पत्तेः सर्वेषामिष्टत्वेन पूर्वपक्षासंभवादधिकरणभङ्गस्तं वारयन्ति स्म श्रुतीति । वायूत्पत्त्यनुत्पत्तिबोधकश्रुतीत्यर्थः । वायुनित्यत्वश्रुतिस्तु 'वायुश्चान्तरिक्षं च एतदमृतम्' इति । तथा च विरोधनिराचिकीर्षोर्व्यासाचार्यस्यैवाशङ्कापूर्वपक्ष इति भावः । स च तथा चात्राहुरा वक्ष्यते । तथा च न पादार्थस्य लक्षणभूतस्य श्रुतिविरोधनिराकरणरूपस्याव्याप्तिः । अग्रे वक्ष्यन्ति च । भौतिकेति भौतिको वायुर्यः पञ्चीकृत इत्युच्यते प्राणः तदुपादानत्वा । भूतेति भूतो वायुर्यत्रिवृत्कृत इत्युच्यते आकाशप्रथमकार्यं स मुख्यत्वम् । अदोष इति विषयभेदाददोषः । एतच्छब्दप्रयोगादरे व्यासाशयमाहुः ।

१. सिद्धम् ।



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

## असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥ ( २-३-२ )

ननु ब्रह्मणोऽप्युत्पत्तिः स्यात् 'आकाशवत् सर्वगतश्च नित्यः' इति श्रुते-

भाष्यप्रकाशः ।

मातरिश्वा । टु ओ श्वि गतिवृद्ध्यौ । तथा च भूतात्मा वायुर्नोत्पद्यते, छान्दोग्ये अश्रवणादिति पूर्वः पक्षः । तैत्तिरीये श्रावणादुत्पद्यत इति सिद्धान्तः । अन्येऽपि गौण्यादिसूत्रोक्ताः पक्षा अत्र योजनीयाः । सूत्रे, एतेनेत्यतिदेशात् । अमृतत्वश्रुतिस्त्वापेक्षिकी, म्लोचन्तीति श्रुत्यनुसारेण तथा निर्णयस्य सिद्धत्वात् । तस्माद् वायुरुत्पद्यत इति सिद्धम् ॥ ८ ॥

इति द्वितीयं एतेन मातरिश्वेत्यधिकरणम् ॥ २ ॥

असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥ व्याकुर्वन्ति नन्वित्यादि । अयमर्थः । यद्यपि ब्रह्मण उत्पत्तिर्न श्रूयत इति तदुत्पत्त्याशङ्कैव नोदेति, तथापि पूर्वोक्ते पादे बाह्याबाह्यमतानां निराकृतत्वात् तदसहमानः कश्चिद् अस्तेरुत्पत्तिवाचकत्वस्य, 'रोहितो रोहितादासीदु'न्धुस्तस्या-

रश्मिः ।

यौगिकालौकिकपदादरे । भूतात्मेति । अनेन विशेषणेन भौतिको वायुर्व्युदस्यते । छान्दोग्य इति श्वेतकेतूपाख्याने । 'सदेव सौम्येदमग्र आसीत्' इत्युपक्रम्य 'तत्तेजोऽसृजत' इत्यादिना तेजोबन्नानां सृष्टिश्रावणेन वायोरश्रावणात् । तैत्तिरीय इति आकाशाद्वायुरिति । पक्षा इति निरवयवत्व-व्यापकत्वैकविज्ञानसर्वविज्ञानप्रतिज्ञावायुशरीरत्वश्रुतिमुख्यत्वेतिगौणप्रयोगरूपाः पक्षाः पूर्वपक्षाः गौणी-सूत्रोक्ताः शब्दाच्चेति सूत्रोक्ताश्चानूद्याग्रे निराकरिष्यन्ते । तत्र व्यापकत्वनिरवयवत्वयोः स्वरूपासिद्ध-त्वात् । वायुशरीरविशिष्टज्ञानस्यैव विषयकज्ञानत्वाभावान्मुख्ये प्रयोगे सति गौणस्यान्याय्यत्वाच्चि-रसनीया इत्येवं योजनीयाः । अतीति आन्यत्रिकप्रतीतपक्षाणां कार्यतोऽनित्यत्वस्थापनतोऽत्र प्राप-णात् । पादार्थं संगमयन्ति स्म अमृतत्वेति । 'वायुश्चान्तरिक्षं चैतदमृतम्' इति श्रुतिः । आपे-क्षिकीति तैत्तिरीयोक्ताग्न्याद्यपेक्षिकी । अग्न्याद्यपेक्षया वायोरमृतत्वमित्यर्थः । कथैकवाक्यतां लभत इत्याकाङ्क्षायामाहुः म्लोचन्तीति । अग्न्यादयोऽतीति अग्न्याद्यपेक्षया वायोरमृतत्वं निरपेक्षं नेति निर्णयस्य सिद्धत्वादिति । न चास्य निम्लोचनत्वस्तं यातीत्यस्योपरमतीत्यर्थाद्दुत्पत्तौ समकक्षत्वात्साध्यत्वमिति वाच्यम् । न वायुर्म्लोचतीत्येतावतैव चारितार्थ्यात् । अन्या देवता म्लोचन्तीति कथनात्तदपेक्षया न वायुर्म्लोचतीत्यस्यावश्यकत्वात् । स्याच्चेति सूत्रे पक्षो न संभवति । गङ्गायां मत्स्यघोषौ स्त इति क्वचि-द्दर्शनात् । गङ्गायां मत्स्यो गङ्गायां घोष इतिवद्धा । उत्पद्यत इति आकाशः समवायिकारणमात्मेन्द्रियं निमित्तम् । अतएवात्रानोऽनियतत्वं द्योतयति स्म सूत्रं वायुः कार्यमित्युत्पद्यत इत्यर्थः ॥ ८ ॥

इति द्वितीयमेतेन मातरिश्वेत्यधिकरणम् ॥ २ ॥

असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥ व्याकुर्वन्तीति । ननु ब्रह्मणोऽप्युत्पत्तिरित्यस्य ब्रह्माधिकारे वाय्वाकाशयोरुत्पत्तेः पूर्वं निरूपणे प्राप्तेऽधीतवेदान्तस्य वाय्वाकाशनिरूपणं प्रतिबन्धकी-भूतजिज्ञासाविषयं तन्निरूपणेन प्रतिबन्धकजिज्ञासानिवृत्त्या पूर्वाधिकरणेनावसरसंगतिरित्याशयेन व्याकुर्वन्तीत्यर्थः । पूर्वपक्षं वदन्तीत्याशयेन व्याचक्षते स्म अयमर्थ इति । 'सदेव सौम्येदमग्र आसीत्' इति विषयवाक्यं तत्रायं संशयादिरूपोऽर्थ इत्यर्थः । नोदेतीति 'अस्तीत्येवोपलब्धव्यः' इति श्रुतेर्ब्रह्म नोत्पद्यत इति संशयस्यैका कोटिः । द्वितीयां कोटिमाहुः तथापीति । कश्चिदिति । समतपरामर्शं श्रुत्वा बाह्यान्तर्गतोऽक्रोधमयः शान्तो न क्रोधमय इति तस्माद्ब्रह्मोपिता वेदरीत्यापि

राकाशन्यायेन सर्वगतत्वनित्यत्वयोरभावे इतीमामाशङ्कां तुशब्दः परिहरति ।
सतः सन्मात्रस्योत्पत्तिर्न संभवति । न हि कुण्डलोत्पत्तौ कनकोत्पत्तिरुच्यते । नामरूपविशेषाभावात् । उत्पत्तिश्च स्वीक्रियमाणा नोपपद्यते । स्वतो न संभवति । अन्यतस्त्वनवस्था । यदेव च मूलं तदेव ब्रह्मेति ॥ ९ ॥

इति द्वितीयाध्याये तृतीयपादे तृतीयमसंभवाधिकरणम् ॥ ३ ॥

---

भाष्यप्रकाशः ।

भवत् सुतः' इत्यादिपुराणवाक्येषु दर्शनात्, 'सदेव सौम्येदमग्र आसीत्' इत्यत्रापि तमर्थं कल्पयेत् तदा श्रुतौ ब्रह्मणोऽप्युत्पत्तिः स्यात्, न च नित्यत्वविभुत्वयोर्बाधकत्वं शक्यम्, 'आकाशवत् सर्वगतश्च नित्यः' इति श्रुतेराकाशस्य यथा आपेक्षिके एव नित्यत्वविभुत्वे, तन्न्यायेन निरङ्कुशसर्वगतत्वनित्यत्वयोरभावे, इमां वैतण्डिकाशङ्कां तुशब्दः परिहरतीत्यर्थः । सन्मात्रस्येति अविकृतस्य । स्वतो न संभवतीति आत्माश्रयापत्त्या न संभवति । शेषमतिरोहितार्थम् ।

यत्तु भास्कराचार्यैरुक्तम्, आशङ्काहेत्वभावात् ब्रह्मण उत्पत्तिसंभावनाभावेन तन्निराकरणार्थमिदं सूत्रं वदतां सूत्रवैयर्थ्यमिति, तदप्यनेनैवापास्तं ज्ञेयम् । अतो यत् दिक्कालसंख्या-

रश्मिः ।

त्वयाकाशवायूत्पत्तिरुक्ता । तादृशशरीरस्वीकारप्राप्त्यापि मद्शक्तिवन्न तु ब्रह्मणोऽप्युत्पत्तिः स्यादिति । सदेवेति इदं विषयवाक्यम् । आसीदित्युत्पत्त्यर्थ एवेति संदेह इति सूचितम् । तमिति उत्पत्तिरूपमर्थम् । आकाशवदिति भाष्यमवतार्य व्याकुर्वन्ति स्म न चेत्यादिना । अभाव इति अभावे सति नित्यत्वविभुत्वयोर्बाधकत्वं न शक्यं चेति योजना । वैतण्डिकाशङ्कामिति स्वपक्षदोषाननुद्धृत्य परपक्षे दोषाविष्करणं वितण्डा तत्संबन्धिन्याशङ्का । अविकृतस्येति । सन्मात्रं विकृतमविकृतं च तयोरविकृतस्य सन्मात्रस्य नोत्पत्तिः संभवति । जगतस्तु 'परतश्चविशेषो हि विकार इति कीर्तितः' इत्येवमपि पाश्चाद्विकृतस्य संभवति । भाष्ये न हीत्यादि । कुण्डलोत्पत्त्युक्त्या संयोगासमवायिकोत्पत्तिरुक्ताऽतोत्र विभागासमवायिकादतिरिक्तोत्पत्तिः केत्यत आहुः नामेति । नामरूपस्वीकार उत्पत्तिरिति भावः । तेनोत्पत्तिलक्षणस्तुल्यमुक्तम् । तेनैवंविधोत्पत्तिर्यद्यपि यावद्विकारसूत्रे संभवति तथापि स एवोत्पत्तिरुक्ता । विशेषः कनकनामरूपाभ्यां बोध्यः । अनेन भाष्येणान्याप्यधिकरणसंगतिः सूचिता । वाय्वाकाशोत्पत्तिसमर्थनेन शरीरोत्पत्त्या 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति मदशक्तिवच्च ब्रह्मणोप्युत्पत्तिसंभव इति प्रसङ्गसंगतिरिति । ननु पाञ्चभौतिकं शरीरमिति द्वयोत्पत्तिकथनोत्तरं कथं ब्रह्मोत्पत्तिप्रसङ्ग इति चेच्छृणु । 'इषे त्वोर्जे त्वा' इति मन्त्राभ्यां द्वयोक्तेः दृश्यतेपि ह्यमन्त्रात्पुरुषे पुष्पकीटादौ पञ्चान्येषामुत्पत्तयः । तत्राकाशो मांसम् । वायुस्त्वक् । अग्निस्तेज ऊष्मादि । आपो लोहितरूपा इति । पृथिवी कठिनांशोऽस्थ्यादीति । प्रकृते आत्मेति स्वोत्पत्तौ स्वापेक्षायामात्माश्रयस्यापत्त्या । आशङ्केति आशङ्कायां यो हेतुस्तत्प्रतिपादकं वाक्यमपि हेतुस्तदभावात् । अनेनेति सदेवेति वाक्ये आसीदित्यस्योत्पत्त्यर्थकत्वसंभावनेनैव । किं च वायोस्तेज इत्यनुक्त्वाग्निपदं यदुक्तं तेन पदेन ब्रह्मण उत्पत्तिसंभावना । संभूत इति पदान्वयाद् अग्निपदस्य ब्रह्मवाचकत्वम् । अग्निमीळे ( ईडे ) इति वेदे । अग्नये जुष्टं निर्वपामीति च । ब्रह्म तर्हि अग्निरित्युत्तरार्धसुबोधिन्याम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्युक्तम् । वाय्वाकाशरूपशरीरस्य पूर्वाधिकरणाभ्यामुक्तेरुत्पत्तिसंभावनेति । अत एव तेजोऽतो वायोरिति वक्ष्यते नाग्निर्वायोरिति, अग्निपदं तेजसि लाक्षणिकम् । लक्षणा जन्यजनकभावः । 'तत्तेजोऽसृजत' इति श्रुतेः । अत इति आशङ्काहेतोर्वाक्यस्य सत्त्वात् । दिक्कालेति ।



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

परिमाणादिनित्यत्वनिराकरणार्थत्वं तैरङ्गीकृतं, तस्मिन्नेव पक्षे वैयर्थ्यम्, व्यवहारे दिशां दर्शि-द्यारत्तमयमेरुप्रभृतिविभजनीयत्वेन पारिभाषिकतया देश एव पर्यवसितत्वेनातिरिक्तत्वार्थ-त्वाभावात् शास्त्रे च 'दिशः श्रोत्रात्' इत्युत्पत्तिश्रावणेन नित्यत्वशङ्कानुदयात्, एवं कालस्यापि, 'सर्वे निमेषा जज्ञिरे' इत्यादिश्रुत्यैव नित्यत्वशङ्कानिरासाच्च शङ्कोदयः। 'दिक्कालावाकाशादिभ्यः' इति सांख्यप्रवचनसूत्राच्च। अतो वैशेषिकादिमतेनैव शङ्कोत्थापनीया, सा तु वृथा, वैतण्डिकत्वे ब्रह्मपक्षेऽप्युत्पत्तुमर्हतीति वृथा तद्दूषणम्।

रश्मिः ।

इदमुपलक्षणं शब्दस्पर्शादिगुणानां तथा च भाष्यं शब्दस्पर्शादीनां गुणानामुपचितानां दिक्काल-संख्यापरिमाणादीनां चोत्पत्त्यश्रवणान्नित्यत्वमितीति । सा काष्ठेत्यत्र परागतिपदसंबन्धाद्दिङ् नित्या। 'कालः स्वभावः' इति श्वेताश्वतरे ब्रह्मस्थाने पाठात्कालो नित्यः। निरगतनित्यसंख्यापरिमाणं च। पृथक्त्वादि च । अङ्गीति अधिकरणस्य सूत्रस्याङ्गीकृतम् । वैयर्थ्यमिति एकमेवाद्वितीयं ब्रह्म' इति श्रुतावेकत्वसंख्यादीनामनित्यत्वम् नित्यधर्माणां नित्यत्वनियमभङ्गप्रसङ्गात् वैयर्थ्यम्। वैयर्थ्यं विशदयन्ति स्म व्यवहारेति। दिशामित्यादि। 'सूर्येण हि विभज्यन्ते दिशः' इति पञ्चमे विंशाध्यायवाक्यात्। वैष्णवे च–'उदयास्तमये चैव सर्वकालं तु संमुखे। दिशास्वशेषासु तथा मैत्रेय विदिशासु च। यैर्यत्र दृश्यते भास्वान्स तेषामुदयः स्मृतः। तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः। नैवास्तमनमर्कस्य नोदयः सर्वदा स्मृतः। उदयास्तमनाख्यं हि दर्शनाऽदर्शनं रवेः। शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम्। विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोशान् द्वे पुरे तथा' इति। तत्रैव च पुनः– 'सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थित' इति। यत्रोद्यः पश्यति सैव तस्य प्राची तस्य वामतो मेरु-स्तिष्ठतीति। प्रतीची त्वेकविंशेऽध्याये यत्रोदेति तस्य ह समानसूत्रनिपातेन निम्लोचति' इति वाक्या-दस्तमयविभजनीया। एवं दक्षिणादिविभक्तव्या। अतीति। ननु देशस्तु दिक्संबन्धी तत्र का दिगिति चेदत्र दीधितिकृत् 'दिक्कालावीश्वरान्नातिरिच्येते इतीश्वरः' इत्याह। सर्वे व्यवहारा-स्तत्रोपपत्स्यन्त इति सिद्धान्ते दिगीश्वरः दिशामाकाशेन्तर्भावात्, आकाशस्येश्वरशरीरत्वात्। ईश्वरोऽव्यवहार्य इति। दिशः श्रोत्रं इति पुरुषसूक्ते। श्रोत्रं कर्णविवरावच्छिन्न ईश्वरः नभसस्तच्छरीर-त्वात्। तादृशमाकाशं दिगित्यर्थः। नित्यत्वेति। आकाशोत्पत्तेः पूर्वं समर्थनात् । सर्वे इति तैत्तिरीयाणां महानारायणोपनिषदि। नित्यत्वेति। विद्युतः पुरुषादधि जातस्य कालस्यानित्यत्वम्। न तु 'कालात्मा भगवान् जातः'–इत्युक्तस्य । शङ्केति दिक्कालादिनित्यत्वशङ्का । अत इति। सांख्यादिमतेन दिक्कालाद्यनित्यत्वात्। सा त्विति। दिगादीनि नित्यानीति वैशेषिकाद्युक्ता शङ्का तु वैशेषिकादिना वैतण्डिकत्वे स्वमते प्राप्तो दोषो द्वितीयश्रुतिविरोधस्तमनुद्धृत्यैव तव मते दोषस्य दिक्काद्यनित्यतद्ध्वंसप्रागभावादिकल्पनस्याभिधातृत्वे दिगादीनां ब्रह्मजन्यत्वपक्षेप्युत्पत्तुमर्हतीत्यर्थः। ब्रह्मपक्षे इति भावप्रधानो निर्देशः । ब्रह्मत्वपक्ष इति ब्रह्मणो जगदुपादानत्वातैर्ब्रह्मपक्ष इत्युक्तम् । तद्दूषणं नित्यत्वदूषणम् । तथा च दिक्कालादीनि सन्ति असन्ति वेति संदेहे सन्तीति पूर्वपक्षे न सन्तीति सिद्धान्तयन्ति। अद्वितीयश्रुत्यनुपपत्तेः सतो दिक्कालादेरसंभवो नित्य-

१. मुण्डके।



PURNATHUI DR. RUPAK NATH
www.astrology-tantra.com

## तेजोऽतस्तथा ह्याह ॥ १० ॥ ( २-३-४ )

तेजोऽतो वायुतः । तथा ह्याह । वायोरग्निरिति श्रुतेः । हिशब्देनैवमाह । छान्दोग्यश्रुतिः प्रतिज्ञाहानिनिराकरणार्थं तैत्तिरीयकमपेक्षते वाय्वा...त्प-

---

### भाष्यप्रकाशः ।

एतेनैव भिक्षुरपि दत्तोत्तरः । यत्पुनस्तेनोक्तमिदं सूत्रं प्रधानो...निराकरणार्थम् । तथाहि । 'सदेव सौम्येदमग्र आसी'दित्यादौ तप्तायःपिण्डवदीक्षितृब्रह्मारोपेणोपन्यस्तं सूक्ष्मं जगत् सत्, तस्य सतोऽव्यक्तस्य प्रधानस्य तु संभव उत्पत्तिर्नास्ति, कुतः अनुपपत्तेः । तस्य कारणाभावेन विकाररूपत्वासंभवात् । कारणकल्पने चानवस्थानादेः । तन्न । सच्छब्दस्य प्रधानवाचकत्वे मानाभावात् । सांख्यसमाससूत्रीयपञ्चशिखसूत्रोक्ताव्यक्तपर्यायेषु, अव्यक्तम्, प्रधानं, ब्रह्म, गुरु, बहु, धातृकं, अक्षरं, क्षेत्रं, तमः, प्रधानमिति दशानामेव गणनात्, कोशादिष्वपि तथानुपलम्भात् । ब्रह्मवाचकत्वं तु गीतायामेव सिद्धम् । 'ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति वाक्यात् । अतः सद्भावेन ब्रह्मैवाभिप्रेयत इत्यपार्थ एवाडम्बरः ॥९॥

इति तृतीयमसंभवाधिकरणम् ॥ ३ ॥

तेजोऽतस्तथा ह्याह ॥ १० ॥ आकाशवाय्वोरुत्पत्तिं विचार्य तेजसो विचारयति, तेजः किं साक्षाद् ब्रह्मजमुत परंपरयेति विचारयति । श्रुतिविरोधपरिहारार्थत्वादध्यायस्य । तत्र छान्दोग्योक्तसृष्टेर्मुख्यत्वात् साक्षात्पक्ष एव श्रेयानिति प्राप्त आह तेजोऽत इति । तद् व्याकुर्वन्ति तेज इत्यादि । नन्वेवं सति छान्दोग्यविरोधस्य कथं परिहार इत्यत आहुः हिशब्देनेत्यादि । अयमर्थः । तेजसः साक्षाद् ब्रह्मजत्वाङ्गीकारे, 'सदेव सौम्येदमग्र आसीत्'

### रश्मिः ।

त्वाऽसंभव इति सूत्रार्थात् । भिक्षुरिति भगवान्भिक्षुः । अव्यक्तमेकं, प्रधानं द्वितीयं, गुरुः तृतीयं, बहु तुरीयम् । धातृकं पञ्चमम् । तम इति नवमम् । प्रधानं दशमम् । पुनः कथनप्रयोजनं मृग्यम् । सद्भावेनेति सत्पदसत्त्वेन । आडम्बर इति समारम्भः 'आडम्बरः समारम्भे गजगर्जिततूर्ययोः' इति विश्वः ॥ ९ ॥ इति तृतीयमसंभवाधिकरणम् ॥ ३ ॥

तेजोऽतस्तथा ह्याह ॥ १० ॥ विषयमाहुः आकाशेति । विचार्येति ताभ्यां ब्रह्मोत्पत्तिशङ्कानिरासपूर्वकं विचार्य । विचारयतीति अवसरगर्भितैककार्यत्वसंगत्या विचारयति । वियदुत्पत्तिविचारैककार्यत्वसंगत्या मातरिश्वोत्पत्तेर्विचारात् । परंतु पूर्वसूत्रेणावसरसंगतिरिति तद्गर्भितत्वम्, एकस्य कार्यता प्रयोजकता एककार्यता । अत्र तु कारणता । विचारयतीति छान्दोग्यतैत्तिरीयश्रुतिभ्यां संदेहे विचारयति । तत्रेति तयोः । छान्दोग्येति श्वेतकेतूपाख्याने 'सदेव सौम्येदमग्र आसीत्' इत्युपक्रम्य 'तत्तेजोऽसृजत' 'तदपोऽसृजत' 'ता अन्नमसृजन्त' इति सृष्टेः मुख्यत्वं 'तदैक्षत' 'ता आप ऐक्षन्त' इतीक्षापूर्वकत्वम् । ईक्षासंबन्धात्फलत्वं फलसंबन्धान्मुख्यत्वं वा पूर्वतन्त्रसिद्धम् । तेज इत्यादीति । तेजःपदप्रयोगस्तु छान्दोग्यसृष्टेर्मुख्यत्वात्, न त्वग्निपदप्रयोग उत्पत्त्यनर्हत्वात् । न वा तेजोनिरूपणमग्निः । 'यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' इत्युक्तः । तथा चाध्यात्मं तेजः आधिदैविकस्य ब्रह्मरूपाग्नेराधिभौतिकाग्नेः संबन्धात् । तथेति वायुजत्वेनाह । अग्निरत्राधिभौतिकः परतेज आश्रयः । अग्निरत्राध्यात्मस्तेजःपदवाच्यः । एवं च पर्यायता । छान्दोग्येति विरोधस्तु छान्दोग्ये

RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## भाष्यप्रकाशः ।

इति प्रतिज्ञा, 'येनाश्रुतं श्रुतं भवति' इति प्रतिज्ञा च हीयेते । अतस्तन्निराकरणार्थं तेजःसृष्टिवाक्यं तैत्तिरीयकमपेक्षत इति तैत्तिरीयकं तस्योपजीव्यम् । तथा सति तत्र या वायोरिति पञ्चमी सा किं हेतावुतानन्तर्य इति जिज्ञासायां यद्यप्युभयथापि प्रतिज्ञासिद्धिः, प्रायपाठश्चोभयथाऽपि शक्यवचनस्तथापि प्राथमिक्या आत्मन इति पञ्चम्या अनुरोधात् पृथिव्या ओषधय इत्यग्रिमाया अपि 'पर्जन्येनोषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतीनामन्नं भवत्यन्नेन प्राणाः' इति श्रुत्यन्तर ओषधीनामन्नकारणतायाः स्फुटत्वात् प्रत्यक्षत्वाच्च कारकविभक्तिरेव युक्ता, बलिष्ठत्वाच्च । एवमुपजीव्यवाक्यगतपञ्चम्या हेत्वर्थकत्वे निश्चिते उपजीव्यस्य

## रश्मिः ।

ततस्तेजः, तैत्तिरीये वायुतोऽग्निरित्येवम् । हीयेते इति वाय्वाकाशयोः कार्यत्वाभावे सदेवेदमित्यत्र तयोस्सत्यलये 'स देव' इति प्रतिज्ञा हीयेत, तथैकत्वाभावेऽश्रुतं श्रुतमिति प्रतिज्ञा च हीयेत । तन्निरेति प्रतिज्ञाहानिनिराकरणार्थम् । उपजीव्यं कारणम् । तथा सतीति उपजीव्यत्वेन तत्रत्यतत्पदवदत्रत्यवायुपदस्य विचार्यत्वे सति । हेताविति हेतुः कर्ता । छान्दोग्ये सदेवेत्यत्र कर्तरि प्रथमेत्येकवाक्यतां वक्ष्यन्ति 'जनिकर्तुः प्रकृतिः' इति सूत्रेण पञ्चम्याभिहिता । हेतुरुपादानं, निमित्तं सत् । कालश्चासमवायि निमित्तान्तर्गतम् । आनन्तर्य इति 'भुवः प्रभवः' इति सूत्रेणाभिहिता । छान्दोग्ये साक्षाद्ब्रह्मोत्पन्नं तेजः वायोः संभूतं प्रथमं प्रकाशितमित्येवमानन्तर्येऽन्यत उत्पन्नस्याग्नेः प्रकाशोऽनन्तरोऽस्ति । उत्पत्तिरेव तेजोनिष्ठा नानन्तर्यनिरूपिका । प्रथमप्रकाशरूपे आनन्तर्येऽर्थे पञ्चमी । यथा हिमवतो गङ्गा प्रभवतीत्यत्र विष्णुपद्या हिमवति प्रथमं प्रकाशः । एवं ब्रह्मजाग्नेर्वायौ प्रथमं प्रकाश इति वायोरग्निरिति श्रुत्यर्थः । अपादाने पञ्चमीति वाभिहिता महाभाष्योक्तरीत्या । 'अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रेण वा वायोरनन्तरमग्निर्न तु सत इत्यनन्तरपदयोगं प्रकल्प्य पञ्चमी वायुपदात् । अनन्तरपदस्य दिशि दृष्टत्वेन दिक्शब्दत्वात् । प्रायपाठ इति आत्माकाशादिपदोत्तरीभूतानां पञ्चमीनां हेतुप्रायपाठ आनन्तर्यप्रायपाठश्च । पञ्चम्या इति अभिन्ननिमित्तोपादानतार्थायाः । नन्वात्मन इति पञ्चमी निमित्त उपादाने चावक्तव्या । पञ्चम्याः एकत्र शक्तेरिति चेन्न । समवायित्वादिभिरेकार्थत्वं पञ्चम्यर्थे सर्वत्र तद्वत्कारणत्वेनैकार्थत्वस्य मणिकामधेन्वाद्युत्तरपञ्चम्या अर्थे दर्शनात् । अत आत्मपदोत्तरपञ्चम्या अभिन्ननिमित्तोपादाने शक्त्यभावे मणिकामधेन्वाद्युत्तरपञ्चम्या कुतोऽभिन्नोपादानत्वमर्थः स्यादिति । अन्यच्च पृथिव्या इति अप्यनुरोधादित्यन्वयः । अत्राभिन्ननिमित्तोपादानत्वं स्फुटं प्रत्यक्षं च । पर्जन्येनेति । इत आरभ्य स्फुटत्वं प्रत्यक्षत्वं च ज्ञेयम् । प्राणा इति । 'अन्नमयꣳ हि सोम्य मनः' इति श्रुतेर्मनआदीन्द्रियाणि । अन्नेति अन्नस्याभिन्ननिमित्तोपादानतायाः । कारकेति आत्मन इत्यत्र पृथिव्या इत्यत्र च 'जनिकर्तुः प्रकृतिः' इत्यनेन कारकविभक्तेरावश्यकत्वेन 'भुवः प्रभवः' इत्युपपदविभक्तेरनावश्यकत्वात् । उपपदविभक्तेः कारकविभक्तिर्बलीयसीत्याहुः बलिष्ठेति । तथा चेति भाष्यं विवृण्वन्ति स्म एवमिति । उपजीव्यवाक्यं तैत्तिरीयवाक्यं तद्गतपञ्चम्याः । हेत्वर्थकत्वेऽभिन्ननिमित्तोपादानार्थकत्वे । निश्चित इति यद्यपि तस्माद्धेति वाक्ये संभूतोपपदमहिम्ना 'भुवः प्रभवः' इत्येव प्राप्नोति । तथा च नाभिन्ननिमित्तोपादानार्थकत्वनिश्चयस्तथापि छान्दोग्यश्रुत्ये-

---

१ वायोः ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥ ( २-३-६ )

'ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि' इति । 'ता अन्नमसृजन्त' इति । तत्रान्नशब्देन व्रीह्यादय आहोस्वित् पृथिवीति संदेहः । ननु कथं संदेहः । पूर्वन्यायेनोपजीव्यश्रुतेर्बलीयस्त्वादिति चेत् । उच्यते । 'अद्भ्यः पृथिवी पृथिव्या ओषधय

### भाष्यप्रकाशः ।

श्रितत्वेन वाय्वर्थकस्य ग्रहीतुमशक्यत्वाच्छ्रुत्युक्तहेत्वर्थकत्वग्रहणे, 'तथा ह्याह' इत्येतावतैव चारितार्थ्यादित्येवकारेणात्र बोधितं ज्ञेयम् । नन्वेवं सति अस्य सूत्रस्य किं प्रयोजनमत आहुः इदमित्यादि । तथाचेदं प्रयोजनमित्यर्थः ॥ ११ ॥ इति पञ्चममाप इत्यधिकरणम् ॥ ५ ॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥ अधिकरणप्रयोजनं वक्तुं विषयवाक्यमाहुः ता आप इत्यादि । संशयमाहुः तत्रेत्यादि । तथाच रूढिप्रायपाठयोर्विरोधात् संशय इत्यर्थः । अत्र चोदयति ननु कथमित्यादि । तथा च पृथिव्येव आप्सत इति व्यर्थोऽधिकरणारम्भ इत्यर्थः । एतेन पूर्वाधिकरणवदत्र पृथिवीति भिन्नं सूत्रमङ्गीकृत्याधिकरणान्तरमिदं वाच्यम्, ततोऽन्नशब्देन कथं पृथिवी ग्रहीतुं शक्येत्याकाङ्क्षायामधिकारेत्यादिसूत्रान्तरेण तन्निर्णय इति रामानुजाचार्यमतं पूर्वाधिकरणन्यायतः संदेहनिवृत्तिप्रदर्शनाच्छिथिलमित्यपि बोधितम् । अत्र समादधते उच्यत इत्यादि । तथा चोपजीव्यानुरोधाद् यथा आकाशवायुव्यव-

### रश्मिः ।

वाय्वर्थकः किं तु 'आत्मन आकाशः संभूतः आकाशाद्वायुः' इति श्रुत्येकदेशपञ्चम्युक्तो हेतुस्तदर्थक इति ग्रहीतुं शक्योऽतःशब्द इत्यत आहुः श्रुत्युक्तेति । चारितार्थ्यादिति तथाशब्देनैव श्रुत्युक्तहेत्वर्थकातःपदग्रहणेन चारितार्थ्यं भाष्यं तस्मात् । एवेति भाष्यीयैवकारेण । एवं सतीति । 'तदपोऽसृजत' 'अग्नेरापः' इत्यनयोरसंदिग्धे विरोधे सति । इदमिति इदं सूत्रं श्रुत्योर्योऽसंदिग्धो विरोधस्तमनुवदति दृष्टान्तार्थं न तु विरोधमपाकरोतीत्यनुवादसूत्रम् । न श्रुत्योः सर्वत्र विरोध इत्यविरोधस्थापकमतो न विरोधस्थापनं प्रयोजनमित्यर्थः । अत्र माध्वभास्कराचार्यादयः तदपोऽसृजतेत्यादिविषयवाक्यं धृत्वा साक्षात्परंपरया वापां सृष्टिरिति संशये । अत्रापि साक्षादिति पूर्वपक्षे परंपरयेति सिद्धान्तयन्ति स्म । अयं सिद्धान्तः सूत्राणां न्यायरूपत्वात्पूर्वसूत्रेण सिद्ध इति न पुनरुच्यते ॥ ११ ॥

इति पञ्चममाप इत्यधिकरणम् ॥ ५ ॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥१२॥ विषयेति छान्दोग्ये श्वेतकेतूपाख्यानस्थम् । रूढीति । पृथिवीग्रहणेऽन्नशब्दस्य व्रीह्यादिषु या रूढिः योगरूढिर्नामैकदेशग्रहणं तस्यास्त्यागस्तदनुरोधेन व्रीह्यादिग्रहणे पञ्चमहाभूतप्रायपाठत्याग इत्येतयोर्विरोधात् । संशयबीजभूतौ योगरूढिप्रायपाठौ । ननु कथमित्यादीति 'तेजोतः' सूत्रोक्तेन प्रतिज्ञाहानिनिराकरणार्थं तैत्तिरीयकापेक्षान्यायेनोपजीव्यश्रुतेः 'अद्भ्यः पृथिवी' इति तैत्तिरीयश्रुतेर्बलीयस्त्वादिति भाष्यार्थः । तथा चेति तैत्तिरीयश्रुतेर्बलीयस्त्वे । एतेनेति । संदेहान्तर्गतग्रन्थेन शिथिलमित्यपि बोधितं पूर्वाधिकरणन्यायतः संदेहनिवृत्तिप्रदर्शनात्पुनरुक्त्या व्यर्थत्वस्फोरणादित्यन्वयः । पूर्वाधीति 'आपः' इत्यधिकरणन्यायतोऽनुवादकम् । 'आपः' इति सूत्रमित्यनुवादन्यायतः पृथिवीति सूत्रादपि 'अद्भ्यः पृथिवी' 'ता अन्नमसृजन्त' इत्यविरुद्धश्रुतिभ्यां निरस्तः संदेहो निरस्यत इत्येवंविधसंदेहनिवृत्तेः पृथिवीतिसूत्रमुपन्यस्य पृथिव्यद्भ्य उत्पद्यते अद्भ्यः पृथिवी ता अन्नमसृजन्त इत्याहेति भाष्येण प्रदर्शनादित्यर्थः । उच्यत इत्यादीति ।

तत्र 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इति त्रयाणां सहचारः सर्वत्रोपलभ्यते । लोकप्रसिद्धिर्वर्षणभूयिष्ठलिङ्गं च । तस्मात् पृथिव्या-द्यध्यस्तानां मध्ये अभेदविवक्षया यत्किञ्चिद्वक्तव्ये अन्नमुक्तमित्येवं प्राप्ते उच्यते । अन्नशब्देन पृथिवी । न, कुतः । अधिकाररूपशब्दान्तरेभ्यः । अधिकारा भूताना-

भाष्यप्रकाशः ।

तत्राग्नेत्यादि । उपलभ्यत इति पदमग्रेऽप्यन्वेति । तथा च त्रितयसहचारो लोकप्रसिद्धिस्तस्माद्यत्र क्वचन वर्षति तदेव भूयिष्ठमन्नं भवतीति वाक्यशेषोक्तं वर्षणभूयिष्ठं लिङ्गं चेति त्रयं क्रमेणा-त्रोपलभ्यते, अथवात्र उपपादनग्रन्थे 'यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत् त्रिवृदेकैका भवति' इति प्रतिज्ञोत्तरमन्नेजःसहचारः कार्यलिङ्गितोऽन्नस्य यो दृश्यते सोऽपि ये फलपत्राद्याहारास्तेषामपि पुरीषमांसमनांसि भवन्तीति त्रयाणां धातूनां सहचारो मृद्भक्षकेषु कीटादिष्वोषधिभक्षकेषु पश्वादिष्वन्नभक्षकेषु पुरुषादिष्वेवं सर्वत्र पृथिव्योषध्यन्नेषूपलभ्यते । 'अन्नशब्दस्य च लोकेऽदनीयत्वमादाय पृथिव्यादिषु त्रिष्वपि प्रसिद्धिः । यथा नैषधे, 'नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः । वीक्ष्य वः खलु तनूममृतादाम्' इति, चतुर्थ-

रश्मिः ।

त्राग्नेति कोटिगतत्राग्नेति मुख्यम् । तेन प्रथमकोटौ सन्तीति त्राग्नमिति पूरणीयम् । अग्नेपीति । लोकप्रसिद्धिरुपलभ्यते । वर्षणभूयिष्ठलिङ्गं चोपलभ्यत इत्यग्रेऽप्यन्वेति । तथा चेति । 'यत्र क्वचन स्वेदति तेजसस्तदध्यापो जायन्ते' इति श्रुतेर्भौतिकत्वामपि तेजआदीनां ग्रहणे सिद्धे च । त्रितयं मनःप्राणवागिति त्रयोऽवयवा यस्य सहचारस्य । तत्रान्नमयं मन इत्युक्तेः शरीरमनसः पृथ्वीवि-कारत्वासंभवादन्नेति प्रकृतिर्व्रीह्यादिर्न तु पृथिवीति । लोकेति व्रीह्यादिष्वेवान्नपदप्रसिद्धिः । वर्षणेति भाष्यं विवृण्वन्ति स्म तस्मादिति । वाक्येति ता अन्नमसृजन्तेतिवाक्यशेषोक्तम् । वर्षणेन यद्भूयिष्ठमन्नं तस्य लिङ्गं च व्रीहियवादेव सति वर्षणे बहु भवति पृथिवीत्यत्र लिङ्गं चेति व्रीह्यादिग्रहणे हेतुत्रयम् । भौतिकपक्षस्य प्रागेवाग्रेऽपास्तत्वात्प्रकारान्तरेण भौतिकानादाय पूर्वपक्षमग्रिमभाष्यानुरोधे-नाहुः अथवेति 'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इत्यस्योपपादनग्रन्थे । 'यथा तु खलु सौम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि' इति । 'यदग्ने रोहितं रूपं तेजसस्तद्रूपम्' इत्यादावित्यर्थः । सा सच्चिदानन्दाख्या देवता तासां तेजोबन्नरूपदेवतानामेकैकां त्रिवृतं त्रिवृतमकरोदित्यर्थः । उपपादन-ग्रन्थान्तर्गतप्रकृतोपयोगिग्रन्थमाहुः यथा त्विति । तिस्रो देवता इति तेजोबन्नरूपाः, आधिदैविकं रूपं देवतापदेनोच्यते । प्रतिज्ञेति 'तन्मे विजानीहि' इति तन्मत्तोऽवधारयेति श्वेतकेतोः पितुरुद्दालकस्य प्रतिज्ञा, तदुत्तरम् 'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यन्मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' इत्यन्नस्यान्नस्य । 'आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः,' तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाग्' इत्यस्तेजःसहचार उक्तस्यान्नस्य दृश्यते । कार्यं पुरीषादि । लिङ्गं कारणस्य तस्मात् । अन्नम्--अस्तेजःसहचरितं पुरीषादिकार्यात् । फलपत्राद्योषधिवत् । धातूनामिति पुरीषमांसमनसाम् । पृथिव्योषध्यन्नभक्षकेषूदाहरणपूर्वकं सप्तत् त्रयाणां धातूनां सहचारं दर्श-यन्ति स्म मृदित्यादिना । मृत् पृथिवी । लोकप्रसिद्धिरिति भाष्यं विवृण्वन्ति स्म अन्नशब्द-स्येति । अदनीयत्वमिति गौणी बोधयितुमयं धर्मनिर्देशः । प्रसिद्धिरिति गौण्या प्रसिद्धिः । नैषध इति पञ्चमसर्गे । व्यतीति भेदः । अन्नेति अन्नात्तं पृथिव्योषध्यन्नानि । आतावां कीटादीनां



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

स्कन्धे च, 'एवं पृथ्वादय पृथ्वीमन्नादाः स्वन्नमात्मनः' इति वर्षणभूयिष्ठलिङ्गमपि त्रिषु तुल्यम् । वर्षणे पृथिव्या आर्द्रतया भूयस्त्वात्, ओषधिवीरुधां व्रीह्यादीनामुत्पत्तेश्च, तस्माद् वाक्यशेष-लोकप्रसिद्धिलिङ्गानां त्रिष्वपि तुल्यत्वात् पृथिव्याद्यन्यतमे वक्तव्ये अन्नमुक्तम्, एवं चोप-जीव्यवाक्यरूढिप्रायपाठानां त्रयाणामविरोधोऽतस्त्रयेऽपि प्राबल्येन प्राप्ते इत्यर्थः । सिद्धान्ते तु लक्षणा नास्त्येव, योगनैर्बल्यं त्वधिकारादिभिर्हेतुभिः परिहियत इति न क्वापि दोषः ।

रश्मिः ।

देहा मृदादिजनिता इति । अमृतादामिति अमृतं जलमत्तीत्यमृतादस्ताम् । 'दृक्षिमन्ननमुपैति सुधायाम्' इतिचतुर्थश्चरणः । तथा च तन्वमृतयोर्जन्यजनकत्वेन प्रतिरोधो नास्तीति तनुं पश्यन्ती दृक् सुधायामेव निमज्जतीति । पृथ्वीमिति 'अकथितं च' इत्यनेन सूत्रेणापादानत्वाविवक्षायां कर्मसंज्ञा । यद्वा पृथ्वीं स्वन्नमिति विशेष्यविशेषणभावः । वर्षणेत्यादि भाष्यं विवृण्वन्ति स्म वर्षणेति । व्रीह्यादीनामिति व्रीह्यादीनां च भूयसामुत्पत्तेरित्यन्वयः । तस्मादित्यादि भाष्यं विवृण्वन्ति स्म तस्मादिति । वाक्यशेषेति पृथ्वादय इति चतुर्थस्कन्धवाक्यशेषः । पृथ्वीमोषधीरन्नानि चा-न्नपदवाच्यानि निर्णयति । पृथ्वादय इत्यत्रादिपदेन पशुमनुष्यादीनां ग्रहणं संभवात् । पृथुः सकलौ-षधीः स्वन्नानि अन्नादः सकलौषध्यादः पृथ्वीं पृथ्व्या दुदोह पाणौ । पशुरन्नादः यवसक्षीरादः । अरण्यपात्रे पृथ्वीं पृथिव्याः स्वन्नं यवसादिरूपमदुदुहुः । एवं मनुष्याः पृथ्वीं पृथ्वीतः स्वन्नं व्रीह्या-दिरूपं वीरुत्पात्रे दुदुहुरित्यर्थात्पृथिव्योषध्यन्नानि अन्नपदवाच्यानीति । लोकेति नैयत्प्रसिद्धिरपि । लिङ्गानामिति तस्मायत्र क्वचनेति वाक्यशेषोक्तवर्षभूयिष्ठं लिङ्गम् । त्रिष्विति पृथिव्योषध्यन्नेषु । उपजीव्येति उपजीव्यं तैत्तिरीयवाक्यम् 'अद्भ्यः पृथिवी' इति रूढिर्योगरूढिर्व्रीह्यादौ प्रायपाठो भूतानाम् । तत्त्रये इति पृथिव्यादित्रये । भाष्योक्ताभेदविवक्षा तु गौण्या भवति तुल्यत्वादनीयस्त्वगुण-योगात् । सिंहो माणवक इतिवत् । सिद्धान्ते त्विति । अयमर्थः । अन्नशब्देन पृथिवी तत्रान्नपदं व्रीह्यादिषु शक्तं पृथिव्यां लाक्षणिकम्, जन्यजनकभावसंबन्धो लक्षणा, लक्षणेत्युपलक्षणं गौण्याः । तेन गौणी चेत्येवं लक्षणा तु नास्त्येव । 'अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते' इति श्रुतावन्नपदस्य यौगिकस्यादरणात् । न चायं योगः पृथिव्यां बाधित इति वाच्यम् । भूतान्तर्गतकीटादिभिर्भूभक्षणात् । अतः 'ता अन्नमसृजन्त' इत्यन्नपदं यौगिकं पृथिवीवाचकं भवति । नन्वेवमपि योगस्यान्ने संभवाद्रूढे-र्योगापहारकत्वस्य पङ्कजादिस्थलेऽवयवशक्त्या कुमुदादिबोधवारणाय प्राचीनैः स्वीकृतत्वाद्योगनैर्बल्यं तस्मिंश्च सति रूढ्या व्रीह्यादिकमेव ग्राह्यम्, न तु योगेन पृथिवीत्याकाङ्क्षायामाहुः योगेति । यद्यपि योगरूढि-रन्नशब्दस्य पृथिव्यामपि 'पृथिवी वान्नम्' इति श्रुतेः रूढिः । कीटादिभिरद्यतेत्ति च भूतानीति योगः । तथापि त्रिषु या लोकप्रसिद्धिस्तस्या अभावान्न । वेदान्तत्वाद्योगमात्रमपि, रूढेरस्मन्मतेऽभावात् । वेदे योगरूढिः वेदान्ते योग इति । ननु कथं तर्हि घटस्थापने वेदान्ते योगाभावादर्थोपस्थितिर्वेदे तु योगाभावाद्वा रूढिः कथमिति चेन्न । एकाक्षरमन्नवाचकत्वेनोपपत्तेः । लोके तु शक्तिसंकोचलक्षणया रूढत्वं, अवान्तरनवतां तु योगरूढ्येति । सत्यं रूढिराद्रियते तव मतरीत्या परमधिकारो भूतानामित्यधि-कारस्तात्पर्यते योगस्त्वाद्रियते । अधिकारादिभिरित्यत्रादिशब्देन रूपं शब्दान्तरं च । तत्र रूपं 'यत्कृष्णं तदन्नस्य' इति कृष्णः स च पृथिव्या एव 'पृथिवी वा अन्नम्' इति श्रुतेर्नान्नस्यानुपलब्धेरतो योग आद्रियते । शब्दान्तरं तद्रूपः एतवाप्स्वेन पृथ्वीत्वे कार्यकारणभावमाह । न त्वन्नेन व्रीह्यादित्वेन



www.astrology-tantra.com
DR. RUPNATHJI ( DR. RUPAK NATH )

मेव, न भौतिकानाम् । नीलं च रूपं पृथिव्या एव । भूतसहपाठात् । शब्दान्तरम् 'अन्नः पृथिवी' इति । तस्मादन्नशब्देन पृथिव्येव ॥ १२ ॥

इति द्वितीयाध्याये तृतीयपादे पृथिव्यधिकार इति षष्ठमधिकरणम् ॥ ६ ॥

---

भाष्यप्रकाशः ।

स ग्रन्थस्तु निगदव्याख्यातेनैव भाष्येण व्याख्यातः ।

भास्कराचार्यास्तु 'तद्यदपां रस आसीत् तत् समहन्यत सा पृथिव्यभवत्' इति श्रुतिमपि शब्दान्तरत्वेनोदाजह्रुः । तेन योगस्यादुष्टत्वादत्र पृथिव्येवान्नपदेनोच्यते इति सिद्धम् ॥ १२ ॥

इति षष्ठं पृथिव्यधिकार इत्यधिकरणम् ॥ ६ ॥

रश्मिः ।

चेति छान्दोग्येऽन्नपदे योग आद्रियते । किंच पृथिवीमन्तरेण व्रीह्यादिः कुतो भवेदिति प्रथमं पृथिव्यर्थे योगोऽन्यथानुपपत्त्याद्रियते । किंच रूढिर्योगमपहरतीति केषांचित्प्रवादः स च विरोध्यविषयकज्ञानस्य प्रतिबन्धकत्वं जनकज्ञानविघटकत्वेनेति नियमं भनक्ति । यथा विरोध्यो विषयो रजतरूपस्तज्ज्ञानमिदं रजतमिति तस्य जनकं शुक्त्यादिस्तद्विषयकज्ञानमियं शुक्तिरित्याकारकं तन्नाशकत्वेन रूपेण दृष्टम् । तत्र रूढेर्योगापहारकत्वे इदं रजतमिति ज्ञानकाले इयं शुक्तिरिति ज्ञाननाशवत् पङ्कजपदेन रूढ्या समुदायशक्त्या पद्मज्ञानकाले पङ्कजनिकर्तृत्वज्ञाननाशापत्तेः । न च रूढेर्योगापहारकत्वाभावे पङ्कजनिकर्तृत्वेन कुमुदबोधो भवेत्तच्चानिष्टमिति वाच्यम् । समुदायशक्त्योपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति सांनिध्यात् । अतः कुमुदादिवारणाय रूढिज्ञानस्य यौगिकार्थबुद्धिप्रतिबन्धकत्वकल्पनमपार्थमिति मणिकारेण दूषणाद्योग आद्रियते । अतो धिकारादिभिर्हेतुभिर्योगस्य नैर्बल्यं परिह्रियते इति न कोऽपि दोष इत्यर्थः । निगदेति । भाष्य पृथिवीति पृथिवी उच्यते न तु व्रीह्योषधी उच्येते । अधिकारे इति प्रस्तावात्मा स च भूतानाम् । 'तत्तेजोऽसृजत' । 'तदपोऽसृजत' इति । एवकारव्यावर्त्यमाहुः न भौतिकानामिति पूर्वपक्षोक्तपुरीषमांसमनआदीनाम् । नीलं चेति । न च 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इति नीलं इति पुंस्त्वं शङ्क्यम् । 'यच्छुक्लं तदपाम्' इत्यादिषु रूपविशेषणे शुक्लादौ नपुंसकत्वदर्शनात् । तत्र 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति सूत्रे गुणपरतायां नीलो रूपमित्येव गुणिपरतायां तु विशेष्यनिघ्नता कोशादिति शेखरे लोकविषयम् । इदं च भूयस्त्वाभिप्रायम् । पीतरोहितादीनामपि सर्वेषां सत्त्वात्तस्यैवोपादानं कुतः । व्रीह्यादिव्यावृत्त्यर्थं श्रुतेश्च नीलग्रहणमिति हेतोः । कृष्णास्तिलास्तु नान्नं इत्याहुः । एवेति । कश्चिद्भौतिकेऽपि कृष्णत्वं तद्युदसितुमाहुः भूतसहेति 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' इति श्रुतौ तथा पाठादित्यर्थः । शब्दान्तरमिति विषयवाक्यशब्दतो भिन्नः शब्द इत्यर्थः । इत्येवमभिधानव्याख्यातेनेत्यर्थः । समहन्यतेति बृहदारण्यके द्वितीयब्राह्मणेऽस्ति 'आपो वार्कस्तद्यदपा९रसः समहन्यत सा पृथिव्यभवत्' इति । समहन्यत कठिनं समयुज्यत । पाषाणावयवसंयोगवत्साऽपां कठिनीपरिणतिः । भास्करेति शंकराचार्यस्याप्युपलक्षकं तत्र रसपदस्थले शरपदम् । तस्मादिति भाष्यं विवृण्वन्ति स्म तेनेति, पूर्वोक्तोपपादनेन । निरूहमिति एत आकाशादयः पञ्चापि ब्रह्मविभूतयः 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' इति छान्दोग्ये ईक्षालिङ्गात् । तत्सहचरिताकाशस्य ब्रह्मशरीरत्वेन तथात्वम् । वायोः सशरीरकार्यत्वात् । पृथिव्यास्तु मायात्वं वर्तते इति तथा ॥ १२ ॥ इति षष्ठं पृथिव्यधिकार इत्यधिकरणम् ॥ ६ ॥

RUPNATHJI( DR.RUPAK NATH)
www.astrology-tantra.com

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ १३ ॥ (२-३-७)

आकाशादेव कार्याद् वाय्वादिकार्योत्पत्तिं तुशब्दो वारयति। स एव परमात्मा वाय्वादीन् सृजति। कथं तच्छब्दवाच्यतेति चेत् तदभिध्यानात्। तस्य तस्य कार्यस्योत्पादनार्थं तदभिध्यानं, ततस्तदात्मकत्वं, तेन तद्वाच्यत्वमिति। ननु यथाश्रुतमेव कुतो न गृह्यत इत्यत आह तल्लिङ्गात्। सर्वकर्तृत्वं लिङ्गं तस्यैव सर्वत्र वेदान्तेष्ववगतम्। जडतो देवताया वा यत्किंचिज्जायमानं तत् सर्वं ब्रह्मण एवेति सिद्धम् ॥ १३ ॥

इति द्वितीयाध्याये तृतीयपादे तदभिध्यानादेवेति सप्तममधिकरणम् ॥ ७ ॥

---

भाष्यप्रकाशः।

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ १३ ॥ एवं तैत्तिरीयश्रुत्येकवाक्यतया छान्दोग्येऽपि क्रमेण ब्रह्मणः सकाशात् पञ्चमहाभूतसृष्टिरवधारितम्, तत्रायं संशयः। क्रमसृष्टावाकाशादयः किं स्वतन्त्राः स्वस्वकार्यं सृजन्त्युत परमेश्वरतन्त्रा इति। तत्र तावत् प्राप्तम्, 'आकाशाद् वायुः वायोरग्निः' इत्यादि, 'तत्तेज ऐक्षत' 'बहु स्याम्' इत्यादिश्रुत्या भूतानां देवतायाश्च हेतुत्वस्य कर्तृत्वस्य कथनात् स्वतन्त्रा एव सृजन्तीति। एवं पूर्वपक्षे सूत्रमुपन्यस्य सिद्धान्तं व्याकुर्वन्ति आकाशादेवेत्यादि। कथमिति। तर्हीति शेषः। तदभिध्यानमिति आकाशरूपः स्यां वायुरूपः स्यामित्येवं स्वस्य तद्रूपाभिध्यानं तच्च, 'बहु स्यां प्रजायेय' इति श्रुत्यैव संग्रहेणोक्तम्। न च तस्य तेजःप्रभृतिसाधारण्यं शङ्क्यम्। तेजःप्रभृतिष्वपि तत्पदोपनिबन्धेन प्रकरणेन च तस्यापि ब्रह्मधर्मत्वनिश्चयात्। सर्वत्र वेदान्तेष्विति 'स विश्वकृद्विश्वविदात्मयोनिः'। 'यतः प्रसूता जगतः प्रसूतिः'। 'यः पृथिव्यां तिष्ठन्' 'यः पृथिवीमन्तरः' इत्यादिषु।

रश्मिः।

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥१३॥ विषयमाहुः एवमिति। अवधारितमिति। देवताया इति ईक्षणलिङ्गात्तेजसोऽपां चाधिदैविकरूपायाः। हेतुत्वस्येति तैत्तिरीये हेतुत्वस्य छान्दोग्ये कर्तृत्वस्य। 'तस्माद्वा एतस्माद्' इति तैत्तिरीयम्। 'तत्तेज ऐक्षत' इति छान्दोग्यम्। तर्हीति वाक्यशोभार्थम्। भवत्वं न लाघवाभिप्रायेण। शोभामुखं गौरवं न दोषाय। तद्रूपेति। अभिध्यानमिच्छा स्मृतौ दर्शनात्। तस्येत्यभिध्यानस्य। तेज इति 'तत्तेज ऐक्षत' इत्यादिश्रुतेः। तथा चाभिध्यानस्य न ब्रह्मतेजआदिपदाभिधानलिङ्गत्वमिति शङ्कमानस्याभिप्रायः। तत्पदेति तेजआदिपदोपनिबन्धनेन। प्रेति 'सदेव सौम्येदमग्र आसीद्' इति श्रुतेः ब्रह्मप्रकरणेन तैत्तिरीये 'ब्रह्मविदाप्नोति परम्' इति श्रुतेर्ब्रह्मप्रकरणेन। तस्येति छान्दोग्योक्तस्य तेजआदेरपि। तथा च 'आत्मा वै पुत्रनामासि' इति श्रुतिविषयस्यापि छान्दोग्योक्तस्य ब्रह्मधर्मत्वमुक्तम्। भाष्ये तद्वाच्यत्वमिति आकाशादिपदवाच्यत्वम्। विशिष्टस्य रूपादिविशिष्टस्य घटादिपदवाच्यत्ववत्। यद्वा एवमेव सर्वत्र तत्तद्वाच्यत्वम्। ब्रह्मणो व्यापकत्वात्। तल्लिङ्गादिति। कर्मधारयःषष्ठीतत्पुरुषो वेत्याशयेन व्याकुर्वन्ति सर्वकर्तृत्वमिति। तत् सर्वकर्तृत्वं लिङ्गं तस्मात्, तस्य लिङ्गं तल्लिङ्गं तस्माद्वा। प्रकृते प्रसूतिरिति। महाभूतानि। इत्यादीति। आदिशब्देन मुण्डके 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः।

'वायुना हृतगन्धा भूः सलिलत्वाय कल्पते। सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते॥
हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते। हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते॥
कालात्मना हृतगुणं नभ आत्मनि लीयते'।

रश्मिः।

तैत्तिरीये त्वात्मनि। अन्यमपि लयप्रकारमाहुः पुराणेष्विति। एकादशे तृतीयाध्याये। वायुना चम्पकादेर्गन्धो ह्रियते इति प्रसिद्धम्। तदा जलादिभ्यो व्यावर्तकस्य गन्धस्याभावात् सांवर्तकमेघगणेन च सलिलवर्षणद्वारा प्रचयसंयोगजननेन द्रवत्वजननाद्भूः सलिलरूपा भवति। यतः सलिलरसः कठिनः सन् पृथिवी भवतीत्युक्तम्। तथा च यथा मृदि शर्करायां च बहुलतरजलप्रक्षेपे जलत्वाय ते कल्पेते तथेयं कल्पत इत्यर्थः। न च पाषाणानां सलिलभावोऽनुपपन्नः। 'सांवर्तको मेघगणो वर्षति स्म शतं समाः। धाराभिर्हस्तिहस्ताभिः' इति पूर्णीभावे पङ्कजभावे वा सलिलभावात्। ईश्वरेच्छाया मनसाप्याकलयितुमशक्यरचनस्य निमित्तत्वात् अत्रापि निमित्तत्वात्। न च नदीपाषाणादौ सलिलत्वापत्तिः। मैवम्। नदीजलस्य संवर्तकत्वाभावात्। ईश्वरसंजिहीर्षोत्तरीभूतवर्षण एव संवर्तकत्वात्। एवं च मृतदेहे घटादौ च नाशसमवायी तद्भावः, कारणान्तरसमवधाने तु भस्मादिरूपं रूपान्तरमिति द्रष्टव्यम्। तत्र सांवर्तकवायुना हृतो रसो यस्य तत् सलिलम्। वायुना रसापहार आर्द्रपटादौ प्रसिद्धः। यद्वा तदिति भिन्नं पदं भूसलिलमित्यर्थः। तर्हि केन हृतरसं सूर्यतेजोरूपेण। अनुक्ते कारके संवर्तक इति सुबोधिन्याः। संवर्तकः प्रलयकर्ता। एवं सति ज्योतिष्ट्वायोपकल्पते सूर्यरश्मीनां तत्र प्रविष्टत्वात् चन्द्रवत्। ज्योतिषे चन्द्रे सूर्यकिरणप्रवेशः। रसस्य च हृतत्वात्। यथा चार्द्रकाष्ठं वह्निना हृतरसं वह्नित्वायोपकल्पते तथा। ज्योतिषो रूपं भास्वरंशुक्लम्। तत्तमसा तमोगुणस्य तामसेनाधिदैविकरूपेण हृतम्। एतच्च तमो मायिकं अर्थान्तरमेव। न तेजःसामान्याभाव इत्युपपादितमन्धकारवादे एतैः। वायावुत्कृष्टे चक्षुषस्तेजो मायाजनिततमसा निहन्यते इति दृष्टम्। यद्यपि तेजसा तमो निहन्यते 'अह्नाय तावदरुणेन तमो निरस्तम्' तथापि आनन्दांशात्तमो भवति तज्जगल्लयार्थं भगवान् गृह्णातीति 'अवस्थितेरिति काशकृत्स्नः' इति प्रथमाध्यायस्योपान्तसूत्रे मतम्। एतच्च द्वितीयस्कन्धपञ्चमे 'सत्त्वं रजस्तम इति निर्गुणस्य गुणाः' इत्यस्य सुबोधिन्यामस्ति। तेन प्रकृतिगुणभूतं मायिकं तमस्तेजो निहन्ति आनन्दांशाः। एतेन तमसा तु तेजो निहन्यते इति विवेकः। एवं च भास्वररूपं तमसा हृतमिति नीरूपं तेजः स्वरूपे वायौ प्रलीयते। अथवा तम आसीदित्यत्र तमःपदेन कर्मोच्यत इति समाकर्षसूत्रे स्थितम्। तथा च कर्मणा हृतरूपं ज्योतिरित्यर्थः। कर्मविशेषेण तेजोरूपं ह्रियत इति प्रसिद्धम्, सुवर्णरजकारादौ। तथा हृतस्पर्श इत्यत्र कार्यानाधारौ देशकालाववकाशशब्देनोच्येते। तत्र देशेन स्पर्शनाशः। लोकेऽपि देशावकाशे न स्पर्शो भवति, उष्णोनुष्णाशीतश्च। स च लोके कर्मणा देशयोः कपालयोरवकाशे सति स्पर्शः संयोगो समवायी सन् भवतीति देशे न स्पर्शस्य संयोगस्य नाशः। न च कर्मणा कपालविभागस्तत आरम्भकसंयोगनाश इति लोकेऽपि विभागेन नाशो न देशेनेति शङ्क्यम्। विभागो न गुणः किं तु तत्स्वरूपात्मक इति समवायाभ्युपगमसूत्रे विभागानङ्गीकाराद्देशावकाशेनैव तत्र संयोगनाशः। एवं कालात्मनावकाशेन संयोगनाशः। कालात्मनेत्यग्रे वक्ष्यमाणत्वाच्चेत्यर्थः। तथा च स्पर्शेन वायुराकाशातिरिक्तोऽनुभूयतेऽवयव-

१. रोहितम्।



RUPNATHJI ( DR RUPAK NATH )
www.astrology-tantra.com

प्रलयः । कुतः । उपपद्यते । प्रवेशविपर्ययेण हि निर्गमनम् । क्रमस्तु स्रष्टावे-वैतत् ॥ १४ ॥ इति द्वितीयाध्याये तृतीयपादे विपर्ययेणेत्यष्टममधिकरणम् ॥ ८ ॥

भाष्यप्रकाशः ।

इत्यादि । पुराणं च श्रुत्युपबृंहणम् । अतो ब्रह्मणः सकाशादुत्पत्त्यनन्तरं तत्रैव प्रलय इति येन क्रमेणोत्पत्तिस्तेन क्रमेण न प्रलयः, किं तु विपर्ययेण क्रमः प्रलयस्य । अत्र पृच्छति, कुत इति । सत्यं श्रुतिपुराणेषूच्यते, परं तत्रापि हेतुर्वक्तव्यो येन बुद्धावारोहेत्, तत्राह, उपपद्यत इत्यादि । तथा च वैशेषिकादिवद् ध्वंसरूपो नात्र प्रलयः, किं तु कारणे प्रवेशः । अतो लौकिकप्रवेशनिर्गमन्याय एव बुद्धिगोचरीकरणायानुसंधेय इत्यर्थः । तेनेदं सिद्धम्, युगपत्प्रलयोत्तरं युगपत्सृष्टिः, क्रमेण प्रलये तद्विपरीतक्रमेण सृष्टिरिति । तदेतदुक्तं क्रमस्तु स्रष्टावेवैतदिति ।

अन्ये तु प्रलयस्य ब्रह्मकर्तृकत्वावधारणार्थमित्याहुः । तन्मन्दम् । यतो वेत्यादिश्रुत्यैव तस्यावधारितत्वेन तत्र संदेहस्यैवानुदयात् । अत उक्तमेव प्रयोजनमिति दिक् ॥ १४ ॥

इत्यष्टमं विपर्ययेणेत्यधिकरणम् ॥ ८ ॥

रश्मिः ।

स्पर्शाभावे तु वायुर्नभ इति भावः । कालेति कालात्मनावकाशेन कालेन हि तृतीयक्षणरूपेण शब्दस्तिरोभवति कालात्मना च विज्ञानघन इत्यवकाशाभावादाकाश आत्मनि विज्ञानघने । यत्तु तामसाहंकारे इति श्रीधर्या तन्न । तन्मात्रजनको हि तामसाहंकारस्तत्र शब्दादीनां तन्मात्राणां लय उचितः कार्यत्वान्न तु नभसः कार्यत्वाभावादित्यर्थः । ननु श्रौते सृष्टिक्रमे श्रौत एव पूर्वपक्षोक्तलयो युक्तो न पौराण इत्यत आह, पुराणमिति । समन्वयाध्याये द्वितीयपादे स्मृतेश्चेति सूत्रेण 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति स्मृतिं संगृह्य शब्दविशेषादि'ति सूत्रेऽन्तरात्मनि हिरण्मयः पुरुषो न जीवः किं तु ब्रह्मेति यथा व्रीहिर्वा यवो वेति श्रुत्यर्थः स उपबृंहित इति प्रकृतेऽपि तथेत्यर्थः । अत इत्यादि भाष्यं विवृण्वन्ति स्म अत इति । इदं च भाष्ये सौत्रं पदमुपन्यस्तम् । परं न व्याख्यातम् । अतः ब्रह्मणः सकाशाद्भूतोत्पत्त्यनन्तरं प्रलयः । यद्वाऽऽनन्तर्ये पञ्चमी । अस्या उत्पत्तेरनन्तरमित्यतः शब्दार्थः । तत्रोत्पत्तिक्रमविपर्ययेण क्रमः यत उपपद्यते लौकिकप्रवेशनिर्गमन्यायेनेति सूत्रार्थः । प्रवेशेति येन क्रमेण सोपानमारूढः प्रविशति तद्विपरीतक्रमेण सोपानमवरोहन्निर्गच्छतीति प्रवेशनिर्गमन्यायः । यस्तु शंकरभाष्ये दृश्यते मृदो जातं घटाद्यप्ययकाले मृद्भावमप्येति । अद्भ्यश्च जातं हिमकरकादि अब्भावमप्येतीत्युक्तः स न ग्राह्यः । अनेकपदार्थाभावात् परंपराभावप्रदृष्टान्तत्वादित्येवकारार्थः । एवकारेण युगपत्सृष्टिव्यवच्छेदः । अन्य इति माध्वाः । 'कर्ता प्राणादिकस्यास्य हन्ता भूम्यादिकस्य च । यः क्रमाद् व्युत्क्रमाच्चैव स हरिः पर-उच्यते' इति भाल्लवेयश्रुतिप्रामाण्यादेवमाहुरित्यर्थः । संदेहस्यैवेति । एवकारस्तु स्थाप्यसूत्रेप्येव-मिति । उक्तमिति सृष्टिक्रमात् लये क्रमवैपरीत्यम् । दिगिति । रामानुजाचार्यास्तु 'एतस्मा-ज्जायते प्राण' इति मुण्डकोक्ता सृष्टिः परंपरयाप्युपपद्यते इति पूर्वपक्षे सूत्रमवतारयन्ति स्म । तु-शब्दोऽवधारणे । अव्यक्तमहदहंकाराकाशादिक्रमाद्विपर्ययेण क्रमो मुण्डके प्रतीयते स च क्रमस्तत्प्राग्ब्रह्मणस्तत्तत्कार्योत्पत्तेरेवोपपद्यते, परंपरया कारणत्वे एतस्मादिति पदकल्पितं सर्वेषां प्राणादीनां ब्रह्मानन्तर्यश्रवणमुपरुध्येतेत्याहुः ॥ १४ ॥ इत्यष्टमं विपर्ययेणेत्यधिकरणम् ॥ ८ ॥



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.c

तत्र क्रमेणोत्पन्ने इति वक्तव्यम् । क्रमस्तु प्रातिलोम्येन, सूत्रे विपर्ययान-न्तरकथनात्, अन्तरेति वचनाच्च । तेजोऽबन्नानामन्नमये गतत्वात् । वा[illegible]वा-

भाष्यप्रकाशः ।

इति तस्य सामग्री वाय्वाकाशपृथिवीरूपा, न तु प्राणाख्यबाह्याबाह्येन्द्रियरूपा, तच्छिरःप्रभृतिकथने प्राणव्यानापानाकाशपृथिवीनामेव कथनात्, एवमेतद्द्वयसामग्री, ओषधीभ्योऽन्नमित्यन्तेन पूर्वमुत्पन्नोक्ता, आनन्दमयस्तु परमात्मा, स तु मूलकारणं 'तस्माद्वा एतस्मादात्मनः' इत्यात्मपदेनैवोक्तः । अतः परं मनोमयविज्ञानमयाववशिष्येते तदाह 'अन्तरा विज्ञानमनसी' इति मध्ये विज्ञानमनसी विद्यमाने क्वचिदुत्पन्ने इति वक्तव्ये । तत्र पूर्वपक्षी आह क्रमेणेति । तैत्तिरीये आनन्दमयस्य निकटे विज्ञानमयो, दूरे मनोमय इति तत्र क्रमेणोत्पन्ने इति वक्तव्यम् । न च यथयं व्यासाशयः स्यात् तदा मनोविज्ञाने इति वदेन्न तु विज्ञानमनसी इति, अतो नैवमिति शङ्क्यम्, क्रमस्तु प्रातिलोम्येनैव व्यासस्य विवक्षितः, अभ्यर्हितत्वेन छान्दोग्यानुसारेण च प्रथममात्मनस्ततो मनसः स्मरणात्, न चात्र मानाभावः शङ्क्यः । सूत्रे विपर्ययानन्तरं कथनात्, अन्तरेति वचनाच्च । यद्येतन्नाभिप्रेयात्तदिदं सूत्रं विपर्ययसूत्रात् पूर्वं पठेत्,

रश्मिः ।

वाय्विति । प्राणव्यानापाना वायवः । यत्तु शांकरा 'एतस्माज्जायते प्राणो मनः' इति मुण्डके प्राणपदेन बाह्यानि कर्मेन्द्रियाणि अबाह्यानि ज्ञानेन्द्रियाणि प्रोच्यन्त इति व्याचख्युस्तदपेशलमित्याहुः नत्विति । तच्छिर इति 'तस्य प्राण एव शिरः व्यानो दक्षिणःपक्षः-अपान उत्तरःपक्षः आकाश आत्मा पृथिवी पुच्छं प्रतिष्ठा' इति श्रुतौ । एतादृशी अन्नमयप्राणमयसामग्री । उत्पन्नेति 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी' इत्यनेन वायोरग्नि-रग्नेराप इति वाक्यरहितेन प्राणमयसामग्र्युत्पन्नोक्ता 'पृथिव्या ओषधय ओषधीभ्योन्नम्' इत्यनेनान्नमय-सामग्रीति विवेकः । आनन्दमय इति । व्याख्येयम् । व्याचक्षते स त्विति । मध्य इत्यारभ्य सूत्रव्याख्यानमित्याशयेन भाष्यैव सूत्रं विवृण्वन्ति स्म मध्य इत्यादिना । विज्ञानमनसी मयड्रहिते ते तु स्वार्थे मयटौ द्योतयतः । तौ तु सूत्रविरुद्धावतः सूत्रोदाहरणाभ्यां मयट् तद्रहितोऽमयविपय-त्वार्थम् । क्वचिदिति । संशये तु भूतेभ्यः पूर्वमुत्पन्ने उत पश्चादिति वक्तव्ये । तत्रेति । एवं संशये तत्रेति भाष्यस्याप्ययमेवार्थः । क्रमे उत्पादकत्वादानन्दमयस्य प्राथम्यमाहुः आनन्दमयस्येति । दूर इति विज्ञानमयेन व्यवहितः । तत्क्रमेणेति । क्रमस्तु प्रातिलोम्येनेति भाष्यादुक्तक्रमेण । क्रमस्त्विति भाष्यं विवृतुमाहुः न चेति । अयमिति । आनन्दमयस्य निकट इत्याद्युक्तः । वदेदिति सूत्राणां श्रुत्यनुसारित्वेन श्रुतिक्रमानुसारित्वाय वदेत् । नैवमिति । प्रातिलोम्येन क्रम इति नेत्यर्थः । व्याचक्षते स्म भाष्यं क्रमस्त्विति । विवक्षित इति । सूत्रे । सूत्राणां श्रुत्यर्थनिर्णायकत्वेन सूत्रे क्रमप्रातिलोम्ये श्रुत्यपेक्षायां प्रथमं श्रुती आहुः अभ्यर्हितत्वेनेति । अल्पाच्तरं पूर्वमिति सूत्रापेक्षयाऽभ्यर्हितं चेति सूत्रस्य विशेषसूत्रत्वादभ्यर्हितत्वेन छान्दोग्ये चानेन जीवेनेत्यादिना विज्ञानमुक्त्वोच्यते । एका कलातिशिष्टा स्यादिति मनस्तदनुसारेण चेत्यर्थः । आत्मनो जीवस्य । स्मरणादिति । सूत्रणात् । स्मृतित्वात्सूत्राणाम् । प्रातिलोम्यप्रयोजकाङ्ग-स्वरूपाभ्यर्हितं चेति सूत्राश्रयणे । सूत्रे विपर्ययेति । व्याख्येयं भाष्यमिदम् । विपर्यय-पदघटितसूत्रानन्तरमेतत्सूत्ररूपवाक्यप्रबन्धादित्यर्थः । कथ वाक्यप्रबन्ध इत्यस्य प्रयोगाद्भाष्ये ।



DR.RUPAK NATH
www.astrology-tantra.com

काशयोः प्राण एव गतत्वात्। आकाशात् पूर्वं विज्ञानमनसी उत्पद्येते इति वक्त-

भाष्यप्रकाशः।

अन्तरेति च न वदेत्। वायुतेजःप्रभृतिष्वन्तरेति पदं विनापि प्रणयनात्, अत एव ...विचार एव व्यासाशयः। एवं सति छान्दोग्योक्तानां तेजोऽबन्नानामन्नमये गतत्वात् ...वाकाश-योरङ्गीक्रियमाणयोः प्राणमये गतत्वात् आकाशात् पूर्वं विज्ञानमनसी विज्ञानं जीवाः मनोऽन्तःकरणमुभयविषयावेन्द्रियनायकमिति तदुपलक्षितं करणकदम्बकं चेति द्वे उत्पद्येते इति वक्तव्यम्, अन्यथा 'सर्व एवात्मानो व्युच्चरन्ति' इति श्रुत्युक्तानां जीवानाम्, 'एतस्माज्जायते प्राणः' इति श्रुतौ स्मृतिपुराणादिषु च जगत्कारणकोटिनिविष्टानां प्राणादीनां महदहंकारादीनां च ब्रह्मकार्येष्वनिवेशे क्रमसृष्टौ न्यूनताऽऽपद्येत। न चाकाशादिग्रहणे यथा महाभूताधिकारो नियामकस्तथात्र विज्ञानमनसोर्ग्रहणे नियामकं छान्दोग्ये नास्तीति वाच्यम्, तयोरग्रे, 'अनेन जीवेनात्मनाऽनुप्रविश्य' इति, 'षोडशानां कलानामेका कलातिशिष्टाऽऽसीत्' इति वचनमेव लिङ्गम्।

रश्मिः।

तत्फलं तु विपर्ययेण इत्यनुवृत्त्य मध्ये विज्ञानमनसी विपर्ययेण मनो विज्ञाने इति वक्तव्येऽभ्यर्हितं चेति सूत्रेण विपर्ययेणोक्त इत्येवं शिष्याः सूत्राशङ्कां पराकुर्युरिति व्यासाशयसूचनम्। तर्हि कः शब्दोऽर्थसूचक इत्यत आचार्याः अन्तरेति। हेत्वन्तरमप्यनिदम्। आनन्दमयान्नमययोर्मध्ये विज्ञा-नमनसी इत्यभिदधदन्तराशब्दो विज्ञानमनसी अन्नमयप्राणमये इत्येव पञ्चानां प्रयोगे मध्ये शङ्कापहारौ सूचयतीत्यर्थः। तथाच अन्तरेतिवचनात् अन्तराशब्द एव सूचक इति भाष्यभावार्थः। व्याचक्षते स्म यच्चैतदिति। एतद्विपर्ययेणेत्यस्यावर्तनम्। तदाख्यानसूत्रे समासाकाशाद्युत्पत्तिविचारान्त एतद्वि-चारस्य युक्तत्वादित्यर्थः। वायुतेज इति। निर्णेतव्येष्विति शेषः। प्रणयनादिति। एतेनेत्यादि-सूत्रचतुष्टयप्रणयनात्। एवं चात्रैवैतादृशौ मध्ये शङ्कापरिहारौ न पूर्वसूत्रेष्विति व्यासाशयः। अत एतदिति। विज्ञानमनसी इत्येवं सोऽयं विषयवाक्यविचार एव। तेज इति भाष्यं विवृण्वन्ति स्म एवं सतीति। गतेति। प्राणमौतिकत्वादेहस्य। यद्वा। अग्निमीळे पुरोहितमिति तेजः। ईडे इड स्तुतौ। इषेत्वेत्यन्नं इषमन्नमिति व्याख्यानात्। ऊर्जेत्वेत्यापः। ऊर्क् तदन्तर्गतो रस इति व्याख्यानात्। कीटेषु त्वयं प्रसिद्धम्। अङ्गीति। तत्तेजोऽसृजतेति तेजःपदेन तैत्ति-रीयकमनुरुध्य लक्षणयाङ्गीक्रियमाणयोराक्षेपेणाङ्गीक्रियमाणयोर्वा। गतेति। आकाश आत्मेति प्राणमयावयवनिरूपणश्रुतेः। पूर्वमिति। आकाशस्य शरीरत्वात्पूर्वम्। 'आकाशशरीरं ब्रह्म' इति श्रुतेः। तत्रापि पूर्वं मनः पश्चाद्विज्ञानम्। तन्मनोऽकुरुतेति 'नैवेह किञ्चनाग्र आसीत्' इत्यस्याग्रे श्रुतेः। अन्यथेति। द्वयोरनुत्पत्तौ प्रकारे सति। एतस्मादिति। एतस्माज्जायते प्राण इत्यादि। स्मृतीति। 'उद्बबर्हात्मनश्चैव मनः सदसदात्मकम्। मनसश्चाप्यहंकारः अभिमन्तारमीश्वरम्। वैकारिकं तैजसं च तथाभूतादिमेव च। स एव च त्रिधा भूत्वा महदित्येव संस्थितम्। महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च। विषयाणां ग्रहीतृणि शनैः पञ्चेन्द्रियाणि च' इति मनुस्मृतीत्यर्थः। पुराणेति। एकादशे चतुर्विंशे। आसीज्ज्ञानमयो ह्यर्थ इत्यादिष्वित्यर्थः। तयोरिति भाष्यं विवरीतुमाहुः नचेति। आकाशादीति। छान्दोग्ये तत्तेजोऽसृजतेत्यत्र तेजःपदे लक्षणया। महेति। तत्तेजोऽसृजत तदपोऽसृजतेति महाभूताधिकारः। विवृण्वन्ति स्म तयोरग्र इति। विज्ञानमनसोरग्रे वचनमित्यन्वयः। षोडशेति। व्याख्यातेषा।



RUPNATHJI( DR. RUPAK NATH)
www.astrology-tantra.com

ध्यम् । तयोरग्रे वचनमेव लिङ्गमिति,अतस्तयोरुत्पत्तिर्वक्तव्येति चेन्न अविशेषात् । नामरूपविशेषवतामेवोत्पत्तिरुच्यते, न त्वनयोः । विज्ञानमयस्य जीवत्वात् ।

---

भाष्यप्रकाशः ।

तैत्तिरीये चानन्दमयनिकटे विज्ञानमयस्य दूरे मनोमयस्य कथनं लिङ्गम्, आकाशादिभूतघटितस्य प्राणमयस्य दूरत्वात्, भौतिकघटितस्यान्नमयस्य ततो दूरत्वाच्च, इदमपि लिङ्गमिति च । अतस्तयोर्जीवान्तःकरणयोरुत्पत्तिर्वक्तुं युक्तेति चेत् न, कुतः अविशेषात् । नामरूपात्मकविशेषवन्तो ये वर्तन्ते तेषामेवोत्पत्तिरुच्यते छान्दोग्ये तैत्तिरीये च, न त्वनयोर्भवदुक्तयोर्जीवान्तःकरणयोः । छान्दोग्ये जीवस्यात्मपदेन विशेषितत्वात्, भूतभौतिकात्मकमनःप्राणवाचामुक्त्या भवदुक्तेन्द्रियाणां चाभावात् । तैत्तिरीये च विज्ञानमयस्य जीवत्वात्, मनोमयस्य वर्णाद्यात्मकवेदत्वात्, अतः श्रुतिद्वयेऽपि जीववेदयोरेवाभिप्रेतत्वेन तयोश्च भूतभौतिकप्रवेशाभावान्न तयोरुत्पत्तिर्वक्तव्येति सिद्धम् । न च छान्दोग्ये वेदोऽभिप्रेत इति कथं ज्ञेयमिति शङ्क्यम्, नामरूपव्याकरणरूपकार्येण तदवगमात् ।

'वेदेन नामरूपाणि विषमाणि समानि च ।
'धातुष्वद्व कल्पयन्त एतेषां स्वार्थसिद्धये' ॥

रश्मिः ।

कथनं लिङ्गमिति । एतदैकवाक्यतया छान्दोग्यस्थलेऽप्युपयुज्यते । आकाशेति । आकाशः आदिर्यस्यासौ भूतः तद्घटितस्येत्यर्थः । भौतिकेति । त्रिवृत्कृततेजोघटितस्य । ततः प्राणमयात् । इदमिति । आकाशात्पूर्वं विज्ञानमयः । ततः पूर्वं मनः उक्तयुक्तेरिति छान्दोग्ये विज्ञानमनसोर्ग्रहणे लिङ्गमिति चेत्यर्थः । अत इत्यादि भाष्यं विवृण्वन्ति अत इति । अविशेषादिति । विज्ञानमनसोर्विशेषस्य नामरूपस्याभावात् । भाष्यमपि विवृतम् । नामेति भाष्यं विवृण्वन्ति नामेति । आत्मेति । जीवेनात्मनेति । आत्मपदेन तत्र जीवत्वस्य परिच्छेदाय जीवपदेन विशेषितत्वात् । विशेष्यविशेषणभावे कामचारो वा । जीवः कर्तृत्वादिरूपः । आत्मेति विशेषितत्वे मुक्तत्वप्रसंगः । न च जीवे आत्मत्वं चित्त्वं विधीयत इति वाच्यम् । इष्टापत्तेः । भूतेति । 'अन्नमयꣳहि सौम्य मन आपोमयः प्राणस्तेजोमयी वाग्' इति श्रुतौ पृथिव्यप्तेजोविकारेत्यर्थः । भवदुक्तेति । पूर्वपक्ष्युक्तमनउपलक्षितकरणकदम्बकस्य । विज्ञानमयस्येति भाष्यं विवृण्वन्ति स्म तैत्तिरीय इति । जीवत्वादिति । श्रद्धर्तसत्ययोगमहोयस्तावत्प्रावणेन तथात्वात् । अवयवप्रयोजनं तु पश्चानां माश्रवर्णिकसूत्र एवोक्तम् । ऋगादीति । तदवयवग्रन्थात्तथा । एतेन मनोमयस्येति भाष्यं विवृतम् । अत इत्यादि भाष्यं विवृण्वन्ति अत इति । छान्दोग्ये तैत्तिरीये श्रुतिद्वये । वेद इति । 'अन्नमयꣳहि सौम्य मन' इत्यत्र मनःपदेन । 'अनेन जीवेनात्मना' इत्यत्रात्मपदेन चित्त्वविधानाद्वेदः । 'नाम चिद्धिवक्तने'ति ऋग्वेदात् । अन्यथा सदानन्दरूपेण विराजि प्रवेशः । कथमिति । तैत्तिरीये तु तदवयवग्रन्थाज्ज्ञातमिति भावः । नामरूपेति । 'सेयं देवतेमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्' इति श्रुतेः । जीवेनार्थरूपेण तिरोहितानन्दसद्रूपेण । 'छिद्रा व्योम्नीव चेतना' इति वाक्यात् । तृतीयस्तंश आत्मनेत्यनेनोक्तः । तद्वेति । आत्मपदेन चिदात्मकमनोमयत्वस्यापि सचिदानन्देऽपि जीवेऽवगमात् । एवं सत्युपबृंहणमप्याहुः वेदेनेति । एकदेशोऽस्ति । अर्थस्तु । नामरूपाणि वर्णाश्रमादीनि । धातुषु देहेषु । कल्पनाप्रयोजनमाहुः स्वार्थेति । 'प्राणिनां स्वार्थसिद्धये' इत्येवम् ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

इत्येकादशस्कन्धीयभगवद्वाक्येन तस्य तत्कार्यतानिश्चयात् । एवं च जीवस्य स्वान्तःकरणस्य वेदस्य च द्वारत्वम्, तेनोभयोः कार्यं नामव्याकरणमिति निश्चयः । इदं च 'यान्य इति चेन्नातःप्रभवात्' इति सूत्रे सर्वैरङ्गीक्रियत इति नात्र विवादलेशः । एवं चास्मिन्नधिकरणे तैत्तिरीयोक्तौ विज्ञानमयमनोमयौ विषयः । कोत्पद्येते इति संदेहः । उत्पत्तिसामग्र्यनुक्ति-रूपकेषु पाठश्च संदेहबीजम् । तयोर्जीवान्तःकरणरूपत्वाच्छ्रुत्यन्तरे तयोः साक्षादुत्पत्तिकथना-दाकाशात् पूर्वं च कथनात् क्रमसृष्टावपि आकाशात् पूर्वं परमात्मनः सकाशात् ते अप्युत्पद्येते इति पूर्वः पक्षः । ते अत्र न जीवान्तःकरणरूपे किं तु जीववेदरूपे, तल्लिङ्गकस्य लाभात्, अतो न तयोरुत्पत्तिरत्राभिप्रेतेति सिद्धान्तः । ननु भवत्वेवं तथापि न्यूनां परिहाराय क्रमसृष्टावपि प्राणे-न्द्रियमनसां क्वचिदुत्पत्तिस्तु वक्तव्येति चेत् । पुराणानां श्रुत्युपबृंहकत्वात् तदनुसारेणाकाशात् पूर्वमेव तत्तत्कारणभावापन्नाद् ब्रह्मण एवेति ज्ञातव्यम् ।

रश्मिः ।

तस्येत्यादि । नामरूप व्याकरणस्य वेदकार्यतानिश्चयात् । सोपबृंहणत्वान्निश्चयपदम् ननु । श्रुतौ जीवेनेत्युच्यते इति जीवस्य नामरूपव्याकरणं भवतु कार्यं कुतो वेदस्येत्याकाङ्क्षायामाहुः एवं जीव-स्येति । उक्तप्रकारेण जीवस्य । अयमर्थः । ब्रह्मस्वरूपात्मके ज्ञाने जीवानां प्रवेशः । सजातीयत्वात् । धर्मात्मकप्रकाशरूपेणाविर्भूते ज्ञाने जीवीयगुणचैतन्यप्रवेशः । इदमेव सृष्ट्यर्थं भवन्मनोमयादि प्रणाख्या वेदशरीरं गृह्णाति ।

'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः' ॥

इत्येकादशस्कन्धात् । तथा चैषा व्याकृता देवता ब्रह्माख्या जीवेन रूपेण प्रविश्य मनो-मयं रूपं गृहीत्वा मात्रादिक्रमेण वर्णात्मकनाम व्याकरोदिति श्रुत्यर्थाज्जीववेदयोः कार्यं नामेति । द्वारत्वमिति । नामोत्पत्तौ जीवस्य रूपान्तररूपं द्वारत्वम् । निश्चय इति । स एष इत्युक्तोप-बृंहणात् । अस्तु तर्हि नामोत्पत्तिर्नाम रूपोत्पत्तिर्भूत् द्वारस्य शब्दत्वाद्रूपस्यार्थत्वादित्याकाङ्क्षाया-माहुः इदं चेति । नामव्याकरणं चकाराद्रूपव्याकरणम् । सूत्रे तु प्रथमाध्यायस्य तृतीयपादे । विज्ञानेति । विज्ञानं च मनश्च विज्ञानमनसी द्वंद्वः । विज्ञानमनसोः प्राचुर्ये विज्ञानमनोमयौ द्वंद्वान्ते मयडुभयत्रेति विज्ञानमयमनोमयौ । क्वेति । आकाशादिभ्यः पूर्वं पश्चाद्वेति । उत्पत्स्ये-ष्विति । अन्नमयादिषु । श्रुत्यन्तर इति । 'एतस्माज्जायते प्राणो मन' इति श्रुतौ मुण्डके प्राण-पदेन जीवस्य ग्रहणं वायुरूपप्राणस्य न वायुक्रिये इति सूत्रे निषिध्यमानत्वात् । एवं जीवोत्पत्तिरपि द्रष्टव्या 'सर्व एवात्मानो व्युच्चरन्ति' इति श्रुतौ । आकाशादिति । मुण्डके खपदेनोक्तात् पूर्वम् । तच्च स इति । 'त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानी'ति वार्तिके । पुंनपुंसकयोस्तु परत्वान्न-पुंसकं शिष्यत इति व्याख्यानात् । ते इति । विज्ञानमनसी । अत्रेति । छान्दोग्ये । तद्रूपमक-स्येति । नामरूपव्याकरणरूपस्य कार्यस्य सेयं देवतेति श्रुतौ लाभात् । सिद्धान्त इति । मुण्डके तु जीवान्तःकरणरूपे ज्ञेये जायत इति लिङ्गात् । अजायमानो बहुधा विजायत इत्यङ्गीकारे तु तत्र जीवे समागमरूपोत्पत्तिः । अन्तःकरणे तु जननरूपा । न जीववेदयोर्नित्यत्वे द्वैतमपि । जीवाना-मंशत्वेन सजातीयत्वाद्वेदस्य तद्रूपत्वात् । 'स एष जीव' इत्युपक्रम्य 'मनोमयं सूक्ष्ममुपेत्य रूपम्' इत्ये-



RUPNATHJI( DR.RUPAK NATH
w.astrology-tantra.c

भाष्यप्रकाशः।

रामानुजाचार्यो विज्ञानभिक्षुश्चैवमेवाहुः ।

यत्तु शंकराचार्यभास्कराचार्याभ्यां 'बुद्धिं तु सारथिं विद्धि' इति, 'एतस्माज्जायते प्राणः' इति वाक्यद्वयं विषयत्वेन धृत्वा सूत्रस्थं विज्ञानपदं च करणव्युत्पत्त्या बुद्धीन्द्रियसंग्राहकं विधाय विज्ञानमनसी इति द्विवचनमुपपादितम्, ततोऽग्रे करणानां भौतिकत्वपक्षे तेनैव

रश्मिः।

कादशस्कन्धात् । न च शब्दस्यार्थेन द्वैतं । अधोक्षजत्वेन विशेषविचाराद्भूतो विरुद्धधर्माश्रयत्वा-द्वेत्यन्यदेतत् । वक्तव्येति । 'एतस्माज्जायते प्राणः' इति । पुराणान्तमिति । 'तमोरजःसत्त्वमिति प्रकृतेरभवन्गुणाः । मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च । तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः । ततो विकुर्वतो जातो सोहंकारो विमोहनः । वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् । तन्मात्रेन्द्रिय-मनसां कारणं चिदचिन्मयः' इत्येकादशचतुर्विंशाध्यायवाक्यान्तम् । अत्र तन्मात्रामूतसूक्ष्मावस्थाः शब्दादयः । तत्र पूर्वं मनइन्द्रियाणामुत्पत्तिः पश्चात्तन्मात्राणां सूक्ष्माणां भूतानां चोत्पत्तिः । विज्ञानोत्पत्तिर्ज्ञातव्या । 'अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते । धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते । अप्सु प्रलीयते गन्ध आपश्च स्वगुणे रसे । लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते । रूपं वायौ स च स्पर्शे लीयते सोऽपि चाम्बरे । अम्बरं शब्दतन्मात्र इन्द्रियाणि स्वयोनिषु । योनिर्वैकारिके सौम्य लीयते मनसीश्वरे । शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः । स लीयते महान्स्वेषु गुणेषु गुणवत्तमः । तेऽव्यक्ते संप्रलीयन्ते तत्काले लीयतेऽव्यये । कालो मायामये जीवे जीव आत्मनि मय्यजे । आत्मा केवल आत्मस्थो विकल्पापायलक्षणः' । इत्यत्र भूतेभ्यः पश्चात्प्राणेन्द्रियमनसां लयोक्तेः । 'विपर्ययेण क्रम' इति विपर्ययसूत्र उक्तम् । मर्त्यं शरीरं धानासु ओषधीषु लीयते । ओषधिमात्रं भवति । प्रलीयन्ते उप्ता अपि न प्ररोहन्ति । प्रलीयते सूक्ष्मा भवति । स्वयोनिषु राजसाहंकारे दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकमनोरूपासु देवतासु वा । योनिर्देवताः मनसीश्वरे देवनियामके । मनसो वशेऽन्ये ह्यभवन्स देवाः । मनो वैकारिके सात्वताहंकारे लीयत इति योजनीयम् । भूतादिं तामसाहंकारम् । प्रभुर्मोहकः स्वेषु क्रियाज्ञानादिषु । अव्यक्ते प्रधाने । मायामये विज्ञानमये । विकल्पापायाभ्यां विश्वोत्पत्ति-प्रलयाभ्यां लभ्यत इति भावः । मुण्डके 'एतस्माज्जायते' इत्यत्र एतस्माद्ब्रह्मणः कारणात् प्राणा-दिकार्यं जायते इत्युक्तेः । ब्रह्मणः प्राणमनआदीनां साक्षात्कारणताबोधनादाहुः तस्माद्दिति । एवेति । अधिकांशस्य पौराणस्यैवाकारः । एवमेवाहुरिति । एवं नाम मुण्डके न क्रमसृष्टिर्नापि विज्ञान-मनसी उत्पद्येते एव । तथाहि—'एतस्माज्जायते प्राणः' इति श्रुतौ भूतप्राणयोरन्तराले विज्ञानमनसी उत्पद्येते क्रमेणान्न चन्नाविशेषात् । विज्ञानमनसोः खादीनां चोक्तश्रुतौ 'एतस्माज्जायते' इति ब्रह्म-साक्षात्संबन्धस्य संबन्धस्य प्राणादिषु तौल्यात् । अतो न क्रमसृष्टिर्मुण्डके किन्तु साक्षात्सृष्टिरि-त्याहुरित्यर्थः । बुद्धिं त्विति । 'मनः प्रग्रहमेव च । इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्' इति पाद-त्रयमितरत् उपेति । अत्र भूतक्रम इन्द्रियक्रमेण विरुद्धो नवेति संशयेऽविरुद्ध इति चित् । इत्थं च इन्द्रियवृत्तौ प्रसिद्धविज्ञाने पदविरोध इति करणव्युत्पत्त्योपपादितं द्विवचनम् । विज्ञायतेऽनेनेति विज्ञानमिति । तेषां सिद्धान्तमाहुः ततोऽग्र इति । तेनैवेति । भूतोत्पत्तिप्रलयक्रमेणैव ।

१. ओषधिषु । २. जीवेषु । ३. ज्ञानक्रियावेदार्थरूपप्रधाने । ४ वेदार्थरूपज्ञानक्रिययोः ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.c

भाष्यप्रकाशः ।

निर्वाहाय क्रमान्तरापेक्षा, अभौतिकत्वपक्षे तु भूतेभ्यः पूर्वमित्युक्तम् । तत् तदनुसारेणैवेव रोचिष्णु । आद्यस्य काठकवाक्यस्योत्पत्तिप्रकरणीयत्वाभावेन विषयवाक्यत्वायोगात्, बुद्ध्यादीनां त्रयाणां तत्र पृथगुक्त्या सौत्रद्विवचनविरुद्धत्वाच्च । द्वितीयस्य मुण्डकवाक्यस्य च बुद्धिरहितत्वेनैव तथात्वाच्च । करणव्युत्पत्तेर्बुद्ध्यादित्रयसाधारण्येन सूत्रे मनःप्रयोगवैयर्थ्यापत्तेश्च । भौतिकेन्द्रियपक्षानादरणीयतायाः अस्माभिः प्रागुपपादितत्वेन तद्रीत्या छान्दोग्ये तन्निवेशस्याशक्यवचनतया, अभौतिकपक्षे चात्माकाशयोरन्तराले वा पश्चाद्वा तेषां प्राप्त्या सूत्रीयसिद्धान्तस्योपपत्तिशून्यतया शैथिल्यप्रसङ्गाच्च । न च 'प्रजापतिर्वा इदमग्र आसीत् स आत्मानमैक्षत स मनोऽसृजत तन्मन एवासीत्तदात्मानमैक्षत तद्वाचमसृजत' इति श्रुत्यन्तरे पृथक्क्रमाम्नानात्, 'स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नम्' इति प्रश्नोपनिषच्छ्रुतेश्च न शैथिल्यमिति वाच्यम्, तथा सति व्यासपादैः श्रुत्यन्तरेणाविशेषादित्येवमुच्येत ।

रश्मिः ।

अभौतिकेति । भूतत्वपक्षे । तन्मते प्रौढिरियम् । उत्पत्तीति । किन्तु जीवप्रकरणम् । 'योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम्' इति । त्रयाणामिति । बुद्धिमनइन्द्रियाणाम् । तत्र पृथगिति । विषयवाक्ये । नच विज्ञानशब्देनैव बुद्धेरिन्द्रियाणां चाभिधानमिति शंक्यम् । युगपद्वृत्तिद्वयविरोधात् । गङ्गायां घोषमत्स्यौ स्तः । विरुद्धेति । तथा च विषयवाक्यत्वायोग इति भावः । तथात्वादिति । विषयवाक्यत्वायोगात् । भौतिकानीन्द्रियाणीति सिद्धान्तं दूषयन्ति भौतिकेति । प्रागिति । सूत्रारम्भ एव न च मनस इत्यादिना । 'अन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इति श्रुतौ वाङ्मनसोर्भौतिकत्वमुक्तम् । तन्न । अन्नतेजसोर्मनोवाक्पोषकत्वमभिदधातीयम् । नैयायिका अपि भौतिकत्वमाहुः । राजसाहंकारकार्यत्वमिति सिद्धान्तः । तद्रीत्येति । तेषामनुमानरीत्या । प्राणेन्द्रियमनांसि भौतिकानि भूताधीनवृद्धिमत्त्वात् देहवदित्यनुमानरीत्याप्यशक्यवचनता । भौतिकत्वं च समवायिभूतजन्यत्वम् । प्राणादीनां समवाय्यपेक्षत्वात् । एवं च यद्भूताधीनवृद्धिमत्त्वं तद्भौतिकत्वमिति व्याख्या कुलालाधीनवृद्धिमति मृत्पिण्डे कुलालभूतसमवायिजन्यत्वापत्तिरतः साधारणोऽयं हेतुरिति । साधारण्यं कुलालाधीनवृद्धिमति मृत्पिण्डे बोध्यम् । तन्नीति । 'तत्तेजोऽसृजत' इत्यादौ वाय्वाकाशयोर्लक्षणया स्वीकारान्नैयायिकरीत्या तद्भूते तत्तदिन्द्रियस्य भौतिकत्वेन निवेशस्य । अभौतिकेति । 'एतस्माज्जायते प्राणः' इति श्रौती प्राणादीनां खादिभ्यः पृथक् जन्मोक्तिर्भौतिकत्वं न सहत इति तदुक्ते प्रौढिवादरूपे । आत्माकाशयोरिति । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुत्युक्तयोः । पश्चाद्वेति । आत्माकाशयोः पश्चात् । तथाधीनाग्रहसूचकं भाष्यं प्रथमं करणान्युत्पद्यन्ते चरमं भूतानि प्रथमं वा भूतान्युत्पद्यन्ते चरमं करणानीति । सूत्रीयेति । अन्तरा मध्ये विज्ञानमनसी इति सूत्रीयसिद्धान्तस्य स्वनिश्चयोपपत्तिशून्यतया । अग्र इति । स्थूलोत्पत्तेः प्राक् । स इति । शारीरः पुरुषः । शैथिल्यमिति । इन्द्रियाणां यत्र कुत्राप्युत्पत्तौ न शैथिल्यम् । भूतोत्पत्त्यादिक्रमः करणोत्पत्तिक्रमेण विरुध्यते नवेति सन्देहे 'एतस्माज्जायते प्राणः' इत्यत्र भूतानामात्मनश्चान्तराले करणानुक्रमाद्भूतोत्पत्तिप्रलयक्रमभङ्ग इति पूर्वपक्षे सूत्रं प्रवृत्ते । आहुः तथा सतीति । श्रुत्यन्तरेणेति । उच्येत सूत्रमुच्येत । तथा च प्रजापतिर्वा इति स प्राणमिति च श्रुत्यन्तरं तेन इन्द्रियाणां यत्र कुत्राप्युत्पत्तावविशेषः । भूतोत्पत्तिक्रमविरोधाभावस्तस्मा-



RUPNATHJI ( DR.RUPAK NATH )
www.astrology-tantra.com

मनोमयस्य च वेदत्वात् । अतो भूतभौतिकप्रवेशाभावान्न तयोरूपपत्तिर्वक्तव्या ॥ १८ ॥

भाष्यप्रकाशः।

किंच एकस्यां सृष्टाविन्द्रियादीनां नानाविधाभिरुत्पत्तिभिर्वक्रमयुक्तत्वात् तत्तत्सृष्टौ तत्र तत्रोत्पत्तिरित्यङ्गीकार्यम्, तथा सति यथा साक्षात्सृष्टिक्रमसूत्रयोः शब्दादेव संदेहाभावस्तथाऽत्रापीति सूत्रमनावश्यकं च स्यात् । अतस्तदविचारेऽपि शास्त्रे न्यूनत्वस्याभावात् प्रागुक्तमेव निरवद्यमिति दिक् ॥ १५ ॥

रश्मिः।

दिति सूत्रार्थः। इदानीं सूत्रमेव नोच्येतेत्याहुः किञ्चेति । नानेति । नानाप्रकारैः । अत्रापीति । इन्द्रियसृष्टौ । नन्वस्त्वयं दूषणनिकुरम्बः शङ्करभाष्ये न तु तट्टीकायां । मुण्डके प्रौढिवादमङ्गीकृत्य भौतिकत्वपक्ष आदृतः । प्रजापतिर्वा इत्यत्र प्रजापतिः सूत्रात्माऽसीत् । अत्र सूक्ष्मभूतात्मकः प्रजापतिसर्गः प्रथमः ततो मनआदिसर्ग इति ... भयाङ्गीकारादिति चेन्न । मुण्डकश्रुता नैयायिकस्मृतिविरोधेन प्रौढिवादस्यान्याय्यत्वात् । तर्काप्रतिष्ठानसूत्रात् । अन्नमयतेजोमय्योर्मनोवाचोरभावस्य सूत्रारम्भ एवोपपादनात् । तदुक्तं ... र इति । भौतिकाभौतिकत्वयोर्मध्ये वा पश्चाद्भूतस्य वा विचारे । शास्त्र इति । सृष्टिनिरूपकशास्त्रे सन्देहवारकेऽस्मिन्मीमांसाशास्त्रे वा यदि संदिग्धं न विचारयेत्तदा न्यूनत्वरूपं निग्रहस्थानस्य भावस्तस्यादित्यर्थः । प्रागुक्तमिति । विज्ञानमनसोर्नित्यत्वव्यवस्थापनं सूत्रार्थं परिहारकम् । दिगिति । विस्तरसंक्षेपस्तु प्रोच्यते । न च–'तस्माद्विराडजायत विराजो अधिपूरुषः' इति पुरुषसूक्ते पूर्वोक्तसहस्रशीर्षेण विराज उत्पत्तिरुक्ता सा कुत्रेति शंक्यम् । 'तस्मादण्डाद्विराड् जज्ञे भूतेन्द्रियगुणात्मकः' इति द्वितीयस्कन्धे षष्ठाध्याये तद्विवरणे भूतपदेन महाभूतासंग्रहात्प्राणेन्द्रियमनःसृष्ट्युत्तरं पञ्चमहाभूतसृष्टिस्ते च विभूतयः । 'एते देवाः कला विष्णो'रिति तृतीयस्कन्धे पञ्चमाध्याये वाक्यात् । 'तदुत्तरं विराड् जज्ञे भूतेन्द्रियगुणात्मकः । ततस्तदधिपुरुषः स्वराडात्मेति ज्ञायते' । अत्र श्लोके–भूतान्यधिभूतं द्रव्यम् । इन्द्रियाणि अध्यात्मम् । गुणा आधिदैवमिति । अयमर्थः सुबोधिन्याः प्रथमवर्णके । द्वितीये तु । भूतानि महाभूतानि । इन्द्रियाणि शब्दादयश्च विषयाः । शरीरेन्द्रियैर्विषयभोगकर्तेत्यर्थं उक्तस्तस्मिन्पक्षे महाभूतोत्पत्त्यैव विराडुत्पत्तिः समर्थितेति न पृथक्त्वसमर्थनापेक्षा अस्मिन्वर्णके । 'किं तदानीं तस्मै सहोवाच न सन्नासन्न सदसदिति तस्मात्तमः संजायते तमसि भूतादिः भूतादेराकाशः, आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी तदण्डं समभवत् । मध्ये पुरुषो दिव्यः सहस्रशीर्षेति सुबालोपनिषदप्यनुकूलीभवति । अत्र तमो माया । माया च तमोरूपेति नृसिंहतापनीयश्रुतेः । भूतादि तन्मात्राः । भूतानामादिः इति व्युत्पत्तेः । एतच्च द्वितीयस्कन्धे तामसादपि भूतादेरित्यत्र निरूपितम् । पञ्चमाध्याये–अत्र चतुर्दशभुवनान्यङ्गतां भजन्ते ।

> पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ।
> महातलं विश्वसृजोथ गुल्फौ, तलातलं वै पुरुषस्य जङ्घे ।
> द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च ।
> महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणन्ति ॥
> उरस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोस्य ।
> तपोरराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः' ।

इति द्वितीयस्कन्धात् । इदं विष्णो रूपं 'पक्ष्माणि विष्णोरहनी उभे च' इत्यग्रे

DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**त्रिविधा निरूपिता । 'अनित्ये जननं नित्ये परिच्छिन्ने समागमः' इति । तथाच जीवस्य समागमलक्षणाऽप्युत्पत्तिर्न स्यादितीमामाशङ्कां निराकरोति नशब्दः । चराचरे स्थावरजङ्गमे शरीरे तयोर्विशेषेणापाश्रय आश्रयः शरीरसंबन्ध इति यावत् । स तु स्यात् । न तु स्वतः । ननु शरीरस्योत्पत्तौ जीवोऽप्युत्पद्यते ।**

---

भाष्यप्रकाशः ।

मनोमयस्य चानुत्पत्तौ सर्वव्यवहारोच्छेदः । न हि जीवानुत्पादे कश्चित् संसारासक्तो वा मुमुक्षुर्वा प्रवृत्तिनिवृत्तिलक्षणकर्मज्ञानभक्त्यधिकारी भवेत्, तदभावे च लोकयात्रा तत्तत्पुरुषार्थोपायबोधकानि शास्त्राणि चोच्छिद्येरन् । न वा वेदस्यानुत्पत्तौ धर्माधर्मादिकमसंकीर्णमवगन्तुं शक्येत, तदभावे लोकमर्यादाऽप्युच्छिद्येत, एवं सर्वव्यवहारोच्छेद उभयत्रापि समान इति पृथक् तदनुक्तिः । नच नामरूपसंबन्धात्मिका या उत्पत्तिः सैवात्र निषिध्यते नेतरेत्यतो न दोष इति वाच्यं, उत्पत्तिस्तु पूर्वं त्रिविधा निरूपिता 'अनित्ये जननं नित्ये परिच्छिन्ने समागमः' इत्यादि, सन्नियोगशिष्टासु तिसृष्वेकतरैव निषिध्यते नेतरे इत्यत्र विनिगमकाभावात् तथाच जीवस्य समागमलक्षणाऽप्युत्पत्तिर्न स्यादितीमामाशङ्कामित्यर्थः । शरीरे इति प्रथमायाः तयोरिति सप्तम्या द्विवचनम् । स तु स्यादिति जायमानः शरीरमभिसंपद्यमान उत्क्रामन्म्रियमाण इति श्रुत्या देहसंबन्धेनैव तयोरुक्तत्वाद्देहसंबन्धस्तु स्यादित्यर्थः । नच वेदस्य न शरीरसंबन्ध इति शक्यं, नादात्मना सर्वशरीरेषु तस्यैव विद्यमानत्वात्, तदुक्तमेकादशस्कन्धे भगवता 'स एष जीवो विवरप्रसूतिः' इत्यादिद्वयेन ।

रश्मिः ।

देवदत्तो जातो विष्णुमित्रो जात इति भाष्यांत् । आदिशब्देन मनोमयो वेदः । व्याकुर्वन्ति स्म नहीति । असंकीर्णमिति वेदोक्तप्रकारेणासंदिग्धम् । लोकेति । मनुष्याणां मध्ये ब्राह्मणानां वेदाध्ययनादयः । क्षत्रियाणां अध्ययनदानयजनानि युद्धापलायनादयश्च । वैश्यानां अध्ययनदानयजनानीति वाणिज्यादयश्च । शूद्राणां सेवादयः । स्त्रीणां पतिशुश्रूषादयो धर्मास्तैरेव कर्तव्या इति मर्यादा । पृथगिति विज्ञानमयात्पृथङ्मनोमयानुक्तिः । उत्पत्तिरित्यादि भाष्यं विवरीतुमाहुः नचेति । अत्रेति भाक्तपदे निषिध्यते नाद्यक्षणसंबन्धरूपा समागमरूपा वातो न दोषः सर्वव्यवहारोच्छेदरूप । भाष्यं विवृण्वन्ति स्म उत्पत्तिरिति । पूर्वमिति 'न वियदश्रुतेः' इति सूत्रे । इत्यादीति । 'नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा' इत्यादिशब्दार्थः । तथा चेति भाष्यं विवरीतु त्रिविधेति भाष्यपदतात्पर्यमाहुः सन्निति हेतुगर्भविशेषणम् । यद्वा । उत्पत्तयोऽनेकविधाः । नामरूपसंबन्धः । आद्यक्षणसंबन्धः । प्रथमज्ञप्तिः । आत्मतया शरीरस्वीकृतिः । जननम् । समागमः प्राकट्यम् । आविर्भावभेदाः । तद्व्यावर्तकं विशेषणमेकतरेति । ननु बहूनां निर्धारणे डतमच् प्राप्तः । मैवम् । 'एकाच्च प्राचाम्' इति सूत्रेण डतरच् । यद्यप्युदाहरणेऽनयोरेकतरो मैत्रः एषामेकतम इति बहूनां निर्धारणे डतमजुदाहृतः । द्वयोर्निर्धारणे डतरच् तथापि द्वयोरित्यविवक्षितलक्षणम् । प्रत्यय इति सूत्रे बहुष्वासीनेषु कश्चित् कंचित्पृच्छति कतरो देवदत्त इति महाभाष्यात् । अतो द्वयोर्बहूनां वा मध्ये एकस्य निर्धारणे डतरच् । अयं न हेतुः किंतु ल्यबन्तम् । इति निरूपितेति भाष्ये इत्येवं निरूपितेत्यर्थे हेत्वनन्वयात् । तथा चेत्यग्रेतनभाष्यस्य जीवस्यानुत्पत्तौ

DR.RUPAK NATH
www.astrology-tantra.com

अन्यथा जातकर्मादीनामभावप्रसङ्गादिति चेन्न । तद्व्यपदेशस्तस्य शरीरस्य जन्ममरणधर्मवत्त्वेन जीवव्यपदेशो भाक्तो लाक्षणिकः । कुतः । तद्भाव-भावित्वात् । शरीरस्यान्वयव्यतिरेकाभ्यामेव जीवस्य तद्भावित्वम् । अतो धर्मो जीवस्य भाक्तः । तत्संबन्धेनैवोत्पत्तिव्यपदेश इति सिद्धम् ॥ १६ ॥

इति द्वितीयाध्याये तृतीयपादे नवममन्तरा विज्ञानमनसीत्यधिकरणम् ॥ ९ ॥

भाष्यप्रकाशः ।

तस्य शारीरस्येत्यादि । शरीरस्य जन्ममरणवत्त्वेन जीवे तस्य जन्ममरणवत्त्वस्य व्यपदेशो भाक्तो लाक्षणिक इति योजना । पृच्छति कुत इति, लक्षणारूपात् कस्मात् संबन्धात् । तद्भावभावित्वादिति तद्भावेन शरीरभावेन शरीराभिमानेनेति यावत्, तेन भवति व्याप्य तिष्ठति तच्छीलस्तद्भावभावी तत्त्वात् । तथाच शरीराभिमानरूपात् संबन्धादित्यर्थः । तदाहुः शारीरस्येत्यादि । तद्भावित्वमिति तदभिमानित्वम् । सिद्धमाहुः देहेत्यादि । तत्सं-

रश्मिः ।

सत्तामित्यर्थान्न हेत्वपेक्षाभावात् । तथाच । तथाचेति भाष्याग्रे ल्यबन्तं हेतुं वा पूरयित्वा भाष्यं व्याख्येयम् । तथाच सन्नियोगशिष्टाखिलाविर्भावतिरोभावहेतोर्वा जीवस्य समागमलक्षणाप्युत्पत्तिर्न स्यादितीमामाशङ्कामित्यर्थ इत्यर्थः । शारीरे इति । चराचरेत्यादिभाष्ये । भाष्ये । अपाश्रय इत्यस्याश्रयोऽर्थः अपपरी अनर्थकाविति सूत्रात् । तयोरिति जन्ममरणयोः । इत्यर्थ इति । तथा च देहसंबन्धो जन्मरूपः स्यान्नतु स्वतो जननमिति भाष्यार्थः । भाष्ये । जातकर्मादीनामिति । जातस्य नाभौ यज्ञोपवीतनिक्षेपः स्पर्शः स्नानादिकर्म । आदिशब्देन अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः, 'षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम्' इति याज्ञवल्क्योक्तनामकरणादि । निष्क्रमः, शुभर्क्षतिथिवारयोगे कुमारमलंकृत्य मङ्गलतूर्यघोषैर्देवालयगङ्गादितीरप्रशस्तारामबन्धुगृहाणामन्यतमस्थानं गत्वा तत्र सगन्धादिद्रव्ययुतकांस्यपात्रादिशकुनादिकं गृहीत्वा गृहमागत्य पुण्याहवाचनम् । चूडाकरणं तु पुण्याहवाचनं केशवपनमध्यं ब्राह्मणभोजनान्तमित्यापस्तम्बानां विश्वप्रकाशे स्फुटम् । प्रकृते । स एवेति । दृष्टान्तसहितवर्णनायै द्वयेन । 'यथाऽनलः खेऽनिलबन्धुरूष्मा बलेन दारुण्यभिमथ्यमानः । तथैव मे व्यक्तिरियं हि वाणी' इति द्वितीयः । पूर्वत्रोष्मस्थानापन्नो घोषो नाद इति तथा । यथोष्मा काष्ठनिष्ठोभिरणुप्रजातस्तदनन्तरं हविषा समिध्यते, ततोऽनिलबन्धुः सन्ननलः खे महानभिभवतीति योजना । व्यपदेश इति 'ततो विराडजायत' 'दग्धगोमयपिण्डवत्' इति मृतः । देवदत्तो जातो मृत इत्ययम् । तथा च जीवीयजन्ममरणयोर्व्यपदेशस्तद्व्यपदेश इति समासः । यदि च व्यपदेशशब्दो जन्ममरणव्यपदेशं ब्रूते तदा तु जीवे व्यपदेशस्तद्व्यपदेश इति समस्तं पदम् । तस्येति इति तु व्याख्येयम् । जन्ममरणवत्त्वसापेक्षमेकवचनमिति चोक्तद्विवचनविरोधः । पृच्छतीति लाक्षणिकत्वनियामकं संबन्धं पृच्छति । लक्षणेति लक्षणा शक्यसंबन्धः स कः संबन्ध इति प्रश्नः । कस्मात्संबन्धाल्लाक्षणिक इत्यर्थः । यावदिति पुरुषविधब्राह्मणे 'ततोऽहंनामाभवत्' इति श्रुतेस्तदंशेष्वपि तथेति । भवतीति भवत इति पाठः । भूङ् प्राप्ताविति धातुपाठात् आत्मनेपदी धातुः । धातूनामनेकार्थत्वाद्वा भू सत्तायां परस्मैपदी प्रयुक्तः । तद्भावभावीति । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति सूत्रेण ताच्छील्ये णिनिः । तत्त्वादिति तद्भावभावित्वात् । शारीरस्ये-



RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.c

भाष्यप्रकाशः।

बन्धेनेति देहसंबन्धेन। एवमेव वेदेऽपि समानन्यायाद् बोध्यम् । एवं च चराचरव्यपा-श्रयस्तु स्यादिति भिन्नं वाक्यं, शिष्टं वाक्यान्तरम् ।

भास्कराचार्यास्तु चरे अचर उद्गत इति गौणत्वसिद्धिरित्यर्थं वदन्तश्चरे अचरस्य व्यपाश्रय इत्येवं समासं कृत्वा, अन्ये तु, चराचरं व्यपाश्रयो यस्येति बहुव्रीहिं कृत्वा चराचरव्यपाश्रयपदं उत्पत्तिनाशव्यपदेशस्य भाक्तत्वे हेतुत्वेन व्याकुर्वन्ति । तद्भावभावित्वादिति तु शरीरसद्भावे जन्ममरणयोर्भावित्वादित्येवं ताच्छील्ये णिनिमङ्गीकृत्य व्याकुर्वन्ति, तथा सति तद्भावभावित्वाच्चराचरव्यपाश्रयस्तद्व्यपदेशो भाक्तः स्यादित्येकमेव वाक्यं भवति । तच्च सूत्रकृतोऽभिप्रेतमिति प्रतिभाति । स्यात्पदस्य मध्ये पाठात्, अभिमानेन वा समागमेन वा जीवशरीरयोः संबन्धस्य सर्वेषामावश्यकत्वाच्च वाक्यद्वयपक्ष एव साधीयानिति ।

रश्मिः ।

स्याद्वीति । यत्सत्त्वे यत्सत्त्वमन्वयः । यदभावे यदभावो व्यतिरेकः । किंच । शरीरस्यान्वयः समवायी रेतआदिः । व्यतिरेको निमित्तम्, देहकारणव्यतिरिक्तं वा परमाण्वादि, ताभ्यामेव जीवस्य तद्भावित्वं देहाभिमानित्वं देहाध्यास इति भाष्यार्थः ।

'चरमः सद्विशेषाणामनेकः संयुतः सदा । परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥'

इति वाक्यात् । अर्थस्तु उभयथापि न तद्भाव इति सूत्र उक्तः । समानेति समानन्यायादिति । समानन्यायाभावे वेदशाधिकरणानवतारान्मीमांसायामस्य प्रसिद्धिः । नादात्मना सकलदेहेषु वेदस्य नित्यस्य विद्यमानत्वाज्जीवसमानन्यायोऽवतरति तस्मादित्यर्थः । एवं चेति । स्यादित्यन्ते पूर्वपक्षे च भिन्नं वाक्यमिति । स्यादिति तिङ्साहित्यादिति भावः । एकतिङ्वाक्यमिति लक्षणात् । एकवाक्यतापक्षे त्वग्रे दूषयिष्यन्ति । एकवाक्यतया व्याख्यातॄनन्यथा पर्यनुयुञ्जते स्म भास्करेति । चर इत्यादि चरे जीवेऽचरो जड उद्गतो जातः । इत्यर्थमिति चराचरव्यपाश्रय इति सूत्रांशार्थं वदन्त इत्यर्थः । अन्ये त्विति शांकराः । यस्येति उत्पत्तिनाशव्यपदेशस्य । हेतुत्वेनेति भाक्तत्वे जीवस्य जन्ममरणव्यपदेशः । किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इत्यत उच्यते । चराचरव्यपाश्रयजातो देवदत्तो मृतो देवदत्त इत्यत्र लोके स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ । स्थावरजङ्गमानि हि भूतानि जायन्ते च म्रियन्ते चातस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्येते इत्येवं भाक्तत्वे लक्षणायां हेतुः । शक्तं पदम्, तच्च च वाक्यार्थस्तेन व्याकुर्वन्तीत्यर्थः । भावित्वादिति भवतस्तच्छीले भाविनी, तयोर्भावो भावित्वं तस्मात् । तद्भावेति । शरीरान्वयव्यतिरेकाच्चराचरव्यपाश्रयो जन्ममरणधर्मव्यपदेशोतः मुख्यार्थलाभात्तस्य धर्मस्य व्यपदेशो जीवे भाक्तः स्यादित्यर्थः । मध्य इति । तथा च स्वारसिकान्वयाभावो दूरान्वयश्च दोषौ स्यातामिति भावः । अतो नाभिप्रेतम् । अभीति देहे समागमश्चानातिरेभावकेन । समेति । मुक्तदेहे प्रकटत्वादुभयत्र भेदेनोक्तिः । संबन्धस्येति अभिमानरूपस्य, अध्यासस्येति यावत् । आवश्यकेति देवदत्तो जातो मृतश्चेत्यादावावश्यकत्वात् । अतश्चराचरवाचकपदस्य शरीरे संबन्ध एव तद्धर्मयोर्जन्ममरणयोर्जीवे व्यपदेशः स च भाक्तः । यथा गङ्गापदार्थसंबन्धादेवं गङ्गापदस्य तीरे प्रयोगः । तदर्थधर्मस्य शैत्यपावनत्वादेर्व्यपदेशो भाक्तश्च भवति । एवेति । पूर्वपक्षबोधकसूत्रे संभावनार्थकलिङन्तधातुप्रयोगस्यावश्यकत्वात् । सिद्धान्त-



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.c

## नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥ ( २-३-१० )

ननु जीवोऽप्युत्पद्यतां, किमिति भाक्तत्वं कल्प्यत इति चेत् न । आत्मा नो- त्पद्यते । कुतः । अश्रुतेः । न हि आत्मन उत्पत्तिः श्रूयते देवदत्तो जातो,

---

भाष्यप्रकाशः ।

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥ पूर्वाधिकरणे जीवस्य नामरूपविशेषसं- बन्धाभावाज्जीवस्य नोत्पत्तिरित्युक्तम् । तद्युक्तं न वेति संदेहे देवदत्तादिनाम जीवस्यैव, न शरीरमात्रस्य, मृते देवदत्ते तदीयगयाश्राद्धादिकरणानुपपत्तेः । एवं नामसंबन्धे तत्र सिद्धे सोऽप्युत्पद्यतां तदेतदाहुः ननु जीवोपीत्यादि । समाधिं व्याकुर्वन्ति नेत्यादि । तथाच 'अङ्गादङ्गात् संभवसि हृदयादधि जायसे आत्मा वै पुत्रनामासि स जीव शरदः शतम्' इत्या- दिश्रुतिविचारे लोकविचारे च देहस्यैवोत्पत्तिः । श्राद्धादिशास्त्रे तु देवदत्तादिदेहोपलक्षितो

रश्मिः ।

'अन्तरा विज्ञानमनसी क्रमेण'इत्युक्त्या पूर्वपक्षः सूचितः । अन्तरात्मनो मनसश्च विज्ञानम् । 'यच्छेद्वाङ्- मनसी प्राज्ञस्तद्यच्छेज्ज्ञानमात्मनि'इति तल्लिङ्गाद्विज्ञानमनसन्तरा विपरीतक्रम इति चेदिति भाष्येण । अत्र प्राणात्मन इत्यसाग्निर्वाग्भूत्वेति श्रुत्युक्तोऽग्निः । 'प्राणाद्वा प्राण उदेति'इति श्रुतेः । एव सूर्यः । सूर्योऽग्निरस्त्येव । विज्ञानं तु प्राज्ञपदलभ्यम् । यच्छेदिति । विज्ञानमनसन्तरेति छान्दसः संधिः । अविशेषादित्यनेन सिद्धान्तः सूचितः । न विशेषप्रमाणाभावादिति भाष्येण । एवं द्वितीयसूत्रार्थोऽपि विमर्शनीयः । तथाहि । मनसश्च विज्ञानमिति व्यपदेशश्चराचरेष्वालोचनाद्विज्ञानं भवतीति भागापेक्षया स्यात् । न विज्ञानतत्त्वापेक्षया । स्कान्दे च 'परादव्यक्तमुत्पन्नमव्यक्तं तु महांस्तथा । विज्ञानतत्त्वं महतः समुत्पन्नं चतुर्मुखात् । विज्ञानतत्त्वात्तु मनो मनस्तत्त्वाच्च खादिकम् । एवं चाचापरा सृष्टिरन्तस्तद्व्यत्त्यपेक्षया । विपरीतक्रमा ज्ञेयो यस्माद् दत्ते हरेर्दृशि'रिति । तथैवेति । भाष्येऽपि तथा व्याख्यानमिति तथा । सूत्रे लयक्रमस्यात्यन्तानावश्यकत्वेनोक्तविचारस्यान्यत्राभावेन विपर्यय- सूत्रेण चारितार्थ्याच्च ॥ १६ ॥

इति नवममन्तरा विज्ञानमनसीत्यधिकरणम् ॥ ९ ॥

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥ नामेति विस्फुलिङ्ग इति नाम वर्तुलादिरूपं सामान्यं तज्ज्ञापकार्थं विशेषेति । नामरूपविशेषस्य । भस्मज्वलितकाष्ठादिहस्तविशिष्ट- चतुष्कोणवर्तुलत्रिकोणादिरूपस्य संबन्धाभावात् । यद्वा । नामरूपयोर्विशेषसंबन्ध आत्मतया शरीरस्वीकरणरूपस्याभावात् । जीवस्यैवेति एवकारोप्यर्थे जीवस्यापीत्यर्थः । तत्रेति जीवे । नामवद्रूपस्यापि तादात्म्यः संबन्धः । नेत्यादीति । उत्पत्तेर्निरूपितत्वादाहुः आत्मा नोत्पद्यत इति । देवदत्त इत्यादिभाष्ये किंचिच्छ्रुतिविरोधसमाधानं कुर्वन्त एव विवृण्वन्ति स्म तथाचेति । श्रुतौ जीवजन्माश्रवणोक्ते च । श्रुतीति । अत्रात्मपदशब्दः त्रिषु वर्तमानोऽपि देहमात्रपरः । पुत्रनामासीत्यग्रे नामरूपसंबन्धकथनात् । अतः समानप्रजाजननियमकत्वादङ्गादङ्गात्संभवसीति देहस्यात्मजन्यत्वं मुख्यम् । हृदये ईश्वरस्थितेस्तस्मादधि अधिकं चिज्जडात्मकं जायसे अतो वा इति निश्चये । त्वं पुत्रनामा देहोधिकोऽपि । इति श्रुतिविचारे । लोको व्याकरणं तद्विचारे जीव प्राणधारणे, प्रत्यक्षविचारे वा देहस्यैव नतु जीवस्योत्पत्तिः । लोकविचारे



RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

किंच । नित्यत्वाच्च ताभ्यः श्रुतिभ्यः । अयमात्माऽजरोऽमरः, न जायते म्रियत इत्येवमादिभ्यः ॥ १७ ॥

इति द्वितीयाध्याये तृतीयपादे दशमं नात्माश्रुतेरित्यधिकरणम् ॥ १० ॥

---

भाष्यप्रकाशः ।

रणं नोत्पत्तिः नामरूपसंबन्धाभावात्, अन्यथा व्युच्चरणश्रुतावात्मशब्दप्रयोगस्य, बालाग्रश्रुति-व्याकरणश्रुत्योर्जीवशब्दप्रयोगस्य च विरोधापत्तेः ।

न चास्यापि सृष्ट्यनन्तरभावित्वात् कृत्रिमत्वं शङ्क्यम् । तथा सति सृष्टेः पूर्वं ब्रह्मण एव केवलस्य सत्त्वात् सृष्ट्यनन्तरं प्रयुज्यमानानां शब्दानां सर्वत्र पारिभाषिकत्वापत्त्या रूढ्युच्छेद-प्रसङ्गात्, अतस्तदभावाय 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' इति श्रुत्युक्तस्य नामरूपनियमस्य साहजिकत्वमास्थेयम् । तथा सति तदतिरिक्तस्यैव कृत्रिम-त्वं, न तु नैसर्गिकस्येति निश्चयः । तदेतदुक्तं नामरूपसंबन्धाभावादिति । न च नामरूपान्तरसंबन्धस्यैवोत्पत्तित्वं, न केवलव्युच्चरणस्येत्यत्र किं गमकमिति शङ्क्यम्, यथो-र्णनाभिस्तन्तुनोच्चरेदित्यव्यवहितपूर्वमुदितस्य दृष्टान्तस्यैव गमकत्वात्, अन्यथैकेनैव निर्वाहे इतरवैयर्थ्यप्रसङ्गात्, अतस्तन्तूनां नामरूपसंबन्धात् पूर्वो दृष्टान्तः प्राणादीनां भूतान्तानां नाम-रूपसंबन्धवत्तयोत्पत्तिबोधकः । नच तेषामुत्पत्तिमत्त्वे किं मानमिति वाच्यम् । ऐतरेये 'स ऐक्षत लोकान्नु सृजै' इति प्रश्ने, 'स प्राणमसृजत' इत्यादिसृष्टिश्रुतीनामेव मानत्वात् । नच 'तदात्मानꣳ स्वयमकुरुत' इत्यात्मकरणश्रुतिविरोधः । तत्र यथास्थितप्राकट्यस्यैव करणत्वेन विवक्षितत्वात् । अन्यथा तस्य सुकृतत्वविरोधापत्तेः । नच 'आत्मकृतेः परिणामात्' इति सूत्रे तस्य परिणामत्वस्याङ्गीकारविरोधः शङ्क्यः । तत्र यथास्थितप्राकट्यस्यैव परिणामत्वेन वि-वक्षितत्वात् । अन्यथा विपरिणामादित्येव वदेत्, अतः प्राणादीनामेवोत्पत्तिर्न जीवस्येति निश्चयः । द्वितीयस्तु जीवस्य व्युच्चरणमात्रबोधक इत्यास्थेयम् । नच 'यथोर्णनाभिः सृजते गृह्णते च' इति मुण्डकवाक्यस्वारस्यात् पूर्वो दृष्टान्तः कर्तृत्वमात्रबोधक इति वाच्यम् । एवमपि क्रिया-

रश्मिः ।

नोत्पत्तित्वं ज्ञापितं तत्र गृह्णते स्म न चेति । आत्मेति नाम । रूपं विस्फुलिङ्गवद्वर्तुलं तदन्यनाम-रूपसंबन्धस्यैवेत्यर्थः । अव्यवहितेति बृहदारण्यके यथाग्नेरित्यस्याव्यवहितपूर्वम् । एकेनेति यथोर्णनाभिरित्यनेन । इतरेति यथाग्नेरित्यस्य वैयर्थ्यप्रसङ्गात् । अत इति एकतरस्य वैयर्थ्याभावाय । सार्वविभक्तिकस्तसिरिति । तन्तूनामित्यादि ऊर्णनाभिः कीटविशेषस्तन्तुना तन्तून् क्रीडां क्रीडार्थं उच्चरेत् । कर्मणः करणसंज्ञा संप्रदानस्य कर्मसंज्ञेत्यनेन कर्मणः करणसंज्ञायां जातायां तृतीया । पशुना रुद्रं यजत इतिवत् । पशुं रुद्राय ददातीत्यर्थः । उच्चरेदुत्पादयेदिति दृष्टान्तश्रुत्यर्थान्नाम तन्तुः दीर्घाकृति-रूपं तयोः संबन्धाद्धेतोः । द्वितीयो यथाग्नेरिति दृष्टान्तः । व्युच्चरणेति । तदानीं देहसंबन्धाभावादेव-कृताद् नाम करपादादि रूपं च नास्तीति तन्मात्रबोधकः । एतस्येति भाष्यं विवरीतुमाहुः न चेति । यथेति । कर्तृत्वमात्रेति मात्रशब्देनोत्पत्तिव्यवच्छेदः । क्रियेति । कृतिमत्त्वं कर्तृत्वमित्यत्र

RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

विषयाणामुत्पत्तिमत्त्वस्य सिद्धेः । नन्वेवमपि प्राणादिसाम्यानपाय इति शङ्क्यम् । यत एतस्य गुणाः स्वरूपं चाग्रे 'ज्ञोऽत एव'इत्यादिसूत्रेषु वक्ष्यते अतस्तदवगतौ प्राणादिसाम्यसंदेहस्य सुखेन निवृत्तेः । नन्वेवमपि प्रमेयबलेन निवृत्तिर्न तु प्रमाणेन, शास्त्रं तु भवतां प्रमाणप्रधानमतो नेदं युक्तमत आहुः किंचेत्यादि । इत्येवमादिभ्य इत्यादिपदेन 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'अजो नित्यः शाश्वतोऽयम्' इत्यादीनां संग्रहः । तथाच नात्र प्रमाणाभाव इत्यर्थः ॥ १७ ॥ इति दशमं नात्माऽश्रुतेरित्यधिकरणम् ॥ १० ॥

रश्मिः ।

निविष्टकृतिविषयाणाम् । प्राणादीति । जीवेषु व्युच्चरणेन प्राणादिसाम्यं प्राणादिसदृशं व्युच्चरणम् । व्युच्चरणे जीवस्येव प्राणादीनामकर्तृत्वात् । तथाचानित्यत्वापत्तिरिति भावः । एतस्येति भाष्यं विवृण्वन्ति यत इति । एतस्येति जीवस्य । प्रमेयेति प्रमेयं शब्दम् । जीवोत्पत्त्यश्रुतिरिति शब्दः । तेनोत्पत्तिश्रवणाभावः प्रमेयस्तद्बलेनेत्यर्थः । प्रमाणेनेति श्रुतिशब्दादिना । रामानुजाचार्या एतद्दोषभियैव श्रुतेरित्येवं पदं छिन्दन्ति । परंतु द्वितीयहेतुप्रतिपादकसूत्रांशवैयर्थ्यं नानुसंदधते । न जायते । ज्ञाज्ञौ द्वावजाविति । जीवोत्पत्तिप्रतिषेधश्रुतिरिति हेतोः सकाशात् । नित्यो नित्यानामित्यादिश्रुतिभ्यो नित्यत्वावगमस्य हेतोरनतिरेकात् । मतानामिति वेदव्यासमतवर्तिनां शब्दप्रधानम् । नेदमिति इदमश्रुतेरिति सौत्रं लिङ्गम् । चेतनानामिति 'एको बहूनां यो विदधाति कामान्' इति श्रुतिशेषः । अयमिति । पुराणे 'न हन्यते हन्यमाने शरीरे' इति श्रुतिशेषः । तथा चेति । द्वितीयहेतुसत्त्वे प्रकारे च । एतावता ब्रह्माण्डप्रकरणं समाप्तं द्वितीयं । ब्रह्माण्डेतिव्याप्तिवारणाय । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इत्यत्र 'तज्जलान्' इति लिङ्गात् । माध्वास्तु 'स इदं सर्वं विलाप्यान्तस्तमसि निलीनस्तद्विलाप्य व्युत्तिष्ठते स इदं सर्वं विसृजति विस्थापयति प्रस्थापयति आच्छादयति प्रकाशयति विमोचयति एक एव' इति श्रुतेः परमात्मापि न लीयते इति व्याख्याय सूत्रांशे श्रुतयः 'स एतस्मिन् तमसि निलीनः प्रकृतिं पुरुषं कालं चानुपश्यति नैनं पश्यति कश्चन' इति पैङ्गीश्रुतिः 'नित्यो नित्यानां चेतनश्चेतनानां, स नित्यो निर्गुणो विभुः परमः परात्मा, नित्यो विभुः कारणो लोकसाक्षी परो गुणैः सर्वकृत् शाश्वतश्च' इत्यादि श्रुतिभ्यो नित्यत्वाच्चेति भाष्ये । 'पूर्वा विराड्लिङ्गिकाऽपरा परलिङ्गिका'इति श्रुतेरिति पदच्छेदेपि नास्वरसस्तथापि लाघवात्ताभ्य इत्यनेन चारितार्थ्यं सुवचमिति ज्ञेयम् । श्रुत्यर्थस्तु स महतः स्रष्टा इदं परिदृश्यमानं विलाप्य विशेषे लीनं ब्रह्माण्डे लीनं कृत्वा ब्रह्माण्डान्तर्मध्ये तमस्तस्मिन् निलीनो मार्तण्डरूपो द्वितीयः । तत्तमः विरुद्धं कृत्वा लात्वा रात्रिरूपं कृत्वेति व्युत्तिष्ठते 'आविरासीत्तमोनुदः' इति मनुस्मृतेः । विशेषो विष्णोर्द्वितीयं रूपं तेन उत्तिष्ठते । विराड्व्याख्यानमिदमित्याह इदमित्यादि । 'विसर्गः पौरुषः स्मृतः' इति वाक्याद्विराट्पुरुषसृष्टिरेवं विस्थापयतीति विशेषस्थापनं पुरुषरूपविराट्कृतम् । प्रगतं स्थापनं च तत्कृतम् । 'दग्धगोमयपिण्डवत्' इति वाक्यात्स्वस्मिन्प्रस्थापितमाच्छादयति विराट् दग्धगोमयपिण्डवज्जातो विराट् । सूर्याविष्कारेण विराट् प्रकाशयति । सूर्यः सत्कर्मप्रेरणेन विमोचयत्येक एव । परमात्मा विराडन्तःस्थः श्रुतिप्रसिद्धचेतनानाम । श्रुत्यन्तरमतलयविशेषार्थम् । परो गुणैरिति महत्स्रष्टृ लिङ्गम् । 'तमसः परस्तात्, 'तमसस्तु पारे' इति च श्रुतिभ्यामिति ॥ १७ ॥

इति दशमं नात्माऽश्रुतेरित्यधिकरणम् ॥ १० ॥



DR. RUPAK NATH
www.astrology-tantra.com

सर्वविप्लववादी ब्रह्मवाक्यान्युदाहृत्य सूत्रोक्तसिद्धान्तमन्यथाकृत्य श्रुति-सूत्रोल्लङ्घनेन प्रगल्भते। स वक्तव्यः। किं जीवस्य ब्रह्मत्वं प्रतिपाद्यते जीवत्वं वा निराक्रियते इति। आद्ये इष्टापत्तिः। न हि विस्फुलिङ्गोऽग्न्यंशो भूत्वा नाग्निः। द्वितीये स्वरूपनाशः। जीवत्वं कल्पितमितिचेन्न। अनेन जीवेनात्मनेति

---

भाष्यप्रकाशः।

भगवन्माहात्म्याविरोधितया च संग्राह्यत्वं बोधयितुं शांकरं मतं दूषणायोपक्षिपन्ति सर्वविप्लवे-

रश्मिः।

शिवपरत्वेन रामानुजमाध्वशैवाचार्याणां मतानामेकदेशित्वं स्पष्टम्। विज्ञानेन्द्रभिक्ष्वाचार्याणां मतस्य कृष्णाद्यवतारपरत्वम्। 'यथा मधु मधुकृतो निस्तिष्ठन्तीति सिद्धान्तयन्ति। द्वितीयोपदेश इत्यव-तारपरत्वं अत एकदेशित्वं तन्मतस्य। परदेवतापरत्वमाचार्यमतस्येति नैकदेशित्वमिति ध्येयम्। माहात्म्यबोधकत्वं तु ईदृशी जीवरूपप्रकृतिरिति भास्कराचार्यमते गुणावतारः। स्वविषये पूर्णावतारश्चेत्यन्याचार्यस्य तेषु माहात्म्यम्। संग्राह्यस्त्वमिति। अत्र सूत्रे संग्राह्यत्वमित्युक्तम्। तदित्थम्। ज्ञानाश्रयश्चैतन्यरूप इत्युक्तम्। तत्र नानावादानुरोधि रूपं निबन्धे ब्रह्म। तत्र भेदा-भेदवादानुरोधि जीवरूपम्। 'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत्' इति गीता। व्यापकधर्मस्य व्यापकत्वानियमानुरोधि। कारणात्मनाऽभिन्नम्। कार्यात्मना भिन्नम्। तथा च तद्भाष्यम्। जीवस्य स्वतश्चैतन्यं नास्त्यागन्तुकमेव तस्य चैतन्यं पाक्षिकमिदं घटादिविषयं विज्ञानमविज्ञानविच्छेदेन वर्तते तदेवास्य चैतन्यमिति काणादा मन्यन्ते। तत्रेदमुच्यते। जीवो ज्ञः। कस्मादत एव। श्रुतिभ्य एव 'अत्रायं पुरुषः स्वयंज्योतिः' 'नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' 'विज्ञानघन एवैतेभ्यो भूतेभ्य' इति ब्रह्माङ्गत्वाच्च। विस्फुलिङ्गन्यायेन 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म'इति स्वाभाविकं चास्य ब्राह्मं रूपमौपाधिकमितरदिति। इदं मतं गीतेतिहासप्रामाण्यान्निबन्धे इति एकदेशितया भगवन्माहात्म्याविरोधितया च ज्ञेयम्। विशिष्टा-द्वैतवादानुरोधि जीवरूपम्। ज्ञः ज्ञानाश्रयः सन् चिदचिच्छरीरब्रह्मकार्यत्वात्। अचिज्जडा संनिरोधिका माया। तथा तद्भाष्यम्। ज्ञ एवायमात्मा। ज्ञातृस्वरूप एव, न ज्ञानमात्रम्। 'न जड-स्वरूप एव। कुतः। अत एव श्रुतेरेवेति। श्रुतिस्तु 'न जायते म्रियते वा' इत्यादिः पूर्वोक्ता। श्रीभाग-वतमते मायाजीवपक्षश्चतुर्थस्कन्धे इत्येकदेशितया भगवन्माहात्म्याविरोधितया च ज्ञेयम्। द्वैतवादा-नुरोधि जीवरूपम्। ज्ञो जीवः अतएव परमेश्वरादुत्पद्यत इति। अत्रैवकारः शब्दात्। स च ते वा 'एते चिदात्मानो विनष्टाः परं ज्योतिर्निर्विशन्त्यविनष्टा एवोत्पद्यन्ते न विनश्यन्ति कदाचन' इति काषायण-श्रुतिः। इदं मतमक्षरामृतग्रामवदिति 'सूत्रभाष्याज्ज्ञानोत्तरं भक्तविषयमित्येकदेशितया भगवन्मा-हात्म्याविरोधितया च ज्ञेयम्। शैवमते विशिष्टाद्वैतं पूर्वोक्तविशिष्टाद्वैतवत् मद्भक्तपूजाभ्यधिकेति वाक्यादधिकं प्राथम्यमिति रूपं प्राथम्योपयोगि अविभागाद्वैतवादानुरोधि जीवरूपम्। विज्ञानेन्द्र-भिक्षवो द्वितीयोपदेशं सिद्धान्तयन्ति यथा मधु मधुकृत इति। सा च स्वयं कृष्णस्तत्परेति नैश्चित्यं वाचि पूर्ववादिति सुबोधिनीकारिकयावतारदेशितया भगवन्माहात्म्याविरोधितया च ज्ञेयम्। नियतज-नादिप्रकरणस्य देवत्वं माहात्म्यं तदविरोधितयेति। निम्बार्कद्वैतवादे माध्वद्वैतवत्। यथाहुः— वेदान्तसारभूतायां दशश्लोक्याम्। 'ज्ञानस्वरूपं च हरेरधीनं शरीरसंयोगवियोगयोग्यम्। अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः' इति। हरेरधीनमित्यस्यार्थः। तत्त्वं द्विविधं। स्वतन्त्रं, परतन्त्रं



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

त्यादि । सर्वविप्लववादित्वं तु पाशवचनोपन्यासेन, 'नासतोऽदृष्टत्वाद्', इत्यत्र मया प्रदर्शितम्, तादृशो, ब्रह्मवाक्यानि 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म', 'अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनः' इत्यादीन्युदाहृत्य, सूत्रोक्तसिद्धान्तमन्यथाकृत्य 'सुषुप्त्युत्क्रान्त्योर्भेदेन'इत्यादि-सूत्रेषु सिद्धं जीवब्रह्मणोर्भेदरूपं सिद्धान्तं भेदस्य काल्पनिकत्वकथनेन संसारित्वरूपमात्राख्यानपर-तया व्याख्याय, 'अयं शारीर आत्मा प्राज्ञेनात्मना संपरिष्वक्तः प्राज्ञेनात्मनान्वारूढः' इत्यादिश्रुतीनां उक्तसूत्राणां चार्थत्यागेन धाष्टर्य करोतीत्यर्थः । तत्र द्वयमपि स वक्तव्य

रश्मिः ।

च । तत्र स्वतन्त्रो हरिः, अन्यदस्वतन्त्रम् । 'सत्यं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे । अस्वातन्त्र्यात्तदन्ये-षामंशत्वं विद्धि भारत'इति महाभारतेति । एवं चैतन्यस्वरूपत्वेऽप्याकाशशरीरं ब्रह्मेति श्रुतेः 'छद्राणीव चेतनाः प्रतीयन्त' इति सिद्धान्तमुक्तावल्याम् । तदेतत्तस्माद्वा एतस्मादित्यत्र प्रसिद्धम् । पञ्चमहाभौतिको देहः । ओषधयः केशाः, अन्नं लिक्षाः, पुरुषः यूकाः । उपलक्षितमिति । किंचात्र भाष्ये विज्ञानमय-प्रकरणस्याविज्ञानमय इति आदिशब्देनाथ सुप्तः सुप्तानभिचाकशीति । अत्रायं पुरुषः स्वयंज्योतिर्भ-वति । नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इत्येवंरूपा अतश्रुतिः सूत्रांशार्थत्वेनोदाहृताः, शंकरभाष्ये तु ब्रह्मवाक्यानि वक्ष्यमाणान्युदाहृतानि तत्राप्युपक्षिपन्ति स्म सर्वविप्लवेत्यादि । ब्रह्मवाक्यो-दाहरणे तु शाब्दापरोक्षमात्रेण कृत्यर्थं प्रति सर्वेषां धर्मार्थकाममोक्षाणां तत्साधनप्रमाणानां विप्लवः स यस्मिन्वादे स वादोऽस्यास्तीति सर्वविप्लववादी तस्य भावस्तत्त्वम् । तादृश इति श्रवणमात्रेण तदध्येतृतद्विचारकातिरिक्तानामपि पातित्यसंपादकमायावादवक्ता । सूत्रोक्तेति । ज्ञश्चैतन्यस्वरूपः अतएव श्रुतिभ्यः विज्ञानमय इत्यादिभ्य इति भाष्योक्तं सिद्धान्तम् । अन्यथेति । तन्मते जाना-तीति ज्ञ इत्यस्तिशब्दवाच्ये ज्ञानजनकसत्त्वगुणसंबन्धात्सगुणो ज्ञः । मायाविषयोरेकदेशविकृतत्वेना-नन्यवत्त्वेऽविद्यासंबन्धाज्ज्ञो जीवः । अतएव यस्मादेव नोत्पद्यत इति । पूर्वसूत्रादनूद्यते । तथा च परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठते । उपाधी मायाविद्ये जीवसगुणयोः । प्रकृते तु जानातीत्यत्र व्युत्पत्तिरिक्तस्य सर्वज्ञातृचैतन्यविशिष्टसत्त्वसंबन्धाज्जीवत्वम् । सत्त्वरूपमायासंबन्धात्पूर्वं 'जीवस्यानुस्मृतिः सती' इति वाक्यात्सोहमित्यभेदप्रतीतिः । भेदो माया । ज्ञाज्ञावित्यत्र ज्ञानजनकं 'विशुद्धसत्त्वं वसुदेवशब्दितम्' । ज्ञाज्ञौ जीवजडौ वा । अत एव श्रुतिभ्यो ज्ञप्रतिपादकश्रुतिभ्यो न ब्रह्मवाक्येभ्यः इति पूर्वसूत्रादनूद्यते । इत्यन्यथाकरणम् । अस्माकमात्मा नोत्पद्यते इति दूरानुवादा-पेक्षया ताभ्य इत्यनुवादो हि समीप इति गुणः । सूत्रोक्तसिद्धान्तान्यथाकरणं विशदयंति स्म सुषुप्तीति । आदिशब्देन पत्यादिशब्देभ्यः आनुमानिकाधिकरणसूत्राणि । सिद्धमिति भेदरूपं सिद्धान्तं सिद्धमिममस्मदीयं बोध्यम् । तथाहि पूर्वाध्याये तृतीयपादे समाप्ता-विदमधिकरणम् । तत्र बृहदारण्यकस्थं ज्योतिर्ब्राह्मणं शारीरब्राह्मणं च विषयः । जीववाक्यं ब्रह्मवाक्यं वेति संदेहे असंसारी परमेश्वर इहोक्त इति मुक्तजीववाक्यमिदमिति शांकरसिद्धान्तं पूर्वपक्षयित्वा ब्रह्मवाक्यमिदमिति सिद्धान्तोतः कुनोदकाभावात्सिद्धस्तं भेदरूपं सिद्धान्तं भेदस्य, परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठत इति स्वभाष्ये काल्पनिकत्वकथनेनेत्यर्थः । व्याख्या-येति । संसारे भेदो न विरुद्ध इति । संपरीति इयं सुषुप्तौ जीवं भेदेन कथयति । प्राज्ञेनेति । इयं श्रुतिरुत्क्रान्तौ जीवं भेदेन कथयति । आदिशब्देन ब्रह्मवाक्यानाम् । उक्तेति सुषुप्त्यु-त्क्रान्त्यधिकरणस्यानुमानिकाधिकरणस्यानाम् । श्रुतिवाक्यार्थस्तु सुषुप्त्यधिकरणे । भाष्योक्तोल्लङ्घन-

DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**श्रुतिविरोधात्। नचानादिरयं जीवब्रह्मविभागो बुद्धिकृतः। प्रमाणाभावात्।**

भाष्यप्रकाशः।

इत्यादि। द्वितीये स्वरूपनाश इति जीवत्वनिराकरणपक्षे जीवस्वरूपस्याविद्यात्वान्मुक्तावविद्यानाशे जीवस्वरूपनाश एव स्यात्, तथाचात्महानमपुरुषार्थ इति मोक्षस्यापुरुषार्थता च स्यात्। ननु वस्तुत आत्मनो ब्रह्मत्वाज्जीवत्वं तस्य कल्पितमतो न तन्नाशे स्वरूपनाश इत्यत आहुः जीवत्वमित्यादि। अत्र हि जीवशब्दोदितस्यात्मनो जीवस्यात्मनेत्युक्तेर्नामरूपकरणत्वं भाष्यते। तत्र यदि जीवत्वं कल्पितं स्यात् तदा ततः पूर्वं कल्पकः कश्चिद्वक्तव्यः। तत्र न तावद् ब्रह्मणस्तथात्वम्, अविद्यासंबन्धराहित्यात्। न तावज्जीवस्य, कल्पनाविषयत्वात्। सृष्ट्यादौ जीवान्तरस्याभावात्। जडस्य तु न तथात्वं, प्रत्यक्षविरोधात्। यदि तु तेजआदिदेवतायाः कल्पकत्वं शङ्क्यते तदा तस्यापि जीवत्वात् तस्य कः कल्पकः। तस्मात् कल्पकनिर्वचनाशक्त्या जीवस्याकल्पितत्वमेवास्थेयम्। अन्यथा, अनेन जीवेनेति, द्वा सुपर्णा इति श्रुत्यन्तरे द्वयोर्देहपरिष्वङ्गश्रावणानुपपत्त्या च श्रुतिविरोधः। नच ब्रह्मत्ववज्जीवत्वमपि पाश्चात्यमिति शङ्क्यम् तथा श्रुत्यभावात्। सृष्ट्यादावनेन जीवेनेति सिद्धवन्निर्देशाच्च। अतः सृष्टेः पूर्वमपि भगवदङ्गवज्जीवरूपोंऽशोऽपि भगवदविभक्तस्तादृशनामादिविशिष्टो नित्य एवास्थेयः। नन्वनादिजीवब्रह्मविभागो बुद्धिकृत इति तथेत्यत आहुः। न चेत्यादि। न ह्यनादित्वे बुद्धिकृतत्वे वा प्रत्यक्षं प्रमाणीभवितुमर्हति, जीवब्रह्मत्वस्य कल्पितत्वेन तत्प्रत्यक्षस्य स्वाप्निकमायिकपुरुषप्रत्यक्षवत्, प्रामाण्यायोगात्, अत एव नानुमानादिरपि, श्रुतयस्तु तत्र विरुद्धा

रश्मिः।

मेवम्। श्रुतिसूत्रेषु कर्मकर्तृव्यपदेशोऽस्ति। ब्रह्मजीवयोरैक्ये तदुल्लङ्घनं भवत्येव। तदाहुरर्थत्यागेनेति। प्रगल्भत इत्यस्यार्थमाहुः धार्ष्ट्यमिति। धार्ष्ट्यं ब्रह्मसंगोपनम्। धृष्टिरसि ब्रह्म यच्छेति श्रुतेः। मा संगोपय धार्ष्ट्येनेति भावः। तत्र हेतु परस्मैपदेनोच्यते। परप्रतारणाय धार्ष्ट्यं करोतीत्यर्थः। स वक्तव्य इत्यादीति। श्रुतिवाक्यानि जीवविषये त्वयाऽऽम्नातानि जीवचैतन्यस्य नित्यत्वाय। परस्य हि ब्रह्मणः कादाचित्कं चैतन्यमुपाधिना जीवत्वे भवति नैयायिकमते तद्वारणाय। तत्र ब्रह्मवाक्यानि विस्फुलिङ्गवत्तिप्रतानि ब्रह्मत्वं प्रतिपाद्यते। यतो नोत्पद्यतेऽतो ज्ञो जीवः ब्रह्म प्रथमसूत्राद्ब्रह्मेत्यनुवर्त्येति वा, ब्रह्मत्वाप्रतिपादिते चैतन्यं नित्यं तच्च व्यावहारिकमित्येवं जीवत्वं निराक्रियते इत्यर्थः। अग्रे स्पष्टम्। संभवादिकल्पो भाष्ये। अविद्येति बुद्ध्यादिनाशे। जीवत्वमित्यादि भाष्यं विवृण्वन्ति स्म नन्विति। तन्नाशे कल्पितनाशे। अनेनेति। व्याख्येयमिदम्। व्याकुर्वन्ति स्म अत्रेति। 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति श्रुतौ तद्द्वारा प्रवेशद्वारा। तेन तदिति। कल्पितेन जीवेन नामरूपव्याकरण-कार्यमिति द्वयम्। नहि रजतेन किंचित्कर्तुं शक्यत इति। न चेत्यादिभाष्यं विवृण्वन्ति स्म न चेति। बुद्धीति। 'बुद्धेर्गुणेनात्मगुणेन चैव, आराग्रमात्रो ह्यपरोऽपि दृष्टः' इति श्रुतेः। प्रमाणेति। व्याख्येयम्। व्याकुर्वन्ति स्म नहीत्यादिना। प्रमाणीति आराग्रमात्रजीवप्रत्यक्षं अप्रमाणं प्रमाणं भवितुमर्हतीति प्रमाणीभवितुमर्हति। कल्पितविषयकत्वाद्बुद्धिविषयकत्वाच्च। प्रत्यक्षस्येति। अहं ब्रह्मासीति प्रत्यक्षस्य तत्त्वमसीति वाक्यजन्यस्य। प्रामाण्येति। उक्तप्रत्यक्षप्रमात्वायोगात्। भावे ल्युट्। करणेऽपि ल्युट् व्याख्येयः पक्षान्तरे। अत एवेति। प्रत्यक्षाभावादेव नानुमानादिः हेतुप्रत्यक्ष एवानुमानोपमानयोः प्रवृत्तिरिति भावः। शब्दोपि न मानमित्याहुः श्रुतय इति। अप्ययमिति पदच्छेदः। इदं सादित्वं न करा-

RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति श्रुतिविरोधश्च । नच जीवानादित्वं

भाष्यप्रकाशः ।

लिङ्गमवुच्युचरणं ब्रह्मण्यप्ययं चाभिदधत्यो जीवब्रह्मविभागस्य सादित्वमेव बोधयन्ति, नच न कर्माविभागादिति चेन्नानादित्वादिति सूत्रे कर्मानादित्वबोधनेन विभागानादित्वं; पुण्यः पुण्येनेति तद्विषयश्रुत्या बोधितप्रायमेवेति वाच्यम्, श्रुतौ सदसत्कर्मणा सदसद्देहभवनमात्रबोधनेन विभागानादित्वस्याबोधनात् सूत्रेऽनादित्वकथनस्य कर्मसापेक्षतया करणेऽपीश्वरस्यानीश्वरत्वाभावबोधनार्थत्वावसायात् । अन्यथा, 'एष ह्येव साधु कर्म कारयती'त्यादिश्रुतिविरोधस्यापरिहाराद् वैषम्याद्यभावस्य तदनन्यत्वादेव सिद्धेश्च । नच तत्र संसारानादित्वव्याख्यानं युज्यते, तथा सतीश्वरस्यानीशत्वं, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति श्रुतिविरोधश्च, संसारहेतुभूताया अविद्याया जीवानां च सत्त्वात् । एतदेवोक्तं सदेवेत्यादिना । नच सा असतीति युक्तम्, तथा सति तया संसारासंभवापत्तेः । नापि सदसद्विलक्षणेति । तथा सति ब्रह्मानतिरेकापत्तेः 'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते' इति गीतावाक्यात् । कल्पितजीवानादित्वमप्येतेनैव निरस्तम् । अतो विभागानादित्वमप्रमाणकमेव । किंच । बुद्धिकृत इति कस्य बुद्धिकृतम् जीवस्य ब्रह्मणो वा स्वस्यैव वा । तत्र न तावदाद्यः ।

रश्मिः ।

चिदनीदृशं जगदिति जैमिनिमताख्यातॄणां शंकराचार्यमतस्थानां नास्त्यतो वक्ति न च नेति । अस्य प्रथमपादोपान्त इदं सूत्रम् । अर्थस्तु स्फुटः जीवेश्वरविभागजनकं कर्म । तद्विषयेति । ते हि वैषम्यनैर्घृण्याधिकरणं त्रिसूत्रमङ्गीकुर्वन्त्यतस्तद्विषयश्रुत्या पुण्येन कर्मणेत्यर्थात् । सिद्धान्ते तु सर्वोपेता चेत्यधिकरणं अष्टसूत्रम् । तेषां तु सर्वोपेता चेत्यधिकरणं द्विसूत्रम् । न प्रयोजनवत्त्वाधिकरणं द्विसूत्रम् । वैषम्यनैर्घृण्याधिकरणं त्रिसूत्रम् । सर्वधर्माधिकरणमेकसूत्रम् । सदेवेति । मात्रया कर्मानादित्वविभागानादित्वव्यवच्छेदः । अनादित्वपदतात्पर्यमाहुः सूत्र इति । जीवानादित्वकथनस्य । करण इति । जीवानां सुखिनां दुःखिनां च करणे । अनीश्वरेति । कर्मसापेक्षतयाऽनीश्वरत्वं प्राप्तं तन्निषेधान्नञ्भावद्वयम् । सापेक्षमपि कर्त्रीश्वर इति माहात्म्यमिति वैषम्यनैर्घृण्यसूत्रभाष्यात् । अन्यथेति । जीवेभ्यः कर्मसापेक्षसुखदुःखदानेऽनीश्वरत्वे । एष ह्येवेति । अत्राविद्यादीनां कर्मकारयितृत्वव्यवच्छेदस्यावश्यकत्वेन तद्बोधकमन्ययोगव्यवच्छेदकैवकारान्ते इतिशब्दप्रयोगः । श्रुतिस्तु 'एष ह्येव साधु कर्म कारयति' इत्यादिः । नन्वेवं सति कांश्चित्सुखिनः कांश्चिद्दुःखिनश्च कुर्वद्विषमं निर्घृणं च स्यादित्यत आहुः वैषम्येति । तदनन्येति । जगतो ब्रह्मानित्यत्वादेव ब्रह्मणि सिद्धेश्च सदेव सोम्येति भाष्यं विवरणमाहुः न च तत्रेति । सौत्रेऽनादित्वपदे । शंकराचार्याणामिति पूरणीयम् । व्याकुर्वन्ति स्म तथा सतीति । चकारार्थं पूर्वमाहुः ईश्वरस्येति । तादृशव्याख्याने तृणावर्तवत्स्वतः कर्मणैव जगत्परिभ्रमणे ईश्वरस्य फलदातृत्वाभावादनीशत्वम् । सदेवेति । इतरव्यावर्तकस्यैवकारस्य विरोधः । युक्तमिति । तथा चासत्यतयाकल्पितैर्जीवैश्च द्वैताभावाच्च श्रुतिविरोध इति भावः । न च सदसतीति वाच्यम् । द्वैतभिया सत्त्वं व्यावहारिकमिति शुक्तिरजतस्य कार्यकारित्वप्रसङ्गात् । अप्रमाणकमिति । न विद्यते प्रमाणमस्मिन्निति बहुव्रीहिः । केचित्तु नलोपो नञ इत्यस्य न बहुव्रीहौ प्रवृत्तिः । उत्तरपदे परतो नञो नस्य लोपः स्यादिति वृत्तावुत्तरपदशब्दस्य मुख्यसमासचरमावयव एव रूढेरित्याहुः । न च बीजाङ्कुरवत्प्रवाहस्यानादित्वादिति न कर्मसूत्रभाष्यविरोध इति

१. समासघटकपदार्थपरत्वं ।



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

ब्रह्म नास्ति । सर्वश्रुतिसूत्रनाशप्रसङ्गात् । यः सर्वज्ञः सर्वशक्तिः । अयमात्मा अपहतपाप्मा । अधिकं तु भेदनिर्देशादित्यादिबाधः । तस्मात् तदंशस्य तद्व्यपदेशवाक्यमात्रं स्वीकृत्य शिष्टपरिग्रहार्थं माध्यमिकस्यैवायमपरावतारो नितरां सन्निरुपेक्ष्यः ॥ १८ ॥

इति द्वितीयाध्याये तृतीयपादे एकादशं ज्ञोऽत एव इत्यधिकरणम् ॥ ११ ॥

---

भाष्यप्रकाशः ।

जीवस्यैवाभावात् । द्वितीये तु बुद्धिकृतत्वाद् गतमनादित्वम् । तदा बुद्धिसत्त्वादद्वितीय-श्रुतिविरोधश्च । तृतीये त्वसंभव एव । तस्या जडत्वात् । अबुद्धिकृतपक्षे विभागस्य कृतत्वेऽपि जीवस्य सत्त्वादद्वितीयश्रुतिविरोध एव । नचैवं विभागस्य सादित्वे विस्मृतकण्ठमणिन्यायेन विस्मृतस्वस्वरूपं ब्रह्मैव जीव इति जीवातिरिक्तं ब्रह्म नास्तीति युक्तम्, सर्वश्रुतिसूत्रनाशप्रसङ्गात् । केषां नाशप्रसङ्ग इति चेत्, यः सर्वज्ञ इत्यादीनां बाधः । स्वीकृत्येति अंशत्वत्यागेन तथात्वं स्वीकृत्य माध्यमिकस्यापरावतार इति भगवदाज्ञप्तशिवावतारत्वेन

रश्मिः ।

वाच्यम् । 'उपपद्यते चाप्युपलभ्यते च' इत्युत्तरसूत्रेण तत्परिहारात् । अनेन जीवेनात्मनेति सर्गादौ जीवप्रयोगादनादित्वमिति । न चेत्यादि भाष्यं विवृण्वन्ति स्म नचैवमिति । विस्मृतेति । विस्मृतः कण्ठमणिर्येन सोऽपि पुरुष एवं विस्मृतं स्वस्वरूपं येन मायादिना तद्ब्रह्मैव जीवः । सर्वेति भाष्यविवरणम् । सर्वेति । य इति भाष्यमवतारयन्ति स्म केषामिति । विवृण्वन्ति स्म य इति । बाध इति । यत्तदोर्नित्यसंबधाद्ब्रह्मवाचको यच्छब्दः । सर्वशब्दार्थान्तर्गतजीवाज्ञानात्तथा । स्वारसिकस्याज्ञानाच्च जीवस्य तदतिरिक्तं ब्रह्म । सर्वशब्दार्थान्तर्गतजीवस्याशक्तित्वे सर्वशक्तित्वबाधः । जीवस्य सर्वशक्तित्वं प्रमाणविरुद्धम् । अयं जीवः पाप्मवत्त्वे प्राप्तेऽपहतपाप्मत्वम् । ब्रह्मणि स्वतःसिद्धमपहतपाप्मत्वम् । द्विव्यभिचयनाभाववत् । सूत्रबाधस्त्वधिकमित्यादिसूत्राणाम् । ब्रह्म न जीवस्यात्मामात्रं किंत्वधिकं भेदेन निर्देशात् । आदिशब्देन कर्मकर्तृव्यपदेशादिति सूत्रम् । भाष्ये तस्मादिति । सर्वश्रुतिसूत्रनाशात् । तदंशस्य ब्रह्मांशस्यांशइवाशस्तस्य तद्व्यपदेशो जन्ममरणव्यपदेशस्तस्य वाक्यमात्रं नोत्क्रान्त्यादिरर्थं स्वीकृत्य । तथा च जैमिनिसूत्रविरोधः । भारद्वाजश्रुतिसंचारः । यथा गङ्गायां घोष इति गङ्गाघोषवाक्यमात्रम् तथा । यद्वा तदंशस्येति स्वसिद्धान्तानुसारेणेति नोपचारः । तद्व्यपदेशवाक्यमात्रं ब्रह्मणो व्यपदेशमात्रं 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिषु एतादृशं ब्रह्मप्रकरणीयं जीवाप्रतिपादकं वाक्यमात्रं जीवप्रतिपादकत्वेन शिष्टा वैमनस्यं त्यजन्तो ग्रन्थं पश्येयुरित्येवं परिग्रहार्थं स्वीकृत्येत्यर्थः । तदपि शिष्टानां भक्तानां परिग्रहार्थमन्यथा जीवेशयोरैक्यं श्रुत्वा शिष्टा न प्रवर्तेरन् । बृहदारण्यके 'अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योऽहमस्मीति न स वेद यथा पशुरेव हि स देवानाम्' इति श्रुतिस्तूपास्याऽभेदविषया । अतएव चाक्षरं जगत् । पुरुषोत्तमस्तु तत्राधेयतया स्थित इति व्यभिचारिण्या भक्त्याधेयपुरुषोत्तमप्राप्तिः सा पुष्टिः मर्यादातो विपरीता । तदुक्तम्—पुरुषोत्तमप्रकरणे । 'न माला पुष्टिरूपा न तु मुद्रा न तु पौण्ड्रकम् । व्यभिचारेण या भक्तिरव्यभिचरतस्तु सा' इति ज्ञेयेत्यर्थः । अतः शिष्टेभ्यो ब्रह्मसंगोपनं तत्तु तदपरिग्रहे न स्यादतः शिष्टपरिग्रहार्थम् । माध्यमिक इति । बौद्धभेदेषु चतुर्थोयं सर्वशून्यवादी । शंकराचार्या अपि ब्रह्ममात्रास्तित्ववादित्वेन सर्वशून्यवादिन इत्या-



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

## उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥ ( २-३-१९ )

अत एवेति च वर्तते । स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति । ये के चास्माल्लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्तीति । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे । श्रुत्युक्तानामुत्क्रान्तिगत्यागतीनां

---

भाष्यप्रकाशः ।

प्रसिद्धे शंकराचार्ये माध्यमिकोऽप्याविष्ट इति तथा । एवं च सर्वावस्थासाधारण्येन ज्ञानधर्मा ज्ञानस्वरूपश्च जीव इति सिद्धम् । अत्रापि जीवो वैशेषिकवदज्ञोऽन्यथा, सांख्यवद् वेति सन्देहः । उभयथा श्रुतिः सन्देहबीजम् । यथाकथञ्चिदस्तु अस्मार्तत्वान् सांख्यमतमेवेति पूर्वः पक्षः । सिद्धान्तस्तूक्त एव । विचारस्तु गुणमुख एव, न तु स्वरूपमुखः । सूत्रे ज्ञशब्दप्रयोगादिति ॥ १८ ॥ इति एकादशं नोऽत एव इत्यधिकरणम् ॥ ११ ॥

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥ अतः परं जीवस्य शारीरकब्राह्मणे, 'स वा एष महानज आत्मा' इति, कौशीतकिब्राह्मणे च, 'योऽयं विज्ञानमयः पुरुषः प्राणेष्वि'ति व्यापकत्वमध्यमपरिमाणयोः श्रावणात्, श्वेताश्वतरे च, 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इति, 'बालाग्रशतभागस्य शतधा कल्पितस्य च, भागो जीवः स विज्ञेय' इत्यणुत्वश्रावणात्, संदेहे जीवस्य परिमाणं विचार्यते । तत्र सूत्रे एकं षष्ठ्यन्तं पदं, तस्य संबन्धः क्वापि न प्रतीयत इति तं बोधयन्ति अत इत्यादि कर्तव्यमित्यन्तेन । तत्र प्रथमं वाक्यं कौशीतकिब्राह्मणे प्रतर्दना-

रश्मिः ।

विष्टः क्षणिकत्वाच्चेति सूत्रेऽयं निराकृतः । स्वयं त्वीश्वरा रुद्रवत् । तथेति । माध्यमिकस्यैवायमपरावतार इति पाठे तु जगतो मिथ्यात्वाङ्गीकारेण प्रमाणचतुष्टयस्य लोकप्रसिद्धेश्च मिथ्यात्वाद्ब्रह्मण्यपि संदेहजननान्माध्यमिक एवेति ज्ञेयम् । अज्ञोति ज्ञानधर्मकं द्रव्यम् । ज्ञानाधिकरणमात्मा इति नैयायिकप्रवादात् । आगन्तुकचैतन्यः स्वतोऽचेतनः । आगन्तुकमात्मनश्चैतन्यमात्ममनःसंयोगजं जाग्रति अग्निघटसंयोगजरोहितादिगुणवदिति प्रथमम् । नित्यचैतन्ये हि सुप्तमूर्च्छितग्रहाविष्टानामपि चैतन्यं स्यात्ते पृष्टाः सन्तो न किंचिद्वयमचेतयामहीति जल्पन्ति स्वस्थाश्च चेतयमाना दृश्यन्तेतः कादाचित्कचैतन्यत्वादागन्तुकचैतन्य आत्मेति वैशेषिका मन्यन्ते । वैशेषिकाः काणभुजाः । सांख्यवदिति । ज्ञानात्मा । उभयथेति । ज्ञाज्ञौ द्वावजाविति विज्ञानं यज्ञं तनुत इति चोभयथा श्रुतिः । गुणमुख इति । चैतन्याकारः । ज्ञः चैतन्यस्वरूप इति भाष्यादेवकारः । स्वरूपेति चेतनमुखः । ज्ञशब्देति । अन्यथा चेतनशब्दप्रयोगः कृतः स्यादिति भावः । इतिरधिकरणसमाप्तौ ॥ १८ ॥

इत्येकादशं ज्ञोऽत एवेत्यधिकरणम् ॥ ११ ॥

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥ व्यापकत्वेति । योयमित्यत्र प्राणेष्विति सप्तमी व्यापकार्थे । जीव प्राणधारणे । विज्ञानमय इत्येकत्वविवक्षणात् । बालाग्रेति । वेदस्यात्मत्वाद्बालाग्रे इत्येनाग्रेतनोपपत्तेः । यद्वा बालः कृष्णाजिनम् । कृष्णाजिनं ब्रह्मेति बृहत्वादुपपन्नम् । अथ बालोऽप्यबालान्यापेक्षया स्थूलः भस्मीभूतस्तथा । आत्मत्वात्सर्वे शब्दा वेदे वा । यथा सौधाग्र्याः स्पृशन्ति विधुमण्डलमिति तथा । अत इत्यादीति । भाष्येऽनुवर्तत इत्यनुक्त्वा वर्तत इत्युक्त्या व्यासहृदि वर्तत इत्यर्थः । चकारादात्माप्यन्यथैकपदं सूत्रं न वदेदिति भावः । यद्वा धातूनामनेकार्थत्वं स्वमते

---

१. संहिता ।



RUPNATHJI ( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

धर्मत्वं प्रतीयते, प्राणधर्मत्वेनैवेक्षणे प्रतीयमानत्वात्, तदुत्क्रान्त्यैव स्वोत्क्रान्तिकथनेन स्वोत्क्रान्तेरौपचारिकत्वबोधनात्र तादृशज्ञापन एव पर्यवसानात् । नच कामो पुरुष

रश्मिः ।

श्रुत्या जानातीति ज्ञ इति व्युत्पत्तिरुक्ता । ततः तं विद्याकर्मणीति समारम्भः । ततः अन्यं नवतरमिति पित्र्यादिरूपाणि तनुत इत्युक्तम् तदनन्तरम् 'स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमय आपोमयः पृथ्वीमयः क्रोधमयोऽक्रोधमयो हर्षमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदं मयोऽदोमयः' इतीति । अयमिति चैद्यादौ प्रत्यक्ष आत्मा, अततीत्यात्मेति व्युत्पत्त्याणुः । अन्यत्रापि शरीरत्वं जीवः । जडेतरात्मत्वात् । वाक्यपदीये 'येनेन्द्रियेण यद्गृह्यते तेन तद्गता जातिस्तदभावश्च गृह्येते' इति जीवप्रत्यक्षम् । येनेत्युक्तव्युत्पत्तौ योगजधर्मप्रत्यासत्त्या 'अनागतमतीतं च' इति वाक्येन च यौगपद्यं बोध्यम् । तेन शोभनम् । तस्य ब्रह्मत्वोक्त्या फलप्राप्त्यायमणुः पन्थाः । यद्यप्यणुः पन्था इति श्लोकः कामय एवायं पुरुष इति स यथाकामो भवति तथा क्रतुर्भवति इति काम्यकर्मकर्ता । अथाकामयमान इत्यादिना सद्योमुक्तिस्तदग्रे वर्तत इति सद्योमुक्तिविषयः तथापि ब्रह्मत्वस्य । स वायमात्मा ब्रह्मेति । तथाकामयमानस्य पुनरावृत्तिः 'तस्माल्लोकात्पुनरेत्यास्मै लोकाय कर्मणे' इति श्रुतेरत्रापि कर्मणामात्मं सर्वात्मभावं निवेश्य पथित्वं समर्थनीयम् । भूमाधिकरणे भूमा ब्रह्म तल्लक्षणं लिङ्गभूयस्त्वाधिकरणे सर्वात्मभावस्येति । अकामयमानस्य 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' इति ब्रह्मसमशनात्पन्थाः । अत्र शारीरब्राह्मणमित्युक्त्या शारीरस्थितौ शारीराणामनुमानमार्ग्यत्वं 'अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिः' इति वाक्यात् । शारीरोऽपि त्रिधा क्षराक्षरपुरुषोत्तमभेदात् । क्षरोऽस्मदादिशरीरेषु, अक्षरो ब्रह्माण्डे, पुरुषोत्तम आकाशे । आकाशशरीरं ब्रह्मेति श्रुतेः । एवं चोक्तं 'तं त्वौपनिषदं पुरुषं पृच्छामि' इत्युपनिषन्मात्रवेद्यत्वविरोधः । अयं प्रमाणविरोधः । तथात्र शारीरकब्राह्मणे पितृयाणपन्थाः । 'तस्माल्लोकात्पुनरेत्य' इति श्रुतेः । एवं चावक्ष्यमाणस्य 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इति चरमसूत्रे देवयानपथो विरोधः । तदुभयनिराकरणाद्ध्यायार्थान्यासिर्न । शाब्दप्रत्यक्षमप्यर्थमनुमानैर्बुभुत्सन्ते तर्करसिका इति हेतोः । यथा महानसो वह्निमान् धूमादिति सिसाधयिषाविरहविशिष्टसिध्यभावरूपपक्षतासत्त्वात् । एवं चात्मवादे जीवोऽनुमानेन शरीरे मृग्यः (मृग्यः) । तद्दिशा ब्रह्माण्डेऽक्षरः सूर्यादीनां नेत्रत्वादित्वात् । तद्दिशैवाकाशे ब्रह्मानुमानम् । वियति विहंगम इत्यत्र विहंगमस्याकाशसमवायित्वात् न तस्य तज्जनकत्वम् । एवं वायोरपि न तज्जनकत्वं आकाशाद्बहिष्ठत्वात् एवमग्न्यादीनां बहिष्ठत्वम् । तथा च आत्मा आकाशवान् उपादानत्वात् यदुपादानकं तत्तद्वत् यथा मृत् । आत्मा उपादानं द्रव्यत्वात् कपालादिवत् । एवमाकाशशरीरं आत्मा मृग्यः । साध्यतावच्छेदकसंबन्धः समवायः, हेतुतावच्छेदकसंबन्धः स्वरूपः । अगत्या स्वत्वनियामकोपि संबन्धः । उत्क्रान्तेर्ब्रह्मधर्मत्वेन प्रतीत्यभावे हेत्वन्तरमाहुः तदुत्क्रान्त्यैवेति । प्राणोत्क्रान्त्या स्वोत्क्रान्तिः षोडशकलोत्क्रान्तिः । औपचारिकेति यद्यपि षोडशकलो जीवोऽणुरिति नोपचारिकत्वबोधनं तथापि शारीरब्राह्मणेऽयमात्मा ब्रह्मेति ब्रह्मत्वोक्तेरणुपथित्वं च व्यापकत्वात् । अतएव छान्दोग्ये 'पुरुषं सोम्योपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि माम्' इत्याद्युपदेशः । न चोत्क्रान्त्यनन्तरं ब्रह्मत्वम् । अविद्यां गमयित्वेत्युत्क्रान्तेः पूर्वं



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

स्वात्मना चोत्तरयोः ॥ २० ॥

उत्क्रान्तिगत्यागतीनां संबन्धे इन्द्रियादिभिः परिष्वङ्गोऽप्यस्ति । अतः संदेहोऽपि भवेत् । किमुपाधित एतेषां संबन्धो भवेत् स्वतो वेति. उत्तरयो-र्गत्यागत्योः, स्वात्मना केवलस्वरूपेण ।

'ऊर्णनाभिर्यथा तन्तून् सृजते संचरत्यपि ।
जाग्रत्स्वप्ने तथा जीवो गच्छत्यागच्छते पुनः' इत्येवमादिवत् ।

---

भाष्यप्रकाशः ।

इति भारद्वाजप्रश्ने इहैवान्तःशरीरे सौम्य स पुरुष इति पिप्पलादेनोत्तरितत्वात् तत्र चान्तःशरीरस्थत्वलिङ्गेन जीवाभिन्न एव स पुरुष इति [illegible], लिङ्गस्य ब्रह्मसाधारणत्वात्, गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यधिकरणे जीवब्रह्मणोरुभयोरपि गुहाप्रवेशस्य निर्णीतत्वादिति ॥ १९ ॥

स्वात्मना चोत्तरयोः ॥ २० ॥ ननु पूर्वं [illegible]वाणुत्वे सिद्धे अस्य सूत्रस्य किं प्रयोजनमत आहुः उत्क्रान्तीत्यादि । एतेषामिति, [illegible]त्यन्तानामर्थानाम् । स्वतो वेति एवंप्रकारिकायां शङ्कायां सूत्रमाहेति शेषः । व्याकुर्वन्ति उत्तरयोरित्यादि । अत्राप्यत एवेत्यनुवर्तते । तथाच श्रुतित एव स्वरूपेण गत्यागतिसंबन्धी प्रतीयतेऽतोऽणुरेवेत्यर्थः । ता एव श्रुतीः प्रदर्शयन्ति ऊर्णनाभिरित्यादि । आद्याया अन्यैरनुदाहृतत्वादाथर्वणप्रसिद्ध

रश्मिः ।

वचनात् । अन्यथा स वा अयमात्मा ब्रह्मेत्युक्त[illegible]तरं ब्रह्मत्वं नोक्तं स्यात् । लिङ्गस्येति अन्तः शरीरस्थत्वस्य । उभयोरिति । ननु सामानाधिकरण्यं न लिङ्गस्य ब्रह्मसाधारणत्वे कारणमिति चेन्न । भवस्त्वदिरौ छिन्धि इत्यत्र एकद्वेधीकरणस्य उभयत्रान्वयादत्र प्रवेशस्योभयत्रान्वयात् । ननु प्रवेशस्य उभयत्रान्वय उच्यते न तु लिङ्गस्येति चेत्, अन्तःशरीरस्थत्वस्य प्रवेशसाध्यत्वेनान्तःशरीरस्थत्वस्यापि साध्यतास्यसंबन्धरूपलक्षणया प्राप्तेः । न च प्रविष्टावित्यत्र लक्षणापत्तिरिति वाच्यम् । प्रविष्टेन्तः-शरीरस्थपदप्रयोगेणान्तःस्थपदेपि लक्षणाभावात् ॥ १९ ॥

स्वात्मना चोत्तरयोः ॥ २० ॥ उत्क्रान्तीत्यादिति । इन्द्रियादिभिरिति लिङ्ग-शरीरेण, आदिशब्देन विद्याकर्मपूर्वप्रज्ञाः अहंकारश्च, मनोमयकोशेन । 'येनैवारमते कर्म तेनैवामुत्र तत्पुमान्, भुङ्क्ते [illegible] लिङ्गेन मनसा स्वयम्' इति पुरञ्जनोपाख्याने वाक्यात्परिष्वङ्गोप्यस्ती-त्यर्थः । उपाधितः इति लिङ्गदेहात् । ननु जीवत्वविशिष्टोत्क्रान्त्यादिविवक्षायां जीवत्वविशिष्टो-त्क्रान्त्यादिर्यत्र तत्रात्मगामी यत्र त्वन्यलिङ्गविशिष्टोत्क्रान्त्यादिस्तत्र व्यापको जीव उत्क्रान्त्यादिर्गौणी-त्याकाङ्क्षायां लिङ्गविवक्षार्थं भाष्यमेतेषामित्याशयेन विवृण्वन्ति स्म गत्यन्तानामिति । शरीर-विस्मरणोत्क्रान्तिगतिरूपाणां येन केन लिङ्गेन विशिष्टानां शब्दानामर्थानामित्यर्थः । अत्र गतिर्न सौत्री, अपि तूत्क्रान्त्युत्तरगमनं गृह्यते । व्याकुर्वन्तीति ब्रह्मवैलक्षण्यार्थमुत्क्रान्तिपूर्वकत्वमु-क्तमिति भाष्यार्थं विहाय व्याकुर्वन्तीत्यर्थः । अन्यैः शंकररामानुजमाध्वैर्गत्यागतिविषये श्रुतीना-मनुदाहृतत्वं विज्ञाय न्यूनतापूर्तौ आद्यायाः श्रुतेः । आथर्वणेति ब्रह्मोपनिषत्प्रसिद्धः । जीवपदाजी-[illegible]रूपकः । दृष्टान्ते ऊर्णनाभिर्देहद्वारा स्वकितं सृजति यतः, ऊर्णा नाभौ यस्य । सृजत इति पद-[illegible] एवमग्रेप्यागच्छत इत्यत्र । जाग्रत्स्वप्न इत्येकवद्भावः जाग्रत्स्वप्नयोरित्यर्थः । कर्म तु हृदयम् ।



RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

**'अनेन जीवेनात्मनानुप्रविश्य' 'ब्रह्माऽप्येति' 'कामरूप्यनुसंचरन्'इति वा ।**

**भाष्यप्रकाशः ।**

आकार उक्तः । द्वितीया छान्दोग्ये । तृतीया बृहदारण्यके । चतुर्थी तैत्तिरीयाणां ब्रह्मोप-निषदि मुक्तिप्रकरणस्था, एवं श्रुतिचतुष्टयेन जीवस्य षडवस्थाः प्रदर्शिताः । तासु जाग्रत्सुषु-प्तिपरिच्छन्नेऽपि स्वप्न इन्द्रियाणां लयेन साक्षिण एव केवलस्य सत्त्वादुपाधिशून्यत्वं, सृष्टा-वप्येवमनुप्रवेशस्योपाधिसंबन्धघटकत्वादनुप्रवेशदशायां पूर्वं तदभावः । अप्ययः सुषुप्तेरप्युप-

**रश्मिः ।**

स एतास्तेजोमात्रा इति वक्ष्यमाणश्रुतेः । संहरतीत्यत्र संचरतीत्यपि पाठः । आकार इति । यथाशब्दघटितपाठे भाष्ये तु तथाशब्द इत्याकारः । भाष्ये लिपिपाठस्य दोषत्वात्तथा शब्दः । बाहुलकात् । अन्यथा दार्ष्टान्तिकान्तरापत्तिः । न तु बृहदारण्यकोक्तः । विरोधनिराकरणे वेदत्रय्याः प्रवृत्तेरात्मलिङ्गाच्च चतुर्थ आथर्वण उक्तः । बृहदारण्यके शारीरब्राह्मणसंबन्धाद्ब्रह्मोप-निषदिति भाष्यम् । बृहदारण्यकपाठस्तु 'स यथोर्णनाभिस्तन्तुनोच्चरेत् यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः' इति ब्रह्मलिङ्गकः । शंकरभाष्योक्तायां 'स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति । शुक्रमादाय पुनरेति स्थानम्' इति श्रुतौ गत्यागतिप्रतिपा-दिकायां । 'कस्मिन्नु रेतः प्रतिष्ठितं भवतीति हृदय इति' इति श्रुतेर्हृदयाच्छुक्रमादाय तु पुनरेति स्थानमित्यागतिः । अत्र दृष्टान्ताभावाद्ब्रह्मजीवविषयत्वस्पष्टनिर्णीतिर्न स्यादतोऽन्योदाहृता । तेजोमात्रा इन्द्रियाणि, शुक्रं प्रकाशकमिन्द्रियग्रामम् । स्थानं जागरितं स जीव आगच्छति । अन्ववक्रामति स्थापादौ गच्छति । अत्र भाष्ये । ब्रह्मोपनिषदित्युक्त्या शारीरकब्राह्मणविषयत्वात्पक्षान्तरेण श्रुतित्रय-मुक्तम् । प्रकृते । तृतीयेति श्रुतिः शारीरकब्राह्मणे अर्थस्तु 'मुमुक्षुरुत्क्रान्त्योर्भेदेन' इत्यस्य भाष्ये । मुक्तीति । नन्वत्र कर्तृसापेक्षश्रुत्युदाहरणे किं प्रयोजनमिति चेन्न । ब्रह्मैव सन् ब्रह्माप्येतीत्युक्तेः कर्तुः पूर्वोक्तस्यानुसंधानेनैव सिद्धेः । किंच । संसारावस्था मुक्त्यवस्था चेत्यवस्थाद्वयं तत्रावस्थान्तर्भावात् । तत्र पूर्वश्रुत्योः संसारावस्थावस्थिते गत्यागती उक्ते । मुक्तौ तु श्रुतित्रयेणोच्यते ब्रह्माप्येतीति ब्रह्मप्राप्तिः । येनाशयेन चतस्र श्रुतय उदाहृतास्तमाहुः एवमिति । षडवस्था इति जाग्रत्स्वप्न-सुषुप्तिब्रह्मसायुज्यसुषुप्तिमुक्तिरूपाः । तासु स्वात्मनावस्थितिमाहुः तास्वित्यादिना । उपाधीति लिङ्गदेहपरिच्छन्ने । लयेनेति 'यत्रैष सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति बृहदारण्यके दृप्तबालाकिश्रुतेरनुभवाच्च । साक्षिण इति । जननमरणानामाविर्भावतिरोभावज्ञानात्स्वयमेवमाविर्भावतिरोभावहीनः स्वयंज्योतिः स साक्षीत्युच्यते तदंशोऽपि साक्षीत्युच्यते 'नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्' इति स्मृतेः । जीवस्थितिस्तत्का पदेन । केवलस्येति । 'अत्रात्मा स्वयंज्योतिर्भवति' इति श्रुतेः । एवं जाग्रत्यपि केषांचित्केवलत्वमिति बोध्यमुक्तस्मृतेः । सृष्टाविति मायासंबन्धात्पूर्वं सोऽहमिति प्रतीतिद्वारासंब-न्धित्वात् । उपाधीति अनुप्रवेशत्वं नाम उपाधिसंबन्धमनुनिवेशत्वम् । उपाधिर्माया इन्द्रियाणि तन्मात्राणि । लिङ्गदेह इति यावत् । तस्य संबन्धो जन्यजनकभावः । पर्यङ्कश्च मुर्भवतीति श्रुतेः । स च ब्रह्मजीवविभेदेन स्वैकीभूतलिङ्गरूपोपाधिनोपाधेयजीवादेर्जन्यजनकभावः । तथा चानुप्रवेशाय जनयितुं योग्यं यज्जन्यं तज्जनकत्वमित्युपाधिसंबन्धघटकत्वम् । घटकत्वं प्रतीकत्वम् । तथा जन्यं लिङ्गशरीरं तद्धतज्जन्यमिदापि भिदा 'मायामात्रमनूद्य'इति वाक्यालिङ्गदेहजन्या तस्याः जीवेन विशेष्य-विशेषणभावः संबन्धः । अनुप्रवेशार्थं या भिदा तद्वाजीव इत्युपाधिसंबन्धप्रतीकत्वम् । यद्वा ।



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

लक्षकः, तत्राप्युपाधिलयात् कैवल्यम्, मुक्तौ तु प्राणोऽपि नास्ति बुद्धिरपि, तथाचैवमुक्त-

रश्मिः ।

अनुप्रवेशो भिदासाध्यः इत्यनुप्रवेशस्येच्छाया उपाधेरुक्तसंबन्धे तयोर्घटकत्वम् । घट चेष्टायां चेष्टकत्वम् । तथाहि । साकारं ब्रह्म 'यदेकमव्यक्तमनन्तरूपम्' इति श्रुत्युक्तं तदभेदो जीवानां सोहमिति प्रतीत्योक्तः सोऽभेदः सदानन्दादपि । कृषिर्भूवाचकः शब्द इति श्रुतेः तस्य जन्मादिकर्त्री शक्तिः तथा चिक्रीडिषयानन्दतिरोभावः तेन जीवभावः । चिदंशस्य व्यामोहिका शक्तिः चिच्छब्दः तस्य संबन्धे व्यामोहकशक्त्याऽभेददशायां व्यामोहः । तेनाभेदतिरोभावः । किंचानुप्रवेशस्येच्छायाः उक्तोपाधिसंबन्धार्थं साकारब्रह्मणि सा चेष्टा यया सूक्ष्मदेहस्य क्रियया योपादानं तेनोपाधिसंबन्धस्तस्याः कर्तृत्वम् । यथेश्वरसिसृक्षया परमाणुषु चेष्टा । इदमनुप्रवेशस्येच्छायाः उपाधिसंबन्धघटकत्वम् । तस्मादभेदतिरोभावोपि सोहमित्यत्र प्रतीतौ । भिदासंबन्धस्याभेदभघटकत्वं प्रसिद्धम् । तज्जनकलिङ्गदेहसंबन्धस्य च साकारब्रह्मणि स्वरूपभूते वार्थस्य भेदरूपेण परिणामकत्वम् । तदा तत्सृष्ट्वा तदनुप्रवेशो भवति । अन्यथाऽप्रवेश एव । किंचोक्तहेतावनुप्रवेशदशायां तद्दशायाः पूर्वं तदभावः अभेदाभावः । लिङ्गस्य, पञ्चमहाभूतोत्पत्तेः प्रागुत्पत्तेः 'अन्तरा विज्ञानमनसी' इति सूत्रे समर्थनात् 'न वियत्' सूत्रे भाष्ये च समागमरूपजीवोत्पत्तेरुक्तत्वात् । एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्तीति कुण्डारवाक्ये पाठक्रमः । तथा च भिन्नेष्वर्थेष्वनुप्रवेश इति तथा । अभेदोत्तरं भेदे जाग्रत्स्वप्नावित्यवस्थात्रयं । अप्यय इति । ब्रह्मैव सन् कूटस्थः सन्नपिः' सहस्थिते जीवे ब्रह्म कर्तृ, एति, आविर्भवतीति । अप्ययः सुषुप्त्यधिकरणे कूटस्थस्तु सर्वोपनिषदि 'ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिस्थविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते' इति श्रुत्युक्तलक्षणकः । अष्ट गीतोक्ता भूम्यादयः । संख्यातात्पर्यमष्टस्वरूपाणि । सुषुप्तेरिति । जीवे ब्रह्माविर्भावः जीवे सुषुप्तिरिति सामानाधिकरण्येनोपलक्षकः । सुषुप्तिर्हि स्वप्नस्थविषयकज्ञानावान्तरभेदः । सुषुप्तिस्त्वकामरूपो भगवानिति भाष्यात् । तत्रात्मस्फुरणं स्वत एव 'अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हितानाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते' इति श्रुतेः । उपाधीति 'स भूतसूक्ष्मेन्द्रियसंनिकर्षं मनोमयं देवमयं विकार्यम् । संप्राप्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधं तेनात्मनात्मानमुपैति शान्तमानन्दमानन्दमयोवसाने' इति द्वितीयस्कन्धादप्यये उपाधेर्बुद्ध्यादेर्लिङ्गादेर्वा लयः । यदा न कस्यचन वेदेत्युक्तश्रुतेः सुषुप्तौ बुद्ध्यादिलयः । बुद्ध्यादिलयोत्तरमविल्लगुणयोगादप्युपलक्षक इति भावः । मुक्ताविति 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः' इति वाक्यात्स्वरूपावस्थानं मुक्तिस्तत्र । अपीति सामान्यतो बोध्यते । तत्र विशेषस्तु द्वितीयेनेत्यर्थः । मुक्तिभेदास्त्वत्र शारीरकोक्ताः । 'अयं पुरुष इद५शरीरं निहत्याविद्यां गमयित्वान्यं नवतरं कल्याणतर५रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वान्येभ्यो वा भूतेभ्यः । स वा अयमात्मा ब्रह्म' इत्यत्र तादृशस्य ब्रह्मत्वोक्तेर्मुक्तः । तनुत इत्यात्मोपनिषदात्मरूपाणि शरीराणि विस्तारयतीत्यर्थात् शाश्वरीत्या मुक्तः । उक्तात्मा वेदान्ते विज्ञानमयः । 'मनोमात्रमिदं ज्ञात्वा' इति वाक्यान्मनोमयः स च 'मनोमयं सूक्ष्ममुपेत्य रूपम्' इति

१. पदार्थसंभावनामपिः ।

RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

**अथवा, उत्क्रान्तिगत्यागतीनां जीवसंबन्ध एव बोध्यते, नाणुत्वम् । स्वात्मना**

भाष्यप्रकाशः ।

त्युक्तयोर्गत्यागत्योः केवलस्वरूपसाध्यत्वात् स्वतोऽणुरेवेत्यर्थः । अस्मिन् पक्षे स्वरूपैकाकारवैयर्थ्यमित्यरुच्या प्रकारान्तरेण सूत्रद्वयव्याख्यानमाहुः अथवेत्यादि । तथाच पूर्वसूत्रे

रश्मिः ।

वाक्याद्वेदे शब्दरूपः । संहितामते संबन्धी वाङ्मयः । अग्निमीळ इति अग्निर्वाग्भूत्वा मुखं प्राविशदिति च । यजुःसंहितायां प्रत्यक्षब्रह्म वायुमयः प्राणमयः । छान्दोग्योपनिषत्सप्तमाध्यायां चक्षुर्मयः । असुराणां 'तस्यै दिशे नमस्कृत्य'इति वाक्यात् । श्रोत्रविवरवृत्त्याकाशस्य दिग्देवताकत्वात् श्रोत्रमयः । वेदान्तिमते आकाशमयः आकाशशरीरं ब्रह्मेति 'छिद्रा व्योम्नीव चेतसः' इति च सिद्धान्तमुक्तावल्याम् । अन्यशब्दरूपः पञ्चमहाभूतान्तर्गतवायुमयः । पञ्चमहाभूतान्तर्गततेजोमयः । छान्दोग्यचतुर्थोपदेशरूपः 'अस्य सोम्य महतो यो मूलेभ्याहन्याज्जीवन्स्रवेद्'इत्यादिः । पृथिवी वा अन्नमिति श्रुतेरन्नमयः पृथिवीमयः । माया च तमोरूपेति श्रुतेश्च दुःखकन्धान्मायिकः क्रोधमयः । वेदान्ते क्रोधेतरज्ञानमयोऽक्रोधमयः । नित्यलीलायां हर्षमयः आनन्दप्राधान्यात् । भीष्मस्य धर्ममयः । कंसस्याधर्ममयः । 'सर्वं सर्वमयम्' इति श्रुतेः सर्वमयः । तन्मयः कुब्जायाः । यन्मयः भक्तानाम् । एतन्मयः सर्वेषाम् । 'भवतीनां वियोगो मे' इत्यत्र सर्वात्मना इति वचनात् । इदंमयः शरीरमयः । इदमस्तु प्रत्यक्षे रूपमिति कोशात् । अनिर्वचनीयोऽदोमयः 'यतो वाचो निवर्तन्ते' इत्युक्त्वा 'आनन्दमेतज्जीवस्य यज्ज्ञात्वा मुच्यते बुधः' इति श्रुतेः । तथा च श्रुतिः 'विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमय आपोमयः पृथिवीमयः क्रोधमयोऽक्रोधमयो हर्षमयो धर्ममयोऽधर्ममयः सर्वमयस्तदेतदिदंमयोदोमयः' इतीति । अग्रे उक्तरूपेषु पुण्यपापे निरूपयति यथाकारी यथाचारी तथा भवतीत्यादिः । ननु रूपतननं शरीरातिरिक्तमपि मानुषं वेत्युक्तेः तत्किमिति चेन्न । अत्रोत्क्रान्तस्य स वा अयमात्मा ब्रह्मेत्युक्त्या नादबिन्दूपनिषदुपतिष्ठते । 'प्रथमायां तु मात्रायां यदि प्राणैर्वियुज्यते । स राजा भारते वर्षे सार्वभौमः प्रजायते' इति । अत्र मात्रास्तिथयः । राजत्वादिकं यथाक्षं पित्र्यं वा गान्धर्वं वा इत्याद्युक्तं पित्र्यादिरूपमुन्नेयम् । अग्रे 'द्वितीयायां समुत्क्रान्तो भवेद्यक्षो महात्मवान्, विद्याधरस्तृतीयायां गन्धर्वस्तु चतुर्थिकाम्' । चतुर्थिकामित्यत्र सप्तम्या लुगम् । चतुर्थिका अमिति पदच्छेदः । 'पञ्चम्यामथ मात्रायां यदि प्राणैर्वियुज्यते । ऊषितः सह देवत्वं सोमलोके महीयते ।' ऊषितः स्त्रीभावं प्राप्त इत्याकाशवाणी । 'षष्ठ्यामिन्द्रस्य सायुज्यं सप्तम्यां वैष्णवं पदम् । अष्टम्यां व्रजते रुद्रं पशूनां च पतिं तथा । नवम्यां च महर्लोकं दशम्यां च ध्रुवं व्रजेत् । एकादश्यां तपोलोकं द्वादश्यां ब्रह्म शाश्वतम् । ततः परतरं शुद्धं व्यापकं निष्कलं शिवम् । सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः' इति । तत इति त्रयोदश्यादिषु । परब्रह्मविशेषणत्वाच्छिवं पुष्टिरूपसमर्पकम् । शिवमार्गे शिवरूपं परं ब्रह्म । तदा परस्य मायायाऽस्पष्टमतिः । शिवपदस्यान्यार्थकत्वे सोर्थः । विवृतः प्रवाहमार्गः । अग्रेऽप्ये खल्वाहुः काममय एवायं पुरुष इतीति । तत्र ध्यातृध्येयादिसत्त्वाद्विवृतप्रवाहमार्गे तेजोबिन्दूपनिषदुपतिष्ठते । दुःप्रेक्ष्यत्वादिगुणयोगात् । न 'अशून्ये शून्यभावं च शून्यातीतमवस्थितम्, न ध्यानं न च वा ध्याता, न ध्येयो ध्येय एव च' अन्यथा स्वांशानां नातीव मोहेच्छां कुर्यात् अतः कामपरा निरीश्वरा विराजो देहं स्वान् देहांश्च बहुमन्यन्तेऽसुराः 'असत्यमप्रतिष्ठं ते' इति



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

चोत्तरयोरित्यणुत्वम् । 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्' इति, उत्क्रमे गत्यतिरिक्ते स्वातन्त्र्याभावात् । स्वात्मना जीवरूपेण, चकाराद्विनियमश्च गत्यागत्योः संबन्धी जीव इत्यर्थः । अतो मध्यमपरिमाणमयुक्तमित्यणुरेव भवति ॥ २० ॥

---

भाष्यप्रकाशः ।

षष्ठ्यन्तपदमात्रप्रयोगात्, उक्तश्रुतिभ्यो ज्ञ उत्क्रान्तिगत्यागतिसंबन्धीति तत्संबन्धरूप एव धर्मो बोध्यते, द्वितीये तु ज्ञः श्रुतिभ्य एव स्वात्मनापि उत्तरयोर्गत्यागत्योः संबन्धीत्यणुत्वं बोध्यते, तदुपपादयन्ति, अङ्गुष्ठेत्यादि । तथाचोक्तस्मृत्या मध्यमपरिमाणत्वेन बोधितस्य जीवस्य 'अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः, बुद्धेर्गुणेन' इति श्रुत्युक्तबुद्धि-

रश्मिः ।

वाक्यात् । अथो खल्वित्युक्त्वाग्रे 'तदेव सक्तसह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इति तु कामयमान इतीति श्रुतिः । अत्र 'यथाकामो भवति तथाक्रतुर्भवति यथाक्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते' । तत्कर्म अभिसंपद्यते इति कर्मादिमार्गत्वान्मर्यादामार्गः 'वेदस्य विद्यमानत्वान्मर्यादापि व्यवस्थिता' इति वाक्यात् । नोऽश्रुजनककर्मकरणान्मुक्तिरिति कर्ममार्गे मुक्तिः 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयते' इति भागवद्वाक्यम् । कर्ममार्गेणाध्यात्मिकचित्तशुद्ध्या ज्ञानं आधिदैविकचित्तशुद्ध्या भक्तिः । अग्रे 'अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात्प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति' इति श्राव्यते । अत्र निष्कामाप्तकामौ विवरणे । अत्रैवेत्यस्याहरहर्जीवगमनयोग्ये एवेत्यर्थः । ब्रह्मेति श्रुत्यर्थ उक्तः । सुबोधिन्युक्तदिशा त्वत्रैवेत्यस्य यथोक्तेर्थे भक्त्या यत्स्वरूपं तत्रेत्यर्थः । 'यथाद्धिया' इति वाक्यात् । शारीरब्राह्मणत्वादहरहर्जीवगमनयोग्येर्थे भावना भक्तिमार्गीयस्य । तस्य तु स्वसेवां त्याजयित्वा शरीरसंबन्धकारणाद्देहसेवाप्राप्त्या तन्निवृत्त्यर्थं शरीरनिविष्टं रूपम् । अत्र साधननिवेशे मर्यादा तदभावे पुष्टिः । हृदयाद्बहिष्ठं वा ब्रह्मम् । सद्योमुक्तिरेषा मुक्तिरुक्ता सा अक्षरप्राप्तिरूपा न पुरुषोत्तमप्राप्तिरूपेत्याह अथायमिति । अनस्थिको ज्योतीरहितः । प्राज्ञः प्रज्ञ एव प्राज्ञः । ज्योतिषामुदयो यत इत्यनयोक्तः । आत्मा जीवः आनन्दांशषड्गुणानां तिरोभावात् । तथापि ब्रह्मैव, परं भविष्यतीत्यत आह लोक एवेति । अक्षर एव न परः । परस्याशरीरवत्त्वेन शारीराविषयत्वात् । अग्रे तदप्येते श्लोका । 'अणुः पन्था विततः पुराणः' इत्यादि । उत्क्रान्तीत्यादि भाष्यं विवृण्वन्ति स्म स्पष्टतया तथाचेति । अत एवेति चानुवर्तत इति भाष्ये चकारेण ज्ञ इत्यस्यावृत्तिर्बोधिता एवं चात एव ज्ञ उत्क्रान्तिगत्यागतीनामिति सूत्रं जातं तद्व्याकुर्वन्ति स्म उक्तेति । एवेति । अणुत्वव्यवच्छेदक एवकारः । बोध्यत इति । सामान्यतोऽणुत्वं विना बोध्यते तत्राणुत्वविशेषस्तु द्वितीयेनेत्यर्थः । स्वात्मनेति भाष्यं स्पष्टतया विवृण्वन्ति स्म द्वितीय इति । श्रुतिभ्य इति । अत्रापि 'ज्ञोऽत एव' इत्यनुवर्तते । अणुत्वमिति स्वात्मपदेन बोध्यते । ननु जीवो व्यापकोपीति चेन्न । नाणुरिति निषेधात् । व्याख्यातस्य निषेधो युक्तो नाव्याख्यातस्येति । उक्तस्मृत्येति । षष्ठस्कन्धे तु 'विकर्षन्तोन्तर्हृदयाद्दासीपतिमजामिलम्' इति पठ्यते । इयमान्वीक्षिकी स्मृतिः । अङ्गुष्ठमात्र इति । यः संकल्पाहंकाराभ्यां लिङ्गतत्कार्याभ्यां समन्वितः उपलक्षणेन 'अथान्तरात्मा नाम पृथिव्यापस्तेजोवायुराकाशमिच्छाद्वेषसुखदुःखकाममोहविकल्पना'



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.c

भाष्यप्रकाशः ।

गुणवैशिष्ट्यप्रतीतेर्गत्यतिरिक्ते उत्क्रमे स्वतो गतिसंबन्धित्वाभावात् तद्व्यतिरिक्ते प्रक्षेपनिर्गदा-युक्तस्थले स्वात्मना जीवरूपेण चकारादिन्द्रियैश्च यथासंभवं गत्यागत्योः संबन्धी जीव इत्यर्थो भवतीत्यत आत्मगुणेन चैव "आराग्रमात्रो ह्यपरोऽपि दृष्टः" इति पूर्वोक्तशेषात् तथेत्यर्थः ॥ २० ॥

रश्मिः ।

दिभिः स्मृतिलिङ्गैः उदात्तोनुदात्तः ह्रस्वो दीर्घः प्लुतःस्खलितगर्जितस्फुटितचित्रमुदितनृत्यगीत-वादित्रप्रलयविजृम्भितादिभिः श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः पुराणं न्यायो मीमांसा धर्मशास्त्राणीति श्रवणघ्राणाकर्षणकर्मविशेषणं करोत्येषोन्तरात्मा नामेत्यात्मोपनिषदुक्तैः समन्वितः सोङ्गुष्ठमात्रस्तथापि बुद्धेर्गुणेनेत्यौपाधिकी न स्वतः स्वरूपमित्यर्थः । प्रकाशे तु बुद्धे-र्गुणेनेति श्रुतिस्तदुक्तं बुद्धिगुणवैशिष्ट्यं तस्य प्रतीतेरुत्क्रान्तेर्लिङ्गदेहविशिष्टधर्मत्वेन, गतेः केवल-धर्मत्वेन गत्यतिरिक्त उत्क्रमस्तस्मिन्स्वतः लिङ्गदेहरहितः स्वरूपेणोत्क्रमसंबन्धित्वाभावात्तद्व्यतिरिक्ते उत्क्रमव्यतिरिक्त इत्यर्थः । ब्रह्मेति ऊर्णनाभिश्रुतौ जाग्रत्स्वप्नयोः स्वप्नस्थले आदिशब्देन छान्दो-ग्यस्थानेनेति श्रुत्युक्तानुप्रवेशस्थले । बृहदारण्यकस्थब्रह्माप्येतीति श्रुत्युक्तसायुज्यसुषुप्त्योः स्थले, तैत्तिरीयस्थकामरूपीत्युक्तमुक्तिस्थले च । एवं च सर्वत्रावस्थासु जाग्रत्येव लिङ्गदेहसत्त्वम् । पञ्चसु लिङ्गदेहशून्यत्वमिति सिद्धम् । चकारादिति । सर्वामुक्तावत्र ब्रह्मसायुज्यमिति लिङ्गरहितादेहा-ज्जीवगतिः । क्रममुक्तौ तु पारमेष्ठ्यादिं यास्यतो जीवस्य लिङ्गेन सह देहाद्गतिरत इन्द्रियैश्चेत्यर्थः । तदुक्तम् 'निर्भिद्य मूर्धन्विसृजेत्परं गतः । यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम् । अष्टा-धिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च'इति द्वितीयस्कन्धे द्वितीयाध्याये परं भगवन्तं गतः सायुज्यं प्राप्त इन्द्रियाणि विसृजेत् प्राणांश्च । न च 'इहैव समवनीयन्ते' इति वाक्यात्प्राणानामत्रैव स्वमूलभूतासन्यरूपेण स्थितिमिच्छन्ति तद्वाक्यं मुक्त्यन्तरपरम् । इहेति शब्दात् । अग्रेऽपि 'यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' इति शारीरक-ब्राह्मणे जीवन्मुक्तत्वेनापि विनियोगात् । अत्र तु अग्रे पवनान्तरात्मत्वे तेषां प्राणानामुपयोगः । 'योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम्'इत्यत्र 'यदि प्रयास्यन्नृप'इत्युक्तपारमेष्ठ्यादि-गमनसामर्थ्यं जीवस्य कृत इत्याकाङ्क्षायां पवनस्यान्तः आत्मा लिङ्गशरीरं येषामिति हेतुकथनात् । विसृजेदिति पदाच्च न जीवन्मुक्तिः । यथासंभवमिति संभवमनतिक्रम्य जीवन्मुक्तिसद्यो-मुक्तिक्रममुक्तिषु आद्ययोः स्वात्मना तृतीयस्यामिन्द्रियैर्गतिः । आगतिस्तु स्वात्मनैव नत्विन्द्रियैरि-त्येवं यथासंभवं गत्यागत्योः संबन्धी जीव इत्यर्थो भवतीत्यर्थः । नन्वस्तु स्वात्मनापि गतिः तथाप्यङ्गुष्ठमात्रत्वे श्रुत्युक्ताङ्गुष्ठमात्र इति अणुत्वे सूत्रं प्रमाणमुक्तं श्रुतिः किं प्रमाणमत आहुः अत आत्मेति स्वात्मनोपाधिना च गत्यागत्योः समर्थनात् । भाष्ये स्वात्मना केवलस्वरूपेणे-त्यत्रैवकाराभावात् । पूर्वोक्तेति । अङ्गुष्ठमात्र इत्याद्युक्तश्रुतिशेषात् 'अङ्गुष्ठमात्रो रवितुल्यरूपः कामाहंकारसमन्वितो यः । बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोऽपि दृष्टः' इति श्वेताश्वतरे । तथेति श्रौतोऽणुत्वमित्यर्थः । एवं चात्रोत्क्रान्तिगत्यागतीनां जीवसंबन्धः पूर्वसूत्र उक्त्वा चोत्क्रान्तौ लिङ्गदेहाविशिष्टत्वेऽपि उत्तरयोर्गत्यागत्योः स्वात्मनापि संबन्धात् ज्ञः आत्मगुणेन चैवेति श्रुतेरित्युक्तम् । तेन पूर्वोक्तोत्क्रान्तिगत्यागतीनां विशेष उक्तः । ननु श्रुतौ बुद्धेर्गुणेनात्मगुणेन चेति चकारेणाङ्गुष्ठमात्रे करणत्वमुभयोरणुत्वमात्रे वा भवतु कथं विभज्यैकैककरणत्वमिति चेन्न । चकारस्त्वर्थ इत्यदोषात् ॥२०॥



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.c

## नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥

जीवो नाणुर्भवितुमर्हति । कुतः । अतच्छ्रुतेः अणुत्वविपरीतव्यापकत्वश्रुतेः । 'स वा एष महानज आत्मा योऽयं विज्ञानमयः' इतिचेन्न ।

---

### भाष्यप्रकाशः ।

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥ अत्र भाष्यमतिरोहितार्थम् । विषयवाक्यं त्वाद्यं बृहदारण्यके शारीरकब्राह्मणे तत्र च प्रकरणं ब्रह्मण इति सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यत्र व्युत्पादितमतो ब्रह्माधिकारस्यम् । द्वितीयं कौशीतकिब्राह्मणे समाप्तौ तस्मादेवंविच्छान्तो दान्त इत्यादिना आत्मन्येवात्मानं पश्येदित्युपक्रम्य पठितं, तदग्रे च इदं ब्रह्मेदं क्षत्रमित्याद्युक्त्वा, इदं सर्वं यदयमात्मेति पठ्यते अतस्तथेति । तथाचान्यत्र जीवपरोऽपि

### रश्मिः ।

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥ अतिरोहितेति । भाष्ये अतच्छ्रुतेरित्यत्र नञर्थो विरोधो विपरीतशब्देनोच्यते । न तद् अणुत्वम् । अतत् अणुत्वाभावः । अणुत्वविरुद्धं अणुत्वविपरीतं यद्व्यापकत्वं तस्य श्रुतेरित्यर्थः । इतर इति । अत्रेतरदिति युक्तं विशेष्यनिघ्नत्वाद्यद्यपि तथापि—इतराधिकारादित्यत्रेतर आत्मा तस्याधिकारादिति पुल्लिङ्गेन समासोभिप्रेयते । तस्य च पुंस्त्वात् । स वा एष इत्यस्य बृहदारण्यकस्थत्वेनात्र 'यस्यानुवित्तः प्रतिबुद्ध आत्मे'त्यात्मनो विशेष्यत्वेन सूत्रप्रणयनावसरे व्यासस्य मन एव हृद्यारूढत्वात् । एतत्सूत्रविषयवाक्ये । न चेदं जीववाचकमिति शङ्क्यम् । 'अस्मिन्सन्देहे गहने प्रविष्टः स विश्वकृत्स हि सर्वस्य कर्ता' इति ब्रह्मलिङ्गात् रामानुजाचार्याणामपि संमतः । सन्देहे—सम्यग्देहे । गहने दुर्विभाव्ये । अतः पुल्लिग इतरशब्दः । तर्हि परं ब्रह्मेति त्यक्तुं शक्यम् । आत्मपदेनैव विशेष्यप्रदर्शनौचित्यादिति चेन्न । आत्मपदस्य कोशादौ बुद्धिमनआदिसाधारण्यादुपपादने तु गौरवम् । अतो जिज्ञासाधिकरणाधिकृतब्रह्मपदत्यागायोगात् परं ब्रह्मेत्येव विशेष्यप्रकरणेनेति । यथा शारीरकब्राह्मणे 'स यत्रायꣳ शारीर आत्मा'इति ब्रह्मप्रकरणे'नैवमेवायं पुरुष इदꣳ शरीरं निहत्य'इत्यग्रे पुरुषशब्दो ब्रह्मपर इति न तु जीवपर इति प्रतिपादितं सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यत्र । यथा वा सर्वं जानाति देव इत्यत्र देवपदं युष्मदर्थे प्रस्तावरूपप्रकरणात् । एवमत्र विज्ञानमयशब्दो योगेन ब्रह्मपर इति नियम्यते विज्ञानं जीवस्तत्प्रचुर आत्मा विज्ञानमय इति । इत्येवमतिरोहितार्थमित्यर्थः । इतरः परं ब्रह्म तस्याधिकार इत्युक्तं भाष्ये स एव कथमित्यपेक्षायां स्वरूपासिद्धिवारणायाहुः तत्र चेति । व्युत्पादितमिति । प्रथमाध्यायतृतीयपादसमाप्तौ व्युत्पादितम् । 'सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति' इति श्रुत्युक्तपत्यादिधर्माणां जीवेऽभावाद्ब्रह्मप्रकरणमिति । शांकरास्तु विरजः पर आकाशादिति श्रुतेर्ब्रह्माधिकारमाहुः । रामानुजा यस्यानुवित्त इति श्रुतेराहुः । द्वितीयमिति । योऽयं विज्ञानमयः प्राणेष्विति । शारीरके तु 'स वा एष महानज आत्माप्यजरोमरोऽभयोऽमृतः' इति पठ्यते । कथमत्र व्यापकत्वश्रुतिरत आहुः तदग्र इति । अतस्तथेति । सर्वत्र जीववाचकात्मशब्दस्याभिधानात्तथा व्यापकत्वेन श्रुतः । कुतोऽत्र प्रकरणं ब्रह्मण इति चेन्न । आत्मन्येवात्मानं पश्येदित्युपक्रमात् । आत्मनि जीवे मनसि वात्मानमीश्वरम् । 'य आत्मनि तिष्ठन्' 'स मानसीन आत्मा जनानाम्' इति श्रुतिभ्याम् । अन्येत्यादि भाष्यं विवृण्वन्ति स्म तथा चेत्यादि ।



RUPNATHJI( DR. RUPAK NATH)
www.astrology-tantra.com

इतराधिकारात् । इतरः परं ब्रह्म तस्याधिकारे 'महानज' इति वाक्यं प्रकरणेन शब्दाश्च नियम्यन्ते । अन्यपरा अपि योगेन ब्रह्मपरा भविष्यन्ति ॥ २१ ॥

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

'स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति' इति स्वशब्दोऽणुपरिमाणं जीवं बोधयति । न हि स्वप्ने व्यापकस्य वा शरीरपरिमाणस्य वा विहरणं संभवति । 'बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः

भाष्यप्रकाशः ।

विज्ञानमयशब्दोऽत्र विज्ञानप्राचुर्यं बोधयन्ब्रह्मपरः । प्राणेषु स्थितिस्तु ब्रह्मधर्म एव 'यः प्राणेषु तिष्ठन्' इत्यन्तर्यामिब्राह्मणात् ।

भिक्षुस्तु ना पुरुषो जीव इति यावत्, सोऽणुः । कुतः । उत्क्रान्तिगत्यागतीनां ताभ्यः स्वात्मना विशिष्टयोर्गत्यागत्योस्ताभ्य इत्येवं पूर्वसूत्रापेक्षितभाष्यानिर्देशमत्राङ्गीचकार । तन्न । पक्षबोधकपदवैयर्थ्यप्रसङ्गात्, ताभ्य इतिवद् आत्मपदस्याप्यनुवृत्तिसौकर्यात् । अतः पूर्वोक्तमेव व्याख्यानं युक्तम् ॥ २१ ॥

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥ उद्धृत्य वस्त्वन्तरं पृथक्कृत्य मानमुन्मानम् । भाष्यमत्रापि निगदव्याख्यातम् । स्वशब्दविषयवाक्यं बृहदारण्यके ज्योतिर्ब्राह्मणे । उन्मान-

रश्मिः ।

विषयवाक्ये विज्ञानेति मयटा । ब्रह्मपर इति 'यथाग्नेः क्षुद्रा' इति श्रुत्युक्त आत्मवाचकः । प्राणेष्विति योयमित्यस्याग्रे तिष्ठतीति क्रियापदाध्याहारात् स्थितिस्तु । तिष्ठतेरध्याहारे श्रुतिमाहुः य इति । तथा च विज्ञानमयश्रुतिरपि न ब्रह्मप्रकरणबाधिकेति भावः । उत्क्रान्तीति उत्क्रान्त्यादिसंबन्धिनीभ्यस्ताभ्यः श्रुतिभ्यः । एवमग्रेपि । पूर्वसूत्रेति पूर्वसूत्रयोरपेक्षितं यत्साध्यं सोणुरित्यत्र स इति पक्षः । अणुः साध्यं तस्य निर्देशम् । उत्क्रान्तिगत्यागतीनां ताभ्य इति स्वात्मना विशिष्टयोर्गत्यागत्योस्ताभ्य इति च हेतू । सूत्रशेषं तु सर्ववत् । पक्षेति नृपदवैयर्थ्येत्यर्थः अनुवृत्तीति नात्माश्रुतेरिति सूत्रान्मण्डूकप्लुत्या स्वात्मनेति सूत्राद्वानुवृत्तिसौकर्यात् । न च सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्रेत्युक्त्या दृष्टस्यात्मवाचकनृपदस्य सत्त्वान्नानुवृत्तिरिति शङ्क्यं 'स्वात्मना चोत्तरयोः' इति स्वशब्दं पश्यन्भगवान्व्यासो नृपदं न वदेदित्यत्र तात्पर्यात् । पूर्वोक्तमिति अणुत्वाभावसाध्यकं जीवपक्षकं अतच्छ्रुतिहेतुकम् । यन्नैवं तन्नैवं घटादिवदिति व्यतिरेक्यनुमानम् । एवकारस्त्वतच्छ्रुतेरिति प्रसिद्धहेतुविरोधात् ॥ २१ ॥

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥ वस्त्वन्तरमिति । श्रौतदृष्टान्तेन तावदवयविनोऽवयवमुद्धृत्य वस्त्वन्तरं सर्वादिकं पृथक्कृत्य । मानं मध्यमपरिमाणं तथा बालात् जीवमुद्धृत्य मानमणुरित्युन्मानम् । निगदेति स्वशब्देन व्याख्यातम् । ज्योतिर्ब्राह्मण इति । स्वयं निर्मायेति । न च स्वप्ने ईश्वरः कर्तेति जीवकर्तृत्वं कथमिति चेन्न । स समानः सन् जीवतुल्यः सन् ध्यायतीति तथोक्तम् । आत्मनो जीवस्य भगवानेव ज्योतिरिति 'सुषुप्त्युत्क्रान्त्योर्भेदेन' इति सूत्रभाष्याच्च । 'अत्रात्मा स्वयंज्योतिर्भवति' इति श्रुतेः 'स्वेन भासा स्वेन ज्योतिषा' इति । उभयं जीवतुल्यत्वात् । भाष्ये व्यापकस्येति तदेशमात्रावच्छेदेनेति बोध्यम् । शारीरेति शरीरधर्मत्वेन । परिमाणस्येति



DR. RUPAK NATH
RUPAK NATH
www.astrology-tantra.com

स विज्ञेयः' इति 'आराग्रमात्रो ह्यपरोऽपि दृष्टः' इति चोन्मानम्। चकारात् स्वप्नप्रबोधयोः संधावागतिदर्शनम् ॥ २२ ॥

**अविरोधश्चन्दनवत् ॥ २३ ॥**

अणुत्वे सर्वशरीरव्यापि चैतन्यं न घटत इति विरोधो न भवति

भाष्यप्रकाशः।

वाक्यद्वयं तु श्वेताश्वतरोपनिषदि पञ्चमाध्याये। संधावागमनदर्शनमपि ज्योतिर्ब्राह्मणे 'तस्य वा एतस्य पुरुषस्य' इत्युपक्रम्य 'संध्यं तृतीयं स्थानं तस्मिन् संध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं च' इति। अत्र जीवस्याणुत्वस्थापनेन श्रुतिगीतोक्ता जीवानां शास्यताऽपि सूचिता। तत्र हि।

'अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगता-
स्तर्हि न शास्यतेति नियमो ध्रुव! नेतरथा।
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्
सममनुजानतां यदमतं मतदुष्टतया'॥

इति श्लोके 'यदि सर्वगतास्तर्हि न शास्यतेति नियमः' इति तर्ककथनादणुत्वस्य भगवच्छास्यताघटकत्वबोधनेन 'ध्रुव नेतरथा' इति भगवतोऽणुत्वे जीवस्य व्यापकत्वे चोक्तनियमभङ्गव्युत्पादनार्थम् 'अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्' इति कथनाज्जीवतत्त्वं यन्मयमजनि तत् स्वकारणं ब्रह्मस्वरूपमविमुच्य किं नियन्तृ भवेदिति काक्वा नियन्तृत्वाभावबोधनेन काक्वनङ्गीकारपक्षेऽपि कारणमविमुच्य नियन्तृ भवेदिति कारणात्यागेन नियन्तृत्वाङ्गीकारे 'सममनुजानतां यदमतं मतदुष्टतया' इत्यनेन ब्रह्म सर्वत्र सममैकात्म्यवादेन सर्वत्र सममित्येवं ब्रह्म लक्षीकृत्य जानतां यन्नियन्तृत्वं मतदुष्टतया अमतमसंमतमिति बोधनेन चाणुत्वनियमत्वे दृढीकृते इति साऽपि सूचिता। एतेन ब्रह्मस्वरूपमादायैकात्मवादो जीवस्वरूपमादाय नानात्मवाद इति सिद्ध्यति। एतदेव, 'अंशो नानाव्यपदेशात्' इत्यत्र स्फुटीभविष्यति ॥ २२ ॥

**अविरोधश्चन्दनवत् ॥ २३ ॥** ननु जीवस्याऽणुत्वे जलावगाहादौ सकलशरीरव्यापिशैत्याद्यनुपलब्धिप्रसङ्ग इति शङ्कायामिदं सूत्रमित्याशयेन व्याकुर्वन्ति अणुत्व इत्यादि। तथाचैतद्दृष्टान्तेन एकदेशस्थत्वेऽपि सकलशरीरव्यापिशैत्याद्युपलब्धिः सामर्थ्यव्याप्त्या घटि-

रश्मिः।

तथा। उन्मानेति। उन्माने वालः केशः। 'कृष्णाजिनं ब्रह्म' इति श्रुतेर्ब्रह्मत्वादग्रभागस्य शास्त्रदृष्ट्या बृहत्त्वादभिवृद्धिः तथा शतभागे वालस्तस्य भागस्य शतधाकल्पनम्। अतोऽत्र शतधा कल्पितस्येति भागविशेषणम्। आराग्रं तु तोत्रप्रोतायःशलाका। संधाविति। भाष्ये चकारादित्यादिनोक्तम्। तस्य वा इति प्रकृतस्य वै प्रसिद्धस्य द्वे एव स्थाने भवतः एकमिदं परिदृश्यमानं जन्म जाग्रत्स्थानम्। द्वितीयं तु परलोकस्थानं सुषुप्त्याख्यं, न तु जन्मान्तररूपं, तयोः संधौ स्वप्नाभावात्। एवं च जाग्रत्सुषुप्त्योः संधौ भवं संध्यं तृतीयं स्वत्रयाणां पूरणं स्वप्नस्थानमित्यर्थः ॥ २२ ॥

**अविरोधश्चन्दनवत् ॥ २३ ॥** सकलेत्यादि। उपलब्धिर्ज्ञानं जीवे चैतन्यगुणत्वात्। तदभावाऽपि जीव इति तथा। हृदि जीवे उपलब्ध्यनुपलब्धिप्रसङ्ग इति भावः। यत्तु संयोगस्यावयविनिष्ठत्वादवयविनश्चैकत्वात्कृत्स्नत्वङ्निष्ठतामाहुस्तत्र संयोगस्याव्याप्यवृत्तित्वादतस्तेनाविरोधो न सिद्ध्यति तस्मादत्रासौ प्रकारान्तरमन्वेषणीयं तदाहुः सामर्थ्येति। स्वभावरूप-



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

**त्वचः एकत्वात् तत्र भवतु नाम, न तु प्रकृते तथा संभवतीति चेन्न । अभ्युपगमात् । अभ्युपगम्यते जीवस्यापि स्थानविशेषः । हृदि हि । हृदि जीवस्य स्थितिः । गुहां प्रविष्टाविति हि युक्तिः ॥ २४ ॥**

भाष्यप्रकाशः ।

व्याकुर्वन्ति चन्दन इत्यादि । भवतु नामेति कल्प्यमानं सामर्थ्यं भवतु नाम, न संभवतीति प्रत्यक्षेणैकदेशावस्थानस्यानिश्चयादनुमानेन साधने तु चैतन्योपलम्भरूपस्य कार्यस्य त्वग्वन्मनोवद्वा जीवस्वरूपव्याप्त्याऽपि संभवात् तस्य व्यभिचारितया हेतुत्वानुपपत्त्या न संभवति । हृदीति 'कतम आत्मा योऽयं विज्ञानमयः प्राणेषु, हृद्यन्तर्ज्योतिः पुरुषः' 'स वा एष आत्मा हृदि' 'हृद्येष आत्मा' इत्यादिश्रुतेरित्यर्थः । युक्तिरिति ब्रह्मभिन्नत्वेन हृदयप्रवेशे युक्तिः । तथाच चन्दनवज्जीवस्याप्येकदेशावस्थितेः शब्दाभिश्रये तस्य त्वगादिवत् स्वरूपव्याप्तेर्वक्तुमशक्यत्वेन

रश्मिः ।

स्म नन्विति । चन्दन इत्यादीति । उपहते केशश्मश्रुस्थित्वादि अवस्थितं चन्दनं न तथेति । अनुपहतत्वं त्वचि विवक्ष्यत इति भावः । किमवधिर्यते तैजस्यमित्यपेक्षायां तदाहुः सम्यक्तयेति । प्रत्यक्षगोचरत्वेनेत्यर्थः । तथा च प्रत्यक्षगोचरत्वं वैशेष्यमिति भावः । न संभवतीति प्रकृते तथा न संभवतीति प्रतीकमिदं मनसि स्थितम् । अनुमानेनेति जीवः व्यतिरेकवान् स्वाधिकदेशवृत्तिकार्यत्वात्, अणुत्वादिमत्त्वात्, गन्धवत् । जीव एकदेशवृत्तिः कार्योपलम्भात्, चन्दनबिन्दुवत् । अत्र कार्योपलम्भत्वेन देशवृत्तित्वेन व्याप्तिः । कार्यं चैतन्यचैत्यादि भाक्तं मुख्यं च । तेन दृष्टान्तेनासंभवः । हेतुतावच्छेदकसंबन्धस्तु स्वविषयाश्रयताख्यः । नैयायिकानां तु समवायाख्यः । तैरात्मनि ज्ञानोत्पत्तिरङ्गीक्रियते न मनसीति । मनोवृत्तयः कामः संकल्प इत्याद्युक्ताः । न मनोरूपाः । कामः संकल्प इत्युक्त्वा इत्येतत्सर्वं मन एवेति श्रुतौ मनोभेदान्वयेऽपि सप्तम्या लुक्स्वीकारात् । अभेदपक्षश्च नास्ति । त्वग्वदित्यादि । जीवः स्वरूपेण व्यापी कार्योपलम्भात् त्वग्वन्मनोवद्वेत्यनुमानान्तरेण जीवस्य स्वरूपेण व्याप्त्या हेतौ, किंच न तु सामर्थ्येन न वा गुणेनेत्यर्थः । अत्रापि हेतुतावच्छेदकः संबन्धः पूर्वोक्त एव । अपिशब्देनोक्तमेकदेशवृत्तित्वसाध्यककार्योपलम्भहेतुकानुमाने हेतुः साधारणः । साध्यमेकदेशवृत्तित्वं तद्वान् चन्दनबिन्दुस्तदन्ययोस्त्वङ्मनसोः स्वरूपेण देहव्यापिनोः कार्योपलम्भसत्त्वात् । कार्यं स्पर्शः शब्दश्च त्वचि सकलदेहावच्छेदेन स्वविषयाश्रयतासंबन्धेन कार्योपलम्भात्स्वरूपेण व्यापित्वं दृष्टम् । एवं तत एव हेतोराकाशस्य देहव्यापित्वमिति । तस्येति चैतन्योपलम्भस्य सामान्यतस्तु ग्रहणे कार्योपलम्भस्येत्यर्थः । व्यभिचारितयेति साधारणतया त्वङ्मनसोः साध्याभाववद्वृत्तितया । कतम इति । बृहदारण्यके ज्योतिर्ब्राह्मणे । कतम आत्मेतीति पाठः विज्ञानमयः पुरुषः प्राणेष्विति पाठश्च । ब्रह्मेति । प्रविष्टाविति द्विवचनाद्भेदः 'अनेन जीवेनात्मनानुप्रविश्य' इति वा यथालिखितपाठकस्य पाठकायश्चोद्योऽकः । भाष्ये युक्तिरिति सौत्रहिशब्दार्थः । यदि भिन्नः सन् प्रविष्टो न स्यादणुर्नस्यादिति । अणुत्वबोधकागमानुरोध्यन्यथाज्ञानरूपस्तर्कः । यद्वा श्रुतिः 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः' इति कठवल्ल्याम् । अर्थस्तु 'गुहां प्रविष्टौ' इत्यधिकरणे स्पष्टः प्रथमाध्याये द्वितीयपादे । छायातपौ सूर्यचन्द्रपृथ्वीछायाः । ज्योतिषे सूर्यचन्द्रग्रहयोः पृथ्वीछाया गच्छतीत्युक्तं पर्वणि । सूर्यचन्द्रपृथ्वीरूपब्रह्मभिन्नत्वेनेति भाष्यप्रकाशार्थः । युक्तिस्तूक्तैव हिशब्दार्थः । स्वरूपेति जीवस्वरूपेण व्याप्तेः ।



RUPNATHJI(DR.RUPAK NATH)
www.astrology-tantra.com

गुणाद्वाऽऽलोकवत् ॥ २५ ॥

जीवस्य हि चैतन्यं गुणः । स सर्वशरीरव्यापी । यथा मणिप्रभृतस्य कान्तिर्बहुदेशं व्याप्नोति तद्वत् । प्रभाया गुणत्वमेव स्पर्शाद्यभावात् ।

भाष्यप्रकाशः ।

चैतन्योपलम्भे तत्सामर्थ्यस्य हेतुत्वोपपत्तौ दृष्टान्तवैषम्याभावात् सामर्थ्येन व्याप्तिसाधनं युक्तमेवेत्यर्थः । अत्र पूर्वसूत्रादविरोधपदस्यानुवृत्तौ ह्यभ्युपगमादविरोध इति सूत्रान्वयो बोध्यः ॥ २४ ॥

गुणाद्वाऽऽलोकवत् ॥ २५ ॥ ननु भवत्वेवं सामर्थ्येनाविरोधस्तथापि वैशेषिकः कथं मंस्यते । स हि चैतन्यगुणकमात्मानं मन्यते । तस्य सकलशरीरे सुखाद्यनुभवात् तद्व्याप्त्येवेति निश्चीयते, गुणश्च गुणिमात्रवृत्तीति रूपरसादिष्वनुभूतम् । अतश्चैतन्यस्य तावद्व्याप्त्या सर्वशरीरव्यापी जीवात्मा मन्तव्यः । यदि हि चन्दनवत् सहदेवीजटावद् वा सामर्थ्येन व्याप्नुयात् तदा तस्य चैतन्यगुणो न सर्वत्रानुभूयेत । नच श्रुतिबलात् तथापक्षपातो युक्तः । तस्या हृदयं विशेषतो जीवस्य वृत्तिलाभस्थानमित्येतत्परत्वेन नेतुं शक्यत्वात् । प्रत्यक्षस्य तु वस्तुमात्रग्राहकत्वेनान्यथा नयनमशक्यम् । अतस्तस्य प्राबल्यान्न सामर्थ्येनाविरोधः शक्यवचन इत्याशङ्कायां प्रवृत्तमिदं सूत्रमित्याशयेनोपन्यस्य व्याकुर्वन्ति जीवस्य हीत्यादि । अत्राप्यविरोध इत्यनुवर्तते । तथाच बहुप्रदेशव्यापिमणिप्रभेवकान्तिवत् सर्वशरीरव्यापिचैतन्यगुणादविरोध इत्यर्थः । एवं व्याख्यानेन आलोकवदिति दृष्टान्तो बोधितः । ननु प्रभादृष्टान्तोऽनुपपन्नस्तस्या मणिजनितविरलसजातीयद्रव्यान्तरत्वात् सूर्यादिप्रभावदित्याकाङ्क्षायामाहुः प्रभाया इति ।

रश्मिः ।

तत्सामर्थ्यस्येति जीवसामर्थ्योपलम्भस्य चैतन्योपलम्भस्य । सामान्यतस्तु कार्योपलम्भस्य । अत्रेति समाधानसूत्रांशे । अविरोध इति दृष्टान्ताविरोधः तथा चानुपहतत्वगवस्थितेरवस्थितिविशेषत्वात् स्थानविशेषत्वात् दृष्टान्तविरोध इति चेन्न । अनुभवेन ह्यवस्थितेरभ्युपगमाद्दृष्टान्ताविरोधो हि युक्त्यापि स इति सूत्रार्थः ॥ २४ ॥

गुणाद्वाऽऽलोकवत् ॥ २५ ॥ वैशेषिक इति नैयायिकभेदः । आत्मानमिति द्रव्यम् । सुखादि सुखाद्यष्टगुणत्वमात्मनः । चैतन्यस्येति कार्यरूपं पूर्वमुक्तं चतुर्विधनित्यज्ञानमध्ये चतुर्थं जीवधर्मरूपमुच्यते तस्य । सहदेवीति 'ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथा' इति तन्त्रे । नचेति गुणस्य स्वाश्रयाधिकदेशवृत्तित्वाभावान्न सर्वत्रानुभूयेत । न चेति श्रुतिस्तु 'कतम आत्मा' इत्युक्त्वा । तथेति कार्यचैतन्येन जीवव्याप्तिपक्षपातः । शक्यत्वादिति कार्यचैतन्येन व्याप्तिबोधकपदाभावेन तथा । ननु श्रुत्यनुगृहीतप्रत्यक्षबलाद्धार्दजीवसामर्थ्येन व्याप्तियुक्तेत्यपेक्षया कार्यचैतन्येन व्याप्तिबोधकं पदं कलयित्वा नेतुमशक्यत्वं तस्या इति चेत्तत्राहुः प्रत्यक्षस्येति । अस्तु तथा कार्यप्रत्यक्षेण निर्वाहोऽर्थापत्त्या परं तुशब्दस्यानाप्तोक्तत्वेन गुणानुभवस्येत्यर्थः । वस्त्विवति । यथार्थमिति शेषः । प्रवृत्तमिति नैयायिकव्यापकत्वखण्डनाय प्रवृत्तम् । बहुहेति । एतदर्थं मणिश्च कान्तिसंबन्धवान् प्रवेकश्च कान्तिगुणः कान्तित्वविशिष्टः । अर्थ इति भाष्यानुसारी सूत्रार्थः । मणीति विरलत्वं प्रसृतत्वं साजात्यं च मणित्वेनान्यथा मणेस्तेज इतिवन्मणिस्तेज इति सामानाधिकरण्यप्रतीतिर्न स्यात् । मणिरत्र सर्वत्र व्याप्तकान्तिर्न तु कान्तिमान् द्रव्यं च । एवं प्रभाद्रव्यमपि । प्रभाया इत्यादीति । अपां पुष्पे सूर्यश्चन्द्रमाश्च

DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

श्रवणप्रक्रियाया अनेकशब्दतद्ध्वंसादिकल्पनया गुरुत्वात् । सिद्ध एकत्र गुणसंचारेऽन्यत्रापि

रश्मिः ।

रसगन्धरूपेषु द्रष्टव्यम् । तथाहि । घटादेर्हस्तेन स्पर्शे स्पर्शादयोऽपि स्पर्शेनैव हस्तसंबन्धिनः न तादात्म्येन । घटादिगतस्पर्शादीनां घटादिभिरेव तादात्म्यात् समवायसूत्रे समवायदूषणेन तादात्म्यस्वीकारात् । अन्यथा प्रत्यक्षविरोधात् । इदं तु ज्ञेयम् । शब्दादितादात्म्याद् द्रव्यमन्तर्बहिःशब्दाद्यतिरिक्तं न लभ्यते तदा रूपमादाय नास्तिकमते प्रवेशः । तद्वारणायान्यत्र निःशेषे रूपादिभिर्निर्वाहे द्रव्यं नावश्यकं परंतु वाय्वाकाशयोर्न द्रव्यमन्तरा निर्वाहस्तादात्म्येन शब्दस्पर्शातिरिक्तगुणाभावात् । न च ताभ्यामेव न द्रव्यापेक्षेति वाच्यम् । भूतसूक्ष्मावस्थात्वेन तयोर्द्रव्यानतिरेकात् । अत आभ्यामतिरिक्तस्थलेऽपि द्रव्यं मन्तव्यम् । विस्तरस्तु प्रस्थानरत्नाकरादावस्ति । स्पर्शहस्तयोः शीतादिग्राह्यत्वचा ग्राहकयोरुभयोरिन्द्रियान्तरचाक्षुषत्वेनोभौ चक्षुषा गृह्येते । स्पर्शस्तु स्पर्शत्वेन त्वाचः संयोगत्वेन चाक्षुषः । न तु स्पर्शान्तरमपेक्षते । स्पर्शस्यैव संयोगसंबन्धत्वात् । रसहस्तयोस्तु स्पर्श एव संबन्धः । द्रव्ययोरेव स्पर्शसंबन्ध इत्यस्य न विरोधः रसद्रव्ययोरत्यन्तमिलितयोः प्रविवेकाभावेन द्रव्यमादाय हस्तस्पर्शसंभवात् । संयोगसमवायान्यतरत्वं संबन्धत्वम् । तत्र तादात्म्याभावस्योक्तत्वात् । परमेतयो रासनत्वात्प्रत्यक्षेण स्पर्शहस्तावेव गृह्येते स च स्पर्शो घटरूपहस्तानां चाक्षुषोऽपि रसहस्तयोरपि वर्तते । रसादीनां रसनादिभिरिन्द्रियैर्घटादौ निश्चयात् । न च रसहस्तयोः संयुक्तसमवाय एव संबन्धः हस्तसंयुक्ते घटे रसतादात्म्यादिति वाच्यम् । रसनेन्द्रियेण रससिद्धौ तस्य हस्तेन स्पर्शे बाधकाभावात् । द्रव्यमिश्रणात् । ज्ञानमात्रं तस्य रसनाधीनम् । एवं गन्धेऽपि हस्तस्य स्पर्शः घ्राणेन गन्धज्ञानमात्रम् । न तु संयुक्तसमवायः रूपहस्तयोस्तु स्पर्शश्चाक्षुषः स्फुट एवेति सुधीभिराकलनीयम् । ननु नैयायिकास्तु नैवं मन्यन्त इत्याकाङ्क्षायां गौरवमाहुः नैयायिकीयेति । प्रक्रियात्वेवम् । शङ्खादिवायुसंयोगान्निमित्ताच्छङ्खाकाशसंयोगादसमवायिकारणात्केचन ध्वनय उत्पद्यन्ते । केचन तु ध्वनयः वेण्वादौ पाट्यमाने दलद्वयविभागान्निमित्ताद्दलाकाशसंयोगादसमवायिकारणादुत्पद्यन्ते । वर्णानुभवस्य यथार्थयोग्यजातत्वेन सर्वं ज्ञानं स्मृतिप्रायं तत्र विशेषस्तु तत्तत्कालीयवर्णविषयत्वमेतत्सहकारिकारणं वायौ कर्मजनने प्रयत्नस्तस्मिन् । जानातीच्छति यतत इति प्रवादात् । एवं च । वर्णास्तु स्मृतिविशेषसहकृतादात्ममनःसंयोगादात्मनि वर्णोच्चारणेच्छायां ततः प्रयत्ने चोत्पन्ने प्रयत्नवदात्मसंयोगात्प्राणादिवायोः कर्म ततस्तेन कर्मणा ऊर्ध्वं गच्छन्प्राणादिः कण्ठताल्वाद्यभिघातान्निमित्तात्कण्ठाकाशसंयोगादसमवायिकारणादकारादिक्षकारान्तानामनुक्तानां चोत्पत्तिं करोतीति कण्ठादिस्थाने ते उत्पद्यन्ते । शब्दश्चाकाशस्यैव गुण इति तत्तदवच्छिन्ने आकाश एवोत्पद्यते । उक्तेषु द्विविधेषु ध्वनिषु वर्णेषु चाद्या एव संयोगासमवायिकारणकाः । द्वितीयाद्यास्तु पूर्वशब्दासमवायिकारणकाः । प्रथमतः संयोगाद्विभागाद्वैकः शब्द उत्पद्यते । स च निमित्तवायुवेगानुसारेण कदम्बगोलकन्यायाद्दशदिक्षु दश शब्दानुत्पादयति तैश्च प्रत्येकं दश दश शब्दा उत्पद्यन्ते । वीचीतरङ्गन्याये तु एकैकशब्दस्यैवारम्भ इति विभुविशेषगुणानामसमवायिकारणत्वदैशिकत्वनियमेनाव्याप्यवृत्तित्वमेषामग्रिमाग्रिमशब्दनाश्यत्वं च कदम्बमुकुलक्रमेण वीचीतरङ्गक्रमेण वा कर्णशष्कुल्यवच्छिन्ने नभस्युत्पद्यमानः शब्दः श्रोत्रेण प्रत्यासन्नत्वाद्गृह्यते । भेरीशब्द एवायमिति प्रत्यभिज्ञातुं सोऽयं दीपस्तदेवौषधमित्यादाविव सजातीयत्वपुरस्कारादिति । अनेक-



DR. RUPNATHJI( DR. RUPAK NATH)
www.astrology-tantra.c

वेदोक्तत्वादस्य दृष्टान्तत्वम् 'यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वात्येवं पुण्यस्य

भाष्यप्रकाशः ।

तथा वक्तुं शक्यत्वात् । अतस्तस्य पृथिवीगुणत्वं विद्यादित्येवार्थः । श्रुतिरपि, 'यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वाति' इति । अत्र तदवयवासत्त्वनिरूपणार्थमेव दूरपदम् । यत्तु प्रसारितमुखस्य रसानुपलम्भे गन्धोपलम्भसामग्र्या एव प्रतिबन्धकत्वमिति कश्चिदाह तत् फल्गु । विजातीयगुणोपलम्भकत्वेन रूपेण प्रतिबन्धकत्वस्याशक्यवचनत्वात् । एककालावच्छेदेन नेत्रगोलकान्तस्त्वचा चक्षुषा च वह्न्यौष्ण्यरूपयोर्ग्रहणस्य सर्वजनीनत्वात् । गन्धोपलम्भकत्वेनेति चेन्न असिद्धत्वाद् वैपरीत्यस्यापि सुवचत्वाच्च । नच फलबलेन तस्याः प्राबल्यं कल्प्यत इति वाच्यम् । फलस्यास्मदुक्तरीत्यापि सिद्धेस्तस्या एव बलवत्त्वे नियामकाभावात् । क्षणान्तरे

रश्मिः ।

शब्दतद्ध्वंसादीति । आदिपदेन तत्प्रागभावविरामकल्पना । किंच । यावदन्तमेकैकशब्देन दशदशशब्दारम्भोऽप्रामाणिकत्वान्न युक्तः । अन्यच्च । अव्याप्यवृत्तित्वार्थमसमवायिप्रादेशिकत्वस्य कदम्बमुकुलादिन्यायविरुद्धत्वात् । प्रदेशान्तर एव कदम्बमुकुलयोर्वीचीतरङ्गयोर्दर्शनात् । किंच । कदम्बमुकुलन्यायेन दूरपर्यन्तमुत्पत्तौ तत्तदवान्तरदेशस्थानां शब्दानामश्रवणापत्तिः । वीचीतरङ्गन्यायेन मन्दोच्चारणेऽपि तारश्रवणापत्तिः । प्रथमवीची तदुत्तरोत्तरं द्वितीयादीनामाधिक्यदर्शनात् । शब्दे च तारत्वातिरिक्ताधिकस्याशक्यवचनत्वात् ( अल्पादेर्जनकत्वेन परिमाणस्य स्वोत्कृष्टपरिमाणजनकत्वेन) एतन्निष्ठबहुदेशव्यापित्वस्य परिमाणप्रयोजकत्वेन द्रव्यत्वगुणत्वहान्योरापत्तेश्च परिमाणाश्रयत्वे द्रव्यत्वं गुणे गुणानङ्गीकाराद्गुणत्वहानिश्चेति भावः । किंच । आद्यमध्यमशब्देषु कार्यशब्दनाश्यत्वस्यान्तिमशब्दे च सुन्दोपसुन्दवत्परस्परनाश्यत्वोपान्त्यध्वंसनाश्यत्वयोरन्यतरस्याप्रिमानुत्पादनेन चान्तत्वस्य वक्तव्यत्वान्निर्वाहायोत्पादकप्रतिबन्धकादृष्टादेश्च वक्तव्यत्वाद्गुरुतराप्रामाणिकानन्तकल्पनापत्तिरितीमे दोषाः । एकत्रेति गन्धे । संचारे स्वाश्रयाधिकदेशवृत्तित्वे । अन्यत्रेति शब्दे । अर्थस्तूक्तः । फलार्थ उच्यते अत इति । श्रुतिरपीति । गन्धस्य स्वाश्रयाधिकदेशवृत्तित्वे प्रमाणमित्यर्थः । दूरेति । अन्यथा सद्युक्तिविरुद्धं कुतो ब्रूयादिति भावः । एवेति । न त्ववयवरसाभावस्य प्रतिबन्धकत्वमित्यर्थः । विजातीयेति । रसोपलम्भसामग्री रसनारसवद्द्रव्यादिः । गन्धोपलम्भसामग्री घ्राणगन्धवद्द्रव्यादिः । एवंच घ्राणादौ घ्राणत्वादिरूपेण प्रतिबन्धकतायां कदापि रसोपलम्भानुत्पत्तिप्रसङ्गः । घ्राणत्वादीनां रसोपलम्भकालेऽपि सत्त्वात् । किंतु रूपान्तरेण तदपि न संभवतीत्याहुः विजातीयेति । रसत्वगन्धत्वादिना वैजात्यं बोध्यम् । एतादृशगुणोपलम्भकत्वं घ्राणादौ, नैयायिकास्त्वात्मन्याहुः तत्सर्वमागामिनि पादे प्राणाधिकरणे स्फुटिष्यति । ग्रहणस्येति । तथा चोक्तरूपेण प्रतिबन्धकत्वे चाक्षुषं स्पार्शनं वा न स्यादिति भावः । गन्धेति रूपेण प्रतिबन्धकत्वमिति बोध्यम् । तथा च त्वक्चक्षुषोर्न गन्धोपलम्भकत्वमिति चाक्षुषस्पार्शनयोरुपपत्तिरिति भावः । असिद्धेति । मृगमदभक्षणे गन्धरसयोरेककालावच्छेदेनोपलम्भस्य सर्वसाक्षिकत्वेन गन्धोपलम्भकत्वेन रूपेण प्रतिबन्धकत्वस्यासिद्धत्वात् । पद्मशतपत्रवेधवत्पौर्वापर्याज्ञानमभ्युपगम्यते इति चेत्तत्राहुः वैपरीतीति । वह्न्यौष्ण्यरूपग्रहणवदेककालावच्छेदेनोपलम्भस्यापि न वैपरीत्यसम्भावनेत्याशङ्कते न चेत्यादि । फलबलेन गन्धोपलम्भबलेन तस्याः गन्धोपलम्भकसामग्र्याः प्राबल्यम् । अस्मदिति । स्वाश्रयाधिकदेशवृत्तित्वेनापि । तस्या इति पूर्ववत् । नियामकेति । रसाश्रयावयवानां त्वन्मते सत्त्वादिति भावः । अस्मन्मते तु



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

रसोपलम्भप्रसङ्गाच्च । नच तद्गतरसादीनामनुद्भूतत्वमिति वाच्यम् । अनारम्भकेषु तेष्वनुद्भूत-रसाद्यङ्गीकारस्य प्रमाणरहितत्वादिति दिक् ।

नच मुहुः क्षालनादिना गन्धापगमतारतम्ये गन्धस्य सावयवत्वापत्तिरिति वाच्यम् । इष्टापत्तेः । नच स्पर्शवत्त्वापत्तिः । सावयवद्रव्यत्वेनैव स्पर्शवत्त्वेन व्याप्तेर्दर्शनात् । भूतसूक्ष्मरूप-त्वेनेष्टापत्तेश्च । एतेनारम्भकत्वमपि दत्तोत्तरं ज्ञेयम् । गन्धेनैव चन्दनस्पृष्टवायुपक्वशालिशाला-

रश्मिः ।

भगवदिच्छाभावाद्गन्धोपलम्भो न रसोपलम्भः । न च स्वाश्रयाधिकदेशवृत्तित्वेऽसदुक्तप्रतिबध्य-प्रतिबन्धकभावोस्त्विति शङ्क्यम् । अवयवनिर्गमजयोग्यतायाः प्रतिबध्यत्वाभावात् । अन्यथा न कदापि गन्धग्रहसमकालिकरसोपलब्धिः स्यात् । अस्माकं तु भगवदिच्छाया नियामकत्वाददुष्टं सूप-पन्नम् । रसोपेति । भोजनादौ तथानुभूतत्वादिति भावः । तद्गतेति निःसृतमृगमदावयवगते-त्यर्थः । तथा च प्रतिबध्यप्रतिबन्धकभावापेक्षेति भावः । अनेति आरम्भकपरमाणुषु तु प्रत्यक्ष-त्वाद्यापत्त्या तदनुपलब्ध्याख्यं प्रमाणमस्ति । किंच । कार्यगतगन्धादिदर्शनमपि प्रमाणम् । पाषाणे-ष्वनुद्भूतरूपगन्धे प्रमाणं परमाणुगन्धानुमानमेव, पृथिवीज्ञानजनकं च भस्मगन्धदर्शनं च हेतुः । पाषाणं गन्धवत् तत्कार्ये भस्मनि गन्धदर्शनात् । पत्रवदनुमानात् । 'यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदु-पादानोपादेयम्' इति व्याप्तेः । सावयवेति यतस्तारतम्यं क्षालनकृतयावद्यावदवयवापसारणानुरोधी-ति भावः । भूतसूक्ष्मत्वपक्षे त्वाहुः इष्टेति । द्रव्यत्वादिति भावः । स्पर्शवत्त्वेति सावयवत्वेन स्पर्शवत्त्वेन व्याप्तेरणुकादौ दर्शनाद् द्व्यणुके स्पर्शवत्त्वसिद्धिः । दर्शनादिति अणुकादौ दर्शनात् । गुणे चादर्शनाद्दृष्टान्ताभावान्न स्पर्शवत्त्वापत्तिरित्यर्थः । नन्वेवमपि स्पर्शवत्त्वापत्तिः भूतसूक्ष्मरूपत्वेन सिद्धान्ते द्रव्यत्वादिति कस्यचिदाशङ्कामुद्भाव्येष्टमापादयन्ति स्म भूतेति । भूतानां महाभूतानां सूक्ष्माणि रूपाणि तत्त्वेन । 'तामसो भूतसूक्ष्मादिः' इति तृतीयस्य पञ्चमाध्याये शब्दादिषु तत्प्रयोगः । हृदयदेशावच्छेदेन शब्दे स्पर्शोपलम्भः । न च गुणगुणिनोस्तादात्म्याच्छब्दहृदयदेशयोर्न संयोगः स्पर्शस्तु संयोगानतिरिक्त इति वाच्यम् । हृदयस्पृशः शब्दस्य भेर्यावत्यन्ताभिघातजन्यत्वेन भौमादित्वात्तत्तद्भौमादेस्तत्तच्छब्दस्य च तादात्म्येन हृदयतदतिरिक्तशब्दयोः संयोग एव । अन्यथा त्वनुभवो विरुध्येत । एवं रसस्य स्पर्शवत्त्वेनारम्भकत्वेन च व्याप्तिः पृथिव्यादिचतुष्टु दृष्टा शब्दादि-ष्वप्यापद्येत, न च द्रव्याद्यनारम्भकघटादौ साधारण्यमिति वाच्यम् । द्रव्यसमवायिकारणवृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वादित्याकाङ्क्षायामाहुः एतेनेति इष्टापादनेन । दत्तो-त्तरमिति आरम्भकत्वं दत्तमिष्टापत्तिरूपमुत्तरं यस्य तादृशम् । तथा च पौराणः क्रमः । भगवान्वै-कुण्ठस्थः सिसृक्षति तदा प्रकृतिं गुणत्रयसाम्यरूपामुपादत्ते, सा च भगवद्वीर्यं गृह्णन्ती महत्तत्त्वं ज्ञानक्रियात्मकं महद्द्रव्यं प्रसुनोति तत्र महत्तत्त्वमहंकारं प्रसुनोति । स चाहंकारस्त्रिविधः । सात्त्विको राजसस्तामसश्चेति । तत्र सात्त्विको मनः सात्त्विकान्देवांश्च राजस इन्द्रियाणि प्रसुनोति । तामसः शब्दं प्रसुनोति । शब्दः खम् । खं स्पर्शम् । स्पर्शोऽनिलम् । अनिलो रूपम् । रूपं ज्योतिः । ज्योती रसम् । रसोम्भः । अम्भो गन्धम् । गन्धः पृथिवीं प्रसुनोतीति । तदुक्तं तृतीयस्य पञ्चमाध्याये 'भगवानेक आसेदम्' इत्यादिना । एवं प्रातिलोम्येन लयक्रमः । एकादशे चतुर्विंशाध्याये 'अन्नं प्रलीयते मर्त्यमन्नं धानासु लीयते । धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते' इत्यादिनोक्तः ।



DR. RUPAKNATH
www.astrology-tantra.com

कर्मणो दूराद् गन्धो वाति' इति। अन्यथा कल्पना त्वयुक्तेत्यवोचाम ॥ २६ ॥

तथा च दर्शयति ॥ २७ ॥

हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय तस्यैव 'आलोमभ्य आनखाग्रेभ्यः' इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति ॥ २७ ॥

भाष्यप्रकाशः।

न्तरशैत्यं निम्बतरुविशेषसंपर्कशालिवातसंसर्गजमुखतिक्तत्वमपि व्याख्यातं ज्ञेयम्। नचैवं सर्वत्रातिप्रसङ्गः शङ्क्यः। उत्कटत्वानुत्कटत्वयोरेव तद्धर्मयोर्निर्गमानिर्गमनियामकत्वादिति संक्षेपः। तदेतद् हृदि कृत्वाऽऽहुः अन्यथेत्यादि। अवोचामेति पूर्वसूत्र एवेत्यर्थः ॥ २६ ॥

तथा च दर्शयति ॥२७॥ चैतन्यस्य गुणत्वे प्रमाणं दर्शयितुमिदं सूत्रमित्याशयेनोपन्यस्य विवृण्वन्ति हृदयायतनेत्यादि। एतद्विषयवाक्यं कौशीतकिब्राह्मणे। तत्र हि 'तं होवाचाजातशत्रुर्यत्रैष एतद् बालाके पुरुषोऽशयिष्ट यत्रैतदभूद्यत एतदागात्' इति प्रतिज्ञाय, 'हिता नाम पुरुषस्य नाड्यो हृदयात् पुरीततमभिप्रतन्वन्ति' तद् 'यथा सहस्रधा केशो विपाटितस्तावदण्व्यः रश्मिः।

कार्यबलेनान्यत्रापि स्वाश्रयाधिकदेशवृत्तित्वमाहुः गन्धेनैवेत्यादि। गन्धदृष्टान्तेनैव। व्याख्यातमिति स्वाश्रयाधिकदेशवृत्तित्वेन व्याख्यातमुक्तप्रायमित्यर्थः। तथा च शैत्यादेः स्पर्शधर्मतया चन्दनस्पृष्टवायोः स्पर्शसत्त्वेन शैत्यस्पर्शवान्वायुस्तत्संपर्केः स्पर्शवत्त्वच्छालि शालान्तरमिति तस्य शैत्यं संयुक्तसंयोगसंबन्धेन। वायुतादात्म्यापन्नेन चन्दनशैत्येन शालान्तरस्पर्शात्। एवं निम्बतरुविशेष उत्कटतिक्तकस्तत्संयोगशाली वात इति निम्बरससंयुक्तत्वं भवति। तस्येति दृष्टं तादृशस्य मुखे संसर्गे तद्रसो रसनेन्द्रियेण गृह्यत इति सारः। एवं च स्पर्शरसगन्धरूपेषु स्वाश्रयाधिकदेशवृत्तित्वमुक्तम्। 'गुणाद्वालोकवत्'इत्यत्र रूपस्यात्र प्रमाणमिति तत्र सर्वेषां स्पर्शादीनां स्वाश्रयाधिकदेशवृत्तित्वमनुभवविरुद्धमापणादावित्यतिप्रसङ्गमाशङ्क्य वारयन्ति न चैवमिति। उत्कटत्वेत्यादि उत्कटत्वावच्छेदकस्पर्शत्वादित्वेन निर्गमत्वेन कार्यकारणाभावः। अनुत्कटत्वावच्छेदकस्पर्शादित्वेनानिर्गमत्वेन कार्यकारणभाव इत्यर्थः। संक्षेप इति विस्तरस्तु रश्मिरेवान्योप्यूह्यः। न च विद्वन्मण्डने गन्धमात्रातिरिक्तगतिमात्रकथने च संकोच इत्यत्र गन्धमात्रस्य स्वाश्रयाधिकदेशवृत्तित्वमुक्तं तद्विरोध इति वाच्यम्। गन्धस्यैव बुद्धिस्थत्वात्। अत एव सूत्रकारोपि सिद्धं दृष्टान्तमाहेमां शङ्कां परिहर्तुमनुपलब्धने व्यतिरेको गन्धवदित्युत्तरग्रन्थेऽस्य सूत्रस्यैव बुद्धिविषयत्वस्फोरणात्। अत एव ननु रूपरसादीनामप्येवमन्यत्रोपलम्भः स्यादिति चेन्न स्यादेवोपलम्भो यदि स्वाश्रयमपहायान्यत्र गच्छेयुरिति ग्रन्थः संगच्छते। एतदालोच्यैव गन्धेनैवेत्यादिग्रन्थ इति ज्ञेयम्। अन्यथेत्यादीति। अर्वाचीननैयायिकोक्ता, पूर्वोक्ता स्वाश्रयाधिकदेशावृत्तित्वे युक्तिरूपान्यथा कल्पना त्वयुक्ता उक्तयुक्तेरिति भाष्यार्थः। उक्तमिति लोकप्रतीतिस्त्वित्यादिनोक्तम् ॥ २६ ॥

तथा च दर्शयति ॥ २७ ॥ केत्याकाङ्क्षायामाहुः एतद्विषयेति एष चासौ विषय एतद्विषयस्तस्य वाक्यम्। बालाके इति संबोधनम्। अशयिष्टेति सुषुप्तोऽभूत्। यत्रैतदिति यत्र निमित्ते एतच्चैतन्यमभूत्। यत इति स्वप्रस्थानादेतच्चैतन्यम्। पुरीततमिति हृदयवेष्टनं पुरीतत्। अभिप्रतन्वन्ति अभितो निःसरन्ति। कृत्स्नशरीरं व्याप्नुवन्त्योऽश्वत्थपर्णराजय इव बहिर्मुखाः प्रसृता इति यावत्। विपाटितः विभागं प्रापितः। यस्य कस्यचित्केशो येन केनापि



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## पृथगुपदेशात् ॥ २८ ॥

**'प्रज्ञया शरीरं समारुह्य' इति करणत्वेन पृथगुपदेशाच्चैतन्यं गुणः ॥ २८ ॥**

**इति द्वितीयाध्याये तृतीयपादे उत्क्रान्तिगत्यागतीनामिति द्वादशमधिकरणम् ॥ १२॥**

भाष्यप्रकाशः ।

पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य कृष्णस्य पीतस्य लोहितस्य च तासु तदा भवति' इति हृदयायतनत्वं तादृशनाडीषु स्थानेनाणुपरिमाणत्वं चाभिधाय तस्यैव हृदयायतनस्याणोरात्मनः, स एष प्राण एव 'प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखाग्रेभ्यः' इति प्रज्ञात्मत्वोक्तिपूर्वकं प्रविष्टत्वकथनाच्चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति । अन्यथा अणोर्व्याप्तिर्नोपपद्येत । अतोऽणुत्वबोधनपूर्वकं व्याप्तिबोधनाच्चैतन्यं गुण एवेत्यर्थः । एवमेव बृहदारण्यके दृप्तबालाकिब्राह्मणेऽपि, 'एष विज्ञानमयः पुरुषः' 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति कथनाज्ज्ञेयम् ॥ २७ ॥

पृथगुपदेशात् ॥ २८ ॥ उक्तश्रुतौ विरुद्धधर्मबोधनात् सामर्थ्यमेवास्तु, न गुण इत्याशङ्कायामिदं सूत्रमित्याशयेन विवृण्वन्ति प्रज्ञयेत्यादि । इदमपि वाक्यं तत्रैवेतः पूर्वस्मिन्निन्द्रप्रतर्दनसंवादेऽस्ति । भाष्यं तु स्फुटार्थम् ।

एतेन जीवस्याऽणुत्वं सर्वावस्थासु । सर्वशरीरव्यापिचैतन्योपलम्भस्तु सामर्थ्याद्वा गुणाद्वेति साधितम् ॥२८॥ इति द्वादशमुत्क्रान्तिगत्यागतीनामित्यधिकरणम् ॥ १२ ॥

रश्मिः ।

प्रकारेण सहस्रधा विपाटितो भवति । यस्य विराजो वालाग्रस्य वा । केशस्य कृष्णाजिनं ब्रह्मेति श्रुतेर्ब्रह्मत्वाद्वा सहस्रधा विपाटनं संभवति । पिङ्गलस्येति पिङ्गलरूपसंबन्धिन्यः पिङ्गला इत्यर्थः । तृतीयार्थे षष्ठी वा, पिङ्गलेन शुक्लेनान्यैः पूर्णा इत्यर्थः । बृहदारण्यके ज्योतिर्ब्राह्मणे शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा इति दर्शनात् । अणिम्न इति अणुत्वेन षष्ठी तृतीयार्थे । तावदिति भिन्नं पदं 'सुपां सुलुक्' इति तृतीयाया लुक् । तावताणुत्वेनाण्व्य इति योजना । तावताणिम्ना तिष्ठन्तीति ज्योतिर्ब्राह्मणात् । शुक्लस्येति शुक्ला इत्यर्थः । एवं सर्वत्र । तास्विति पिङ्गलादिगुणविशिष्टासु नाडीषु । एवं च यत्र नाडीष्वेतदभूत्तत्र पुरुषोऽशयिष्ट । यत एतदागादिदं तु रत्वा चरित्वा पुनर्नव इवागाद्गिति श्रुत्यन्तरादर्थः । प्रज्ञात्मेति प्रज्ञा चैतन्यमात्मनि यस्येति । आत्मानमिति शरीरविशेषणम् । जीवं वा । आलोमेति लोमानि मर्यादीकृत्य, नखान्यभिव्याप्येत्यर्थः । 'पञ्चम्यपाङ्परिभिः' इति सूत्रेण पञ्चमी । अन्यथेति गुणत्वाभावे । चैतन्यस्य विसर्पितामावे च स्वभावतोऽणोः । प्राणानामिति प्राणेन्द्रियाणां विज्ञानं विषयप्रकाशनसामर्थ्यम् । विज्ञानेन स्वचैतन्येनादायेत्यर्थः गृहीत्वेत्यर्थः । ज्ञेयमिति विषयवाक्यम् ॥ २७ ॥

पृथगुपदेशात् ॥२८॥ विरुद्धेति तासु तदा भवतीत्यणुत्वमनुप्रविष्ट आलोमभ्य इति व्यापकत्वम् । सामर्थ्यमेवास्ति जीवस्वभाव एव । जीवत्वानन्तरं विरुद्धधर्माधारत्वाभावादेवकारः । न गुण इति जीवोऽव्यापकः चैतन्यं व्यापकमिति विरुद्धधर्माधारत्वं स्यादतो 'अविरोधश्चन्दनवत्' इत्येव साध्विति भावः । प्रज्ञयेत्यादीति कर्तुः सकाशात्पृथगुपदेशादित्यर्थः। प्रज्ञा चैतन्यमिति करणतृतीययोक्तम् । स्फुटार्थमिति । पर्वकृतवेदान्ताधिकरणमालानुरोधे त्वत्राधिकरणसमाप्तिः । तदा त्वस्मिन्पादे षोडशाधिकरणानि॥२८

१. रश्मिकारमते पादस्यास्य पञ्चदशाधिकरणानि, प्रकाशकारैः षोडशाधिकरणैः समापितः पादः । अस्माभिश्च प्रकाशे रश्मौ च [illegible] उपन्यस्तः । [illegible]

DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥ ( २-३-१३ )

ननु तत्त्वमस्यादिवाक्यैः परमेव ब्रह्म जीव इति कथमणुत्वमितीमामाशङ्कां निराकरोति तुशब्दः । तस्य ब्रह्मणो गुणा प्रज्ञाद्रष्टृत्वादयस्त एवात्र जीवे सारा

---

### भाष्यप्रकाशः ।

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥२९॥ [तुशब्दस्य शङ्कानिरासार्थत्वात् तद्व्याख्यानमुखेनैव सूत्रप्रयोजनं वदन्तः सूत्रं व्याकुर्वन्ति नन्वित्यादि । ननु परिमाणविषयिणी विप्रतिपत्तिस्तदा निवर्तते यदि जीवस्य ब्रह्मणः सकाशाद् भेदः संभवति स एव तु नास्ति ] ननु सकलशरीरव्यापिचैतन्योपलम्भादन्यत्रानुपलम्भाच्च प्राप्ते जीवस्य मध्यमपरिमाणतयाऽनित्यत्वे तत्परिहाराय पूर्वसूत्रोक्तमणुत्वं वाऽऽदरणीयम्, अथवा, तत्त्वमस्यादिवाक्येषु ब्रह्मत्वेन व्यपदेशाद् ब्रह्मतया व्यापकत्वं वेति संदेहे नित्यत्वस्य व्यापकत्वेऽपि संभवाद्, ऋष्यन्तरैरपि भोगव्यवस्थया व्यापकत्वाङ्गीकारात् सकलशरीरगतचैतन्योपलम्भस्यान्यत्रानुपलम्भस्य च जातिवदुपपत्तेरुत्क्रान्त्यादीनामुपाधिवशादपि संभवादणुत्वाङ्गीकारे जीवमेवाभिसंधायोक्तानां तत्त्वमस्यादिवाक्यानामसामञ्जस्याच्च व्यापकत्वमेव ज्याय इति । ननु कथमसामञ्जस्यमिति चेन्मैवम् । छान्दोग्ये, 'ऐतदात्म्यमिदं सर्वं, तत् सत्यम्' इति सर्वस्य ब्रह्मात्मकत्वमुक्त्वा अग्रे 'स आत्मा तत्त्वमसि' इति सर्वसाङ्क्रमतया त्वंपदार्थस्य जीवस्य तत्पदसामानाधिकरण्यश्रावणेन कौशीतकिब्राह्मणसमाप्तौ च इदं सर्वं यदयमात्मेत्यभिधाय, स एष तत्त्वमसीत्यात्मावग्राह्यः । अहं ब्रह्मासीत्यहंग्रहश्रावणेन च तत्त्वमस्यादिवाक्यैः परमेव ब्रह्म जीव इति सिद्ध्यति तस्य च व्यापकत्वं 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतिशतैः सिद्धमतः कथमणुत्वमितीमामाशङ्कां परिहरतीत्यर्थः । जीवस्य ब्रह्माभिन्नतया व्यापकत्वस्यैव सिद्धत्वादिति प्राप्तम् । तत्र नित्यत्वस्याणुत्वेऽपि तुल्यत्वाजीवस्याणुत्वेऽपि ईश्वरेच्छयैव भोगव्यवस्थासंभवे भोगव्यवस्थया ऋष्यन्तरैरादृतस्य व्यापकत्वस्यासंगतत्वाद् अग्रे, अदृष्टानियमसूत्रे दूषयिष्यमाणत्वाच्च । अत एव जातिवद् व्यापकत्वस्याप्यसंगतत्वाद्, उत्क्रान्त्यादीनामप्युपाधिकृतत्वस्यापि स्वात्मना चोत्तरयोरित्यनेन निरस्तत्वात् तत्सर्वमुपेक्ष्य, तत्त्वमस्यादिव्यपदेशवाक्यान्येव विचारयन्तोवतारयन्ति नन्वित्यादि । तथा च तत्त्वमस्यादिवाक्यैः जीवस्य ब्रह्मरूपेण व्यापकत्वात् कथमणुत्वमितीमामाशङ्कां परिहरतीत्यर्थः । परिहारं व्याकुर्वन्ति तस्येत्यादि । प्रज्ञाया ब्रह्मधर्मत्वं 'प्रज्ञा च तस्मात् प्रसृता पुराणी' इति श्वेताश्वतरे सिद्धम् । द्रष्टृत्वादीनां गार्गीब्राह्मणे 'तद्वा एतदक्षरं गार्गि अदृश्यं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ' इत्यादिभिः । त एवात्र जीवे सारा इति तु इन्द्रप्रतर्दनसंवादे

### रश्मिः ।

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥ ननु परिमाणेति । तथा चेति सूक्ष्माणुपरिमाणं चेत्युक्तं तत्र मतान्तरेण व्यापकपरिमाणं प्राप्तं ततश्चाणुत्वमहत्त्वपरिमाणविषयकसंदेह इत्यर्थः । छान्दोग्य इति अष्टमप्रपाठके । सामानेति तत् त्वमित्येवं भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वश्रावणेन । अहमिति अस्मत्प्रत्ययश्रावणेन । तस्येति ब्रह्मणः । तस्मादिति शिवात् । अत्र यद्यपि य एको वर्णो बहुधा शक्तियोगात् वर्णाननेका-

---

1. प्रकाशकारैः श्रीहस्तलिखिते पुस्तके भाष्यमधिकं विवृतं स्थलान्तरेपि तथा दृश्यते तच [ ] इति चिह्नान्तर्निवेश्य अत्र मुद्रितमस्ति । रश्मिकारैः विशिष्टविवरण प्रतीकानि स्वकृतौ व्याख्यातानीति तन्मुद्रणमत्रावश्यकम् ।



RUPNATHJI( DR.RUPAK NATH )
w.astrology-tantra.c

इति जडवैलक्षण्यकारिण इति अमात्ये राजपदप्रयोगवज्जीवे भगवद्व्यपदेशः । मैत्रेयीति संपूर्णे ब्राह्मणे भगवत्त्वेन जीव उक्तः ।

ननु कथमन्यस्यान्यधर्मवत्त्वेन कथनम् । न हि निरूपणस्थल एवंप्रकारः

भाष्यप्रकाशः ।

'प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया प्राणं समारुह्य सर्वान् गन्धानाप्नोति' इत्यादिभिः । प्रश्नोपनिषदि गार्ग्यप्रश्ने 'एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः स परे अक्षरे आत्मनि संप्रतिष्ठितः' इत्यादिभिश्च । सारं प्रधानत्वं तच्च जडवैलक्षण्यकारित्वम् । अत्र यद्यपि 'सर्वं खल्विदं ब्रह्म' इत्यादौ जडेऽपि ब्रह्मपदप्रयोगस्तथापि भगवद्गुणानां तत्र सारत्वं नोच्यते किंतु तज्जलानिति विशेषणेन प्रस्तुतकार्यत्वमेव बोध्यते अतो धर्माणामेव जडवैलक्षण्यकारित्वमितीतरवैलक्षण्याद् यथाऽमात्ये राजकार्यकर्तृतया राजपदप्रयोग एवं जीवेपि भगवद्गुणसारत्वाद् ब्रह्मपदप्रयोग इति न तेनाणुत्वनिवृत्तिरित्यर्थः । अन्यथा पदार्थ-ब्रह्मांशत्वादीनां सर्वत्र तुल्यत्वात् केन जडवैलक्षण्यमस्य भवेत् । गौण्या व्यपदेशस्थलं स्फुटी-

रश्मिः ।

त्रिहितार्थौ दधाति, तद्व्याख्यैर्योंकारस्य ब्रह्मभेदः । 'ओमित्येकाक्षरं ब्रह्म' इति श्रुत्यन्तरादेको वर्ण ओंकार इति ब्रह्मैवोपक्रान्तं दधाति, प्रज्ञा चेत्यस्य पूर्वपादत्रये 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलस्तदक्षरं तत्सवितुर्वरेण्यम्' इत्यस्मिन् शिवोपि [illegible] तथापि यदा तम इति तमोगुणाद्गुणी रुद्रो युक्त इति न ब्रह्मधर्मे ब्रह्मेति चेन्न । गुणिनि यथा [illegible]शब्दप्रवृत्तेः स एवोक्तः शब्दार्थयोरत्यन्ताप्रविवेकाच्च । शिवः शब्दः । श्वेतेति चतुर्थाध्याये । अदृश्यमिति अतीन्द्रियं पश्यतीत्यर्थः । एवमग्रेपि । त एवेति कारणगुणाः कार्ये समायान्तीत्येवकारः । अक्षरः कारणं जीवास्तदंशाः । प्रज्ञयेति प्रज्ञया चैतन्यगुणेन स्वभावेन वाचं वैखरीमारुह्य शरीरत्वेन गृहीत्वा नामान्याप्नोति वक्तव्यत्वेन प्राप्नोतीत्यर्थः । प्रज्ञयेति पूर्ववत् प्राणं प्राणमिन्द्रियकोशं समारुह्य सर्वान्गन्धानाप्नोति, वायोर्नेतृत्वादित्यर्थः । एष इति परमात्मा । एतस्मिन् पुरुषे कानि स्वपन्तीति जीवस्वापप्रश्नेति । एतत्सर्वं परे आत्मनि संप्रतिष्ठत इति 'एष हि' इति श्रुतेः पूर्वं पठ्यत इत्येष पर आत्मा न जीवः । पर इति परमे । सारस्त्वमिति तत्र सारत्वम् । अन्यथेति पुष्पवत्सारत्वे । सर्वत्रेति जीवेषु जडेषु च । अस्येति जीवस्य । गौण्येति । ननु मुख्यव्यपदेशस्थलं विहाय कुतो गौण्या व्यपदेशस्थलमत्र, तथा च शंकरभाष्यानुसारितया तुशब्दघटितं दशसूत्र्युक्तपूर्वपक्षसमाधानसूत्रमेतदिति चेन्न । नेदं स्वयुक्त्या शास्त्रं किंतु शास्त्रयुक्त्येदम् । तत्र तु 'अंशो नानाव्यपदेशात्' य आत्मनि तिष्ठन्नित्यादिभ्यं-शांशिभावः शरीरशरीरिभावश्च श्रुत्यन्तरं च 'यथा पक्षी च सूत्रं च नाना वृक्षरसा यथा, यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा । यथा स्तेनापहार्यौ च यथा पुंविषयावपि । तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ' इति 'सत्यो जीवः सत्यो जीवः सत्यो जीवः, सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवारुणिर्मैवारुणिर्मैवारुणिः' इति च श्रुतिः । 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते । विद्यमाने विभेदेऽपि मिथो नित्यं स्वरूपतः' इति भारते । 'भिन्ना जीवाः परोभिन्नस्तथापि ज्ञानरूपतः । प्रोच्यन्ते ब्रह्मरूपेण वेदवादेन सर्वशः' इति स्मृतिः । एतद्युक्त्या तु गौण्या व्यपदेशः । ननु कथं भवन्मये भेद इति चेन्न । 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन' इति गीतायां वेदानां त्रिगुणमायाविषयत्वात् मायायाः भिदा 'मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' इति वाक्याद्भेदरूपत्वम् । 'निस्त्रैगुण्यो भव' इत्याज्ञा तु भिदापगमेऽद्वैतव्याख्यानेन भवति । तदा भेद इवार्थरूपः । 'अविभक्तं च भूतेषु विभक्तमिव च



RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

कुर्वन्ति मैत्रेयीत्यादि । मैत्रेयीतिपदेन संपूर्णे ब्राह्मणे । यद्यपि पूर्वस्मिन्नपि मैत्रेयीब्राह्मणे जीवस्य भगवद्व्यपदेशस्तथापि तत्र 'उक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वम्' इत्येवं विद्यासमाप्तेर-नुक्तत्वात् संदेहोऽपि भवेत् । द्वितीये जीव एव वस्तुतो ब्रह्मत्वेन सेत्स्यतीति तन्निराकरणायै-तद्ग्रहणम् । इदं च 'वाक्यान्वय'अधिकरणस्य विषयवाक्यम् । तत्र च 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इति जीवमुपक्रम्य च तद्विज्ञानतः सर्वविज्ञानार्थं सर्वस्य तदात्मकत्वकथनेन वेदादीनां तन्निःश्वासत्वकथनेन च ब्रह्मधर्माणां तत्र बोधनात् भगवत्त्वेन जीव उक्तः । तत्र यथा वाक्यान्वयेन हेतुना प्रतिज्ञासिद्ध्यादिभिश्चो-पक्रममनादृत्य ब्रह्मवाक्यत्वस्थापनान्निरुपधिप्रियत्वमात्रासंस्पर्शपक्षत्वादिलिङ्गबोधिते जीवे व्यास-चरणैः प्रज्ञानघनशब्दसार्थाद् व्यपदेशपक्ष एव स्वीकृतस्तथा तत्त्वमसीत्यत्र तत्पदेऽप्यवगन्तव्य इत्यर्थः । अत्र कश्चूते ननु कथमित्यादि । तथाच मैत्रेयीब्राह्मणेऽप्युपचारादरो न युक्त इत्यर्थः । एवमाशङ्कायां निरूपणस्थल एवोपचारस्य प्रामाणिकत्वं वक्तुं दृष्टान्तमुपन्यस्य व्याकुर्वन्ति

रश्मिः ।

स्थितम्' इति गीतायां ब्रह्मस्वरूप इवार्थसन्निवेशात् । तथा चास्मन्मये भेदपदस्यैवार्थे लक्षणा करिष्यत इत्यदोषात् । मैत्रेयीब्राह्मणे संपूर्णे इत्यनुक्तेरेवमुक्तेर्विवृण्वन्ति मैत्रेयीति संबोधन-मिदम् । दूरात्संबोधनाभावेन न प्लुतभावः । पञ्चमेनोपक्रमोपसंहाराभ्यां जीवस्य पदार्थत्वेन तद्वी-द्वारमुक्तम् । इयं जीवः, अमृतत्वस्याप्र उक्तेः । अतो जीव उक्तः । परं भगवत्त्वेन रूपेण 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतेः । नहि स्वात्मा स्वेन श्रोतव्यः निकटत्वात् प्राप्तत्वाच्च । 'आत्मनि वा अरे दृष्टे श्रुते मते विज्ञाते इद५ सर्वं विदितम्' इति तज्ज्ञाने सर्वविज्ञानश्रावणाच्चेति भाष्यार्थः । उप-क्रमोपसंहाराभ्यां जीव उक्तः नहि तज्ज्ञानेन सर्वविज्ञानं भवति किं त्वमृता मैत्रेयीति ज्ञानेनेत्यमृतत्वेन भगवत्त्वेन जीवो मैत्रेय्युक्तः । पूर्वस्मिन् द्वितीयस्मिन् । इत्येवमिति एतावच्छब्देनामृतत्वस्येयत्ता निष्कर्षेण विद्यासमाप्तेः । संदेह इति एतावदेवामृतत्वमितोऽधिकं वेति मैत्रेय्याः संदेहो निर्णेतुर्वा संदेहोऽपि भवेत्तेन च 'अधिकं तु भेदनिर्देशात्' इति सूत्रेण जीवाधिकं ब्रह्मेति पूर्वस्मिन्निर्णीयादपि द्वितीये तु मैत्रेयीब्राह्मणे उक्तसन्नासिवत्त्वाद्ब्रह्मत्वेन सेत्स्यतीत्यर्थः । तन्निरेति जीवब्रह्मवादनिरा-करणायैतस्य द्वितीयमैत्रेयीब्राह्मणस्य ग्रहणं कथं सेत्स्यतीत्यत आहुः इदं चेति । वाक्येति समन्वयाध्यायचतुर्थपादे । तत्र जीवब्रह्मकारणवादनिराकरणेन प्रकृतिकारणवादो निरा-क्रियतेऽतो जीवस्य भगवत्त्वेनोक्तत्वात्तदतिरिक्तत्वेन सेत्स्यतीत्यर्थः । सर्वस्येति 'सर्वं तं परादाद्यो-न्यत्रात्मनः सर्वं वेद' इत्यनेन वाक्येन । तन्निःश्वासेति 'अस्य महतो भूतस्य निःश्वसितमेतद्य-दृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' इत्यनेन । ब्रह्मधर्माणामिति सर्वं तमित्युक्तसर्वात्मकत्व-मस्य महतः इत्युक्तं वेदनिःश्वासत्वमस्यैवैतानि सर्वाणि निःश्वसितानीत्युक्तसर्वनिःश्वासत्वं चेत्येतेषां ब्रह्मधर्माणाम् । वाक्येति 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेः । वेदरूपमहावाक्यान्वयेन 'न वा अरे पत्युः' इत्यस्य वाक्यस्य भगवत्त्वेवान्वयेन । प्रतिज्ञेति 'आत्मनि वा विज्ञात इद५ सर्वं विदितम्' इति प्रतिज्ञा तस्याः सिद्धिर्जीवस्य ब्रह्मात्मकत्व एव भवतीति 'आत्मनस्तु कामाय पतिः प्रियो भवति' इति जीवेनोपक्रम इत्याश्मरथ्यमतं तेन आदिशब्देन मुक्तौ जीवो भगवानेव भविष्यतीत्याशयेन जीवो-पक्रम इत्यौडुलोमिमतम् । कथाचित्तदवस्थयावस्थितं ब्रह्मैव जीव इति संसारदशायामपि जीवो ब्रह्मैवेति



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

संभवति तत्राह प्राज्ञवत् । 'तद्यथा प्रियया स्त्रिया संपरिष्वक्तः' इत्यत्र, 'एवमेवाऽयꣳशारीर आत्मा प्राज्ञेनात्मना संपरिष्वक्तः' इत्यभिधाय प्राज्ञस्वरूप-

---

भाष्यप्रकाशः ।

तद्यथेत्यादि । इदं हि बृहदारण्यके शारीरकब्राह्मणेऽस्ति । तत्र हि जीवस्य जाग्रत्स्वप्नावुक्त्वा पूर्वमुक्त्वा, 'अथ यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति' इति सुषुप्तिं वदंस्तत्सामयिकं

रश्मिः ।

ज्ञापनार्थं जीवोपक्रमः । न तु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमिति का... समं च गृह्यते । व्यपेति जीवे भगवानिति व्यपदेश उक्तिस्तस्य पक्षः । तथेति वाक्य... हेतुभिः । अत्रेति जीवे भगवानिति व्यपदेशः । अत्र तत्पदेन लक्ष्यमाणा गुणाः, गुणाः प्रज्ञा...ः, लक्षणाधाराधेयभावसंबन्ध-स्तथाच भगवानित्यस्य प्रज्ञादिरर्थस्तदभिन्नो जीवो 'ज्ञोऽत एव' इति सूत्रात् । धर्मगुणयोरभेद इति न शङ्कनीयम् । गुणानामेवेदमित्थतया प्रमेयत्वात् 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्' इति श्रुत्या धर्मिण इदमित्थतया प्रमेयत्वाभावात् । तथा च पदद्वयलक्षणातो ...प्रज्ञादीत्येकतत्पदे लक्षणेति भावः । एवं तैर्जीवस्य योगाद्गौणी यथा गौर्वाहीक इत्यत्र गोपदेन लक्ष्य...स्तदीया जाड्यमान्द्यादयः तैर्वाहीकस्य योगाद्गोपदे गौणी । वाहीको देशविशेषस्तत्स्थः पुरुषोऽपि वाहीकः । एवं 'तत्त्वमसि' इत्यत्र तत्पदेऽप्यवगन्तव्य इत्यर्थः । ननु कथमित्यादीति । क... गौरितिप्रश्ने सास्नावती गौरिति निरूपणस्थले जाड्यादयो गौरित्युपचारः संभवत्यपि तु न युगपद्वृत्तिद्वयविरोधात् । किंतु कालान्तरे वाहीकपदसमभिव्याहारे एवोपचारः संभवति यथा तथा प्रकृतेऽपि न संभवतीति नहीत्यादिभाष्यार्थः । शारीरकेति । इदं संभ्रमात् । सर्वग्रन्थटीकाकर्तृत्वेनान्यत्रमनस्त्वात् । तथा च लक्षणया ज्योतिर्ब्राह्मण इत्यर्थः । ज्योतिर्ब्राह्मणं शारीरकब्राह्मणाव्यवहितपूर्वब्राह्मणम् । उक्तेति 'याज्ञवल्क्य किं ज्योतिः' इत्यारभ्य 'सोऽस्य परमो लोकः' इत्यन्तेन ग्रन्थेनोक्ता । इदं तु ज्ञेयम् । 'जनकꣳ वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे । तꣳहास्मै ददौ तꣳह सम्राडेव पूर्वः पप्रच्छ' इत्यत्र जगाम दिनान्तरे जगाम । एतद्ब्राह्मणात्पूर्वं जनकयाज्ञवल्क्यसमागमनिरूपणात् न वदिष्ये यानक्षेमार्थमागतोऽस्मीति न वदिष्ये । तदनु अग्निहोत्रे तन्निमित्तमग्निहोत्रविषयकमिति यावत् । ...द्वतुः संवादं कृतवन्तौ ततो याज्ञवल्क्यो राज्ञो विज्ञानं समीचीनमुपलभ्य तुष्टस्तस्मै राज्ञे वरं ददौ वरं वरयेत्युक्तवान् । स च राजा कामप्रश्नमिच्छाप्रश्नं वव्रे । प्रश्ने क्रोधाभावाय तमिच्छाप्रश्नमस्मै राज्ञे ददौ । तदीयं कृतवान् तदनु तं याज्ञवल्क्यं पूर्वः प्रश्ने पूर्वः पप्रच्छ 'याज्ञवल्क्य किंज्योतिरयं पुरुष इति' इति । अत्र किं ज्योतिरस्य पुरुषस्य परिदृश्यमानस्याज्ञमयस्येति प्रश्न औदर्यविषयको भवितुमर्हति । न तु पूर्वोक्तात्मविषयोऽन्यैर्व्याख्यातः । तस्य प्रश्नांशस्येन 'आदित्यज्योतिः सम्राडिति होवाच' इत्युत्तरविरोधात् । शारीरकब्राह्मणे जीवस्य वक्तव्यत्वाच्च 'अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तायां वाचि किं ज्योतिरेवायं पुरुष इति' इति प्रश्ने आत्मज्योतिः सम्राडिति होवाचेत्युत्तरे तस्य जीवज्योतिष्ट्वकथनाच्च आत्मनेवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपर्येति' इति अग्रे श्रुतिस्तत्र कर्तृकरणत्वव्यपदेशाच्च । आस्ते उदरे उपविशति । पल्ययते ...ते तदीयस्वरूपसमर्पकमूर्ध्वगमनं कुरुते कर्म कुरुते चतुर्विधान्नपाचनं कुरुते विपर्येति विपरीतभावं प्राप्नोति कदाचिदन्नपाचनं न करोतीत्यर्थः । एवमुक्ते संदिहानो जनकः पप्रच्छ कतम आत्मेति' इति हार्दौदर्ययोः कतम आत्मा जीव इत्यर्थः । 'तयोरेकतरो ह्यर्थः प्रकृतिः सोमयात्मिका ज्ञानं त्वन्यतमो-



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

माह 'तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माऽभयꣳरूपमशोकान्तरमत्र पिता अपिता भवति' इत्यादि । प्राज्ञश्च सुषुप्तिसाक्षी । न हि तस्यापहतपाप्मत्वमस्ति । ब्रह्मलिङ्गात् ।

### भाष्यप्रकाशः ।

जीवस्वरूपं निरूप्य, 'तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' इति जीवब्रह्मणोर्भेददृष्टान्तनिरूपणावसरे, एवमेवायꣳशारीर आत्मा प्राज्ञेनात्मना संपरिष्वक्त इति जीवप्राज्ञयोर्भेदमभिधाय, कः प्राज्ञ आत्मेत्याकाङ्क्षायां प्राज्ञस्वरूपमाह, तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्मेत्यादिना । अत्रास्य रूपमित्यनेन परमेश्वरस्य रूपान्तरमित्युच्यत, न तु परमपुरुष एवेति । नचापहतपाप्मत्वरूपाद् ब्रह्मलिङ्गाद् ब्रह्मैवेति शङ्क्यम् । प्राज्ञश्च सुषुप्तिसाक्षी । न हि तस्य स्वतोऽपहतपाप्मत्वमस्ति । अपहतपाप्मत्वस्य ब्रह्मलिङ्गत्वात् । ब्रह्मलिङ्गादिति भावप्रधानः । अत्राऽयमर्थः । माण्डूक्ये, 'ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव सर्वं ह्येतद् ब्रह्म अयमात्मा ब्रह्म' इत्योङ्कारस्य वाच्याभेदविवक्षया अक्षरत्वमुक्त्वा 'सर्वस्य वाच्यस्य तद्व्याख्यानत्वं तज्ज्ञापनाय वाच्यस्य सर्वस्योङ्कारविषयत्वं चोक्त्वा तदुपपादनाय, सर्वस्य वस्तुजातस्यैतस्य जीवात्मनश्च ब्रह्मत्वं

दृष्टिमः ।

भावः पुरुषः सोऽभिधीयते' इत्येकादशे चतुर्विंशे । तयोरन्यतमो भावो ज्ञानमिति द्वयोरेकतरनिर्द्धारणे डतमचोपि दृष्टत्वात् । तदनु जीव हार्द इति निरूप्य अवस्थानिरूपयत्यग्रे । अर्थस्तु स्वमतानुसारेणोह्यः । तत्सामयिकमिति सुषुप्तिसामयिकम् । 'तद्वा अस्यैतद् आत्मकाममाप्तकामꣳ रूपम्' इत्यनेन निरूप्य । इत्यादिनेति । इत्यस्याः 'पूर्वं न बाह्यं किंचन वेद नान्तरम्' इति श्रुतिर्बोध्या । (भाष्योक्तादिशब्दग्राह्यग्रन्थेनेत्यादिनेत्यस्यार्थः) अर्थस्तु । तद्वै प्रसिद्धमस्य परमेश्वरस्य रूपम् । कीदृक् । अतिच्छन्दः कामो यस्मात् । पुनरपहतपाप्मापहतः पाप्मा धर्माधर्मादिलक्षणो यस्मिन् । पुनश्चाभयम् नास्ति भयं यत्र । पुनरशोकान्तरं नास्ति शोकान्तरं गर्भवासो यत्र । अत्र सुषुप्तौ पिता अपितापहतपाप्मत्वादेव भवतीत्यर्थः । भाष्योक्तादिशब्देन माताऽमाता लोका अलोका इत्यादि । अत्रास्येति अत्रेति श्रुतौ । रूपान्तरमिति जीवावस्थान्तररूपम् । एवेतीति किंतु रूपान्तरमपीत्यर्थः । प्राज्ञश्चेति भाष्यं विवरीतुमाहुः न चेति । ब्रह्मैवेतीति प्राज्ञो ब्रह्मैव । तथाच न प्राज्ञेपहतपाप्मत्वादेर्नोपचार इति भावः । प्राज्ञश्चेति । अतः परमेश्वरस्य रूपान्तरमेवेति सिद्धम् । तस्येति सुषुप्तिसाक्षिणो ब्रह्मशरीरस्य 'यस्यात्मा शरीरम्' इति श्रुतेः । ब्रह्मलिङ्गेति 'स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः सꣳसृज्यते' इति ज्योतिर्ब्राह्मणात् । एवमर्थे कृत आहुः ब्रह्मलिङ्गादिति । अपहतपाप्मेति ब्रह्मलिङ्गादिति भाष्यार्थे तु न भावप्रधानः । अत्र श्रुतावात्मानावुक्तौ तौ च ब्रह्मजीवाविति वक्तव्यम् । जीवयोरसंभवात् । एवं च प्राज्ञे सुषुप्तिसाक्षिणि ब्रह्मणि नहि तस्येत्यादि भाष्यमनुपपन्नमेवेति प्राज्ञस्वरूपं निर्भिन्दन्तस्तत्कथनमुखेन तत्त्वमसीत्यत्र व्याख्याता गौणी श्रुत्यन्तरसिद्धेति सूचयन्तः उत्तरभाष्यार्थमप्याहुः अत्रेत्यादिना । पूर्वोत्तरभाष्यसंदर्भोऽयं सुदृढः । त्रिकालेति जीवो वेदात्मकं मनश्च त्रिकालातीतं नित्यत्वात् । वाच्येति अत्राक्षरपदेन प्राह्यं तद्वाचकं वाच्यम् । नातीतं भूतमित्यादिनोक्त्वा तल्लिङ्गाधिकरणस्थयावन्मुख्यपरत्वं संभवतीत्यादि भाष्याद् ज्ञेयं तद्व्याख्येति इदं सर्वमित्यादिनोक्त्वेति पूर्वेणान्वयः । तस्य व्याख्यानत्वं प्रकृतिविकृतिव्याख्यानत्वमुपोपसर्गात् । तज्ज्ञेति 'ज्ञोः सुना सुः' इति सुत्वम् । सर्वस्येति जगतस्त्रिकालातीतस्यापि ।



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

बोधयित्वा जडवैलक्षण्यार्थं 'सोऽयमात्मा चतुष्पात्' इत्यादिना वैश्वानरतैजसप्राज्ञतुरीयभेदेन चतुरः पादान् विवृणोति स्म । तत्र यद्यपि सोऽयमात्मेति तच्छब्दबलेन ब्रह्मणो जीवस्य चैते पादा इति वक्तुं शक्यते । उभयोः प्रकृतत्वात् । तथापि नृसिंहोत्तरतापनीयारम्भे 'अणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्व' इति देवैः पृष्टः प्रजापतिः, ॐ तथेति कथनं प्रतिज्ञाय माण्डूक्यवदेव, अयमात्मा ब्रह्मेत्यन्तमुक्त्वा ततोऽहंग्रहोपासनार्थं चतूरूपमेतं चतूरूपेण ब्रह्मणैकीकर्तुं ब्रह्मणः पादानाह, 'विश्वो वैश्वानरः प्रथमः पादः' 'तैजसो हिरण्यगर्भो द्वितीयः' 'प्राज्ञ ईश्वरस्तृतीय' 'ईश्वर ग्रासस्तुरीयः' इति। ततस्तुरीयस्य न स्थूलप्रज्ञमित्यादिना प्रपञ्चोपशमत्वेनोक्तत्वात् स निर्धर्मको

रश्मिः ।

उक्त्वेति भूतमित्यादिनोक्त्वा । ब्रह्मत्वं शब्दब्रह्मत्वम् । सर्वं ह्येतदित्यादिना बोधयित्वा । चतुष्पादिति चतुरंशः । पादानित्यंशान् । सोयमात्मेति । तदिति परोक्षमपरोक्षरूपम् 'इदमस्तु प्रत्यगं रूपम्'इति स भगवानयं जीव आत्मेत्यर्थः । सोयमात्मेति अहंग्रहोपासनार्थत्वस्य वक्ष्यमाणत्वान्नात्र स प्रसिद्धः आत्मा परमेश्वर इत्यर्थः । किंतु व्युच्चरणात्मकब्रह्मांशसंबन्धात्पूर्वं 'जीवस्यानुस्मृतिः सती' इति वाक्योक्तः सोहमिति प्रतीतिकालीनः तेन साधनैर्मायापगमो ज्ञातव्यः । तदाहुः तच्छब्देति । ब्रह्मण इति शब्दब्रह्मणः । प्रकृतेति तदिदम्पदाभ्यां सोयमात्मेति श्रुतौ प्रकृतत्वात् । अहंग्रहेति जीवस्य ब्रह्मांशत्वेन सोहमित्युपासनमहंग्रहोपासनं तदर्थमित्यर्थः । तमेतमात्मानमोमिति ब्रह्मणैकीकृत्य ब्रह्म चात्मनोमित्येकीकृत्य 'तदेकमजरमपरममृतमभयमोमित्यनुभूय'इति श्रुत्योक्ता । अत्रोमित्यस्योमित्यनेनेत्यर्थः । ब्रह्मविशेषणं चेदम् । कथं स्वभावेन भिन्नयोरैक्यं घटपटाद्येकीभावाभाववत् । आह । 'तदेकम्' इति तदभयमेकम् । कैर्धर्मैरैक्यं तत्राह 'अजरम्' इत्यादि । अजरादयः स्वरूपभूता जीवस्य न धर्माः । अभयं तु सुषुप्तौ भगवता तस्मै दीयते । यद्वाऽभयं भयाभावो न कस्यापि धर्मस्तेनाजरादिधर्मैः ब्रह्मसाधारणैरहंब्रह्मांशो ब्रह्मैवेत्यालोचनमहंग्रहोपासनमित्युक्तं भवति । अनुभूयेत्यस्य ब्रह्मविचारानन्तरमर्थस्तेन शाब्दानुभवोऽनुभूयत्वात्र ग्राह्यः । अन्योपि ग्राह्य एतावताऽनारोपितरूपेण जीवोपासनोक्ता । सर्वस्योंकारत्वात् । चतूरूपमित्यवस्थात्रयं प्रत्येकं रूपत्रयम् । जीवस्वरूपा चिच्चेति चतूरूपमेनं जीवं चतूरूपेण वैश्वानरतैजसप्राज्ञतुरीयरूपचतूरूपेण । एकीति पूर्वश्रुत्युक्ताजरादिभिर्धर्मैरेकीकर्तुं पृथङ् न एकः स एकः संपद्यते तथाकर्तुम् । पादानाहेति जागरितेत्यारभ्य तुरीय इत्यन्तेनाह । वैश्वानरादयो जाग्रत्स्वप्नसुषुप्तिसाक्षिणः । निर्धर्मक इति प्रपञ्चोपशमवान्जगज्जन्मकर्तृत्वशून्यः । ईश्वरग्रासात्मकत्वात् । एते श्रुत्यन्तरिताः पादाः तथाहि अनुभूयेति । पूर्वोक्तश्रुतिमनु गुणोपसंहारसूत्रोक्तरीत्या ब्रह्मधर्मैर्जीवोपासनोच्यते । तस्मिन्निदं त्रिशरीरमारोप्य तन्मयं तदेवेति संहरेदोमित्यनेन ग्रन्थेन । तदनन्तरं वा एतं त्रिशरीरमात्मानं त्रिशरीरपरब्रह्मानुसंदध्यात् । स्थूलत्वात्स्थूलभुक्त्वाच्च सूक्ष्मत्वात् सूक्ष्मभुक्त्वाच्चैक्यादानन्दभोगाच्च । 'सोयमात्मा चतुष्पाज्जागरितस्थानः स्थूलप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् चतुरात्मा'इति श्रुतिः । तस्यास्तस्मिन् जीवात्मनि त्रिशरीरं त्रीणि शरीराणि सत्यं विज्ञानमानन्दं ब्रह्मेति श्रुतेरागन्तुकानि धर्माः मुक्तजीवोपासाप्रत्यायकाः इति सारः । 'आपो वा इदमग्र आसन् तत्सलिलमेव'इति पूर्वतापिनीयात् तत्र सत्यं जडमबात्मकं । एवं विज्ञानं जीवा उपासकातिरिक्ताः । आनन्दमन्तर्यामीत्येवं त्रीणि शरीराण्यवयवाः शरीरपदस्य यौगिकत्वादरेण लब्धा यस्य स्वरूपस्य श्रीयमुनाजिद्रूपजलकार्यस्य तमारोप्यैकीकृत्य । ननु कथमेकीभावः सत्यपदार्थस्य जडस्येत्याशङ्क्याह । तन्मयमित्यादि तन्मयं जडमयमिति तदेव चैतन्यमेवेति हेतोरोमित्यस्य गुणानुप-



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः।

भविष्यतीत्याशङ्कानिरासाय, अथ तुरीय ईश्वरग्रासः स्वराट् स्वयमीश्वरः स्वप्रकाशश्चतुरात्मा रश्मिः।

संहरेदिति सारोऽर्थः। अनुसंदध्यादिति विश्वात्मकत्वेन स्वस्मृतिं कुर्यात्। अहं ब्रह्मास्मि इति। षड्तयो मुक्तत्वसूचकास्तानाह स्थूलत्वादित्यादि। स्थूलत्वसूक्ष्मत्वे लिङ्गेणुत्वव्यापकत्वपर्यायभूते विरुद्धधर्माश्रयत्वबोधके। स्थूलभुक्त्वसूक्ष्मभुक्त्वाभ्यां हेतुभ्यां निःसंबोधो मोक्ष इति धार्यते। आनन्दभोगोऽपि वक्तव्यो भवेत् मुक्तस्य कथं तु अमुल्यो भवेत्संपद्यानाविर्भावादतो [illegible]माह ऐक्यादानन्दभोगाच्चेति। जीवस्य ब्रह्मसायुज्याद्धेतोरानन्दभोगो ब्रह्मधर्मो जीव उपचर्यते। उपसंहरति जीवप्रकरणम्। सोयमात्मा चतुष्पादिति। सोयमिति ब्रह्मजीवौ मिथुनीकृत्य [illegible]र्देशो मुक्तजीवोपासासूचकः। अतः परं प्रकृतश्रुतीर्व्याख्याय तदनु तत्पाठात् तत्र ब्रह्मप्रक[illegible] निरूप्यते जागरितेत्यादि। श्रुतिस्तु 'जागरितस्थानः स्थूलप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् चतुरात्मा विश्वो वैश्वानरः प्रथमः पादः' एतावती व्याख्यायते। जागरितावस्थयावस्थानं यस्य स स्थूलप्रज्ञो भवति। स्थूलास्थूलविषयिणी प्रज्ञा बुद्धिर्ब्रह्मधर्मो यस्य जीवस्य स, सप्ताङ्गश्च सप्तविभक्तयोङ्गा[illegible] यस्य वेदस्य स सप्ताङ्गो वेद इत्येतावुभौ मिलित्वैकोनविंशतिमुखौ। एकवचनं समुदायापेक्षं नवद्वा[illegible]णि जीवस्याष्टौ वेदस्य सप्तविभक्तयः मनश्चेत्येकोनविंशतिमुखः समुदायः। तादृशेन्द्रियादिभिः स्थूलभुक् स्थूलान् विषयान्घ[illegible]दीन् भुनक्तीति तथोक्तः। स चतुरात्मावस्थात्रयं स्वरूपं च मिलित्वा जी[illegible] गौण्या व्यपदेशोयं जीवे स्थूलभुक्त्वस्य। विश्वो जडात्मा वैश्वानरो वह्निः प्रथमः पूर्वमुत्प[illegible]त्वात्। पादोंश इत्यर्थः। तैजस इति। एवं हि श्रूयते व्यवहितश्रुतौ। 'स्वप्नस्थानः सूक्ष्म[illegible]ः सप्ताङ्ग एकोनविंशतिमुखः सूक्ष्मभुक् चतुरात्मा तैजसो हिरण्यगर्भो द्वितीयः पाद' इति। अर्थस्तु स्वप्नावस्थापन्नो जीवः स सूक्ष्मावस्था यत्र लिङ्गदेहविषयिणी प्रज्ञा यस्य सः। लिङ्गदेहं प्र[illegible]तो जीवो। चतुर्थचरणे स्फुटिष्यति चेदम्। सप्ताङ्गः पूर्वोक्तरीत्या वेदः। समुदायस्यैकविंशतिमुखत्वं तु प्रागुक्तरीत्यात्राप्यविरुद्धम्। सूक्ष्मभुक् सूक्ष्मैर्मनोधर्मैर्भुनक्ति स सूक्ष्मभुग्जीवश्चतुरात्म[illegible]दार्थः। चतुरात्मपदेन जीवपरामर्शस्तु चतस्रोवस्था अंशतः सार्वविद्भ्य इति सूचयितुं तैजस इति योगरूढं पदं राजस इति सारोर्थः। हिरण्यगर्भो ब्रह्मा। हिरण्यं सुवर्णं गर्भे यस्य। तादृशो[illegible] विवक्ष्यते। युक्तं चैतत्। गर्भपदमुदरे उपचर्यते। उदरे हि हिरण्मयः शकुनिर्ब्रह्मनामेति दृश्यतेऽपि तद्विद्भिः अन्तर्यामिविद्भिः। शकुनिप्रभैवानन्दमयः कोशः इति तत्रापि व्यवहार इति श्रुतं मया। आकाशवाणीवत्। चत्वारोन्ये कोशास्तु तथैव। तथाहि। विज्ञानं तु व्यष्टधात्म[illegible]। व्यष्टिस्तु जीवस्वरूपम्। समष्टिस्तु तत्प्रभावः विज्ञानमयकोशात्मकः। एवं सर्वत्रोह्यम्। आन[illegible]मयाधिकरणे त्विदमुक्तम्। द्वितीयः पादोम्भः। द्वितीयत्वं तु पालकत्वात्। राजसत्वाच्च। इदानीं सुषुप्तिं वक्तुं तत्स्वरूपं वक्तुं संसारिजीवस्वरूपमाह यत्र सुप्तो नेत्यादि। श्रुतिस्तु। यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखश्चतुरात्मा प्राज्ञ ईश्वरस्तृतीयः पाद एष सर्वेश्वर एष सर्वज्ञ एषोन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां त्रयमेतत्सुषुप्तं स्वप्नं मायामात्रं चिदेकरसोह्ययमात्मेति। यत्र स्थाने सुप्त उज्जीवः। तृतीयत्वं तु पालनकर्तृत्वात्। आनन्दभुगित्यादिपर्यायाः [illegible] नामान्तराणि। तथा च ज्ञानस्वरूपं श्यामित्युक्तं भवति। अग्रे स्फुटतरम्। [illegible] नासङ्गिकमुक्तम्। प्रकृतमनुसरामः। ईश्वरग्रास इत्यादि। 'अथ चतुर्थश्चतुरात्मा तुरीयावसितत्वा[illegible]देकैकस्यौतानुज्ञात्रनुज्ञाविकल्पैस्त्रयमत्रापि सुषुप्तं स्वप्नं मायामात्रं चिदेकरसो ह्ययमादेशो न

१ [illegible]

**एवमेव शारीरस्यापि जीवस्य ब्रह्मधर्मबोधिकाः श्रुतयः ।**

भाष्यप्रकाशः ।

ओतानुज्ञात्रनुज्ञाऽविकल्पैरित्युक्त्वा ओतादीन् विवृणोति स्म । तादृशं च विवरणं न माण्डूक्ये । अतो जीवपादेभ्यो भिन्ना एते ब्रह्मपादा एतेषु ये पूर्वे त्रयस्तान् पूर्वेषु त्रिषु जीवपादेष्वारोप्य तुरीयं च जीवस्य केवलं रूपमीश्वरग्रासेन तुरीयेण ब्रह्मरूपेणैकीकृत्याहंग्रहोपासनां कुर्यादिति सिद्ध्यति । एवं सति जीवाग्निभस्येश्वरस्य सर्वसुषुप्तिसाक्षिणोऽपि ब्रह्मशरीरत्वेन न ब्रह्मत्वमतस्तत्र यथा ब्रह्मधर्मा बोध्यन्ते, 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्'इत्यनेन । एवं शारीरस्यापि जीवस्य ब्रह्मधर्मबोधिकाः श्रुतयो जीवे गौण्या ब्रह्मत्वं वदन्तीति । नन्वस्मिन् सूत्रे गौण्या व्यपदेशः सूत्रकाराभिमतः स्यो च तच्छब्दद्वयम् । तत्र पूर्वस्मिंस्तच्छब्दे उपाधिः परामृश्यते, द्वितीये चाणुत्वमिति जीवे उपाधिगुणसारत्वादणुत्वव्यपदेश

रश्मिः ।

स्थूलप्रज्ञं न सूक्ष्मप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षणमलिङ्गमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते स एवात्मा स एव विज्ञेय ईश्वरग्रासस्तुरीयस्तुरीयः' इति श्रुतेः । विवृणोतीति । ओतो ह्ययमात्मा यथेदं सर्वमन्तकाले कालाग्निः सूर्यस्रयीनुज्ञाता ह्ययमात्माऽस्य सर्वस्य स्वात्मानं ददाति यदि सर्वमिदं दर्शयति स्वात्मानमेव करोति यथा तमः सवितानुज्ञैकरसो ह्ययमात्मा चिद्रूप एव यथा दाह्यं दग्ध्वाग्निरविकल्पो ह्ययमात्मा वाङ्मनोगोचरत्वादित्येवं विवृणोति स्मेत्यर्थः । लट् स्मे इति लिटः स्थाने लट् । अस्योभयपदित्वेऽपि परस्मैपदादिविचारस्यासार्वत्रिकत्वाद्भवतीत्यादौ प्रथमोक्तस्यात्र त्यागे मानाभावाच्च परस्मैपदम् । देवैः पृष्टः प्रजापतिर्देवार्थमाहेति वा परस्मैपदं ज्ञेयम् । तादृशं चेति । चोप्यर्थे । विवरणमपि नेत्यर्थः । अत इति । जीवपादविवरणाभावरूपात्कारणाज्जीवपादेभ्यो भिन्ना एते माण्डूक्योक्ता इत्यर्थः । उपक्रमोऽपि हेतुत्वेनानुसन्धेयः । 'यद्यप्यणोरणीयांसमित्याद्युपक्रमो न तथा तथाप्योङ्कारं नो व्याचक्ष्वेत्युपक्रमस्तथा । 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' यदि च नायमुपक्रमः । किंतु प्रश्नस्तथाप्यहंग्रहोपासनस्य ध्यनाकारत्वात्तस्य च ब्रह्मपादैर्विना संभवादीश्वरग्रासपदाच्च ब्रह्मपादा इत्यर्थः । अहंग्रहेत्यादि एषां न ज्ञान एव स्फुटा । अहंग्रहश्च भगवता भक्ताय न दीयत इत्युक्तं साधनाध्यायपादेन्तराभूतप्रमाधिकरणेऽतो नात्र वितन्यते । अत्र माण्डूक्ये च या शब्दतः सृष्टिरुक्ता सा समन्वयाध्याये तृतीयपादे 'शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्' इत्यादिसूत्रेषु वैदिकी सृष्टिरित्युक्तम् । एवं सतीति । जीवपादेषु ब्रह्मपादारोपणेनाहंग्रहोपासनमिति सिद्धे सति । ब्रह्मशरीरत्वादिति ब्रह्मावयवत्वम् । तस्मिन्निदं त्रिशरीरमारोप्येत्यादिश्रुतिसन्निधानाच्छरीरपदमेवोक्तम् । न तु निरवयवत्वशब्दकोपः । 'श्रुतेस्तु शब्दमूलत्वात्', एवमेवेत्याद्युत्तरभाष्यार्थमाहुः एवमिति । पूर्वं जीवस्य विचारितत्वाद्भाष्य एवकारः । श्रुतय इति तत्त्वमस्यादिश्रुतयः । गौण्येति । तथाच श्रुतिस्मृतयः । 'एष वीरो नरसिंह एव'इति नृसिंहोत्तरतापनीये । गौण्याऽविवक्षणे वीरपदमनतिप्रयोजनकं स्यात् । नरसिंहे वीरत्वविधाने सिंहो माणवक इति न्यायेनावतरति । उपासकनरसिंहयोगे तु भवति । इदानीमुत्तरभाष्यं विवरीतुमाभासत्वेन व्याख्याद्वयमुपन्यसन्ति स्म नन्वित्यादि । शंकराचार्यव्याख्यानमुपन्यसन्ति स्म तत्र पूर्वस्मिन्निति । पूर्वस्मिंस्तच्छब्द इति । अनुस्वारस्य हल् नकारत्वेनोल्लेखोनुस्वारभ्रमात् । वैषयिकाधारे सप्तमी । अभिव्यापकौपश्लेषिकाधार-

1. जसःस्थाने शस् छान्दसः ।



RUPNATHJI ( DR RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

वादिनस्तत्साधारण्याच्च । नच भेदे अद्वैतप्रतिज्ञाविरोधान्नित्यत्वमेवाभेदे पर्यवस्यति । अनादित्वं च मिथ्यात्वे । अतो न हेतौ दोष इति वाच्यम् । प्रतिज्ञाया वक्ष्यमाणेनांशांशिभावेन, 'परास्य शक्तिर्विविधैव'इत्यादिश्रुतेः शक्तिशक्तिमद्भावेन चाविरोधे नित्यत्वानादित्वयोरुक्तपर्यवसानस्यैव दुर्घटत्वात् । नचांशांशिभावे निष्कलश्रुतिविरोधः । 'श्रुतेस्तु शब्दमूलत्वात्'इत्यत्र विरुद्धधर्माश्रयत्वाङ्गीकारेणैव परिहृतत्वात् । नापि निर्गुणश्रुतिविरोधः । तस्याः प्राकृतगुणनिषेधपरत्वात् । तस्मान्नोत्पत्त्यश्रवणस्य जीवब्रह्मतागमकत्वम् । नापि परस्यैव ब्रह्मणः प्रवेशश्रवणस्य । तथाहि । प्रवेशो नाम संयोगो वा तज्जनिका क्रिया वा । नाद्यः । कार्यसृष्टिमात्रात् अन्तर्बहिश्च तत्संभवेन पृथक् तदुक्तिवैयर्थ्यप्रसङ्गात् । तत एव नामरूपव्याकरणसिद्ध्या अन्तःसंयोगानावश्यकत्वप्रसङ्गाच्च । न द्वितीयः । व्यापकत्वस्य क्रियाविरुद्धत्वात् । वस्तुतस्तु न तत्र जीवरूपेण स्वप्रवेश उच्यते, किंतु जीवसाहित्येन स उच्यते । द्वा सुपर्णादिश्रुत्यनुसारेण जीवपदगततृतीयायाः सहार्थे वक्तुं शक्यत्वात् । अन्यथा आत्मनेत्यस्य वैयर्थ्यप्रसङ्गात् । न चेतरव्यपदेशाधिकरणभाष्ये, जीवेनात्मनेत्यात्मपदस्य जीवविशेषणत्वाङ्गीकारान्नैवमिति वाच्यम् । तस्य पूर्वपक्षसूत्रत्वात् । तदनुरोधेन तत्र तथा व्याख्यानस्य सिद्धान्तीयत्वेन वक्तुमशक्यत्वात् । तस्मात् प्रवेशश्रवणस्यापि

रश्मिः ।

त्वमुत्पत्त्यश्रवणस्येति लक्षणसमन्वयः । प्रकृतेऽनुमानं तु जीवः ब्रह्म, उत्पत्त्यश्रवणात् । यन्नैवं तन्नैवं घटादिवदित्युक्तमाभासे । तथा च तस्य हेतोः साधारण्यं तत्साधारण्यं तस्माच्चेत्यर्थः । भेद इति । अंशांशिनोर्भेदे जीवः ईश्वर इति, संज्ञा भेदसाधिका पूर्वतन्त्रे सिद्धा । नित्यत्वमिति जीवीयं भेदप्रयोजकमपि ध्वंसाप्रतियोगित्वं नित्यत्वं ध्वंसावृत्तित्रैकालिकाबाधयोग्यत्वमीश्वराभिन्नत्वमीश्वराभेद इत्येवं पर्यवस्यति । एवकारो नित्यत्वेतरस्मिन् भेदे पर्यवसाने नित्यत्वस्य भेदापादकत्वभिया नित्यत्वेतरयोगव्यवच्छेदकः । अनादित्वं च जीवीयनित्यत्वसमानाधिकरणमादिमत्त्वाभावः । ईश्वरीयानादित्वेन पुनरुक्तं गुरुभूतं च । एवं च गुरुत्वपुनरुक्तिभियाऽनादित्वं मिथ्या, मिथ्यात्वमनादित्वस्य लक्षणमित्येवं मिथ्यात्वे पर्यवस्यतीत्यर्थः । अत इति नित्यभिन्नाभावात् । तथा च साध्यवदन्यस्याः प्रकृतेर्विशेषणाभावेन स्वतश्चात्यन्ताभावादप्रसिद्ध्या साधारण्यलक्षणानाक्रान्तत्वेन हेतोर्न हेतौ साधारण्यलक्षणो दोष इत्यर्थः । प्रवेशेति 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'इति श्रुतौ प्रवेशश्रवणस्य । संयोग इति । फलमेव धात्वर्थ इति खण्डनमिश्राः । 'फलव्यापारयोर्धातुः'इति भूषणे । कार्येति मात्रच् कार्त्स्न्ये । तत्संभवेन संयोगसंभवेन । तथा च स्मृतिः । 'बहिरन्तरपावृतम्' इति । तदुक्तीति । प्रवेशोक्तिवैयर्थ्यप्रसङ्गात्तथा च हेतुर्दुष्ट इति भावः । प्रवेशशब्दश्च न त्यक्तुं शक्य इति च । पक्षसाध्ये पूर्वोक्ते । अनेन जीवेनेति श्रुतौ किंचिदाहुः तत इति अन्तर्बहिर्वर्तमानादीश्वरादेव । व्यापकेति आत्मेत्यत्रातततीत्यात्मेति व्युत्पत्त्या । सहार्थ इति । अयमर्थः ल्यबन्तकर्तृत्वविशिष्टस्यैव व्याकरणकर्तृत्वम् । करणार्थत्वे तु तृतीयाया जीवरूपः प्रवेशकर्ताऽस्मदर्थो व्याकरणकर्तेत्युपाधिभेदात् क्त्वाविधायकसूत्रस्य विरोध इति सहार्थे तृतीया, वदनाशक्तावेव करणतृतीयेति । अन्यथेति अनेन जीवेन करणेनेत्येवं जीवस्य करणत्वे आत्मना व्यापकत्वेन प्रवेशक्रियाविरुद्धेन विशिष्टेनेत्यर्थादनुस्यूतात्मभिन्नत्वेनास्य वैयर्थ्यं प्रवेशविरुद्धत्वेन चास्य वैयर्थ्यम् । न च विरुद्धधर्माश्रयत्वेनात्मनोऽपि करणत्वमिति वाच्यम् । व्याकरणकर्तृभिन्नत्वेनास्य वैयर्थ्यम् । न च शब्दमूलत्वादेवमेव साधुः प्रवेश इति वाच्यम् । शास्त्रस्यास्य न्यायत्वात् । चत्वारो वेदाः षडङ्गानि पुरातनमिति-



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

न जीवब्रह्मतागमकत्वम् । नापि तादात्म्योपदेशस्य । तस्यांशांशिभावादप्युपपत्तेः । किंच । यदि परमेव ब्रह्म जीवः स्यात् तदा, 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति गौतम' इति काठकश्रुतिरपि विरुध्येत । वास्तवयत्किंचिद्भेदाभावे, अस्य दृष्टान्तस्य सर्वथानुपपत्तेः । सत्संपन्यादिश्रुतिविरोधश्च । किंच । औपाधिकभेदाभ्युपगमपक्षे तत्त्वमसीत्यत्र, तत् त्वमितिपदद्वये भागत्यागलक्षणा । कारण अंशकार्यबोधकश्रुतीनामसदर्थवादत्वकल्पनं, कारणत्वांशत्वकार्याणां मिथ्यात्वकल्पनम्, उपासनाविषयाणां श्रुतीनामब्रह्मत्वकल्पनमित्येतदादयो दोषाः । जीवोंऽशस्तत्र ब्रह्मत्वं गौण्या व्यपदिश्यत इति पक्षे त्वेकस्मिंस्तत्पदे

रश्मिः ।

ह्यसो न्यायो धर्मशास्त्रमित्येवं चतुर्दशविद्यासु न्यायत्वेनास्यागणनात् । न च न्यायस्तर्कशास्त्रमिति वाच्यम् । तस्य गुणत्रयविवरणाध्याये पाद्मे निन्द्येषु गणनात् निन्द्यत्वे च विद्यात्वायोगात् । नेति जीवः ब्रह्म, प्रवेशश्रवणाद् बुद्धिवत् । यन्नैवं तन्नैवं घटादिवत् । अत्र हेतुर्दुष्टोऽतो नेत्यर्थः । तादात्म्येति महावाक्ये तादात्म्योपदेशस्तस्य । अंशांशीति 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति' इति मुण्डकश्रुतेरात्मनामंशत्वेन नहि स्फुलिङ्गो नाग्निरिति ब्रह्मत्वेन च जीवानां तादृशोपदेशस्योपपत्तेः । यथैतदात्म्यं जडे तथा तस्य त्वं तत्त्वमसि श्वेतकेतोइति । विजानत इति विज्ञानवतो न त्वविज्ञानवतस्तस्यैच्छिकभेदसत्त्वादिति । विरुध्येतेति कुत इत्यत हेतुमाहुः वास्तवेति । अयमर्थः । परमेव ब्रह्म यदि जीवस्तर्हि तादृक्पदं विरुध्येत । तस्य तद्वृत्ते यत्रेति व्युत्पत्त्या शुद्धं तत्पदवाच्यमुदकं यत्र शुद्धे उदकादौ श्यामेऽपि आसिक्तं संयुक्तं दृश्यते वृद्धितद्गुणैर्यथा तथात्मा भवतीति वचनव्यक्तेः । जीवब्रह्मवादेस्यार्थस्य यत्किंचिदिवार्थो भेदस्तस्याभावे सर्वैः प्रकारैरस्य दृष्टान्तस्यानुपपत्तेरित्यर्थः । मायिकभेदप्रतियोगिकाभावेऽपि तथा । भेदाभेदवादानुरोधे तु यत्किंचिद्भेदः विरुद्धधर्मान्तर्गतस्तदापि तथा । यत्किंचिद्भेदो नानात्वं तदापि तथा । तथा च सर्वथा यत्किंचिदित्यन्वयः । सदिति 'सता सौम्य तदा संपन्नो भवति' इति । आदिशब्देन 'न विदुः सति संपद्यामहे' इति । औपाधिकेति विद्वन्मण्डने स्फुटमिदम् । भागत्यागेति शुद्धसत्त्वप्रधाना माया तदवच्छिन्नं चैतन्यमीश्वरः मलिनसत्त्वप्रधानाऽविद्या तदवच्छिन्नं चैतन्यं जीवः तत्र भागौ मायाविद्यात्मकौ तयोस्त्यागः शुद्धं चैतन्यं पर्यवसितम् । पदद्वये भागत्यागलक्षणा । कारण इति कारणस्याश्रयतया विवक्षितस्यालुप्तविभक्तिकस्य समासवर्तिनः कारण इत्यस्य पदत्वं श्रूयमाणविभक्तिकत्वाद्यपि । तथापि कारण अंशकार्याणि तेषां बोधकानां श्रुतीनामंशकार्ययोर्वेति समासः । अत्र कार्यान्ते 'सुप्तिङन्तं पदम्' इति सूत्रं पदत्वं विधत्ते शक्तिस्तु न कारण इत्यस्य पदत्वं विधत्ते । 'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः' इति न्यायाच्च । तथा च 'एङः पदान्तादति' इत्यस्य तादृशपदत्वाभावं गृहीत्वाप्राप्त्या 'एचोयवायावः' इति सूत्रेणायि कृते 'लोपः शाकल्यस्य' इति यलोपे कृते कारण अंशकार्याणीति साधुः । श्रुतयस्त्वंशो नानेत्यादिरूपा भाष्ये वक्तव्याः । असदिति । पदसंस्कारपक्षे संहिताया अविवक्षितत्वादनुस्वारस्य न परेण संयोगः । अनुस्वारस्तु सर्वत्रैव गुणवादत्वकल्पनमिति व्याख्यातम् । कारणत्वेति । दृष्टान्तभाष्ये यथा प्राज्ञस्य ब्रह्मणः सगुणेपूपासनेपूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशो 'अणीयान्व्रीहेर्वा यवाद्वा' 'मनोमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसंकल्पः' एवं प्रकारस्तस्मिंस्तथा । एतदादय इति हृदयायतनत्वमपि बुद्धेरेवेत्यादिस्वशास्त्रविप्लवश्चादिशब्दार्थः । गौण्येति प्रज्ञादृत्त्वादिगुणयोगेन सिंहो माणवक इतिवत् । यद्वा तत्पदस्य स्वांशे लक्षणा प्रयोजनवती । तत्पद इति । गौण्या विधेयधर्मत्वमुक्तमतोऽत्र लक्षणा प्रयोजनवती गौणी प्रस्थानरत्नाकरोत्र ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

गौणी । सापि राजज्येष्ठपुत्रवदिति नासदर्थवादत्वापादिका । पूर्वकल्पोक्ताश्च न दोषाः इति । एवं सति कः पक्षोऽत्र ज्यायान् को वा कनीयान् । नेतरोनुपपत्तेरित्यारभ्य जीवब्रह्मणोर्भेदं बोधयतोऽणुत्वमंशत्वादिकं च जीवस्य साधयतः सूत्रकृतश्च किं वाभिप्रेतमित्यालोचक विभाव-नीयम् । किंच । तद्गुणसारसूत्रे प्राथमिकतत्पदेन य उपाधिः परामृश्यते, स किमन्यथानुपपत्ति-बलादध्याहृत उत क्वचित् पूर्वमुक्तः । नाद्यः । अनुपपत्त्यभावस्योपपादितत्वात् । नेतरः । अदर्श-नात् । नच 'अन्तरा विज्ञानमनसी' इत्यत्रोक्तं विज्ञानं बुद्धितत्त्वात्मकं दृश्यत एवेति वाच्यम् । विज्ञानपदस्यानेकार्थत्वेनात्र बुद्धेरेव ग्रहणे नियामकाभावात् । व्याख्यातृत्वात्र विज्ञानमनसी इति द्विवचनोपपत्त्यर्थं विज्ञानपदे करणव्युत्पत्त्यङ्गीकारेण बुद्धीन्द्रिययोः संग्रहात् । कस्य वोपाधित्वं कथं वा इन्द्रियाण्यपाकृत्य बुद्धेरेव ग्रहणमित्यत्र हेत्वनुपलम्भाच्च । एतेन भास्कराचार्यव्याख्यान-मपि दत्तोत्तरम् । ब्रह्मपरामर्शे तु कोऽप्ययं दोषो न भवति । नाणुरतच्छ्रुतेरिति सूत्रे इतरपदेन ब्रह्मण एवोक्तत्वेन तस्य च सन्निहितत्वेन कल्पनालेशस्याप्यभावादिति ।

यत्तु भिक्षुः—अणुत्वसाधकानि नव सूत्राणि पूर्वपक्षीकृत्य, पृथगुपदेशादिति सूत्रं सिद्धा-न्तत्वेनाह । तदर्थं च जीवादणुरूपाधिभूतः पृथक् । कुतः । उपदेशात् । 'स चानन्त्याय कल्पते' 'स वा एष महानज आत्मा', 'योऽयं विज्ञानमयः प्राणेषु' इत्यादिश्रुतिभिर्जीवस्यानणुत्वोपदेशा-दित्याह । तन्न । अन्त्ययोर्ब्रह्मप्रकरणस्थत्वस्य प्रागेव दर्शितत्वेन जीवाविषयत्वात् । आद्याया अपि सामर्थ्यबोधकत्वस्योपपादितत्वेन इतः पर्यालोचने अङ्गुष्ठमात्र इति श्लोके बुद्धेर्गुणेनाङ्गुष्ठमात्रत्व-

रश्मिः

स्यापीति । सापि गौण्यपि यावदात्मा ब्रह्म भवत्यानन्दांशप्राकट्येन तावदेव यथा राजज्येष्ठपुत्रे राजपदगौणी तावदेव यावद्राज्ञि वैराग्यं तदभावे तु नेति । नासदिति । यथा यजमानः प्रस्तर इत्यत्र गुणवादे प्रस्तरो यज्ञः 'यो यच्छ्रद्धः स एव सः' इति यजमानाभेदः इत्येवमर्थवादपादे विवेचितमन्यत् । उत्तरकल्पनद्वयमपि न । सदर्थवादत्वात् । हृदयायतनत्वमपि बुद्धेर्न, मध्यमपरिमाणस्यायुक्तत्वादणुरेव जीव इति भाष्यात् । स्वशास्त्रविप्लवोऽपि न । मिथ्यात्वाभावात् । पूर्वेति । उत्पत्त्यश्रवणादयश्च न दोषाः । पूर्वसमर्थनात् । नेतर इति आनन्दमयाधिकरणे सूत्रम् । भेदमिति । 'एकोऽहं बहु स्यां प्रजायेय' इत्यैच्छिकं भेदम् । अणुत्वमिति 'नाणुरतच्छ्रुतेः' इत्यादिसूत्रेण । अंशत्वमिति 'अंशो नानाव्यपदेशात्' इति सूत्रेण साधयतः । आदिशब्देन कर्तृत्वम् । इत्यादिकमिति आदिशब्देन जीवे सेवानिषेधः सुबोधिन्यां श्रुतिगीते यत्तत्संगृह्यते । वेदान्तानां जीवपरत्वे तत्रोक्तः सेवाभावो विरुध्यते । विभावनीयमिति 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्यः' इति च वाक्याभ्यां ब्रह्मपरत्वमनुसंधेयमिति हृदयम् । अन्तरेति इदं सूत्रं गतम् । 'विज्ञानमनसी' इत्यत्रेति पाठः 'ईदूदेद्द्विवचनम्' इति सूत्रात् । बुद्धीति उपाधिरूपम् । व्याख्यात्रेति गोविन्दानन्दभगवता रत्नप्रभाभाष्यटीकाकृता । एतेनेति उपाध्यर्थदूषणेन । भास्करेति उपाधिव्याख्यानं प्रथमतत्पदस्य । तदर्थमिति । पूर्वसूत्रार्थस्तु यथाभाष्यम् । प्रागिति 'नाणुरत-च्छ्रुतेः' इत्यादिसूत्रे । सामर्थ्येति । 'कृपू सामर्थ्ये' इति धातुपाठात् । मुक्ताविल्युक्तोपलक्षणमस्या-ग्रेऽपि द्रष्टव्यम् । अङ्गुष्ठेति ।

'अङ्गुष्ठमात्रो रवितुल्यरूपः कामाहंकारसमन्वितोऽपि ।
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोऽपि दृष्टः' इति श्लोके ।



RUPNATHJI(DR. RUPAK NATH)

भाष्यप्रकाशः ।

प्राणा अनूत्क्रामन्ति संज्ञानमेवान्ववक्रामति स एष ज्ञः सविज्ञानो भवति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च' इत्यत्रैव इत्यनेन सलिङ्गमात्मानमुपक्रम्य चक्षुरादीनि निष्क्रमण-द्वाराण्युक्त्वा सलिङ्गस्याङ्गुष्ठमात्र इति पूर्वोक्तश्रुतौ, अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति स्मृतौ च सिद्धत्वात् कथं चक्षुष्टो निष्क्रमणमिति शङ्कानिवृत्त्यर्थं, 'तमुत्क्रामन्तम्' इत्यादिना केवलस्यात्मनो निष्क्रमणानन्तरं लिङ्गभूतानां मुख्यप्राणादीनामनूत्क्रमणं मुक्तामुक्तसाधारण्ये-नोक्त्वा तदनन्तरं संज्ञानमेवेत्यादिना पश्चाद्बुद्धिसंबन्धश्च इति ज्ञानगुणकत्वं, तेन जन्य-ज्ञानवत्त्वं स्थूलदेहान्तरप्राप्तिसामग्रीं वक्तीति तदनाकलनात् । अङ्गुष्ठमात्रतया गुणेनोक्तत्वाद् गुणस्य चौत्कट्ये स्वाश्रयाधिकदेशवृत्तित्वस्य पूर्वं साधितत्वात् मञ्जूषाहितमणिप्रभावत् पिपी-लिकादिदेहेषु बुद्धिगुणसंकोचेन गौणपरिमाणसंकोचेऽपि दोषाभावात् । एवमेव परिवर्तना-

रश्मिः ।

यस्मिन्काले जराद्युक्तहेत्वभिभूतस्तस्यैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनेत्यर्थः । संज्ञानमिति बुद्धिम् । सलिङ्गमिति प्रत्यक्षत्वाल्लिङ्गं तेन सह समानं वा । चक्षुरिति चक्षुष्ट इत्यादिना । चक्षुष्ट इति तसिल्प्रत्ययान्तमिदम् । केवलस्येति एतेन सलिङ्गस्यात्मनो निष्क्रमणं वदन्तः उप-निषट्टीकाकृतः परास्ताः । या बुद्धिरुत्पद्यते सैव सर्वेषु प्राणेषु संबध्नाति तम् । संबन्धस्तु स्वरूपः स्वजन्यजनकत्वम् स्वं बुद्धिस्तज्जन्यं ज्ञानं तज्जनकत्वं प्राणपदवाच्येन्द्रियेषु । ज्ञानगुणेति । जानातीति व्युत्पत्तेः । स एष ज्ञ इत्यनेन 'सत्त्वात्संजायते ज्ञानम्' इति वाक्यात्सत्त्वं बुद्धिः पूर्वोक्ता तद्गु-णकत्वम् । तेनेति तेन सत्त्वेन जन्यं यज्ज्ञानं स्वप्न इव शास्त्रादिना भाविदेहविषयकं तद्वत्त्वम् । यथा सेवाप्रतिबन्धे जन्मोक्तं सिद्धान्तमुक्तावलीटीकायाम् । स्थूलेत्यादि 'तं विद्याकर्मणी-इत्यादिना । तं स्थूलदेहं विद्याशब्देन प्रमाणाप्रमाणजन्यज्ञानमात्रं विहितप्रतिषिद्धादिरूपमात्मज्ञान-व्यतिरिक्तमुच्यते । शास्त्रलोकप्रमाणोत्पन्नदृष्टादृष्टार्थरूपवाङ्मनःकायसाध्यसर्वकर्मशब्दार्थः । तदुत्पन्नफल-भोगजनितसंस्कारो भावनाजन्यत्वात्प्रतः पूर्वप्रज्ञोच्यते । समन्वारम्भः सम्यक्प्रकारेण देहदर्श-नमनु पश्चादारम्भः ज्ञानात्मकोऽभिरारम्भः 'सर्वं खल्विदं ब्रह्म' इति वक्तीति इतिः प्रकारे पूर्वोक्तप्रकारेण । तस्य समुत्क्रान्तमिति भागस्यानाकलनात् । तदपि तथेत्यत्र हेतुः । जीवस्य नमो-पमत्व एतन्न संगच्छत इति । अङ्गुष्ठमात्रपरिमाणं पिपीलिकादिदेहेषु विरुद्धमित्याहुः अङ्गुष्ठेति । पूर्वमिति उत्क्रान्त्याधिकरणे 'अविरोधश्चन्दनवत्' इत्यादिसूत्रेषु । गौणेति अणुत्वापेक्षया गौणस्याङ्गुष्ठपरिमाणस्य संकोचे । परिवर्तनेति माध्यन्दिनानां बृहदारण्यके 'स यत्रायꣳशारीर आत्माबल्यन्नेत्य संमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति' इति पाठः । काण्वानां तु अबल्यमिव निसमेत्य संमोहमिव नियति इति पठ्यतेऽर्थस्तु समानः । स एष 'तद्यथाऽनः' इत्यादिना पूर्वब्राह्मणोपक्रान्तः सोऽयं शारीर आत्मा । यत्र यस्मिन्काले जराद्युपहतो बल्यं बले साधुः बल्यं न बल्यमबल्यमित्थं नितरां प्राप्य संमोहमिव वैचित्यमिवाविवेकि-तामिव न्येति नितरामेत्यनन्तरमेतमात्मानं प्रति प्राणा इन्द्रियाणि तैजसेन्द्रियाणां तेजोमात्राः सूक्ष्मावस्थाः सम्यक् स्वप्नवैलक्षण्येनाऽऽसमन्ताद्यथा केनाप्यंशेन तद्देहावच्छेदेन तत्कार्याणि ददानः स्वीकुर्वन्नेवकारेण गुणस्य स्वाश्रयाधिकदेशवृत्तित्वाव्यवच्छेदः क्रियते तदनु हीनमस्वतन्त्रमीश्वराधीनं यथा भवति तथा



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

द्वावपि बोध्यम् । यत्तु अनुशब्दो विज्ञानमयादेः प्राधान्यद्योतको, न त्वनुक्रमद्योतक इति व्याख्यानम् । तदसंगतम् ।

अनोरप्राधान्येऽनभिधानाल्लिङ्गवियोगस्य प्राणादिपदैरेव प्राप्तेर्विज्ञानमयप्राधान्यस्योत्क्रान्तिक्रियायामेव पर्यवसानाच्च । व्यापकत्वश्रुत्यादितात्पर्यं त्वनुपदमेवाग्रिमसूत्रे वक्ष्यामः । यदुक्तमयं विभागः कस्मिन्नहमिति श्रुत्यैव स्पष्टीकृत इति । तदपि न । इयं श्रुतिस्तु ब्रह्मपरा सृष्टिकर्तृत्वलिङ्गात् । तया ब्रह्मण उत्क्रान्तिरौपाधिकीति बोध्यते । उत्क्रान्ते प्राणे देहजीवनरूपं कार्यं भगवांश्च करोतीति । जीवनं च भगवत्कार्यमेवेति,

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥

इति श्रुत्याऽवगम्यते । अतो नानया जीवोत्क्रान्तिविभागस्य स्फुटीभावः । दृष्टान्त-

रश्मिः ।

पादस्य स्वस्य विक्षेपं करोतीश्वरप्रेरितः स्वयं हृदयमागच्छति । तदनुश्रूयते । स यत्र चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवतीत्यादि स हृदयस्थोऽङ्गुष्ठमात्रः यत्र यस्मिन्काले पराङ् भोक्तृभोग्येभ्यो विमुखश्चाक्षुषः उपास्यभिन्नोऽधिकदेशवृत्तिर्बुद्धिगुणात्मा पुरुषः पर्यावर्तते स्वदेवतां सूर्यं परि प्रत्यासमन्तादवर्ततेऽथानन्तरं सोऽङ्गुष्ठमात्रोऽरूपज्ञो भवति । रूपं न जानातीत्यर्थः । तथा चैवमेव पूर्वोक्तप्रकारेण परिवर्तनादौ चाक्षुषः पुरुष उक्तो यस्तत्रापि गुणपरिमाणसंकोचो बोध्यः । इतः परं तमुत्क्रामन्तमित्यादिनानुः क्रमार्थत्वेन व्याख्यातः स तदा स्थिरो भवेद्यदा परोक्तप्राधान्यद्योतकत्वमनोर्न भवेत्तदर्थमाहुः यत्त्वित्यादि । विज्ञानमयेति । तथा च श्रुतिः 'विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमय आपोमयः पृथिवीमयः क्रोधमयोऽक्रोधमयो हर्षमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोदोमयः' इति । व्याख्यानमिति माध्यन्दिनबृहदारण्यकटीकाकृतो व्याख्यानम् । अप्राधान्येनेति । अनुस्तावल्लक्षणेत्थंभूताख्यानभागवीप्सापाश्चात्यानुक्रमाद्यर्थेषु दृष्टो न तु तं विज्ञानमयं राजस्थानीयमुत्क्रामन्तमनुशब्देन प्रधानीकृत्य प्राणः प्रधान उत्क्रामति तं चानु प्रधानमुत्क्रामन्तं सन्तं सर्वे प्राणा वागादयः परिवारस्थानीया अनुशब्देन प्रधाना उत्क्रामन्तीति प्राधान्येन न विहित इति । तं विज्ञानमयमिति व्याख्यानं तदपि प्राणाद्युत्क्रमणयोरग्रेतनयोर्विरुणद्धीत्याहुः लिङ्गेति । वियोगशब्देन युक्तस्य तत्त्वविद एव वार्यते प्रत्यक्षम् । प्राणादीति । युक्ततत्त्वविदः प्रत्यक्षमविवक्ष्येदम् । ननु प्राणादिपदानि प्राणाद्यभिदधति लिङ्गवियोगं तात्पर्येण वृत्त्या प्रापयन्ति । स्फूर्तेरन्यानधीनतयैवकारः । उत्क्रान्तीति । गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययात् । चकेति कर्तृत्वादेवकारः । ननु विज्ञानमयोत्क्रान्तावनोरश्रवणात् प्राधान्यं कुतो लब्धमिति चेन्न । स्वातन्त्र्यरूपप्राधान्यस्यावार्यत्वात् । नन्वेतादृशप्राधान्यज्ञापनस्य किं प्रयोजनमिति चेन्न । प्राणेऽत्क्रमणेऽग्निसंबन्ध्यनुसरणस्य वक्तव्यत्वेन तदनुक्तौ निग्रहस्थानं भवेदिति । तदुपन्यस्तविरुत्वावेदकश्रुतिस्मृती पर्यनुयुञ्जते स्म व्यापकत्वेति । श्रुत्यैवेति श्रुतिः प्रश्नस्था । स्पष्टीति । तेन 'आकाशस्तल्लिङ्गात्' इति न्यायप्रसरोऽत्रेति ज्ञापितम् । ब्रह्मण इति । 'जीवेशयोर्विभेदेन मुक्तिरेकादश द्विधा' इत्युक्ते ब्रह्मण उत्क्रान्तिः । जीवनकर्तृत्वे उत्क्रान्ते ब्रह्मण उत्क्रान्तिर्धर्मौपाधिकीत्युपाधिर्जीवनकर्तृत्वमित्याहुः उत्क्रान्त इति । श्रुत्येति काठकश्रुत्या । 'सांख्योप्येकः सदादृतः' इति



RUPNATH JI ( DR. RUPAK NATH )
www.astrology-tantra.com

व्यापकत्वश्रुतिस्तस्य भगवत्त्वेन युज्यते ।
आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः ।
प्रतीयेरन् परिच्छेदो व्यापकत्वं च तस्य तत् इति ॥ ३० ॥

भाष्यप्रकाशः ।

युक्तत्वं परिहृतं बोध्यम् । अतो नायुक्त इत्यर्थः तथा चायं सूत्रार्थः । यावदवधारणे, यावदात्माऽसंसारी, व्यपदेशस्य तावद्भवनशीलत्वान्न दोषः नायुक्तत्वं तद्दर्शनात् 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिष्वग्रे ब्रह्मभावस्यैव युक्तत्वादिति । पूर्वव्याख्याने जीवभावस्योत्तरावधिग्रहणमत्र तु ब्रह्मभावस्य पूर्वावधिग्रहणमिति भेदः । अत्र च 'उत्क्रमिष्यत एवं भावादित्यौडुलोमिः' इतिमतं समर्थितं भवति । एवं जीवस्य ब्रह्मभावं व्याख्याय तेन व्यापकत्वबोधकानि वाक्यानि समर्थयन्ति एतदेवोक्तमित्यादिना । उक्तमिति निबन्धेऽस्माभिरुक्तम् । अर्थस्तु—तस्य ब्रह्मभावं प्राप्तस्य जीवस्य भगवत्त्वेन व्यापकत्वश्रुतिर्युज्यते, न तु जीवत्वेन रूपेण । तत्र प्रकारमाहुः । आनन्दांशाभिव्यक्तौ ब्रह्मभावे सति तस्य जीवस्य तत्तद्विरुद्धधर्माधारत्वं भवत्यतस्तत्र ब्रह्माण्डकोटयः परिच्छेदो व्यापकत्वं च प्रतीयेरन्निति । तथाच यथा कृष्णो भगवान् यशोदोत्सङ्गे स्थितोऽपि जृम्भणमृत्साभक्षणादौ सकलजगदाधारो दृष्टस्तथा जीवोऽणुरपि ब्रह्मभावेऽणुत्वाविरोधेनैव व्यापकः सकलजगदाधारो भवति । अत एव, 'मय्येव सकलं जातम्', 'तदेतदृषिः पश्यन् वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' इति, 'पुत्रेति तन्मयतया तरवोऽभिनेदुः' इत्यादीनि वाक्यानि ब्रह्मभूतमेव लक्षीकृत्योच्यन्ते । तेन, 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः', 'व्यापकोऽसङ्गयनावृतः', 'पुमान् सर्वगतो व्यापी' इत्यादीन्यपि भाविनीमवस्थामुद्दिश्य ।

पराभिध्यानतिरोहितधर्मा जीवोविद्यया पूर्वोक्तो जात इत्यविद्यया विद्योपमर्दे पराभिध्यानतिरोहितधर्मा जीवः कथमभेदभाग् भवेत् अतो न तु हीदानीं ब्रह्मत्वबोधकः । किंतु मुक्तौ ब्रह्मत्वसूचक इत्यर्थः । आत्मेति आत्मैव न त्वन्यबलः । असंसारीति छेदः । अयमर्थः पदार्थानतिवृत्त्यर्थे यावति न भवतीत्यर्थः । इत्यादीति । आदिशब्देन 'ब्रह्मैव सन् ब्रह्माप्येति' इति 'सलिल एको द्रष्टाऽद्वैतो भवति' 'एष ब्रह्मलोकः सम्राडिति होवाच' इति च ग्राह्ये । अग्र इति । ब्रह्मैव सन्नित्यस्याग्रे 'तदेष श्लोको भवति' 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' इति । अत्रेति पदाद्ब्रह्मभावः । सलिल इत्यस्याग्रे 'एषास्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति । एषोऽस्य परम आनन्द इत्यत्रैतदिदम्पदाभ्यां ब्रह्मभावः । अद्वैतपदाल्लिङ्गात्सलिलपदं ब्रह्मवाचकमिति । एवं ब्रह्मभावस्योक्तत्वादित्यर्थः । एवकारस्तूक्तपदार्थबलात् । व्याख्यानान्तरप्रयोजनमाहुः उत्तरेति । यावदात्मा जीवस्तदुत्तरावधौ ब्रह्मभावः । उत्तरावधिवाचको यावच्छब्दस्तेनोत्तरावधिग्रहणम् । पूर्वेति यावदात्मैव ब्रह्मभावस्य पूर्वावधिः शुद्ध आत्मा जीवोऽसंसारीति यावत् । अत्रापि वाचकः पूर्ववत् । यावत्तावतौ साकल्यावधिमानावधारणेषु भवतस्तत्रावधौ यावद्व्याख्यातम्, यथा यावद्दन्तव्यं तावत्तिष्ठेत्यत्रावधौ । उत्क्रमीति सूत्रं तु प्रथमाध्यायचतुर्थपादस्थम् । समर्थितमिति चित्प्रधानांशांशिग्रहणेन समर्थितम् । ब्रह्माण्डेति ब्रह्मवैवर्ते प्रसिद्धाः । जृम्भणेति । 'जृम्भतो ददृश इदम्' इति सप्तमाध्याये । 'सा तत्र ददृशे विश्वम्' इत्यष्टमेऽध्याये । जगदिति । अर्थान्मुखद्वारा भगवति ददृश इति जृम्भत इत्यत्र सुबोधिन्याम् । तन्मयेति पुत्रमयतया तरवोऽभिनेदुरुत्तरं चक्रुः । भाविनीमिति ।

DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

**व्यपदेशदशायामपि आनन्दांशस्य नात्यन्तमसत्त्वम्। पुंस्त्वादिवत्। तथा पुंस्त्वं सेकादिसामर्थ्यं बाल्ये विद्यमानमेव यौवने प्रकाशते तथा आनन्दांशस्यापि सत एव व्यक्तियोगः ॥ ३१ ॥**

---

### भाष्यप्रकाशः।

अन्योन्तर आत्मा विज्ञानमयो योऽयं विज्ञानमयः प्राणेष्वित्यादौ तथा विज्ञानमयत्वं तु ज्ञानांशत्वाज्ज्ञानप्रचुरत्वं, न तु बुद्धिमयत्वं, तदनभिमानेऽपि ज्ञानप्राचुर्यस्य मुक्तेषु सिद्धत्वात्। विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्मयः श्रोत्रमय इत्यत्र प्रायपाठबलेन विज्ञानपदस्य बुद्ध्याख्यकरणवाचकत्वेऽपि न सर्वत्र तथात्वं, गमकाभावे तथात्वं वक्तुमशक्यत्वात्। अत्रापि बुद्धिमयत्वं, बुद्धिप्रचुरत्वं, तदपि बुद्ध्यधीनव्यवहारत्वमेव। प्रायपाठेन तथा निश्चयात्। न तु बुद्धिगुणसारत्वम्। तस्य दूषितत्वात्। नापि बुद्ध्यधीनाखिलव्यवहारत्वम्। यावत्संसारमेव बुद्धिसंसर्गेण बुद्धेर्यावदात्मभावित्वाभावात्। यदपि उपाधिकल्पितस्वरूपव्यतिरेकेण न परमार्थतो जीवो नाम कश्चिदस्तीति तदप्यसंगतम्। अंशत्वस्याग्रे वक्ष्यमाणत्वादिति। तस्मात् पूर्वोक्तरीतिरेव युक्तेति दिक् ॥ ३० ॥

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥ ननु पूर्वमसतश्चेदानन्दांशस्य प्राकट्यं तदा जन्यत्वेन नश्वरत्वेन व्याप्तेरानन्दांशस्य तिरोधानं भविष्यतीति न तस्य यावदात्मभावित्वं वक्तुं शक्यमिति शङ्कायामिदं सूत्रं प्रवृत्त इत्याशयेन व्याकुर्वन्ति व्यपदेशेत्यादि। निगदव्याख्यातमेतत् ॥ ३१ ॥

### रश्मिः।

मयत्वं जीवस्य श्रूयते। विज्ञानमय इति, तत्राहुः अन्योन्तर इति। बुद्धिमयत्वं जीवत्वं मुक्तजीवेषु व्यभिचरति, बुद्धेर्लीनत्वेनाभावादित्याहुः तदनभीति अहं बुद्धिमानित्यभिमन्यते तस्याभावेऽप्यनात्मनो देहादीनभिमन्यते सोऽभिमानः आत्मनो बन्धस्तन्निवृत्तिर्मोक्ष इति श्रुतेः। प्रायेति करणप्रायपाठबलेन। तेषां भाष्यानुसारेणार्थे यावदित्यादि। बुद्ध्या अपि स्वीकारेण लयादेवकारः। बुद्धेर्यावदिति। जीवभावस्योत्तरावध्यात्मभावित्वाभावादित्यर्थः। अग्र इति। अंशो नानाव्यपदेशाधिकरणे। दिगिति 'ममैवांशो जीवलोके' इति गीता ॥ ३० ॥

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥ निगदेति पाठमात्रेण व्याख्यातम्। बाल्ये सेकादीति। पूञ् पवने डुमसुन्। पा रक्षणे वा डुमसुन्। आदिशब्दार्थः। आदिशब्देन भगवत्सेवानुकूलत्वलक्षणमपि। एवकारस्तु आनन्दः व्यपदेशदशायां सन् व्यक्तियोगात्। पुंस्त्वादिवत्। अभिव्यक्तियोगादित्यपि पाठः। एवेति अन्यथा षण्ढादीनामपि तदुत्पत्तिप्रसङ्गादित्येवकारः। 'नासतो विद्यते भावः' इति। सौत्रस्य असेत्यस्यार्थमाहुः आनन्दांशस्येति एतेन सौत्रत्वयोऽवधारणमित्युक्तम्। एवेति वाक्यादेवकारः। व्यक्तियोग इति। तस्मादिति शेषः। एवं निगदव्याख्यातमित्यर्थः ॥ ३१ ॥



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ ३२ ॥**

**ननु कथमेवं स्वीक्रियते । इदानीं संसारावस्थायां सच्चित्प्राकट्यमेव । मोक्षे त्वानन्दांशोऽपि प्रकट इति तन्निवारयति । तथा सति नित्यमुपलब्धिः स्यादानन्दांशस्य । तथा सति न संसारावस्थोपपद्येत । अथानुपलब्धिः सर्वदा तथा सति मोक्षदशा विरुद्ध्येत । अथान्यतरनियमः । जीवो निरानन्द एव, ब्रह्म त्वानन्दरूपम् । तथा सति, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिविरोधः । तस्मात्**

भाष्यप्रकाशः ।

**नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॥ ३२ ॥ सूत्रप्रयोजनमाहुः ननु कथमित्यादि । तन्निवारयतीति । तमेतमाशङ्कोत्पादकं प्रश्नमुत्तरयति । तथाचेदं सूत्रप्रयोजनमित्यर्थः । व्याकुर्वन्ति तथा सतीत्यादि । सूत्रयोजना तु, अन्यथा यद्युक्तसूत्ररीत्या व्यवस्था नाङ्गीक्रियते तदा जीवे त्रयाणां नित्यं प्राकट्यं वा नित्यमप्राकट्यं वा, जीवः सच्चिद्रूप एव, ब्रह्मानन्दमेवेति वाङ्गीक्रियेत ततः पक्षत्रयेऽपि क्रमेण त्रयो दोषा इति निर्दुष्टः पूर्वोक्तप्रकार एव युक्त इति सिद्धमित्यर्थः ।**

रश्मिः ।

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोन्यतरनियमो वाऽन्यथा ॥ ३२ ॥ ननु कथमित्यादीति । इदं भाष्यं सौत्रान्यथाशब्दव्याख्यानम् । कथमिति प्रश्ने । एतादृशप्रश्नोत्थाप्यां शङ्कामाहुः इदानीमित्यादिना । इतीति इत्याशङ्का सङ्गेत्यर्थः । तमेतमिति तन्निवारयतीत्यत्रानुस्वारस्य घञि परसवर्ण इति भावः । आशङ्केति । इत्याशङ्कायामित्यादिरुक्त्वाऽऽशङ्कोत्पादकं प्रश्नम् । शङ्कामध्याहृत्य योजितं प्रश्नोत्थाप्यं हेतुमिति तु नोक्तम् । इतिशब्दार्थो हेतुरध्याहारश्च न स्यादिति । पर्यायव्याख्यानत्वात् । गौरवादिदोषोद्भावनं पर्यायेषु नास्ति । अन्यथैकाक्षरीनाममालोक्तशब्दप्रयोगापेक्षयान्यत्सर्वं गौरवादिदोषग्रस्तं स्यात् । यथा घटकलशयोर्मध्ये घटप्रयोग एव स्यान्न क्वापि कलशपदं शरीरगौरवादिति । उत्तरयतीति प्रश्नविघातानुकूलव्यापारो ह्युत्तरयतेरर्थः यो वारयतेरर्थः व्यासो वारयति । इदति मिप्रश्नवारणलक्षणम् । नाङ्गेति अन्येन प्रकारेणापि तु स्वीक्रियते । भाष्ये नित्यमुपलब्धिः स्यादानन्दांशस्येत्यत्र प्रकटसच्चिदिति पूर्वभाष्यादित्याशयवन्त आहुः जीव इति संसारावस्थायां सच्चित्प्राकट्यमेवेति पूर्वभाष्योक्ते जीवे नित्यमुपलब्धौ त्रयाणामंशानां सच्चित्प्राकट्यवन्नित्यं प्राकट्यम् । अप्राकट्यमिति अत्रानन्दमात्रमन्वेति । अथान्येत्यादि भाष्यं विवृण्वन्ति स जीवः सदिति । आनन्दमिति आनन्दोस्य ज्ञानस्यास्तीत्यानन्दम् । अर्श आद्यच् । श्रुतिविरोध इति । ब्रह्म सन्नित्यस्यानन्दः सन्नित्यर्थाच्छ्रुतिविरोधः । तस्मादिति यस्मादन्यथा नाम ननु कथमित्युक्तप्रकारः स्यात्तथासति नित्योपलब्ध्यनुपलब्धिप्रसङ्गोन्यतरनियमो वा स्यात्तस्मादित्यर्थः । सूत्रार्थोप्येतेनोक्तप्राय इति नोच्यते । प्रकृते । अर्धजरतीयेनेति यथावल्लिखामि । तथाहि । नित्योपलब्धिसूत्रमुपन्यस्य व्यत्यनङ्गीकारे देवानां नित्योपलब्धिरानन्दादीनाम् । असुराणां नित्यानुपलब्धिर्मनुष्याणां नित्योपलब्ध्यनुपलब्धी प्रसज्येते नित्यानन्दो नित्यज्ञानो नित्यबलः परमात्मा नैव सुरा एवमनेवं च मनुष्या इति ह्याग्निवेश्यश्रुतिः । भविष्यत्पर्वणि च

'नित्यानन्दज्ञानबला देवा नैव तु दानवाः ।
दुःखोपलब्धिभाजस्ते मानुषास्तूभयात्मकाः ।



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

पूर्वोक्त एव प्रकारः स्वीकर्तव्य इति सिद्धम् ॥ ३२ ॥

इति द्वितीयाध्याये तृतीयपादे तद्गुणसारत्वादिति त्रयोदशमधिकरणम् ॥ १३ ॥

भाष्यप्रकाशः ।

समानत्वात्, अतो विभुत्ववादिनां दूषणायेदं सूत्रमित्याहुः । एवमेव शैवोऽपि ।

यत्तु भास्कराचार्यैरुक्तं, सर्वगतत्वेऽपि भोगस्य कर्मनिमित्तत्वाच्छरीरादेव भोगोत्पत्तेर्न सर्वगतत्वव्याहतिरिति । तदप्यदृष्टानियमेनैव दूषितत्वान्न युक्तिसहम् । इदं च मया जीवाणुवादे सम्यक् प्रपञ्चितमतो नात्रोच्यते । न चैवं सति मनःसिद्धयभावः । श्रुत्या तत्तद्वृत्तिप्रत्यक्षेण च सिद्धत्वादिति ॥ ३२ ॥

इति त्रयोदशं तद्गुणसारत्वादित्यधिकरणम् ॥ १३ ॥

रश्मिः ।

विद्याकर्मपूर्वप्रज्ञाजन्यत्वेन कर्मत्वांशमादाय भोगोपपत्तेरित्यर्थः । अदृष्टेति धर्माधर्मनियमेति । प्रपञ्चितमिति । प्रपञ्चस्तु । किंचादृष्टविशेषा·····दृष्टस्य धर्मनियम्यत्वेन कर्मणश्च कर्मविशेषप्रयत्ननियम्यत्वेन प्रयत्नस्य चात्मनः संयोगनियम्यत्वेन संयोगस्य च सर्वेषामात्मनां सर्वेषु मनस्सु सत्त्वात्तथैव प्रणाड्या सर्वेष्वेव प्रयत्नजधर्माधर्मरूपाणां सर्वादृष्टानां सुवचत्वात् । न च देहाद्यवच्छिन्नविलक्षणमनःसंयोगादिना दोषः परिहर्तुं शक्यः कारणमन्तरेण देहाद्यवच्छेदमात्रेण मनःसंयोगवैलक्षण्यस्याशक्यवचनत्वात् । अथ कार्यैकोन्नेयं तद्वैलक्षण्यमिति चेदस्तु तथापि नास्तिकमिति कारणं तु वाच्यमेव । तत्रान्यस्य वक्तुमशक्यत्वादीश्वरे नैव चेद्वैलक्षण्यहेतुत्वेनाद्रियते । तदेष एव भुङ्क्तां नान्ये । अस्य कर्मणास्यैवादृष्टमुत्पद्यतां नान्यस्येतीश्वरेच्छयैव व्यापकात्मनां भोगनियमवद्देशान्तरस्थोऽयमनेन प्रकारेण भुङ्क्तामित्येवमण्वात्मवादेऽपि भोगनिर्वाहसिद्धौ देशान्तरेऽदृष्टवदात्मसंयोगाङ्गीकारेण व्यापकत्वसाधनं जघन्यमेव । यत्तु आत्मशरीरसंयोगस्याध्यासभिन्नस्य ज्ञाने कारणतैव नास्ति । प्रयोजनविरहेण तस्यास्तत्रानङ्गीकारात् । विदेहमुक्तात्मविज्ञानाद्युदयवारणाय ज्ञानादिकं प्रत्यवच्छेदकतया शरीरस्यैव हेतुत्वावधारणाच्च । अतः परशरीरे कारणाभावादेव भोगाद्यभाव इति न तत्र तदापादनमुचितमित्युक्तम् । तदपि फल्गु । ज्ञानादिकं प्रति शरीरस्य शरीरत्वे शरीरत्वेन हेतुत्वे त्वदीत्यापि कारणात्मत्वस्य वक्तुमशक्यत्वात् । आत्मनां विभुत्वस्यासिद्धत्वे तत्तच्छरीरत्वेन कारणताया अप्रामाणिकगौरवग्रस्तत्वाच्च । अतः कारणतानङ्गीकारेण भोगानियमसमाधानं मज्जतः फेनावलम्बनमेवेति दिगिति । सम्यक्त्वं चावारपारीणत्वम् । असंदिग्धान्तःकरणसत्ता न सूत्रविषयो संदिग्धश्रुतिवदित्याहुः उक्तेति । तद्वृत्तीति । मनोवृत्तीनां कामसङ्कल्पादीनां प्रत्यक्षेण मनसः सिद्धत्वात् इतिरधिकरणसमाप्तौ ॥ ३२ ॥

इति तद्गुणसारत्वादित्यधिकरणम् ॥ १३ ॥

१. यावदात्मा मानसीनस्तावत्प्रयत्नवान् अन्यथा मनोविनाप्यन्यत्रापि व्यापकात्मा प्रयत्नी स्यात् । तथाचेति सिद्धान्तित इत्यर्थः ।



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

## कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ ( २-३-१४ )

सांख्यानां प्रकृतिगतमेव कर्तृत्वमिति तन्निवारणार्थमधिकरणारम्भः । कर्ता जीव एव । कुतः शास्त्रार्थवत्त्वात् ।

भाष्यप्रकाशः ।

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ अधिकरणप्रयोजनमाहुः सांख्यानामित्यादि । तथा च पूर्वं ज्ञानस्वरूपत्वे ज्ञानगुणकत्वे च सिद्धान्तिते सांख्यवदकर्तृत्वं नैयायिकवत् कर्तृत्वं च संभाव्यते, अतः संशयः । तत्र कठवल्ल्याम् ।

'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते' ।

इत्यत्र हन्तृत्वं जानतोऽज्ञत्वश्रावणात् । गीतायामपि,

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताऽहमिति मन्यते' ।
'नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति' ।
'कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते' ।

इति भगवता कथनात् पुराणेष्वप्येवंविधवाक्यदर्शनाज्जीवो न कर्ता, प्रकृतिरेव कर्त्रीति निराकरणायाधिकरणारम्भ इत्यर्थः । एवं पूर्वपक्षे सूत्रोक्तं सिद्धान्तं व्याकुर्वन्ति कर्तेत्यादि । शास्त्रार्थवत्त्वादिति । शास्त्रस्य अर्थवत्त्वं शास्त्रार्थवत्त्वं तस्मात् । शास्त्रस्य फलवत्त्वादिति यावत् ।

रश्मिः ।

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ भाष्ये पूर्वपक्षोक्तेस्तदाक्षेप्यमाहुः तथा चेति । सिद्धान्तित इति सतीति शेषः । तथा च प्रसङ्गसंगत्याधिकरणारम्भ इति भावः । अत्र विषय उक्तः । हन्ता चेदित्यादिः कार्येत्यादिश्च श्रुतिस्मृतिजालं पूर्वपक्ष इति वक्ष्यते । संशयः क इत्यत आहुः सांख्येति 'असङ्गः पुरुषः' इति सांख्यप्रवचनसूत्रात् । नैयायिकेति । यथाहुः 'संसारमहीरुहस्य बीजाय' इति । बीजाय निमित्तकारणाय । औपाधिकं जीवत्वमिति भाष्ये उक्तम् । संशय इति कर्ताऽकर्ता वेति । भाष्यं व्याकुर्वन्ति स्म पूर्वपक्षत्वेन । तत्र कठेति । हन्तुमिति स्वकर्तृकं हननम् । भावे तुमुन् । हन्तृत्वं स्वकर्तृनिष्ठमन्यकर्तृनिष्ठं च । एवं विधेति । यथा तृतीयस्कन्धे 'यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्' इति वाक्यम् । अत्र 'ब्रह्मवदविशेषम्' इति सुबोधिनी । अत एवंविधता । कर्तेत्यादीति । तथा च सिद्धान्तो विषय इत्युक्तम् । यद्वा 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इत्युपादानसूत्रे वक्ष्यमाणं विषयवाक्यम् । तत्रैव प्रकाशे विषयवाक्योपन्यासेनेत्युक्तम् । भगवद्दत्तकर्तृत्वविशिष्टः । तेन तद्गुणसारसूत्रस्य तस्य ब्रह्मण इत्यादिभाष्यस्याविरोधः । अत एव जन्मादिसूत्रभाष्यम् न सांख्यस्य ब्रह्मगतमेव कर्तृत्वमित्यन्तम् । एवकारेण प्रकृतिव्यवच्छेदः । अर्थवत्त्वमनुबन्धचतुष्टयत्वं प्रतिपाद्यतासंबन्धेन । जीवमेवेति वक्ष्यमाणभाष्यात् फलवत्त्वं प्रतिपाद्यतासंबन्धेन उपलक्षणमेतत् 'सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः' इति वार्त्तिककाराणाम् ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

जीवमेवाधिकृत्य वेदे अभ्युदयनिःश्रेयसफलार्थं सर्वाणि कर्माणि विहितानि ब्रह्मणोऽनुपयोगात् । जडस्याशक्यत्वात् । संदिग्धेऽपि तथैवाङ्गीकर्तव्यम् ॥ ३३ ॥

---

भाष्यप्रकाशः ।

'कारीर्या वृष्टिकामो यजेत', 'ज्योतिष्टोमेन स्वर्गकामो यजेत', 'तज्जलानिति शान्त उपासीत,' 'अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति, स क्रतुं कुर्वीत' इत्यादिभिर्वेदेऽभ्युदयनिःश्रेयसफलार्थं सर्वाणि यज्ञादिरूपाण्युपासनारूपाणि च कर्माणि विहितानि । यदि जीवः कर्ता नेष्येत तदा स्वर्गकामादिपदानि तादृशाधिकारिशून्यानि कुप्यन्ति तत्तच्छास्त्रवैयर्थ्यमेवापादयेयुः । न हि तादृशकामवत्त्वं ब्रह्मणः संभवति । आत्मकामत्वेन तत्फलानुपयोगात् । न वा जडस्य बोधाभावेन तादृशकामाभावेन चाशक्यत्वात् । अतः पूर्वोक्तवाक्यैः संदिग्धेऽपि कर्तृत्वे बहूनामनुग्रहस्य न्याय्यत्वात् तत्तत्फलकामिनां जीवानामेव कर्तृत्वमङ्गीकार्यम् । नच, हन्ता चेदित्यस्य कोपः । आत्मनो नित्यत्वेन वध्यत्वाभावात् । तादृशज्ञानस्य मिथ्यात्वबोधनेनोपपद्यमानत्वात् । 'प्रकृतेः क्रियमाणानि' इत्यादिगीतावाक्येषु पौराणिकेषु च यद् गुणानामेव कर्तृत्वं स्वस्मिन्नध्यस्यतीत्युच्यते तदपि लौकिककर्तृत्वाध्यासपरम् ।

'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः' ॥

इति वाक्ये लोकप्रवाहपतितस्य कर्मणः प्राकृतगुणप्रयुक्तत्वबोधनात् । न तावता सर्वविधकर्तृत्वलोपः ।

'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ॥
शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तत्र हेतवः ॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः' ॥

इति गीतायामेव जीवस्य कर्तृत्वं कर्तेतिपदेनोक्त्वा तस्याधिष्ठानादिपञ्चहेतुसापेक्षत्वं निरूप्य केवलस्य स्वस्य कर्तृत्वाभिमाने दुर्मतित्वबोधनेन घृतद्रवत्ववत् तस्य लौकिकस्यापि

रश्मिः ।

जीवमेवेति भाष्यं विवृण्वन्ति स्म कारीर्येति । कारीरीज्योतिष्टोमौ यागनामधेये । तज्जलानिति सर्वत्र प्रसिद्धोपदेशाधिकरणविषयवाक्यमिदम् । इत्यादिभिः आदिशब्देन 'पुण्यः पुण्येन' 'एष उ एव साधु कर्म कारयति यमुन्निनीषति' इति श्रुती । वेद इति वेदान्तानां वेदत्वं 'स्मृतेश्च' इति सूत्रे भाष्ये प्रतिपादितम् । ब्रह्मण इति भाष्यं विवृण्वन्ति स्म नहीति । जडस्येति भाष्यं विवृण्वन्ति स्म न वेति । आधिदैविकवादेन प्राप्त्यायं निषेधः । सन्दिग्धेति भाष्यं विवृण्वन्ति स्म अत इत्यादि । पूर्वोक्तेति हन्ता चेदित्यादिभिः । कर्तृत्व इति कारीर्यादिवाक्योक्ते । अध्यस्यतीति कर्तृत्वमित्यवम् । लौकिकेति लौकिकत्वं लोकप्रवाहपतितत्वम् । लोकशब्दात्तत्रार्थे ठञ् । अलौकिककर्तृत्वं तु कर्ता जीव एवेति भाष्यरश्म्युक्तम् । पृथगिति दशविधम् । अकृतेति न कृता शास्त्रीया बुद्धिर्येन सोऽकृतबुद्धिस्तत्त्वात् । घृतेति घृते द्रवत्वं नैमित्तिकम् । सांसिद्धिकं जले ।



RUPA NATH (DR. RUPAK NATH)
www.astrology-tantra.com

## विहारोपदेशात् ॥ ३४ ॥

तस्यैव गान्धर्वादिलोकेषु, यद् यत् कामयते तत् तद् भवति' इति विहार उपदिष्टः । ततश्च कर्तृत्वभोक्तृत्वयोः 'साधुकारी साधुर्भवति' इति सामानाधिकरण्यश्रवणाज्जीव एव कर्ता ॥ ३४ ॥

भाष्यप्रकाशः ।

नैमित्तिकात्मधर्मत्वबोधनादिति ॥ ३३ ॥

विहारोपदेशात् ॥ ३४ ॥ जीवस्य स्वतः कर्तृभावेऽपि प्रकृतिपरत्वेन विवेकाग्रहात् तादृशकर्तृग्रहणेऽपि शास्त्रसार्थक्यमिति शङ्कायां सूत्रोक्तं हेत्वन्तरं व्याकुर्वन्ति तस्यैवेत्यादि । छान्दोग्ये दहरविद्यायां, 'स यदि पितृलोककामो भवति' इत्यादिना, 'यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते' इत्यन्तेन तत्तल्लोकस्थानादिकथनाद् विहारः स्वेच्छाक्रीडात्मकभोगरूप उपदिष्टः स चोक्तरीत्या दहरविदः कर्तृत्वमाक्षिपति । न च तादृशस्य विवेकाग्रहः संभवत्यतस्तथेत्यर्थः । अत्र पित्रादीति वक्तव्ये गान्धर्वादीति पदं विहारस्वाच्छन्द्या-

रश्मिः ।

नैमित्तिकेति । गुणनिमित्तकात्मधर्मत्वम् । तथा च नैमित्तिकसांसिद्धिकसामान्यकर्तृत्वावच्छिन्नपरं सौत्रं कर्तृपदमिति भावः । यद्वा सांख्याधिकारिणां सांख्यानभवद्वाक्योक्तं कर्तृत्वम् । वेदान्तिनां तु जीवः कर्ता शास्त्रार्थवत्त्वादित्यर्थः । इतिः सूत्रार्थसमाप्तौ ॥ ३३ ॥

विहारोपदेशात् ॥ ३४ ॥ शास्त्रेति मायामये वासनया शयानानां कर्तृत्वेन शास्त्रसार्थक्यम् । हेत्वन्तरमिति हेतुः शास्त्रार्थवत्त्वं तदन्योयं हेतुर्हेत्वन्तरस्तम् । स इति आत्मानमनुविद्य व्राजी । महीयत इति दीव्यति । स्वेच्छेति स्वेच्छया क्रीडा तदात्मको भोगस्वरूपः । उक्तेति जीवमेवाधिकृत्येत्यादिभाष्योक्तरीत्या । तादृशस्येति दहराधिकरणे सा दहरविद्या दृश्यते यत्रेति तादृशस्तस्य । तथेति विहार उपदिष्टउपदिष्टत्वप्रकारेणेत्यर्थः । विहारेति । पित्रादीति छान्दोग्यानुरोधेनोक्ते पित्रादिपारतन्त्र्यं स्यात् । अनुज्ञयाऽऽज्ञा यतस्तेषां, आदिशब्देन कर्तृत्वं स्वतन्त्रं न स्यात्ततः कर्तृलक्षणविरोधः । 'स्वतन्त्रः कर्ता' इति 'क्रियायां स्वातन्त्र्येण विवक्षितोर्थः कर्ता स्यात्' इति कर्तृलक्षणम् । किंचादिशब्देन गान्धर्वादीति गड्वादिसमासः । गान्धर्वस्यादयः पितृमातृभ्रातृस्वसृसखिगन्धमाल्यान्नपानलोकाः गान्धर्वादयः । गान्धर्वः आदिर्येषां स्त्रीलोकसर्वकामानां ते गान्धर्वादयः । गान्धर्वादयश्च गान्धर्वादयश्चेत्येकशेषः । तेषां लोकेष्विति षष्ठीतत्पुरुषः । ननु गान्धर्वलोको न श्रूयत इति चेन्न । गन्धर्वाणां गीतवादित्राभ्यां संस्क्रियते गान्धर्वस्तदादीनां लोकेष्वित्यर्थात् । 'अथ यदि गीतवादित्रलोककामो भवति संकल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन संपन्नो महीयते' इति श्रुतेः । तत्रश्चेत्यादिभाष्यार्थस्तु नोक्त एव स्फुटत्वम् । नन्वदर्शनान्मास्तु जीवः कर्तेश्वरस्तु जन्मादिसूत्रात्कर्ता सिद्धः । स एवान्तर्याम्यस्तु कर्तेत्याशङ्क्याहुः ततश्चेत्यादि । विहाररूपभोक्तृत्वोपदेशात् । च पुनर्जीव एव कर्ता नान्तर्याम्यादिः । तत्र हेतुः कर्तृत्वेति स्याद्यदि कर्तृत्वमात्रं स्यान्न त्वेवं किंतु यद्यत्कामयते तत्तद्भवतीति भोग्यभवनोक्तेः भोगकर्तृत्वं तच्चान्तर्याम्यादौ नास्ति 'अनश्नन्' इति श्रुतेः 'न तदश्नाति' इति श्रुतेश्च । किंच । 'साधुकारी' इत्यादौ साधुकर्मकारी साधुः साधकः परकार्यस्येति साधुभोगकारी

1. मूले सामानाधिकरण्यादिति रश्मिकारसंमतः पाठः ।



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

## उपादानात् ॥ ३५ ॥

'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति जीवेन सर्वेषां विज्ञानमुपादीयते । तस्मादिन्द्रियादीनां करणत्वमेव । स्वातन्त्र्यादस्यैव कर्तृत्वम् ।

---

भाष्यप्रकाशः ।

दिद्योतनार्थम् । यत्तु कैश्चित्, 'स ईयते पुरुषो यत्र कामम्' इति श्रुत्युपन्यासेन स्वामी क्रिया विहारत्वेनादृता । तन्न रुच्यम् । लभ्यमाने ईदृशे ज्ञानिनो विहारे तादृशाज्ञानिविहारग्रहणस्यायुक्तत्वादिति ॥ ३४ ॥

उपादानात् ॥ ३५ ॥ संकल्पस्य मनोधर्मत्वाद् दहरविद्योक्ते मनःसंसृष्टत्वमेवेति न केवले जीवे कर्तृत्वसिद्धिरिति शङ्कानिरासायोक्तं हेत्वन्तरं विषयवाक्योपन्यासेन व्याकुर्वन्ति तदेषामित्यादि । श्रुतिस्तु बृहदारण्यके दृप्तबालाकिब्राह्मणस्था 'यत्रैष एतत् सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति । अत्र अभूदित्यन्तं भिन्नं वाक्यम् । अग्रिमे तु विज्ञानेन स्वीयेन गुणेन एषां प्राणानामन्तर्बहिरिन्द्रियाणां विज्ञानं ज्ञानजनिकां शक्तिमादायेत्यर्थो बोध्यः । शेषं स्फुटम् । तत्रैव

रश्मिः ।

भवतीति पूर्वसूत्रोक्तकर्तृत्वं भोगकर्तृत्वमित्येवं भोक्तृत्वकर्तृत्वयोः सामानाधिकरण्यमेकाधिकरणवृत्तित्वं तस्मात् । सामानाधिकरण्यश्रवणादिति पाठान्तरम् । जीव एव न तु परमात्मा कर्तेति । कैश्चिदिति शंकराचार्यैः । स इति अत्रैवः स आत्मा यथेष्टमीयते गच्छतीति श्रुत्यर्थः । स्वामीति । जीवप्रक्रियायां संध्ये स्थानेऽस्य पाठात् । ज्ञानिन इति 'य इहात्मानमनुविद्य व्रजति' इति श्रुतेः । अयुक्तेति उक्तश्रुतिविरोधादयुक्तत्वम् । गौणमुख्यन्यायेनाप्ययुक्तत्वं तस्मादिति ॥ ३४ ॥

उपादानात् ॥ ३५ ॥ संकल्पस्येति संकल्पादेवास्य गीतवादित्रे इत्याद्युक्तसंकल्पस्य । मनःसंसृष्टत्वमिति मनःशब्दः प्रकृतोपलक्षकः भाष्यात् । सकलेन्द्रियोपलक्षकश्च इन्द्रियादीनामिति भाष्यात् । हेत्वन्तरमिति हेतुं विहारोपदेशरूपम् । विषयेति पूर्वसूत्रे सामान्यकर्तृत्वमुक्त्वा द्वितीये भोगकर्तृत्वं समर्थितम् । समर्थिते भोगकर्तृत्वे 'तन्मनोऽकुरुत' इति श्रुतिपश्चोपस्थितिः 'अधिष्ठाय मनश्चायं विषयानुपसेवते' इतिस्मृतेः । ततश्च संशयावसरः । ननु पूर्वमेव परमात्मना संशयः कुतो नेति चेन्न । विषयवाक्यगतपदस्य पूर्वसूत्रयोरभावादत्र तूपादानपदसत्त्वात् । अतोऽत्र विषयवाक्योपन्यासस्तेनेत्यर्थः । सर्वेषामिति प्राणपदवाच्येन्द्रियाणाम् । तस्मादिति प्राणानामिति मध्ये षष्ठ्याः । दृप्तेति बलाकाया अपत्यं बालाकिः दृप्तो गर्वितः । अजातशत्रोर्गार्ग्यं प्रति वचनम् । यत्र यस्मिन्निमित्ते सुप्तो विशेषविज्ञानरहितोऽभूद्य एष विज्ञानमयः पुरुषस्तन्निमित्तमेतच्छृणु । इत्यस्मिन्नर्थे एकस्यैतदो रूपस्य प्रथमान्तस्य वैयर्थ्यमत आहुः अत्रेत्यादि । अर्थस्तु स एव । 'एकतिङ्वाक्यम्' । स्वीयेनेति स्वमात्मा तस्येदं चैतन्यं गुणस्तेनेत्यर्थः । जीवेनेति भाष्यात् । स्फुटमिति । तस्मादिति भाष्ये तस्यार्थः । विषयवाक्ये विज्ञानमय इत्यत्र संशयः 'विज्ञानं यज्ञं तनुते' इति श्रुत्या विज्ञानं जीवः 'बुद्धिर्विज्ञानरूपिणी' इति भागवते विज्ञानं बुद्धिः 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्' इति श्रुत्या विशेषज्ञानकरणं मनः संकल्परूपम् । तत्र बुद्धेर्मनोभेदत्वेन विज्ञानपदेन जीवो वा मनो वेति संशयः । जीवस्य कर्तृत्वेन तत्संसृष्टमनसोऽपि कर्तृ-



DR. RUPNATHJI( DR. RUPAK NATH )
w.astrology-tantra.c

यस्तु मन्यते बुद्धिसंबन्धाज्जीवस्य कर्तृत्वमिति । स प्रष्टव्यः । किं बुद्धिकर्तृत्वं जीवे समायाति अथवा जीवगतमेव कर्तृत्वं बुद्धिसंबन्धादुद्गच्छति

भाष्यप्रकाशः ।

श्रुत्यन्तरं च, 'तद्गृहीत एव प्राणो भवति गृहीता वाग् गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः स यत्रैतत् स्वप्नया चरति, स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते' इति । तथाच स्वप्नावस्थायामज्ञानबहुलायामपि प्राणानामन्तर्बहिरिन्द्रियाणां ग्रहणादिकथनात् तदानीं प्राणाख्येभ्य इन्द्रियेभ्यो विविक्तस्यैव ग्रहीतृत्वमुच्यते । अतो दहरविदः संकल्पोऽप्यात्मधर्म एव ज्ञेयः । 'कामः संकल्पः' इति श्रुतिस्तु लौकिकतत्परा । अतः स्वातन्त्र्याज्जीवस्यैव कर्तृत्वमित्यर्थः । अत्र मतान्तरमनुवदन्ति दूषयितुं विकल्पयन्ति च यस्त्वित्यादि, स प्रष्टव्य इत्यादि च ।

रश्मिः ।

स्वम् । पूर्वपक्षस्तु जीवस्य कर्तृत्वेन तच्चैतन्यस्यापि कर्तृत्वम् । पर तु मनःसंसृष्टस्य जीवस्य 'संकल्पादेवास्य गीतवादित्रे समुत्तिष्ठतः' इति श्रुतेरिति । तस्मादिन्द्रियादीनामिन्द्रियमनोबुद्धीनां करणत्वं तृतीयान्तविज्ञानपदवाच्यत्वेन तथा । एवकारस्तु सर्वत्रप्रसिद्ध्या । ननु भाष्यीयपदसंशयः कुतो न इति चेन्न आदानघटितविषयवाक्ये तात्पर्याद् एव स्फुटमित्यर्थः । स्वातन्त्र्यादिति सिद्धान्तभाष्यमित्याशयेन तद्विवरीतुमाहुः तत्रैवेति, वागादिशक्तिकविज्ञानादान एव । वक्ष्यमाणप्राणपदस्योपलक्षकत्वाश्रयणादेवकारः । तद्गृहीत इति तत्तत्र स्वापकाले । स इति जीवः । स्वप्नयेति । स्वप्ने साध्यया मायया । 'तत्र साधुः' इति यत् । अग्र एतत्प्रपञ्चरूपा श्रुतिः । सा विस्तरभिया नोपक्षिप्ता अस्माभिर्लिख्यते । 'ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति' इति । अर्थस्तु यत्र चरति ते लोकाः कर्मफलसूचकानि विहारादिस्थानानि तज्जीवस्तत्र स्वप्नस्थाने वा । उतेवेत्यव्यये । महाराज इव 'अनुकृतेस्तस्य च' इति सूत्रान्न तु महाराज इतीव प्रयोगः । उच्चं देवत्वादि, अवचं तिर्यक्त्वादि । स इति जीवः । जानपदान् जनपदे देशे संजातान् राजोपकरणभूतान् भृत्यादीन् । एतत् निमित्तम् । प्राणानिति इन्द्रियाणि । अपीति अपिना ज्ञानिनो विहारस्तत्र । विविक्तस्यैवेति 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' इति दहरविद्याश्रुतेः । अन्यथाननुविद्य व्रजत इव सर्वेषु लोकेष्वकामचारो भवेत् । अत उक्तं विविक्तस्यैवेति । सर्वसंमत्यैवकारः । संकल्प इति संकल्पात्पित्राद्युत्थानुत्थानाद् इह स्वप्ने पित्रादिसमुत्थानं श्रूयते 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादिना । अत आत्मधर्मोऽलौकिकः । लौकिकेति । तथा च लौकिकानां पितॄणां समुत्थानमिति भावः । स्वातन्त्र्यादिति 'स्वतन्त्रः कर्ता' इति सूत्रोक्तात् । एवमपि 'गावो वै सत्रमासीरन्' इत्यत्र तु गावो नेन्द्रियाणि किं तु प्रसिद्धा एव गाव इत्येवकारः । मतान्तरमिति शंकराचार्यमतम् । विकल्पेति अथवेत्यादिभाष्येण विकल्पयन्ति । स प्रष्टव्य इत्यादि । यथा भवति तथा विकल्पयन्तीत्यन्वयः । स प्रष्टव्य इत्यादीत्यतद्गुण-

१. पूर्ववत् ।



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

**अथवा शशविषाणायितमेव कर्तृत्वं संबन्धे समायाति । नाद्यः । जडत्वात्, अनङ्गीकारात् पूर्वं निराकृतत्वाच्च । द्वितीये त्विष्टापत्तिः । उपादानविरोधश्च ।**

---

भाष्यप्रकाशः ।

दूषयन्ति नाद्य इत्यादि । बुद्धिर्हि जडा । जडगतं कर्तृत्वं चेतने समायातीति न क्वापि दृष्टम् । विपरीतं रथाऽऽदौ दृष्टम् । अतो नाद्यः । किंच । सूत्रकृता कुत्र वा जडे कर्तृत्वमङ्गीकृतं येनात्र तदाद्रियते, यदि तथा स्यात् पूर्वं न प्रकृतेः कर्तृत्वं च रचनानुपपत्त्यादिसूत्रेषु निराकुर्यात्, अतोऽनङ्गीकारात्, पूर्वं निराकृतत्वाच्च नाद्य इत्यर्थः । द्वितीयं दूषयन्ति द्वितीय इत्यादि । कर्तृत्वस्य यद्यपि घृतद्रवत्ववज्जीवधर्मत्वसिद्ध्या इष्टापत्तिस्तथापि प्राणानामुपादेयतया श्रुतौ सिद्धत्वाद् बुद्धेरपि प्राणेष्वेव प्रवेशात् तत्संबन्धेनोद्गमाङ्गीकारे प्राणोपादानविरोधश्च । अतः सोऽपि नेत्यर्थः । नच जीवानां करणगोचरसाक्षात्काराभावात् तद्ग्रहणं कथमुपपद्यत इति वाच्यम् । जाग्रति स्वयंज्योतिष्ट्वाभावेन तत्साक्षात्काराभावेपि, 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' इति श्रुत्या तदानीं स्वयंज्योतिष्ट्वेन करणनाडीप्रभृतिसाक्षात्कारसंभवे सुखेन तद्ग्रहणोपपत्तेः । नचैवं सति जाग्रति कदाचित् तत्स्मरणापत्तिः । निद्रया स्वयंज्योतिष्ट्वस्यैव ग्रहणादिविषयक-

रश्मिः ।

संविज्ञानः । भाष्ये शशेति शशविषाणमिवाचरितं[1] वा कर्तृत्वम् । एवकारस्तु व्यावहारिकीं सत्तां व्यवच्छिनत्ति । संबन्ध इति शशशृङ्गं नास्तीत्यत्र शशशृङ्गाप्रसिद्ध्या प्रतियोगिरूपकारणज्ञानाभावान्नाभावज्ञानं स्यादिति प्रतियोगिप्रसिद्ध्यै शृङ्गे शशीयत्वाभाववद्बुद्धिसंबन्ध इत्यर्थः । समायातीति जीवे कर्मणि वा । प्रकृते जडेति सत्त्वगुणरूपत्वात् । ज्ञानरूपा नैयायिकानाम् । अनङ्गीति भाष्यविवरणम् । किं चेत्यादि । पूर्वमिति द्वितीयपादारम्भे । भाष्यविवरणं कर्तृत्वस्येत्यादि । घृतेति नैमित्तिकं द्रवत्वम् । दार्ष्टान्तिके बुद्धिनिमित्तम् । प्राणानामिति प्राणविज्ञानानाम् । धर्मे धर्मिण आधेयतासंबन्धो लक्षणा । बुद्धेरिति कर्तृत्वनिमित्तायाः । उद्गमेति कर्तृत्वोद्गमाङ्गीकारे । प्राणेति जीवानां निराकारत्वेन हस्तधर्मीभूतोपादानविरोधः । गृहीतेः प्राण इत्यत्र ग्रह उपादान इति धातुपाठात् । स इति द्वितीयः पक्षः । 'हस्तौ चादातव्यं च' इति श्रुत्या निराकारस्य हस्ताभावात्करणानीन्द्रियाणि तेषां विषया गोचरा उपादानादयस्तेषां साक्षात्काराः प्रत्यक्षाणि तेषामभावादित्यर्थः । हस्ताभावाद्गोचरोपादानाभावस्तदभावात्तत्साक्षात्काराभावस्तस्मात् । तद्ग्रहणं प्राणोपादानम् । जनयतीत्येति यतत इति तत्तत्कारणपरंपरा तदभावात्कथमिति प्रश्नः । करणेत्याद्यव्यवहितग्रन्थस्त । स्वप्ने निराकारत्वाभावादुपपत्तिमाहुः जाग्रतीति । अत्रेति स्वप्ने प्रकरणात् । तदानीमिति सुप्तस्य विज्ञानकाले । स्वयमिति न तु करणादिद्वारा । करणेति करणादीत्यर्थः । दृष्टानुरोधेन साक्षात्कारसंभवे तद्ग्रहणेति प्राणग्रहणोपपत्तेः । तत्स्मरणेति अनुभवस्य स्वसजातीयगोचरविषयकस्मरणजनकसंस्कारजनकत्वनियमेन चाक्षुषस्मरणवत् प्राणग्रहणस्मरणापत्तिः । तमस्त्वेन ज्ञाननाश्यत्वेन कार्यकारणभावादाहुः निद्रयेति निद्रा 'तमस्त्वज्ञानजं विद्धि' इतिवाक्यात्तामसी तया विषयाग्रहणरूपया । ननु स्वयंज्योतिष्ट्वं निद्रान्तर्गतं कथं निद्रया तिरस्कार्यमिति चेन्न निद्रापदेन तच्चरमवृत्तेर्विवक्षितत्वात् । जाग्रदवस्थाप्रागभावाधिकरणक्षणस्य निद्राक्षयाधिकरणक्षणत्वात् । तथापि प्रागभावा-

---

1. चरितं ।

तृतीये शास्त्रविरोधः । ब्रह्मणि सिद्धत्वाच्च । असत्कार्यस्य निराकृतत्वात् । सर्वविप्लवस्तु माध्यमिकवदुपेक्ष्यः ॥ ३५ ॥

भाष्यप्रकाशः ।

संस्कारस्यापि तिरस्कारात् । नच तिरस्कारे मानाऽभावः । कार्याभावेनैव तदनुमानात् । अथवा, उपेक्षाज्ञानादिव तादृशज्ञानादपि संस्कारानुत्पत्तिरुपेक्षाज्ञानवत्तदपि त्रिक्षणावस्थाय्येवेति वा श्रुतार्थापत्त्या कल्पनीयमतो न दोषः ।

नच द्वितीयस्कन्धे, 'आत्मा यथा स्वप्नजनेक्षितैकः' इत्यत्र स्वप्नादौ भगवत एव द्रष्टृत्वप्रतिपादनाच्च तत्र जीवस्य द्रष्टृत्वमिति शङ्क्यम् । तत्र, 'स सर्वधीवृत्त्यनुभूतसर्वः' इत्यत्रोक्तायाः भगवतो द्रष्टृत्वप्रतिज्ञायाः पूर्तये भगवतो द्रष्टृत्वव्युत्पादनेऽपि जीवद्रष्टृत्वस्यानिषेधात् । अन्यथा स्वप्नानुस्मरणाभावप्रसङ्गात् । इदं च मया तत्रैव व्युत्पादितमिति ततोऽवसेयम् ।

भिक्षुस्तु—यद्यपि जीवानां करणगोचरसाक्षात्कारो नास्तीति तद्गोचरा कृतिर्न संभवति, तथापि निद्रानिमित्तकारणचक्षुर्निमीलनादिद्वारैव निद्रायां कर्तृत्वं बोध्यमित्याह तच्चास्माकं रोचते । उक्तरीत्या कर्तृत्वे साक्षात्संभवति तथा कल्पनस्यायुक्तत्वादिति । तृतीयं दूषयन्ति तृतीय इत्यादि । शास्त्रे हि कर्तृत्वं प्रतिज्ञातं ब्रह्मकर्तृत्वं । यदि तच्छशविषाणायितमेव भवेत्

रश्मिः ।

विकरणक्षणे जाग्रदवस्थाया अभावात्कथं निद्रया स्वप्नोतिष्ठतिरस्कार इति चेत् स्वकारणाभेददर्शनेन जाग्रदवस्थासत्त्वादित्यवधेहि । तिर इति । कार्याभावादिति भावः । एतदेवाहुर्नचेत्यादिना । कार्यं ग्रहणादिविषयकसंस्कारः । अनुमानादिति जाग्रदवस्था तिरस्कारवती कार्याभावात् सुषुप्तिवदिति गुरुधर्मस्यावच्छेदकत्वादुक्ते साध्यहेतुतावच्छेदके । तथापि जीवस्य साकारतापत्तिमाशङ्क्य पक्षान्तरमाहुः अथवेति । उपेक्षेति उपेक्षाज्ञानानास्कन्दितानुभवस्य संस्कारकारणत्वम् । अन्यथा पण्यप्रसारितनानापदार्थानामनुभवैर्जन्याः संस्कारास्तैः सर्वविषयकस्मरणापत्तिः । सर्वानुभवजन्यसंस्काराणां सत्त्वात् । तदपीति स्वाप्निककरणनाडीप्रभृतिज्ञानमपि । श्रुतार्थेति श्रुतार्थापत्तिर्दृष्टार्थापत्तिर्द्विविधा । तत्र श्रुतार्थापत्तिर्जीवन्देवदत्तो गृहे नास्तीत्यत्र । दृष्टार्थापत्तिस्तु पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र । तत्र दृष्टार्थानुपपत्तेः शब्देऽभावाच्छ्रुतार्थानुपपत्तिमाहुः श्रुतार्थेत्यादि । श्रुतोर्थो 'विज्ञानमादाय तद्गृहीत एव प्राणः' इत्यादिस्तस्यार्थान्तरं तत्तं विनानुपपद्यमानस्योपपत्तयेऽर्थान्तरकरणनाडीप्रभृतिज्ञानवच्छ्रुतार्थो 'निराकारास्तदिच्छया' इति 'यथाग्नेः क्षुद्रा विस्फुलिङ्गाः' इति च जीवनिराकारत्वरूपस्तदुपपत्तये उपेक्षाज्ञानवत्स्वाप्निककरणनाडीप्रभृतिसाक्षात्कारतिरस्कारकल्पनं श्रुतार्थापत्तिस्तयेत्यर्थः । दोष इति साकारत्वापातः । भिक्षुरिति भगवान्भिक्षुः । तद्गोचरेति उपादानविषयिणी । निद्रेति । निद्रायां कर्तृत्वं बोध्यमित्यन्वयः । तच्च कर्तृत्वम् । निद्रा तामसी सुप्तस्य विज्ञानरूपा विशिष्टा सा भवति तत्र बाधितम् । जाग्रदवस्थयाऽज्ञानतिरस्कारात्सुप्तविज्ञानात्मकनिद्राऽसंभवादत आह निद्रेति । निद्राया निमित्तकारणं यच्चक्षुर्निमीलनादि तत्पूर्ववृत्तीति तद्द्वारा । अन्यस्याभावे एवकारः । तथा च शतपत्रवेधवत् प्रागेव स्वकारणगतं कर्तृत्वं निद्रायां भवतीति भावः । भगवद्भिक्षुमते स्वीयमतसमाप्ताविति । विरोध इति । अप्रवृत्तिपदमनुक्त्वा विरोधपदग्रहणं ब्रह्मणि शास्त्रप्रवृत्तिरस्तीति । जीवीयकर्तृत्वे शास्त्राप्रवृत्तिरित्युक्तौ गौरवमिति । समागमशशविषाणायितत्वयोर्विरोधः सहानवस्थानलक्षणो दत्तः । ब्रह्मणीत्यादिभाष्यमव-



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

**व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६ ॥**

व्यपदेशः, 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' इति । अत्र सांख्ये बुद्ध्यादीनामेव कर्तृत्वं न जीवस्येति क्रियायां यागादिकर्मसु, न तु भोगे । जीवस्य

---

भाष्यप्रकाशः ।

तदा तस्य समागमनासंभवात् कथं तत्प्रतिजानीयादतस्तद्विरोधः किंच । यदि तत् तथा स्याद् ब्रह्मण्यपि न स्यात् । तथा सतीक्षत्यादिसूत्रेषु न तत्प्रतिपादयेत्, अतो ब्रह्मणि सिद्धत्वादपि न कर्तृत्वस्य तथात्वम् । नच ब्रह्मणि सिद्धत्वेऽपि जीवे शुक्तिरजतवदसदेवोत्पद्यत इति युक्तम्, असत्कार्यवादस्य निराकृतत्वात् । यत्तु ब्रह्मणो निर्गुणत्वात् कार्यस्य विधिकत्वेन कर्तृत्वमपि तथैवेति, तदयुक्तम्, सर्वविप्लावकत्वात् । सर्वविप्लवस्तु माध्यमिकप्रच्छन्नवाद एव पर्यवस्यतीति सर्वप्रमाणविरुद्धत्वात् तद्वदेवोपेक्ष्यः । तस्मात् तृतीयोऽपि नार्थः ॥ ३५ ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६ ॥ एवं श्रुतार्थापत्त्या जीवस्य कर्तृत्वं साधयित्वा साक्षाच्छ्रुत्या साधयतीत्याशयेन व्याकुर्वन्ति व्यपदेश इत्यादि । व्यपदेशः प्रथमाविभक्त्या कर्तृत्वेन निर्देशः, सोऽस्यां श्रुतौ जीवे वर्तते । अतः कल्पनां विना साक्षाच्छ्रुत्यैव स कर्तेत्यर्थः । सूत्रशेषं व्याकुर्वन्ति अत्र सांख्ये इत्यादि । अत्र अस्मामपि

रश्मिः ।

तारयन्ति स्म किंचेति । तदिति कर्तृत्वं शशविषाणायितं स्यात् । ईक्षतीति । आदिना 'आनन्दमयोभ्यासात्' । तदिति कर्तृत्वम् । तथेति शशविषाणायितत्वम् । तु अम् । पक्षव्यावृत्तिः प्रसिद्धिश्चार्थः । असदित्यादिभाष्यं विवरिष्यन्तः साध्यमाहुः न चेति । निरेति तर्कपादे 'नाभाव उपलब्धेः'इत्यधिकरणे निराकृतत्वात् । सर्वविप्लव इति भाष्यं विवरीतुमाहुः यस्त्विति । एवकारस्तत्रान्वयत्वेन । सर्वेति सर्वेषां सन्मार्गाणां विप्लावकत्वात् । तदुक्तं निबन्धे शास्त्रार्थे 'महेन्द्रजालवत्सर्वं कदाचिन्माययासृजत् । तदा ज्ञानादयः सर्वे वार्तामात्रं न वस्तुतः' इति । एवेति गुणत्रयविवरणाध्याये 'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्ध उच्यते' इति वाक्यादेवकारः । सर्वप्रमाणेति 'सर्वं खल्विदं ब्रह्म' 'तदात्मानᳫँस्वयमकुरुत' 'सच्चिदानन्दमिदं सर्वम्' इत्यादीनि प्रमाणानि । 'असदेवेदमग्र आसीत्' 'सत इदमुत्थितं सदिति चेन्न तु तदेतदनृतम्' इत्यादिवाक्यानि तु वैराग्यार्थं जगतो मिथ्यात्वप्रतिपादकानि पूर्वं व्याख्यातानि चेति सर्वप्रमाणविरुद्धत्वादिति ॥ ३५ ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६ ॥ कर्तृत्वमिति उपादानकर्तृत्वं निराकारस्य साधयित्वा । श्रुत्येति विज्ञानं जीवो यज्ञं तनुते विस्तारयति कर्माणि च लौकिकानि 'कायेन वाचा मनसा' इत्यादिपद्योक्तानि विस्तारयति । शंकरभाष्ये मनोमयो वेदात्मोक्तः । वेदार्थविषया बुद्धिर्निश्चयात्मिका विज्ञानं तन्मयः । विज्ञानैः प्रमाणस्वरूपैर्निर्वर्तित आत्मा विज्ञानपूर्वको विज्ञानादिस्तायत इति । स मायावादः । अस्माकं तु मतं मनोमयो वेदात्मोक्त इति समानम् । तदनु नानाविधयागादिसाधनवतः फलं विज्ञानमय इति माश्रवर्णिकसूत्रभाष्योक्तप्रकारेण । तदनु वेदानन्तरं नानाविधयागादिसाधनम् । तद्द्वारा चित्तशुद्धिद्वारा विज्ञानमयः विविधज्ञानवज्ज्ञानम् । ततो विज्ञानरूपेण फलेन प्रवृत्तिद्वारा



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

जडस्य च स्वातन्त्र्याभावान्न कर्तृत्वम् ॥ ३६ ॥

---

भाष्यप्रकाशः।

विकारप्रत्यये मानत्वम्। श्लोके तस्य यज्ञकर्तृतायाः वक्तव्यत्वात्। श्रुत्यन्तरे च यजमानभागप्राशनप्रशंसायाम् 'एतावान् वै यज्ञो यावान् यजमानभागो यज्ञो यजमानो यद्यजमानभागं प्राश्नाति यज्ञ एव यज्ञं प्रतिष्ठापयति' इति यज्ञस्वामित्वेन यजमानस्य यज्ञतायाः कल्पनया उपदिष्टत्वाद्यजमानधर्माणां श्रद्धादीनां शिरस्त्वादिः यज्ञशिरःप्रभृतिरूपत्वं कल्पनयोच्यते। पञ्चाग्निविद्यायां श्रद्धाहोमकथनात् तस्या यज्ञाङ्गतया तद्धर्मत्वम्, आत्मसंस्थे समायमाणानुष्ठीयमानो धर्मो। योगश्चात्मचिन्तनसाधनत्वाद्योगशिखाद्युपनिषत्सु विहितत्वाच्च धर्म एव। महर्लोकोऽप्याधारतया योगयज्ञाङ्गम्। इदं च तृतीयाध्यायेन संगतम्। अत इयं कल्पना यज्ञत्वार्थेति नास्या विकारप्रत्ययसाधकत्वमित्यर्थः। सिद्धमाहुः तस्मादित्यादि। ननु भवत्वेवं तथापि यज्ञादिकर्तृत्वं शरीरविशिष्टस्यैवेति बुद्धावेव कर्तृतायाः पर्यवसानमित्यत आहुः जडस्येत्यादि।

रश्मिः।

श्लोक इति 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च। विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासते' इति श्लोके। तस्य विज्ञानमयस्य। श्रुत्यन्तर इति। श्रुतिस्तु संहिताप्रथमाष्टके सप्तमप्रश्नस्था। एतावानिति। स्वचिक्रीडिषया यजमानभक्षणकाल एतावानात्मा निर्मितः विद्वन्मण्डनोक्तदिशा सर्वशक्तित्वाद्ब्रह्मणः। श्रुतित्वाद्वा इति। यज्ञो यजमानो 'यो यच्छ्रद्धः स एव सः' इति स्मृतेः सामानाधिकरण्यम्। प्राश्नातीति। यदेव विद्ययेति श्रुतेर्ज्ञानपूर्वकमशनं प्राशनम्। यज्ञ इति सप्तम्यन्तमपि। कल्पनयेति स्मृत्याज्ञारूपसामर्थ्येन। यज्ञेति यज्ञस्य शिरःप्रभृतयस्तद्रूपत्वम्। किमेतावतेत्यतोऽनेकरूपतया यज्ञरूपं विज्ञानं विकारव्यतिरिक्तमित्याहुः पञ्चाग्नीति। इयं रंहत्यधिकरणस्था। तस्या इति 'यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति श्रुतेः। अनुपश्रद्धाया यज्ञस्य कर्तृरूपाङ्गतया तद्धर्मत्वम्। 'चोदनालक्षणोऽर्थो धर्मः' इति धर्मलक्षणात्कर्तृधर्मत्वम्। धर्माविति अनुष्ठीयमाने इत्यत्र कर्मणी। आत्मेति। 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इति स्मृतेः। धर्मो ह्यात्मदर्शनसाधनत्वं तस्मात्। यद्वा। आत्मचिन्तनं तत्साधनं चिन्तनसाधनं तस्मात्। पञ्चमस्कन्धे चतुर्थाध्याये। 'द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज' इत्यत्र द्रव्यदेशकालाः, वयो युवा, यजमानस्येति कर्तोक्तः। विविधोद्देशपदेन परमधर्मसाधनत्वाद्योगो धर्म इति प्रथमपक्षे लक्षणापत्त्याऽरुच्या हेत्वन्तरमाहुः योगशिखेति। धर्म एवेति। धर्म इति योगयज्ञे द्रव्यस्थानीयत्वेन धर्म एव चोदनालक्षणत्वात्तस्येनैवकारः। योगयज्ञेति। योगो यज्ञ इति कर्मधारयः। तस्याङ्गमिति षष्ठीतत्पुरुषः। देशरूपाङ्गम्। इदमिति श्रद्धादीनां शिरस्त्वादि। तृतीयेति तृतीयान्तं पदम्। कल्पनेति स्मृतिसामर्थ्येन शिरस्त्वादिकल्पना श्रद्धादीनाम्। विकारेति। तथा श्लोके द्वारेभ्य इत्यत्र सुबोधिन्याम्। ज्ञानशक्तिक्रियाशक्तियुक्तो हि भगवान्। ज्ञानक्रियायोगेनैतयोरुपगच्छतीव। प्राकट्यं तु विवर्तत एवेत्यलम्। अविकृतत्वमुपादानस्य। समन्वयाधिकरण उपपादनात्। तस्मादित्यादीति एवकारेण भाष्ये बुद्धिव्यवच्छेदः। बुद्धाविति बुद्धेर्गुणेनाङ्गुष्ठमात्रत्वात्। सांख्यप्रसिद्ध्यैवकारः। पर्यवेति तथापि श्रुतिपथमनुसरतो 'बुद्धेर्गुणेनाङ्गुष्ठेन चैव आराग्रमात्रो ह्यपरोपि'अङ्गुष्ठमात्रो दृष्ट इति 'अङ्गुष्ठमात्रः पुरुषः अङ्गुष्ठं च समाश्रितः'



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

## शक्तिविपर्ययात् ॥ ३८ ॥

नन्वीश्वरवत् स्वार्थमन्यथा न कुर्यादिति चेच्छक्तिविपर्ययात्। तथा सामर्थ्याभावात्। इत एव दैवादहितमपि करोति ॥ ३८ ॥

## समाध्यभावाच्च ॥ ३९ ॥

जीवस्य क्रियाज्ञानशक्ती योगेन सिद्ध्यतः। समाध्यभावाच्छक्त्यभाव इत्यर्थः। चकारात् तादृशमन्त्राभावोऽपि।

---

### भाष्यप्रकाशः।

आत्मनां विभुत्वाभ्युपगमेन सर्वेषां सन्निधानस्याविशिष्टत्वात्। अत एव नान्तःकरणादिनापि व्यवस्थासिद्धिरित्याहुः। तदपि युक्तम् ॥ ३७ ॥

शक्तिविपर्ययात् ॥ ३८ ॥ सूत्रमवतारयन्ति नन्वित्यादि। अयमर्थः। चक्षुषा अनिष्टोपलब्धिर्या जायते सा न स्वप्रयत्नसंपाद्या। प्रमाणवस्तुपरतन्त्रत्वेन दैवाज्जायमानत्वात्, कर्म तु न तथा, स्वयत्ननिष्पाद्यत्वात्, अतः कर्मजनितेष्टानिष्टे उपलब्धिदृष्टान्तो न युक्तः। अतो यदि जीवः स्वतः कर्ता स्यात् तदा स्वार्थमनिष्टं न कुर्यात्। यथा ईश्वरः स्वार्थमनिष्टं न करोति तद्वत्। दृश्यते च तत्। अतो न जीवः कर्तेति। अत्र समाधिं व्याकुर्वन्ति तथेत्यादि। विपर्ययोऽभावः। तथाच शक्त्यभावादनिष्टकरणम्। ईश्वरे तु शक्तिरस्तीति न स दृष्टान्तः, अतोऽनिष्टकरणं न साहजिककर्तृत्वबाधकमित्यर्थः ॥ ३८ ॥

समाध्यभावाच्च ॥ ३९ ॥ शक्त्यभाव एव कुत इत्याकाङ्क्षायामेतत्सूत्रं प्रवृत्त इत्याशयेन विवृण्वन्ति जीवस्येत्यादि। स्पष्टम्। तादृशमन्त्राभाव इति सामर्थ्यसाधक-

### रश्मिः।

भोगाय स्युरित्यन्वयः। अत एवेति आत्मनां विभुत्वेत्याद्युक्तहेतोरेव। हेत्वन्तरव्यवच्छेदायैवकारः। नान्तरिति अन्तःकरणेन विषयोपसेवनं क्रियते न विषयव्यवस्था क्रियते। आदिशब्देन धर्मः। तेनापि विषया उपसेव्यन्ते न व्यवस्थाप्यन्ते इति तथा। तदपीति सूत्राणां सारवद्विश्वतोमुखत्वात्कर्तृत्वसाधनप्रकारेण प्रकृतिकर्तृत्वखण्डनं प्राप्नोतीति। अपिर्गर्हायाम्। अपि स्तुयाद्वृषलमितिवत् ॥ ३७ ॥

शक्तिविपर्ययात् ॥ ३८ ॥ स्वेति स्वं जीवः। प्रमाणेति। वस्तु विषयः। दैवादिति अधर्मात्, प्रमाणवस्तूपस्थापकात्। तथेति प्रमाणवस्तूपस्थापकत्वेन प्रकारेण। स्वयत्नेति जनिका क्रिया यत्नः। आत्मनिष्ठेति नैयायिकाः। अधर्मोऽदृष्टमपूर्वम्, कर्म तु तज्जनकमिति भेदः। न युक्त इति कार्यकारणयोर्दृष्टान्तदार्ष्टान्तिकयोर्निविष्टत्वात्। न कुर्यादिति। बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानस्य सहकारिप्रवर्तकस्याभावात्। न करोतीति 'कृष्णायाक्लिष्टकारिणे' इति श्रुतेः। शक्त्यभावादिति। शक्तिः सामर्थ्यं ज्ञानक्रियाशक्त्यभावात्। न स दृष्टान्त इति स ईश्वरो न दृष्टान्तः। इत्यर्थ इति ज्ञानक्रिययोः सामर्थ्यसाज्ञानं कारणमित्यर्थः ॥ ३८ ॥

समाध्यभावाच्च ॥ ३९ ॥ स्पष्टमिति। 'जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः' इति कैवल्यपादस्थयोगसूत्रात्समाधिरूपयोगजसिद्धी शक्ती इत्यर्थः। एवं स्पष्टमित्यर्थः। सामर्थ्येति



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**न च सहजकर्तृत्वे अनिर्मोक्षः । पराधीनकर्तृत्व एवैतत् । ब्रह्मवत् । सांख्यस्य तन्मतानुसारिणो वान्यस्य भ्रम एव । कर्तृत्वे न मुक्तिरिति ।**

---

भाष्यप्रकाशः ।

मन्त्राभावः । यथा 'भूमिर्भूम्ना द्यौर्वरिणेत्याहाशिषमेवैतामास्ते' 'सर्पा वै जीर्यन्तोऽमन्यन्त स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्ततो वै ते जीर्णास्तनूरपाघ्नत' इति । अत्र सांख्यास्तदनुसारिणो मायावादिप्रभृतयश्च जीवस्य बुद्धिसंबन्धादौपाधिकं कर्तृत्वमङ्गीकुर्वन्तः स्वाभाविके जीवस्य कर्तृत्वे यथा वह्नेरौष्ण्यान्न निवृत्तिस्तथा जीवस्य कर्तृत्वान्न निवृत्तिः स्यात् । तदनिवृत्तौ च मोक्षोऽपि न स्यात् कर्तृत्वस्य दुःखरूपत्वादित्याहुः तद् दूषयन्ति न चेत्यादि । पराधीन-कर्तृत्व एवैतदिति । आध्यासिक एव कर्तृत्वे अनिर्मोक्षस्तस्यैव दुःखरूपत्वात् । ब्रह्म-वदिति, वैधर्म्ये दृष्टान्तः । तथाच पराधीनकर्तृत्ववादिनस्तवैवायं दोषो, नास्माकमित्यर्थः । ननु शुद्धबुद्धमुक्तात्मनः प्रतिपादनात् तादृशे आत्मनि मोक्षसिद्धेरभिन्नता । तादृगात्मप्रतिपादनं च न स्वाभाविके कर्तृत्वे अवकल्पते, अत उपाधिधर्मध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविक-मिति वदतः प्रत्याहुः सांख्यस्येत्यादि । कर्तृत्वे नेति । अत्र नेति भिन्नं पदम् । भ्रमत्वे

रश्मिः ।

पूर्वसूत्रे शक्तिरुक्ता तामनुवर्त्यैकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति न्यायेन साधकमन्त्रोपस्थितिर-भावेऽन्वयः । मन्त्रेण सामर्थ्ये दृष्टान्तमाहुर्यथेति । इयं श्रुतिः पञ्चमप्रश्ने चतुर्थानुवाके प्रथमाष्ट-केऽस्ति । माधवाचार्यभाष्यानुसरणे तु पञ्चमप्रपाठके । श्रुत्यर्थस्तु भूमा परमात्मा वरिणा मेघेन यः कश्चिदाह स मन्त्र आशिषमेवैतामावत्ते आसमन्तादृदाति । उदाहरणमाह सर्पे-त्यादिना । जॄ वयोहानौ । अमन्यन्त ज्ञातवन्तः । एतम् । कसर्णीर इति गरुडनाम । काद्रवेयः कद्रोरपत्यम् । मन्त्रदर्शं जायते स ऋषिदेवताकान्मन्त्रान् वै निश्चयेन ते जीर्णाः सन्तोऽपि तनूर्नागकञ्चुकीरपाघ्नत अपयुक्तवन्त इति । मायेति मायावादिनः शंकराचार्याः । भेदाभेदवादिनो भास्कराचार्याः । अविभागाद्वैतवादिनो विज्ञानेन्द्रभिक्षवः । प्रभृतिपदार्थौ आहुरिति यथेति वक्ष्यमाणसूत्र आहुः न चेत्यादीति । सहजकर्तृत्वं व्युच्चरणकर्तृत्वम्, यथाग्नेरिति श्रुतेः तस्मिन् । अनिर्मोक्ष इति स्वरूपेणावस्थितिर्मोक्षः । अनात्मनो देहादीनभिमन्यते सोऽ-भिमान आत्मनो बन्धस्तन्निवृत्तिर्मोक्ष इति श्रुतेः । नाहं किंचित्करोमीति स्मृतेश्च । एतदिति भाष्येऽव्ययमित्याशयः । यद्वा । समीपतरवर्तिबन्धककर्तृत्वं भाष्येऽर्थ एतदित्यस्य । एवेति स्वाभाविककर्तृत्वव्यवच्छेदः । दुःखेति द्रव्याद्वैतविरुद्धमविदुषां कर्तृत्वं बन्धकत्वाद्विदुषां दुःख-रूपं तत्त्वात् । सहजं तु सुखरूपम्, ब्रह्मधर्मत्वात् । ब्रह्मवदिति । षष्ठ्यन्ताद्वतिः । वैधर्म्ये इति ब्रह्मणः पराधीनकर्तृत्वाभावादनिर्मोक्षाभाव इवेति जीवविरुद्धो धर्मः । स्वार्थे ष्यञ् । स एव वैधर्म्यं तत्र दृष्टान्तः । यद्वा जीवद्वारा ब्रह्मण आध्यासिककर्तृत्वम् । चतुष्पदो ब्रह्मणो विश्वस्य पादत्वात् । पादे मे सुखं पादे मे वेदनेति प्रसिद्धेः । अयमिति अनिर्मोक्षः । अस्मीति ननु शुद्धबुद्धमुक्तप्रतिपादनादिति चेन्न । प्रतिपादनेन शाब्दज्ञानस्य विवक्षणात् । वेदान्तविज्ञानेति श्रुतेः । कर्तृत्व इति शरीरवत्त्वसमानाधिकरणे अत्रेति । शुद्धत्वादिविरुद्धत्वात् । अत इति कर्तृत्वस्य उक्तशुद्धत्वादिविरुद्धशरीरवत्त्वापादकत्वात् । सांख्यस्येत्यादीति सांख्यमता-



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

**नपुंसक एवमुच्येतेति बाह्यवत् । निरिन्द्रियस्यैव समाधिरित्यपि । करणत्वेन बुद्धिं**

भाष्यप्रकाशः ।

हेतुः नपुंसक इत्यादि । नपुंसक इति स्वातन्त्र्यादिसर्वपुरुषधर्मशून्यः इति बाह्यवदिति, अयमभ्युपगमो बाह्यानामिव प्रमाणरहितः । तथाच प्रमाणराहित्यादस्य भ्रमत्वमित्यर्थः । अत्र हेतुस्तु मुक्तानामपि शुकसनत्कुमारादीनामुपदेशकर्तृत्वदर्शनम् । भूमविद्यायां 'तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राणः' इत्यारभ्य, 'आत्मतः कर्माण्यात्मत एवेदं सर्वम्' इत्यन्तेन पश्यस्य संकल्पादीनामात्महेतुकत्वश्रावणं च बोध्यम् । ननु क, समाध्यभावश्च शास्त्रार्थवत्त्वेनैव परिहृतो यथाप्राप्तमेव कर्तृत्वमादाय समाधिविधानादिति तद् दूषयन्ति निरिन्द्रियस्यैव समाधिरित्यपीति अध्यासशून्यतया इन्द्रियाद्यभिमानरहितस्यैव समाधिर्मुख्य इत्यपि बोध्यमित्यर्थः । अत्रापि भूमविद्यास्थं वाक्यमेव हेतुः । ननु कैवल्यात् पूर्वं जीवन्मुक्तस्यापि लिङ्गसद्भावाद् बुद्धिसंबन्धोऽस्त्येवेति कथं निरिन्द्रियत्वमत आहुः करणत्वेनेत्यादि ।

रश्मिः ।

स्त्रीति सांख्यः पुरुषस्तस्य । भ्रम इति । परप्राप्तिकर्तृत्वसमानाधिकरणमुक्त्यभावाभावरूपमुक्तिमति ब्रह्मविदि कर्तृत्वसमानाधिकरणमुक्त्यभावप्रकारकं ज्ञानं भ्रमः । तदभाववति तत्प्रकारकं ज्ञानं भ्रमः । दशगणीमध्ये यस्याः कस्याश्च कृतेः स्यात् कस्य व्यापारस्यावर्जनीयत्वात् । कृतिमत्त्वं कर्तृत्वम् । धातूपात्तव्यापाराश्रयत्वं वा कर्तृत्वम् । अत्रेति तथा च सति सप्तम्याः सामानाधिकरण्यमर्थः । कर्तृत्वसमानाधिकरणमुक्तित्वावच्छिन्नप्रतियोगिताकाभाव इति भाष्यार्थः । स्वातन्त्र्यादीति आदिशब्देन कामक्रोधावशत्वम् । प्रमाणेति तथा च जन्यजनकभावसंबन्धेन प्रमाणराहित्यादेतद्वाक्यजन्यज्ञानस्य भ्रमत्वमित्यर्थः । आप्तवाक्यं प्रमाणं, पदसमूहे नाप्तवाक्यत्वं दोषः । तथाचाप्रमाणसाहित्यादस्य भ्रमत्वमित्युक्तम् । इति बाह्यवदित्युक्तयातियौक्तिकत्वादभ्युपगमे युक्तिः । नपुंसक ऊर्ध्वरेताः कामवशेन सर्वसह इति । ननु 'पितृ रेतोतिरेकात् पुरुषो मातृ रेतोतिरेकात् स्त्री उभयोर्बीजतुल्यत्वान्नपुंसकम्' इति श्रुतेरन्यविधं नपुंसकत्वं कुतो नोक्तमिति चेत्सत्यम् । वेदबाह्यग्रन्थत्वान्नोक्तम् । अत्रेति कर्तृत्वसमानाधिकरणमुक्तत्वे । उपेति स्पष्टं श्रीभागवते । मुक्तस्य सर्वेन्द्रियलये कर्तृत्वसमर्थिकां श्रुतिं वक्तुमाहुः भूमेति । अर्थस्तु लिङ्गभूयस्त्वाधिकरणे तृतीयाध्याये भाष्ये स्पष्टः । पश्यस्येति ज्ञानिनः । यदुक्तमिति शंकराचार्यैर्यथेति वक्ष्यमाणसूत्रभाष्ये यदुक्तम् । समाधीति । द्रष्टव्य इति समाधिः । 'आत्मा वा अरे द्रष्टव्यः' इत्यत्र वेदान्तश्रवणपरित्यक्तोपाधेरकर्तृत्वेन यः समाध्यभावः समाध्यभावप्रसङ्गस्तस्मादिति सूत्रार्थः । कर्तृत्वं जीवस्य शास्त्रार्थवत्त्वमुच्यते यथेति । यत्र हि द्वैतमिव भवतीत्यादिशास्त्रेण यथावत्प्राप्तम् । एवकारस्तु व्याख्येभिः । समाधिरिति समाधिपादस्थे निर्बीजसबीजसमाधी योगसूत्रे शंकराचार्योक्तसमाधिर्मतिवादे सूत्रांशोऽर्थत्वेन व्याख्यातः । सूत्रं तु 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' इति सूत्रे तद्ध्यानं तदेव ध्यानमेवेत्यर्थः । मुख्य इति । ननु मुख्यपदं भाष्ये नास्ति । नैष दोषः । गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययमालोच्योक्तं समाधिपदम् । बोध्यमिति 'नैव किंचित्करोमि' इति वाक्यात् । भ्रम एवेति नान्वेत्यतो बोध्यं दूषणत्वेनेत्याक्षेपः । ननु मानसीसेवायां कथं कर्तृत्व 'ता नाविदन्मय्यनुषङ्गबद्धधियः' इति वाक्यात् । अत्राहुः अत्रापीत्यादि । 'आत्मत आविर्भावतिरोभावौ' इति निरुच्यात्मतो बलमिति श्रुतेः । अत्र पूर्वत्र 'बलं वा व विज्ञानाद्भूयः' इत्युपक्रम्य



RUPNATHJI( DR. RUPAK NATH ) www.astrology-tantra.com

वदत्र केनापि दृष्यते । तस्माज्जीवस्य स्वाभाविकं कर्तृत्वम् । ध्यायतीव लेलायतीवेत्यपि परधर्मानुकरणम् । अयमप्येको धर्मः ।

---

भाष्यप्रकाशः ।

तथाच बुद्धिसंबन्धस्तु केवलस्य ब्रह्माभेदेऽप्यनिवार्यः । बुद्धेः पारमार्थिके व्यावहारिके च सत्यत्वे विभुन आकाशस्येव सर्वसंबन्धत्वात् । अध्यासस्तु नास्ति, येन संबध्येत । तस्माज्जीवस्य स्वाभाविकमेव कर्तृत्वमित्यर्थः । एवं मुक्तस्य स्वाभाविकं कर्तृत्वं प्रतिपाद्य संसारिणोप्याहुः ध्यायतीवेत्यादि । तदुक्तमेकादशस्कन्धे द्वाविंशे,

'नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् ।
एवं बुद्धिगुणान् पश्यन्ननीहोप्यनुकार्यते' ॥ इति ।

गुणैर्भगवता वेति बोध्यम् । तथा चानुकरणेऽपि गुणादीनां प्रयोजकत्वमेव, धर्मस्तु जैव एव बुद्धिगुणद्रष्टृत्वकथनादिति बोध्यम् । अत एवैकादशे द्वितीयाध्यायेऽपि योगीश्वरवाक्ये

रश्मिः ।

'कर्ता भवति' इति श्रुतेः । अत एव भगवत्सेवोपयोगिदेहो वैकुण्ठादिष्वित्यत्रादिशब्द उक्तः । तेनात्रापि । अन्यथा ज्ञानमार्गे इवात्रापि 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यापत्तिस्तद्व्यवच्छेदक एवकारः । केवलस्येति मयट्प्रत्ययशून्यस्य विज्ञानमात्रस्य परमाणोर्जीवस्य । अनिवार्य इति बुद्धिस्तत्त्वान्तरं तथापि सहजकर्तृत्वार्थमपेक्षते । कर्तृत्वस्य कृतिरूपत्वेनेच्छाजन्यत्वमिच्छाया ज्ञानजन्यत्वम् । ज्ञानस्य बुद्धिजन्यत्वादनिवार्यः । बुद्ध्या पदार्थाञ्जानातीति प्रयोगात् । तदेवाहुर्बुद्धेरिति विज्ञानात्मिकायाः । आकाशस्येति आकाशं तस्य । तस्मादिति भाष्यं विवृण्वन्ति स्म तस्मादिति युक्तिसत्त्वात् । एवेति अप्यर्थे । अस्मिन्नेव विचारे औपाधिककर्तृत्वव्यवच्छेदक एवकारः । संसारिण इति लिङ्गदेहविशिष्टत्वं संसारित्वम् । ध्यायतीवेत्यादीति । इयं श्रुतिर्ज्योतिर्ब्राह्मणस्था 'कतम आत्मेति योयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः स समानः सन्नुभौ लोकौ संचरति ध्यायतीव लेलायतीव' इति । श्रुत्यर्थस्तु बुद्ध्यादिषु बहुष्वात्मा कतम इति प्रश्नः कृतो जनकेन ततो याज्ञवल्क्य उत्तरमाह योयमित्यादिना । विज्ञानमयो जीव इति व्याख्यातम् । प्राणेष्विन्द्रियादिषु स आत्मा समानः । वक्ष्यमाणवाक्येन बुद्धिसमानो गुणैरुभौ इहलोकपरलोकौ संचरति । तदेव दर्शयति ध्यायतीव ध्यानं व्यापारवती बुद्धिः तत्स्थं ध्यानं पश्यन् ध्यानं करोतीव जीवो भवति । लेलायति चलति । बुद्ध्यादिकारणेषु प्राणादिवायुषु चलत्स्वित्येवाचार्याशयगोचरो न तु परधर्माणामनु पश्चात्करणं भ्रान्त्या करणं चतुष्कोणलोहपिण्डावभासकचतुष्कोणाग्निवत् चलत्यां नावि तत्स्थप्रतीततीरस्थतरुचलनवच्चेत्यर्थ इति वक्तुमुपष्टम्भन्ति तदुक्तमिति । तथा च ध्यायतीवेत्यस्य बुद्धिर्ध्यायति जीवोत्र तद्गुणध्यानं करोतीव । एवं लेलायति बुद्धिर्जीवो लेलायति चलतीवेत्यर्थः । अनीहः करणाभावान्निराकारत्वात् । अनुकार्यते जीवोनुकरोति अहंकारेण स्वस्मिन्नध्यस्यति । बुद्ध्या त्वध्यासते जीवः । बुद्धिः सात्त्विकी राजसी तामसी चेति गुणैरित्याहुः गुणैरिति । 'परात्तु तच्छ्रुतेः' इति सूत्राद्धाहुर्भगवतेति । तथा च परशब्देन भाष्ये मनः । बुद्धेर्मनोधर्मत्वादित्युक्तम् । अयमिति परधर्मानुकरणं विषयलिङ्गम् । श्रुतौ दर्शनात् । धर्म इत्यन्तभाष्यतात्पर्यार्थमाहुः तथा चेति कर्तृत्वधर्मे सति च । एवेति वक्ष्यमाणार्थावेवेति । धर्मस्त्विति धर्मः कर्तृत्वलक्षण एवेति श्रीपर्या



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः।

अपश्यत्त्वादिकं प्रतिपाद्य विभक्तत्वनिषेधेनाविभागानुसंधानदशायां द्वितीयस्य विभक्तत्वेन

रश्मिः।

द्वैतमिवेत्यारभ्यासमाप्ति संसारिप्रकरणम् । तस्य समानं प्रकरणं द्वितीयमैत्रेयीब्राह्मणे यद्वै तन्न पश्यतीत्यारभ्यासमाप्ति संसारिप्रकरणम् । तत्र षष्ठ्यन्तस्योभयत्रान्वयः । अपश्यत्त्वेति । यद्वै तन्न पश्यतीत्यपश्यत्त्वम् । अपश्यत्त्वादिकमिति पदच्छेदः । आदिना पश्यत्त्वम्, पश्यन्वै तद्द्रष्टव्यं न पश्यति' इति श्रुतेः । तदुभयं प्रतिपाद्य 'नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्' इत्यनया प्रथमप्रतिज्ञाहेतुमुखेनापश्यत्त्वं प्रतिपाद्य 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इत्यनया विशेषप्रज्ञानाभावरूपद्वितीयप्रतिज्ञाहेतुमुखेन पश्यत्त्वं च तत्र द्वितीयं प्रमातृ, अन्यच्चक्षुरादिकम्, विभक्तं प्रमेयम्, एतत्त्रयं प्रमातृप्रमाणविषयचैतन्यात्मकम् । परंतु चकाराभावाच्चैतन्यविभ·········· दुरूह इति बोध्यम् । क्त्वान्तः प्रयोगः प्रतिपाद्येति । अतस्तोऽन्यद्विभक्तमित्यादेरार्थिकार्थं उच्यते विभक्तत्वेत्यादिना । ततस्तत इत्यस्य द्रष्टृदृष्टिभ्यामित्यर्थस्तत्र विभक्तत्वनिषेध आर्थिकस्तेनेत्यर्थः । अविभागेति । न त्वभेदानुसंधानदशायामतोऽन्यशब्दो गौणोऽपि नेत्यपि भावः । अयमर्थः । भेदाभेदवादे एवं च परममुक्तिदशायामपीत्यादिनेयं श्रुतिरुक्ता तत्र च द्वैतदृष्टिनिवृत्त्या 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतम' इति काठकश्रुत्यां भेदप्रतीत्यभावरूप एवाभेदो न भेदाभावरूप इत्यभेदो भेदप्रतीत्यभावरूपोऽवतारितः । स यथा 'यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इति श्रुत्यामन्यादर्शने पश्यत एवादर्शनस्य हेतुत्वं पश्यन्वा इत्यादिना निरूप्य तत्रैव द्वितीयत्वाभावस्य हेतुत्वं नन्वित्यादिना निरूप्य तत्रैव विभागाभावस्य हेतुत्वं ततोऽन्यत्वाभावस्यार्थिकस्य हेतुत्वं निरूपितम् । अग्रे च यत्र वाऽन्यदिव स्यादित्यादिना वैलक्षण्यहेतुकमन्यदर्शनमनूद्य यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना स्वस्य द्रष्टृत्वाविभागेनाविज्ञाने तं केन विजानीयादित्यनेन ज्ञानकरणाभावं हेतुत्वेन वक्तीत्यतो भेदप्रतीत्यभावरूप एवाभेदो न तु भेदात्यन्ताभावरूप इति । अत एव मङ्गलमाचेरुः 'ब्रह्माभेदोपासनाज्ज्ञानतो वा ब्रह्मात्मैक्येप्यज्ञताममत्यजन्तः । यस्यैश्वर्यादसत पश्चियम्यास्तं श्रीकृष्णं देवदेवं नमामि' इति । अत्र किंचिद्विमृश्यते । ब्रह्माभेदोपासनं न भक्तिमार्गे 'अन्तरा भूतग्रामवत्स्वात्मनः' इत्यत्र भाष्ये तथोपपादनात् । कदाचित्तु जायते व्यतिहारसूत्रे तथोपपादनात् । ज्ञानमार्गे तावद्वर्तते तेनावरणभङ्गो भवति । ज्ञानमार्गस्तु माहात्म्यज्ञानेन भक्तिद्वारा भगवत्प्राप्तिः 'भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया' इति वाक्यात् । तदुक्तं सप्तमे ज्ञानविज्ञानयोगाध्याये 'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः' इत्युपक्रम्य 'बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते । वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' इति । वासुदेवः सर्वमिति न ज्ञानरूपं प्रपत्तिस्वरूपमिति व्याख्यातं भक्तिमार्तण्डेऽपि । अपरं च त्रयोदशे 'क्षेत्रक्षेत्रज्ञनिर्देशयोगाध्याये ज्ञानस्वरूपमप्यस्ति तत्र 'क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम' इति वाक्यात् । क्षेत्रक्षेत्रज्ञविषयकं ज्ञानं नातोधिकम् । परं सविकारं ज्ञानमुदाह्रियते 'अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः । इन्द्रियार्थेषु वैराग्यमनहंकार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् । असक्तिरनभिष्वङ्गः पुत्रदारगृहा-



RUPAK NATH (DR.RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

दर्शनं निषिध्य सर्वस्यात्मभावबोधनपूर्वकमन्यदर्शननिषेधात् सजातीयदर्शनपरत्वं वा, विज्ञात्र-विज्ञातृदर्शनपरत्वं वा । न तु द्रष्टृत्वादिनिषेधनपरत्वम्, पश्यत्त्वादीनां विनाशेऽविनाशित्व-

रश्मिः ।

दिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु । मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्त-देशसेवित्वमरतिर्जनसंसदि । अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा' इति । अत्रापि तत्त्वज्ञानार्थदर्शने कृते सत्यभेदः । तथापि यथा सेव्य-सेवकभावस्तथोपपादितं **भक्तिरत्नटीकायाम्** । नन्वत्र मयि चेत्यत्रास्मत्पदेन क्षेत्रज्ञबोधात्कथं भक्तिः प्रभुपर्यवसायिनीति चेन्न । 'पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः । आविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितम्' इति भगवद्वचनेनैक्यात् । पुरुषश्च तदंशः । गुणत्रयविभागयोगाध्याये 'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्' इति प्रस्तुत्य 'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्' इत्यादिभिर्माहात्म्यं देवस्वरूपं भणितवान्भगवान् । ज्ञानस्य विजातीयसंवलितत्वे मार्गत्वं, केवलत्वे ब्रह्मधर्मत्वमित्येकादशस्कन्धसुबोधिन्यामस्ति । ननु माहात्म्यज्ञाने चतुर्दशोक्ते ब्रह्माभेदोपासना नास्ति । मम योनिरिति जीवसमूहाक्षरात्मकषष्ठ्या भेदोक्तेः । अस्ति तु भावाद्वैतमतेन । तदुक्तं सप्तमस्कन्धे शिवमतेन 'कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत्' इत्यादिना । तत्र परममुक्तौ यदि भेदो वर्तते तदा तत्प्रतीत्यभावः कथम् । यदि तत्र भेदात्यन्ताभावाभावः कथमिति प्रश्ने पर्यवसितिमात्रमतो नान्य इति निषेधफलात्फले परममुक्तौ भेदोऽवश्यं पर्युदासार्थकनञादिभिर्व-क्तव्यः । आदिना भेदार्थकनञादिभिः । उक्तश्चास्थूलमनण्वित्यस्याः श्रुतेर्व्याख्याने **विद्वन्मण्डनो-पन्यस्तायाः सुवर्णसूत्रे** पर्युदासे नञ् । एवंच फले मायिकभेदभिन्नतद्भेदसद्भ्य आधिकारि-कमण्डलस्थभेद इति लीलान्तरेच्छया भेदप्रतीत्यभावरूपो भेदो न भेदात्यन्ताभावरूपः 'अवि-भक्तं च भूतेषु विभक्तमिव च स्थितम्' इति ब्रह्मस्वरूपपरगीतायां विभक्तमिव कथनादित्यलं विमर्षाय । अतोऽन्तर्यामिब्राह्मणे नियम्यानां इवशब्देनाविभागानुसंधानं न त्वविभागस्तस्य दशा-यामित्यर्थः । अभेदज्ञानपूर्वकं भक्तिः 'नृप स्वात्मैव वल्लभः' इति वाक्यादित्युपपादितमाकरे नृसिं-होत्तरतापिनीयटीकायामप्येतैः । **द्वितीयस्येत्यादि** । **द्वितीयस्य** दृष्टिरूपदर्शनस्य विभक्तत्वेना-र्थान्निषिध्य । अयमर्थः । तत्रैवाग्रे 'यत्र वा अन्यदिव स्यात्तत्रान्योन्यत्पश्येदन्योन्यज्जिघ्रेत्' इत्या-दिना यत्र संसारदशायां मायिकभेदेनान्यदिव ब्रह्मभावात्तत्रान्यो नेत्रादिरन्यद्विभक्तं पश्येदर्थाद्दृष्टि-रूपं दर्शनं तत्प्रतियोगिकं च तस्य द्वितीयस्य विभक्तत्वेनेत्यर्थः । **सर्वस्येत्यादि** 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्' इत्यादिनान्यदर्शननिषेधात् । अन्यत्वं विजातीयत्वं तद्दर्शननिषेधात् । पश्यन्वा इति श्रुतेश्च यत्सिद्धं तदाहुः **सजातीयेत्यादि** । विजातीयत्वं च सत्त्व-मनीश्वरत्वं तेत्याशयेनाहुः **विज्ञात्रित्यादि** । विज्ञाता द्रष्टाऽविज्ञातृ दृष्टिरूपं दर्शनं करणम् । तद्व्या-पारानाश्रयो न जानातीत्यविज्ञातृ भवति । न तु **द्रष्टृत्वादीत्यादि** । तथा च द्रष्टृत्वादिनिषेध-परं शंकराचार्यभाष्यं विद्यावस्थायां ते एव कर्तृत्वभोक्तृत्वे निवारयन्ति स्म 'यत्र त्वस्य सर्वमात्मै-वाभूत्तत्केन कं पश्येत्' इति । **अविनाशित्वेत्यादि** । 'यद्वै तन्न पश्यति' इत्यस्याः श्रुतेः पूर्व

१ समभ्राम्यपि २ धीरः [illegible]

RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः।

यदपि विज्ञानपदस्य बुद्धौ प्रसिद्धत्वान्मनोनन्तरपाठाच, 'विज्ञानं यज्ञं तनुते' इत्यत्रापि बुद्धेरेव कर्तृत्वमुच्यते 'विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासते' इति वाक्यशेषोऽपि बुद्धेरेव प्रथमजत्वं विषयीकरोति। ज्यैष्ठ्यस्य प्रथमजत्वरूपस्य बुद्धौ प्रसिद्धत्वात् 'स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद् यज्ञः' इति श्रुत्यन्तरे यज्ञस्य वाग्बुद्धिसाध्यत्वावधारणादित्युक्तं तदपि मन्दम्। प्रकरणापेक्षया प्रसिद्धेर्दुर्बलत्वात् 'विज्ञानमानन्दं ब्रह्म' इति ब्रह्मण्यपि प्रसिद्धेस्तुल्यत्वात्। योगरूढ्यपेक्षया केवलयोगस्याऽपि निर्बलत्वात्। अवयववाक्येन मनोमयस्य वेदरूपतावगमादुत्तरं जीवस्यैव युक्तत्वात्। श्रद्धादीनां शिरस्त्वादिकल्पनतात्पर्यस्य प्रागेवोक्तत्वात् ज्येष्ठशब्दोऽपि ब्रह्मपदसमभिव्याहाराद् ब्रह्मण इव ज्यैष्ठ्यं वक्ति। ब्रह्मज्येष्ठा वीर्याणीत्यादिवत्। वाग्बुद्ध्योरुत्तरोत्तरपरिक्रमस्तु बुद्धेः करणत्वेऽपि तुल्यः तस्मान्न किंचिदेतत्॥ ३९॥

रश्मिः।

विज्ञानेन विज्ञानमादाय शेत इत्यत्र शयनोपादानयोः कर्तृत्वमित्यर्थः। दिक्त्वनिरूपकं यत्किंचिदुच्यते। कस्यचिदित्याद्युक्ता युक्तिः प्रकृतेप्यनुकूलेति। तथा च स्वभावात्तन्निबन्धनं जीवकर्तृत्वं न विवक्षितमिति वक्तुं शक्यते तथा तादृशस्थले बुद्धेरभावात् सर्वत्रापि न तन्निबन्धनं कर्तृत्वमपि तु स्वाभाविकमित्यपि वक्तुं शक्यत इति। मनोनन्तरेति शंकरभाष्यव्याख्याने द्रष्टव्यम्। वाग्बुद्ध्योः पूर्वोत्तरक्रमान्मनोरूपवेदरूपवागनन्तरं विज्ञानरूपबुद्धेः पाठात्। वाक्येति विज्ञानं बुद्धिर्मतभेदेन जीव इति केन व्याख्यानेन भाष्यमिति विमर्शे विज्ञानं देवा इति वाक्यशेषः प्रवर्तते। एवेति जीवानां प्रथमजत्वाभावादेवकारः। प्रसिद्धेरिति 'ब्रह्मा देवानां प्रथमं संबभूव' इति कोशे ब्रह्मात्मबुद्धिमनसामैकार्थ्यात्। उत्तरेति उत्तरं च उत्तरमस्यास्तीत्युत्तरि चोत्तरोत्तरिणी तयोः क्रम इत्यर्थः। यज्ञ इति ब्रह्मविचाररूपो यज्ञः। वाचो ब्रह्म चित्तं बुद्धिः। वाच इति श्रुतौ षष्ठी। स्वप्रतिपाद्यविषयत्वं चित्ते संबन्धः। चित्तं बुद्धिः। वागिति लक्षणया वाग्बुद्धिसाध्यत्वावधारणात्। प्रकरणेति ब्रह्मवित्प्रकरणम्। 'ब्रह्मविदाप्नोति परम्' इत्युपक्रमात्। दुर्बलेति श्रुत्यादिषट्प्रमाणान्तर्गतत्वेन तथा। स्वमते वेदत्वे योगे पूर्वमीमांसाभाष्यकारिकाव्यञ्जितोऽपि परस्य नेत्याशयवन्त आहुः योगेति। निर्बलेति विज्ञानपदे। रूढिर्योगमपहरतीति प्रसिद्धेः। योगरूढिस्तु ब्रह्मणि न तु बुद्धाविति भावः। अवयवेति 'तस्य यजुरेव शिरः' इत्यादिश्रुतिवाक्येनैकत्वमविवक्षितम्। उत्तरमिति ग्राह्यस्य ग्राहकापेक्षायाः 'स एष जीवो विवरप्रसूतिः' इति वाक्यादुत्तरम्। मनोमयं रूपं ग्राह्यं जीवो ग्राहकः। आनन्दमयाधिकरणे भाष्यवर्णिकसूत्रोक्तसंगत्योत्तरमित्यादिरित्यपि। एवकारो बुद्धिव्यवच्छेदकः। यद्यपि यज्ञः श्रुतौ वाचश्चित्तस्येत्युक्तस्तथापि 'मनः पूर्वरूपं वागुत्तररूपम्' इति श्रुत्यन्तरात्प्रवचनं यज्ञः पूर्वोक्तोऽपि यज्ञः। यज्ञानां गीतायां बहुविधत्वात्। प्रागिति आनन्दमयाधिकरणे। ब्रह्मण इति। तथा च ब्रह्म इव ज्येष्ठं ब्रह्मज्येष्ठम्। मयूरव्यंसकादित्समासः। ब्रह्मज्येष्ठेति जसो डा। ब्रह्मज्येष्ठानीत्यर्थः। आदिना भवन्तीति श्रुतिशेषः। वाग्बुद्ध्योरिति। यण्घटितबुद्धिशब्दो न तु पवर्गादिः स ध्वनयति। बकारवकारयोर्बहुधु शब्देषु विपर्यय इति। यद्यपि बुरिति लेखनेऽप्येवं भवति तथापि 'काञ्चनीकरणे शक्तो मणिर्धातुगतस्य यः। तस्याश्मनां तथाभावाकरणेऽपि न हि क्षतिः' इति न्यायो द्रष्टव्यः। उत्तरोत्तरी व्याख्यातम्। तुल्य इति यन्मनसा ध्यायतीति करणत्वपक्षः तत्र श्रुत्योर्विरोधे विकल्पाश्रयणादुभयोर्वादिनोस्तुल्य इत्यर्थः। एतदिति औपाधिकं जीवत्वम्॥ ३९॥



RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

## यथा च तक्षोभयथा ॥ ४० ॥

ननु कर्मकराणां कर्तृत्वभोक्तृत्वभेदो दृश्यते तथा कर्तृत्वभोक्तृत्वयोर्भेदो भविष्यतीति चेन्न । यथा तक्षा रथं निर्माय तत्रारूढो विहरति, पीठं वा । अतो वा न व्याम्रियते वाद्यादिद्वारेण वा । चकारादन्येऽपि स्वार्थकर्तारः । अन्यार्थमपि करोतीति चेत् तथा प्रकृतेऽपि सर्वहितार्थं प्रयतमानत्वात् । न च कर्तृत्वमात्रं दुःखरूपम् । पयःपानादेः सुखरूपत्वात् । तथाच स्वार्थपरार्थकर्तृत्वं कारयितृत्वं च सिद्धम् ॥ ४० ॥

इति द्वितीयाध्याये तृतीयपादे कर्ता शास्त्रार्थवत्त्वादिति चतुर्दशमधिकरणम् ॥१४॥

## परात्तु तच्छ्रुतेः ॥ ४१ ॥ (२-३-१४)

कर्तृत्वं ब्रह्मगतमेव तत्संबन्धादेव जीवे कर्तृत्वं तदंशत्वादैश्वर्यादिवत् । न तु जडगतमिति । अतो, 'नान्योऽतोऽस्ति'इति श्रवणमपि घटते । कुत एतत् ।

### भाष्यप्रकाशः ।

यथा च तक्षोभयथा ॥ ४० ॥ सूत्रमवतारयन्ति नन्वित्यादि । भेद इति भिन्नः निष्ठत्वम् । सूत्रोक्तं समाधिं व्याकुर्वन्ति नेत्यादि । तथा च उक्तो भेदः प्रायिको, न तु नियत इति न कर्मकरदृष्टान्तेन तयोर्भिन्ननिष्ठत्वसिद्धिरित्यर्थः । उभयथेति पदं व्याकर्तुमाहुः अन्यार्थमित्यादि । पूर्वपक्षिणोक्तमङ्गीकुर्वन्ति तथेत्यादि । प्रकृत इति शास्त्रप्रणयने । तथाच व्याख्यातान् सर्वान् प्रकारान् क्रोडीकर्तुमयं चकारो, न तु स्वतोऽकर्ता, करणद्वारैव कर्तृत्वे- तावन्मात्रांशे, प्रमाणाभावादित्यर्थः । तथा ज्ञापनार्थम् ॥ ४० ॥

इति चतुर्दशं कर्ता शास्त्रार्थवत्त्वादित्यधिकरणम् ॥ १४ ॥

परात्तु तच्छ्रुतेः ॥ ४१ ॥ जीवे कर्तृत्वं स्वाभाविकमित्यवधारितम् । तत् किं जीवस्य स्वातन्त्र्येण, उत ब्रह्माधीनतयेति विचारणीयम् । 'पुण्यः पुण्येन' इति, 'एष उ एव' इति विरुद्ध-

### रश्मिः ।

यथा च तक्षोभयथा ॥ ४० ॥ भिन्नेति भिन्नौ पाचकपाचयितारौ तन्निष्ठे कर्तृत्व- भोक्तृत्वे तन्निष्ठो भेद इत्यर्थः । तयोरिति कर्तृत्वभोक्तृत्वयोः । शास्त्र इति । स्वयमप्याविर्भूय मुक्तिं लोकान् शिक्षयितुं स्वीकरोतीत्येकादशनिबन्धे स्फुटम् । नामसहितमुक्तिशास्त्रवत्तादुक्ता । तथा चेति प्रकृतस्य शास्त्रप्रणयनार्थत्वे च । एवेति जीवदृष्टान्तादेवकारः । करणं बुद्धिः । शेषमिति प्रतिकूलवेदनीयं दुःखम्, अनुकूलवेदनीयं सुखं तत्रेत्येवमुक्तानार्थम् । यद्यप्यानन्दो भोक्ता, तेन पातु तथापि तदुभयमात्येत्यदोषः ॥ ४० ॥

इति त्रयोदशं कर्ता शास्त्रार्थवत्त्वादित्यधिकरणम् ॥ १३ ॥[1]

परात्तु तच्छ्रुतेः ॥ ४१ ॥ पादार्थसंगमनायाधिकरणसंगतिं चाहुः जीव इति । 'सर्वे जीवा व्युच्चरन्ति' इति मुण्डकश्रुत्या साकं 'नान्योतोऽस्ति द्रष्टा' इत्यादिसर्वकर्तृत्वनिषेधकश्रुतिविरोधस्तस्य परिहारात् पादार्थसंगमनं हेतुतासंगतिरधिकरणस्येत्याहुः तत् किमिति । पुण्यः पुण्येनेति । अत्र पूर्वोक्तानि शरीरादिवाक्यानि विषयवाक्यम् । संशयमाहुः पुण्य इति । विरुद्धेति तेन श्रुत्योर्विरोधपरिहारादत्र

१. रश्मिकारमते त्रयोदशमिदम् ।



DR. RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

पक्षं तुशब्दो निवारयति । प्रयत्नपर्यन्तं जीवकृत्यम्, अग्रे तस्याशक्यत्वात् स्वय-मेव कारयति । यथा पुत्रं यतमानं बालं पदार्थगुणदोषौ वर्णयन्नपि तत्प्रयत्नाभि-निवेशं दृष्ट्वा तथैव कारयति । सर्वत्र तत्कारणत्वाय तदानीं फलदातृत्वे या श्रुतिः तामेवानुवदति 'उन्निनीषति, अधो निनीषति' इति । अन्यथा विहितप्रतिषिद्धयो-

---

भाष्यप्रकाशः ।

वैषम्यनैर्घृण्ययोः परिहारः कृतः । स तु न युज्यते । कर्मानादित्ववत् तत्कारयितृत्वं तस्याप्यनादित्वादित्यर्थः । समाधिं व्याकुर्वन्ति प्रयत्नेत्यादि । अयमर्थः । तैत्तिरीय आनन्द-मयप्रशंसाप्रसङ्गे, अथातोऽनुप्रश्ना इत्यादिना अविद्वद्विदुषोः समानेऽपि ब्रह्मप्राप्तित्वे कश्चिद्भेद इति प्रश्ने उत्तरत्वेन, 'सोऽकामयत' इत्यादिना स्वस्यैव बहुभवनेच्छारूपेण सर्वसृष्टिमुक्त्वा तत्रानुप्रवेशेन स्वस्यैव, 'सच्च त्यच्चाभवत्'इत्यादिना अनेकविधं वैषम्यभावं चोक्त्वा, 'सत्यम-भवत्' इति समाप्तौ ब्रह्मरूपत्वं निगमयामास तथा सति सर्वस्य ब्रह्मरूपत्वे अविशिष्टेऽपि मध्ये, 'स तपोऽतप्यत'इत्यादिना तपोरूपस्यालोचनस्यापि सृष्टौ कारणत्वेन कथनाद् यथाधिकारं तत्तत्फलं तत्तदधिकारश्च नानाविधस्तत्र कारणं, तस्यापि कारणं नानाविधः स्वभाव इति तत्र फलति । एवं सत्यालोचनानुसारेण वक्ष्यमाणप्रणाड्या प्रयत्नपर्यन्तं जीवकृत्यं, तदपेक्षः सन्, अग्रे बाह्यकृतावुपकरणबाहुल्यमपेक्षितं, तस्य जीवेन केवलेन संपादयितुमशक्यमतस्तत्सं-पादनद्वारा स्वयमेव कारयति । तत्र दृष्टान्तो यथा बालमित्यादि । एवं सति कार्यमात्रं प्रति

रश्मिः ।

तन्नेजति' इति श्रुतेर्निःप्रतियोगिककर्मानादित्वम् । 'अनुच्छित्तिधर्मा' इति श्रुत्या धर्माणां तौल्यं वदन्तोऽनादीत्यादिभाष्यं विवृण्वन्ति स्म कर्मानादीति । अत्र कृतप्रयत्नापेक्षस्तु वैषम्यनैर्घृण्यदोष-रहितो भगवान्कारयिता, फलाय जीवः करोति तं जीवं कारयतीति फले प्रयोजकः इच्छाद्वारा, तत्र हेतुर्विहितप्रतिषिद्धावैयर्थ्यादिभ्य इति । अन्यथा विहितप्रतिषिद्धयोः कर्मणोर्वैयर्थ्या-द्यापत्तेः । अतो न वैषम्यनैर्घृण्ये, द्वौ नेत्यर्थाज्जीवप्रयत्न एव फलपर्यन्तमस्तु कृतं भगवते-त्याशङ्कायां प्रयत्नपर्यन्तं जीवकृत्यं विशदयन्ति स्म अयमर्थ इति । अविद्वदिति विद्वच्छब्दः तेन नञ् समासः । तथा सतीति । उक्तप्रकारेण सर्वेषां ब्रह्मत्वे सति । आलोचनस्येति ननु नवमेऽध्याये द्वितीयस्कन्धस्य तप संतापे इत्यस्य धातो रूपं श्रुतौ तु सोऽकामयतेत्यस्यामि-च्छाशरीरे एतदेतत् कर्म कारयित्वैतदेतत्फलं दास्यामीति प्रतिजीवं विचारितवानित्यस्मिन्नालोचनं निविष्टमित्येकवाक्यतायामुक्तमनेन कथमिति चेन्न । अत्रालोचनस्य संतापात्मकत्वात् । एकवाक्यतया तथावसायात् । यथेति आलोचनशरीरनिविष्टत्वेन यथेत्यादिः । तत्रेति सृष्टौ । कारणमाविर्भा-वकशक्त्याधारत्वेन अनन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्तित्वाच्च । स्वभाव इति परि-णामहेतुः । फलाधिकारयोः परिणामः । ननु गुणाः कुतो नोक्ता इति चेन्न । गुणव्यतिकर-कारकालस्याप्रकाशाभावात् । कर्तृविशेषणं पूरयन्तोऽग्रे इत्यादिभाष्यं विवृण्वन्ति स्म तदपेक्ष इति । उपकरणेति गीतोक्तकर्तृपञ्चकम् । केवलेनेति पञ्चसु कर्तृषु गीतोक्तेषु केवलेन । तत्संपादनेति कर्तृपञ्चकत्वसंपादनद्वारा । यथा बालमिति । बालस्य इति दृष्टान्तस्य, वृद्धि-र्यथाबालम् । यथा यथावत् भाष्ये बालदृष्टान्तस्य पुत्रदृष्टान्तेन वृद्धिर्यथावद् अव्ययीभावः । 'अव्ययं समीपसमृद्धिवृद्धि' इति सूत्रेण समासः । यथाबालमिति दृष्टान्तद्वयमादिर्यस्य तद्भाष्यं



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

वैयर्थ्योपत्तेः । अप्रामाणिकत्वं च । फलदाने कर्मापेक्षः । कर्मकारणे प्रयत्नापेक्षः । प्रयत्ने कामापेक्षः । कामे प्रवाहापेक्ष इति मर्यादारक्षार्थं वेदं चकार । ततो न

भाष्यप्रकाशः ।

भगवानेव कारणमिति सर्वत्र तत्कारणत्वाय तदानीं प्रयत्नोत्तरकाले फलदातृत्वाभिव्यापिका या इच्छा आलोचनाकारान्तःपातिनी तामेव श्रुतिरनुवदति, 'उन्निनीषत्यधो निनीषति' इति । अतो गुणदोषकथनपूर्वकं बालेच्छानुसारिसामग्रीसंपादके पितरि यथा न दोषः, किंतु बालस्वभावे, तथा ब्रह्मण्यपि न दोषः, किंतु जीव एवेत्यर्थः । ननूक्तदृष्टान्तन्यायेनैव कारयतीत्यत्र किं गमकमित्याकाङ्क्षायां सूत्रोक्तं, विहितप्रतिषिद्धावैयर्थ्यादिकमित्याहुः इति हेतुं विवृण्वन्ति अन्यथेत्यादि । यद्युक्तन्यायं विहाय केवलं जीवकृतकर्मापेक्षः कारयतीत्येवाङ्गीक्रियते तदा विहितप्रतिषिद्धयोर्यागादिब्राह्मणहननादिरूपयोः कर्मणोर्वैयर्थ्यं स्यात् । पूर्वपूर्वजीवकर्मानुसरणे ईश्वरस्य तदधीनतया तेषामेव प्राधान्यात्तत एव दुःखवद्प्राप्तिवत्तस्य सुखस्यापि सिद्धेः । आदिपदादप्रामाणिकत्वं च । इदं विहितमिदं निषिद्धमिति बोधकस्य प्रमाणव्यापारस्य वैयर्थ्यात् । अतो विहितप्रतिषिद्धावैयर्थ्यप्रमाणव्यापारावैयर्थ्यप्रामाणिकत्वाबाधावत्कृतप्रमाणानुसरणेभ्यो हेतुभ्य इदं ज्ञायते, यत् फलदाने कर्मापेक्ष इत्यादिमर्यादारक्षार्थं तज्ज्ञापकं स्वनिःश्वासरूपं वेदं प्रकटीचकार, यथा लोके राज्यमर्यादारक्षकं नीतिशास्त्रम् । ततो, 'लोकवत्तु लीलाकैवल्यम्' इति ।

रश्मिः ।

यथाबालमित्यादि अज्ञमित्यर्थः । एवमिति कारणेषु स्वेन पक्षकत्वे संपादने कृते सति । एवेति 'सदेव सौम्येदमग्र आसीत्' इति श्रुतावेवकार इत्येवकारः । तदानीमित्यस्य विवरणं प्रयत्नेति । फलदातृत्वे या इच्छा तामनुवदतीत्यत्र भाष्येऽभिव्यापकाधारे सप्तमीत्याशयेनाहुः फलेति । आलोचनाकारः 'बहुस्यां प्रजायेय' इत्यत्र बहुस्यामिति सोन्तःपाती यस्याः सा आलोचनाकारान्तःपातिनी उक्तेच्छा । सर्वेत्यादि भाष्यप्रयोजनमाहुः अत इति । न दोष इति । ननु बालदोषः पितुः स्मर्यतेऽतः कथं न दोष इति चेन्न नात्र बालः स्तनन्धयोऽपितु पूर्वव्यतिरिक्त इति न दोषः । एवेति मुण्डके 'सर्व एव आत्मानो व्युच्चरन्ति' इति श्रावणाज्जीवस्यांशत्वाद्यथा लोकशरीरांशे दोषो न त्वंशिनि शरीरे तथेत्येवकारः । एवेति एवकारः कर्माधीनेश्वरं व्यवच्छिनत्ति । तत इति पूर्वजीवकर्मभ्यः । एवेति गौणमुख्यन्यायात् । दुःखेति । तदुक्तं श्रीभागवते 'तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः । यल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा' इति । अप्रामाणिकत्वमितिभाष्यं विवृण्वन्ति स्म आदीति सूत्रीयादिपदात् । पदशब्दप्रयोगः समासावयवसुपोर्लुका लुप्तत्वे पदत्वाभावेऽपि शब्दे पदत्वारोपात् व्यपेक्षालक्षणसामर्थ्ये । अप्रामाणिकत्वमिति भाष्ये प्रमाणेन प्राप्यत इति प्रामाणिकं विहितं प्रतिषिद्धं च कर्म । ठगिति प्रत्ययः, न प्रामाणिकमप्रामाणिकम् नञ्तत्पुरुषः । तस्य भावोऽप्रामाणिकत्वमित्याशयेनाहुः इदमित्यादि । इति बोधकस्येति । इत्येवंप्रकारेण विहितत्वनिषिद्धत्वप्रकारको यो बोधः प्रमा तत्कर्तुः प्रमाणस्येति वक्तव्ये बोधयतीत्यत्र व्यापारनिष्ठव्यापारविवक्षया प्रमाणव्यापारस्येत्युक्तम् । व्यापारेण व्यापारिणो नान्यथासिद्धत्वमिति नाङ्गीकृतम् । अन्यज्ञापनात् । हेतुभ्य इति त्रिभ्य इत्यर्थः । फलेति । फलदाने कर्मापेक्ष इत्यादियां मर्यादेत्यादिः । अत्र प्रवहणं प्रवाहः सर्गपरंपराया अविच्छेदः । तज्ज्ञापकं मर्यादाज्ञापकम् । नीतीति तत्र



DR.RUPAK NATH www.astrology-tantra.com

ब्रह्मणि दोषगन्धोऽपि । नचानीश्वरत्वम् । मर्यादामार्गस्य तथैव निर्माणात् यत्रान्यथा स पुष्टिमध्य इति ॥ ४२ ॥

इति द्वितीयाध्याये तृतीयपादे परात्तु तच्छ्रुतेरिति पञ्चदशमधिकरणम् ॥ १५ ॥

भाष्यप्रकाशः ।

इति न्यायेन जीवकृतप्रयत्नानुसरणान्न ब्रह्मणि वैषम्यादिदोषगन्धः । नाप्यनीश्वरत्वम् । मर्यादामार्गस्य तादृशापेक्षावैशिष्ट्यपूर्वकत्वेन स्वयमेव निर्माणादिति । नन्वयमपि न नियमः । 'अद्वयापृतम्' इति, 'ते नाधीतश्रुतिगणाः' इत्यादिवाक्येषु तदन्यैरपि गोकुलस्थेभ्यः फलदानकथनाच्छ्रुतावपि, 'सुहृदः पुण्यकृत्यां द्विषन्तः पापकृत्याम्' इति कथनादित्यत आहुः यत्रेत्यादि । तथाचेदमपि लोकवत्तु लीलेति न्यायादेव समाहितम् । लोके राज्ञामपि कृपापात्रेषु तथा दर्शनादिति ।

विद्वन्मण्डने तु, 'स वै नैव रेमे' इति श्रुत्यनुसारेण, मनी प्रयतन इतिधात्वर्थमादाय भगवत्कृतो यः क्रीडार्थमुद्यमः सोऽत्र प्रयत्नशब्दे गृहीतः । सिद्धान्तस्तूभयत्राप्येक एव । तेनात्रेदं सिद्धम्, फलदाने भगवान् जीवकृतप्रयत्नापेक्षोऽपि न स्वातन्त्र्याद्धीयते । तथैवालोचितत्वात्, आलोचनानुसारेण विविधं फलं जीवेभ्यो ददद्धि, न वैषम्यादिदोषभाग् भवति, सर्वरूपत्वात् । कर्मणामप्यनादित्वं भगवद्धर्मत्वात् । कचिन्मर्यादा भिनत्त्यपि, स्वतन्त्रत्वात् । तथोक्तं द्वितीयस्कन्धसुबोधिन्याम्

यत्किञ्चिद् दूषणं त्वत्र दूष्यं चापि हरिः स्वयम् ।
विरुद्धधर्माः सर्वेऽपि धर्ममत्रैव श्राम्यते ॥ ४२ ॥ इति

इति पञ्चदशं परात्तु तच्छ्रुतेरित्यधिकरणम् ॥ १५ ॥

रश्मिः ।

बृहस्पत्यादिस्मृतिरूपम् । इयं वक्ष्यमाणप्रणाडी । तत इति भाष्यं विवृण्वन्ति स्म तत इति । नचेति भाष्यविवरणं नापीति । मर्यादेति भाष्यविवरणं मर्यादेति । भाष्यभाष्यश्रुतिमाहुः श्रुतावपीति 'तस्य पुत्रा दायमुपयन्ति सुहृदः पुण्यकृत्याम्'इत्यादिः । अस्याः पुष्टिमार्गीयत्वं तु भगवदनुगृहीतस्य पुण्यकृत्यायाः भोगाभावेऽपि सुहृद्गामिनीत्वं पापकृत्याया भोगाभावेऽपि द्विषद्गामिनीत्वमितरेषां त्वेतयोर्भोगादेव क्षय इति न भोगाभावे मोक्षः । तथेति । इष्टदेशप्रापणप्रकारदर्शनादिति । मतं भेत्तुमाहुः विद्वन्मण्डन इति । गृहीत इति । तेन सुबोधिन्यनुसारिप्रयत्नः न तु यदभ्यासमतवर्तिवल्लभमतप्रयत्न इति न मतभेदोऽप्यस्ति । सिद्धान्त इति वैषम्यनैर्घृण्यदोषपरिहाररूपः । यत्रेति भाष्यतात्पर्यमाहुः कचिदिति । पुष्टिप्रसङ्गात्किंचिदाहुः यत्किंचिदिति । अत्रेति अत्रशब्दयोः पुष्टिमार्ग इत्यर्थः । स्वयमिति तदात्मानमिति श्रुतेः । एवकारस्तु 'तदात्मानं स्वयमकुरुत'इति श्रुतेः पुष्टिमात्रविषयत्वात् ॥ ४२ ॥

इति चतुर्दशं परात्तु तच्छ्रुतेरित्यधिकरणम् ॥ १४ ॥

१. रश्मिकारमते चतुर्दशमधिकरणम् ।



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

## अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४३ ॥ ( २-३-१६ )

जीवस्य ब्रह्मसंबन्धिरूपमुच्यते । जीवो नाम ब्रह्मणोंऽशः । कुतः । नानाव्यपदेशात् । 'सर्व एवात्मानो व्युच्चरन्ति कपूयचरणा रमणीयचरणाः' इति च ।

ननु ब्रह्मणो निरवयवत्वात् कथं जीवस्यांशत्वमिति वाच्यम् । न हि ब्रह्म निरंशं सांशमिति वा कचिल्लोके सिद्धम् । वेदैकसमधिगम्यत्वात् । सा च

---

भाष्यप्रकाशः ।

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४३ ॥ अधिकरणमवतारयन्ति जीवस्येत्यादि । स्वसंबन्धि तु, 'ज्ञोऽत एव' इति सूत्रे ज्ञानरूपत्वबोधनादुक्तम् । इदानीं 'यो यदंशः स तं भजेत्'इति भजनयोग्यत्वं वक्तुं मतान्तरवद् अन्यत्वं परिहर्तुं मुक्तिदशायां ब्रह्मत्वव्यपदेशस्य मुख्यवृत्तत्वे हेतुं बोधयितुं ब्रह्मानेकत्वं च परिहर्तुं ब्रह्मसंबन्धिरूपकथनार्थमिदमारभ्यत इत्यर्थः । सूत्रं विवृण्वन्ति जीवो नामेत्यादि । नानाव्यपदेशादिति नानात्वेन व्यपदेशो नानाव्यपदेशस्तस्मात्, श्रुतौ बहुत्वसंख्याविशिष्टत्वेन कथनाद् ब्रह्मणः सकाशाद् विस्फुलिङ्गवद् विभागकथनाच्चेत्यर्थः ।

विद्वन्मण्डने तु नानाविधो व्यपदेशो नानाव्यपदेशः, कचिद् ब्रह्मत्वेन, कचिद्विभक्तत्वेन, कचिदज्ञत्वेन, कचिच्चिद्रूपत्वेन, कचिन्नियमितत्वेन, कचिदणुत्वेन, कचिद् व्यापकत्वेनेत्येवंरूपः । 'अयमात्मा ब्रह्म सर्वानुभूः', 'सर्व एवात्मानो व्युच्चरन्ति', 'ज्ञाज्ञौ द्वावजावीशनीशौ', 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय', 'क्षरात्मानावीशते देव एकः', 'एषोऽणुरात्मा चेतसा वेदितव्यः,' 'तद्धजीवो नभोपमः' इत्यादिषु । तस्माद् ब्रह्मणोंऽश एव जीवः, न ह्येवं विरुद्धधर्माश्रयत्वं कार्यस्य संभवतीत्यपि व्याख्यातम् ।

अत्रैकदेशिभिर्दर्शनान्तराभिमानिभिश्च कृतामाशङ्कामनूद्य निषेधन्ति ननु ब्रह्मण इत्यादि ।

रश्मिः ।

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४३ ॥ अवेति एककार्यत्वसंगत्यावतारयन्तीत्यर्थः । तामेवाहुः स्वेति । किमन्यज्जीवसंबन्धिरूपमिति जिज्ञासयाधिकरणावतरणात् । ज्ञोऽत इति । अन्याधिकरणानामेतन्मूलत्वादव्यवहितमधिकरणं परित्यज्यैतदुपात्तम् । स्वं जीवः जीवत्वविशिष्टः विशिष्टे शक्तं जीवपदं तत्संबन्धः समवायोऽस्यास्तीति जीवसंबन्धिरूपमित्यर्थः । स्वं स्वीयं जीवत्वं वा संबन्धस्तु स एवान्यत्पूर्ववत् । जीवो नामेत्यादीति । भाष्ये ब्रह्मणोंऽश इति छान्दसप्रयोगो बाहुलकात् । नानेति सूत्रे भावप्रधान इत्याशयेनाहुः नानात्वेनेति । बोधनार्थं त्वलं तेन समासविग्रहो न तु समासघटकः । सर्व इति भाष्यं विवृण्वन्ति स्म श्रुत[illegible]विति मुण्डकश्रुतौ । इत्यर्थ इति भाष्ये कपूयचरणा इत्यस्याः निन्दिताचरणा इत्यर्थः । रमणीयचरणाः आत्मानः । नानाविध इति विध इति बोधनार्थं न समासघटकम् । एवेति अत्र [illegible]कजीवव्यवच्छेदक एवकारः । चतुर्थस्कन्धे मायिको जीव इति अन्यभाषा । तदुपबृंहितं कौषमय [illegible] शारीरकब्राह्मणमप्यन्यभाषा । एवं विरुद्धेति अणुत्वव्यापकत्वरूपविरुद्धेत्यर्थः । अपि च्येति । सूत्राणां सारवद्विश्वतोमुखत्वात्पदार्थसंभावनायामपिः । ननु ब्रह्मण इत्यादीति । अनेनाभासे



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

स्मरन्ति च ॥ ४७ ॥

स्मरन्ति च सर्वेऽपि ऋषयोंऽशिनो दुःखसंबन्धं स्मरन्ति ।

'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः ।
न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा' ॥ इति ।
'कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते' ।
'एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' । चकारात्,
'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' ॥ ४७ ॥

अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४८ ॥

ननु जीवस्य भगवदंशत्वे विधिविषयत्वाभावात् कर्मसंबन्धाभावेन कथं

---

भाष्यप्रकाशः ।

स्मरन्ति च ॥ ४७ ॥ स्मरन्ति च ऋषय इति ग्रहणकमग्रे व्याख्यानम् । निर्गुण इति प्राकृतसंसर्गशून्यः । एकस्तथेति श्रुतिस्तु कठवल्लीस्था । एतत्पूर्वार्द्धं तु, 'सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः' इति । द्वितीया श्वेताश्वतरस्था । एतत्पूर्वार्द्धं 'द्वा सुपर्णा' इत्यादि । तया विरुद्धधर्मवत्त्वं भेदश्च जीवपरमात्मनोः सिद्ध्यति । एवं सूत्रद्वयेन एको दोषः परिहृतः । पूर्वश्रुतौ चाक्षुषैरित्यस्य तत्र चक्षुःसंन्निधिमित्तिमिरादिभिरित्यर्थः ॥ ४७ ॥

अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४८ ॥ पुनर्दोषान्तरमाशङ्क्य परिहरतीत्याहुः नन्वित्यादि । अयमर्थः । 'कर्ता शास्त्रार्थवत्त्वात्' इत्यत्र ब्रह्मण आप्तकामत्वेन फलानुपयोगाज्जडस्य च ज्ञानाद्यभावेन कर्मकरणस्याशक्यत्वाद् विधिनिषेधशास्त्रमनर्थकं स्यादिति, तत्परिहारार्थं जीवस्य विधिनिषेधविषयतया कर्तृत्वमङ्गीकृतम् । अंशत्वे तद्विरुध्यते । भगवत इव जीवस्यापि तथात्वस्याऽवश्यवक्तव्यत्वेन कथं फलसंबन्धः । तथाच विधिनिषेधवैयर्थ्य-

रश्मिः ।

स्मरन्ति च ॥ ४७ ॥ ग्रहणकमिति वार्तिकमेवेदं भाष्यप्रकाशम् । घञन्तं पुंसीत्यस्य लौकिकत्वात् सूत्रापेक्षितं ग्रहणयतीति ग्रहणकं सूत्रशेषमिति यावत् । अग्र इति । ननु शेषविवरणस्यैव इति कुतो न व्याख्यानमिति चेत्सत्यम् । व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमित्यभियुक्तोक्तेर्व्याख्यानम् । 'प्राकृतेति प्राकृतगुणशून्यः । गौणश्चेन्नात्मशब्दात्' इति सूत्रात् । एक इति । ननु स्मृत्युपन्यासे कुतः श्रुत्युपन्यास इति चेन्न, सर्व इत्युक्तत्वेन सर्वज्ञानस्यावश्यकत्वात् सर्वस्मृतिमूलश्रुत्युपन्यासमन्तरा निर्वाहाभावात् । चक्षुरिति आधिदैविकम् । बाह्येति दुष्टस्थलशवरजस्थलादिदर्शनभाषणजदोषैः । द्वा सुपर्णेति । 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते' इति । विरुद्धेति पुरुषत्वसुपर्णत्वरूपविरुद्धधर्मवत्त्वम् । अन्यपदेन भेदश्च । अभिचाकशीति पश्यति । एक इति दुःखसंबन्धित्वरूपः । तिमिरेति आदिशब्देन दुष्टस्थलेत्यादिदोषास्तेन दुष्टेत्यादिना पूर्वमुक्ताः ॥ ४७ ॥

अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४८ ॥ तथात्वस्येति कर्म-



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

**शाब्दज्ञानस्य पूर्वमेव सिद्धत्वात्। कथं सिद्धवद् यावज्जीवं विदध्यात्। न्यासोऽपि देहसंबन्ध एव ॥ ४८ ॥**

भाष्यप्रकाशः।

इत्यादिभिः स्वार्थज्ञानम्। पूर्वमेव सिद्धत्वादिति अध्यापनाध्ययनविधिभ्यां कृतेऽध्ययने तत्काल एव सिद्धत्वात्। तथाच कामाधिकारको विधिर्विश्वासोपजननार्थोऽनधिकारको भवतु नाम, यावज्जीवादिरूपो नित्यविधिस्तु नाज्ञाधिकारकः, अतो न शास्त्रार्थवैयर्थ्याभावात इत्यर्थः। ननु यावज्जीवविधिश्चेज्ज्ञानिपरस्तदा, 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इत्यादिसंन्यासविधिवैयर्थ्यम्। अतो नेयं व्यवस्था युक्तेत्यत आहुः न्यासोऽपीत्यादि। तथाच जरामर्याग्निहोत्रस्य तत्रापि संभवान्न वैयर्थ्यम्। ये पुनर्ब्रह्मभूता आदितः साधनसंपन्ना वा देहसंबन्धं नानुसंदधते, 'दैवादपेतमुत देववशादुपेतम्' इति न्यायेन देहं धारयन्ति पूर्णा एव ज्ञानिनस्तेषां तु शुकादिवत् स्वत एव तत्र तत्र प्रवृत्तेर्न विधिनियतत्वम्। अत एव, 'यं प्रव्रजन्तमनुपेतमपेतकृत्यम्' इति, 'पश्यन्त्वात्मायनाभामाः' इति, 'स्वैरं चरन्ति मुनयोऽपि न नह्यमानाः' इति 'योगेश्वरस्य भवतो नाऽऽम्नायोऽपि नियामकः' इत्यादीनि वाक्यानि, दत्तात्रेयस्य च मार्कण्डेयपुराणे स्वैराचरणमिति सर्वं संगच्छते। अतो, न कोऽपि दोष इत्यर्थः ॥ ४८ ॥

रश्मिः।

भगवत्कृतसंबन्धवतां कर्माकरणे। स्वार्थेति। स्वज्ञानमिति भाष्ये स्वशब्द आत्मीयवाचक इति भावः। भाष्ये जीवन्मुक्तानां शाब्दज्ञानेनाध्यासनिवृत्त्या श्रुतिः कर्माणि बोधयिष्यतीत्याशङ्कायामाहुः शाब्देति। प्रकृते। तत्काल इति अध्ययनादिनाध्ययनाध्यापनकाले। तदुक्तं परस्पराभिनन्दनेनार्थः स्फुरतीति। एवेति 'अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणाः संमर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामाः स्युर्यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः' इति श्रुतेरेवकारः। 'अलौकिको हि वेदार्थः' इति श्रुतेर्विमर्शिनः परमात्मप्रसादवन्तः। 'किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने' इति वाक्यात् विमर्शनार्थज्ञानमिति। भाष्ये कथमित्यादि। उक्तहेतोर्निवृत्ताविद्याकर्मणां कथं श्रुतिस्त्वित्याद्युक्तप्रकारातिरिक्तप्रकारेण सिद्धवदित्यादिः। निवृत्ताविद्याकर्मणां साध्याविद्याकर्मप्रसज्जनं विना यावज्जीवमग्निहोत्रं जुहुयादिति विरुद्धं यावज्जीवं कर्म विदध्यादित्यर्थः। अग्निहोत्रं जुहोतीत्यनयाग्निहोत्रविधानेन यावज्जीवमग्निहोत्रं जुहुयादिति नापूर्वविधिरपि तु गुणविधिर्यावज्जीवत्वविधिः दध्ना जुहोतीतिवत्। अतः श्रुतिस्तु भगवत्कृतसंबन्धमित्यादिः। तथा चेति कर्मणां विद्याधीनत्वेयम्। कामेत्यादि। प्रवृत्तं च निवृत्तं च तत्र पूर्वं प्रवृत्तम् 'फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्' इति वाक्यात्। तमाहुः विश्वासेति। ज्ञानिपरम् इति ज्ञानिकर्मपरः। अत्र देहसंबन्धो भगवत्कृतो ग्राह्यः। अपिनाग्निहोत्रादिरिति ध्यानयोगश्चेत्याहुः तथा चेति। जरामर्याग्निहोत्रं महानारायणोपनिषदन्ते 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः' इत्युपक्रम्य'एतद्वै जरामर्यमग्निहोत्र९ सत्रम्'इति श्रुतेः। तत्रापीति संन्यासेऽपि। संभवात् अयमर्थः। महानारायणोपनिषदस्तात्सूत्रात्पूर्वं 'वसुरण्वोविभूरसि' इति संन्यासप्रकरणस्य श्रुतिपर्यालोचनया संभवात्। श्रुतेः संन्यासप्रकरणस्थत्वं तु द्वितीयस्कन्धद्वितीयाध्याये 'सिद्धं सुखम्'इत्यत्र सुबोधिन्यामस्ति। विधीति विधिविषयत्वम्। योपीति योपि वर्तते सोपि नियामक इत्यर्थः। स्वैरेति यथाचार्याणाम्। न कोपीति प्राणाग्निहोत्रोपनिषदुक्तप्राणाग्निहोत्रस्य स्वैरचारिषु संभवाद्यावज्जीवंश्रुतिविरोधरूपदोषोऽपि नेत्यर्थः। अत्रापि विरुद्धयोः 'यावज्जीवम्' 'यदहरेव' श्रुत्योर्विरोधपरिहार इति पादार्थः ॥ ४८ ॥

RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## असंततेश्चाव्यतिकरः ॥ ४९ ॥

ननु देहस्यापि बाल्यकौमारादिभेदात् कथं कर्मकाले ब्राह्मणत्वादि, जीवैक्यादिति चेद् देहान्तरेऽपि स्यादिति, तत्राह देहान्तरे संततिरपि नास्ति। बाल्यादिभेदे पुनः संततिरेका। अतः संततिभेदान्न कर्मणां सांकर्यमिति ॥ ४९ ॥

## आभास एव च ॥ ५० ॥

ननु सच्चिदानन्दस्य ब्रह्मणोंऽशः सच्चिदानन्द एव भवेदिति कथं प्रवाहे प्रवेशो भगवतश्च सर्वकार्याणि तत्राह आभास एव जीवः आनन्दांशस्य

---

भाष्यप्रकाशः ।

असंततेश्चाव्यतिकरः ॥ ४९ ॥ सूत्रमवतारयन्ति नन्वित्यादि । यदत्र देहसंबन्धेन विधिनिषेधव्यवस्थापनं तदयुक्तम् । यस्मिञ्जन्मनि यो देहो गृहीतस्तस्य देहस्यापि नित्यप्रलयेन बाल्यकौमारादिभेदादाधानादिकर्मकाले तस्य देहस्याभावेन ब्राह्मणत्वादिकं कथं वक्तव्यम्, तदभावे च, 'वसन्ते ब्राह्मण आदधीत', 'न ब्राह्मणं हिंस्यात्' इत्यादिविधिनिषेधव्यवस्था दुरुपपादा। अतः कर्मव्याकुलत्वमसमाधेयम् । अथ जीवैक्यात्तानुपपत्तिरित्युच्यते चेत् तस्य देहान्तरेऽपि तुल्यत्वात् तस्याप्याधानाद्यापत्तिरिति शङ्कायां समाधिमाहेत्यर्थः । समाधिं व्याकुर्वन्ति देहान्तरे इत्यादि । अर्थस्तूत्तानः । तथाच देहसंबन्धेन समाधौ न कोऽपि दोष इत्यर्थः ॥ ४९ ॥

आभास एव च ॥ ५० ॥ पुनः किंचिदाशङ्क्य परिहरतीत्याशयेन सूत्रमवतारयन्ति नन्वित्यादि । भगवतश्च सर्वकार्याणीति अत्रापि कथमिति पदं संबध्यते सर्वाणि

रश्मिः ।

असन्ततेश्चाव्यतिकरः ॥ ४९ ॥ भाष्ये प्रवाह इति प्रवहणं प्रवाहः सर्गपरंपराया अविच्छेदः । नित्येति द्वादशस्कन्धोक्तचतुर्विधप्रलयेऽयमपि । 'नित्यदा ह्यङ्गभूतानाम्' इति वाक्योक्तेन । बाल्येति आदिना यौवनवृद्धावस्थे । आधानादीति । आदिनाग्निहोत्रादि·················ब्राह्मणत्वादीति आदिना क्षत्रियत्ववैश्यत्वनिषादस्थपतित्वानि । ब्राह्मणत्वादिकं न जातिः । 'त्रिभिर्नश्यति ब्राह्मणत्वं हालाहलहलाहलैः' इति वाक्यात् । अतो देहेन सह ब्राह्मणत्वादिनाशः । आदधीतेति अग्निमादधीत । कर्मेति देहभेदेऽपि कर्मव्याकुलत्वम् । ब्राह्मण्याभावात् । जीवेति भाष्यं विवृण्वन्ति स्म अथेति । देहान्तर इति नित्यप्रलयविषयातिरिक्ते शूद्रादिदेहे । व्याकुर्वन्तीति सूत्रार्थकथनेन व्याकुर्वन्ति । उत्तान इति । भाष्ये संततिः क्षणिकदेहसंततिः । नञत्यन्ताभावार्थकः चोऽप्यर्थकः । न संततेः असंततेरिति परिनिष्ठितविभक्त्या नञ्समास इत्याशयेन सूत्रव्याकरणं संततिरपीत्यादिना हेतुपञ्चम्या व्यापारेणान्वयः । संततब्राह्मणत्वोभयप्रतियोगिकात्यन्ताभावनिष्ठसत्त्वानुकूलव्यापारादित्यर्थः । बाल्यादीति । विशेषार्थो भेदः । एकेति एकदेहनिष्ठत्वादेका । संततिभेदात् संततिविशेषात् । अव्यतिकर इति सूत्रांशं व्याकुर्वन्ति स्म न कर्मणामिति । कर्मणामनुज्ञापरिहारविषयाणाम् । अनुज्ञापरिहारावित्यनुवर्तते । विभक्तिविपरिणामेन स्वविषयलक्षणयान्वयः । सांकर्यं व्यतिकरः शूद्रादिदेहेऽप्याधानाद्यापत्तिः । शूद्रत्वादिभिराधानादिसांकर्यं सामानाधिकरण्यमिति यावत् । इत्युत्तान इत्यर्थः । न कोऽपीति सांकर्यदोषोपि न ॥ ४९ ॥

आभास एव च ॥ ५० ॥ 'सदेव सौम्येदमग्र आसीत्' इति श्रुतेः सर्वानीलसार्थमाहुः



PURNATHJI (DR. RUPAK NATH)
www.astrology-tantra.c

## अदृष्टानियमात् ॥ ५१ ॥

ईशित्वाय नैयायिकाद्यभिमतं जीवरूपं निराकरोति । नानात्मानो व्यवस्थात इति भोगव्यवस्थया जीवनानात्वमङ्गीकृतम् । तत्रादृष्टस्य नियामकत्वं तन्मते सिद्धम् । देशान्तरवस्तूत्पत्त्यन्यथानुपपत्त्या व्यापकत्वं चाङ्गीकृतम् ।

एवं च क्रियमाणे मूल एव कुठारः स्यात् । सर्वेषामेव जीवानामेकशरीर-संबन्धात् कस्यादृष्टं तद् भवेत् । न च मिथ्याज्ञानेन व्यवस्था । तत्रापि तथा । नचानुपपत्त्या परिकल्पनम् । श्रुत्यैवोपपत्तेः । एतेन विरोधाद् ऋषिप्रामाण्यमपि निराकृतम् ॥ ५१ ॥

---

### भाष्यप्रकाशः ।

अदृष्टानियमात् ॥ ५१ ॥ सूत्रप्रयोजनमाहुः ईशित्वायेत्यादि, ईशो नियामको-ऽस्मान्योऽस्तीतीशित्वायेत्यर्थः । ननु जीवस्य ईश्वरनियम्यत्वं नैयायिकादिभिरप्यङ्गीक्रियत एवेति कुतस्तदर्थं तन्मतनिराकरणमित्याकाङ्क्षायां तत्र तदनुपपत्तिबोधनाय तन्मतमनुवदन्ति नानेत्यादि । तत्रेति भोगव्यवस्थायाम् । सिद्धमिति कार्यमात्रं प्रति जीवादृष्टस्य कारणत्वाङ्गी-कारात् सिद्धम् । देशान्तरेत्यादि सामग्रीसमवधाने हि कार्यमुत्पद्यते । तत्र सामग्रीमध्ये अदृष्टमपि प्रविष्टमिति देशान्तरे यद्भोगार्थं यद्वस्तूत्पद्यते तत्र तददृष्टमवश्यं वक्तव्यम्, अदृष्टं चात्मसमवेतं गुणत्वात्, अतस्तत्रात्माभावे तद्वस्तूत्पत्त्यभाव इति तदन्यथानुपपत्त्या तस्मिन् देशे तददृष्टवदात्मसत्ताऽऽवश्यकीति तेषां व्यापकत्वमङ्गीकृतमित्यर्थः । एवमनूद्य दूषयन्ति एवं चे-त्यादि । भोगव्यवस्थयैतत्सर्वाङ्गीकारे जीवनानात्वव्यापकत्वसाधनहेतुभूतायां भोगव्यवस्थायामेव तच्छेदकदूषणपात इत्यर्थः । अत्र हेतुमाहुः सर्वेषामित्यादि । मिथ्याज्ञानेनेति शरीरेऽह-मित्यभिमानेन । तत्रापि तथेति । सर्वेषामेकस्मिन् शरीरे संबन्धतौल्ये कथमेकस्यैवात्मनोऽहं-ममेत्यभिमानः । विरोधादिति श्रुतिविरोधात् । तथाचाभिमानकारणस्य निर्वक्तुमशक्यत्वे

### रश्मिः ।

भाष्यमपेक्षितमत आहुः मिथ्यात्वमिति । स्वरूपमिति रूपव्याख्यानं न विग्रहघटकम् । अत्र 'ऋतेऽर्थं यत्प्रतीयेत' इति भागवतोक्तमायापक्षो नास्ति । तस्य लक्ष्मणभट्टात्मजवल्लभविरचित-त्वेनाधिदैविकमतत्वात् । अस्य वेदव्यासमतवर्तिवल्लभाचार्यमतत्वेनाधिभौतिकत्वात् । एतेनापरितोषे श्रीभागवतकरणात् । निबन्ध आध्यात्मिकमतं विष्णुस्वामिमतवर्तिवल्लभाचार्यविरचितत्वात् । यमुना-ष्टकादि तु सगुणं निर्गुणं युक्त्या परमार्थस्तत्प्रतिपादकं मुख्यं च । स्वनाम्ना तु मुख्यत्व-मित्यभियुक्तोक्तिः । इति श्रीवल्लभाचार्यविरचितं यमुनाष्टकं संपूर्णमितीतिश्रीकथनात् ॥ ५० ॥

अदृष्टानियमात् ॥ ५१ ॥ ईश इति । अन्य इति न विग्रहघटकं किंतु नियामके स्वार्थेऽन्यत्वमात्रमावेदयेत् । मूलं प्रपञ्चयन्ति स्म भोगव्यवस्थेत्यादिना । एवे-त्यादि विवृण्वन्ति स्म तच्छेदकेति । मूलभूतभोगव्यवस्थाछेदककुठारस्थानीयदूषणपात इत्यर्थः । एवकारेण नानात्वव्यापकत्वदूषणव्यवच्छेदः । सर्वेषामित्यादीति । यथा विपक्षि विहङ्गम इति दृष्टान्तः । 'आकाशवत्सर्वगतश्च नित्यः' इति वाक्यात् । एकशरीरं विह-



DR. RUPAKNATH
www.astrology-tantra.com

## अभिसंध्यादिष्वपि चैवम् ॥ ५२ ॥

**ननु मनःप्रभृतीनां नियामकत्वात् तेषामीश्वरेच्छया नियतत्वान्न दोष इति चेन्न। पूर्ववदेव दोषप्रसक्तिः। तादृशेश्वरकल्पना च पूर्वमेव निराकृता॥५२॥**

### भाष्यप्रकाशः।

तेन शरीरेण तत्तदिन्द्रियेण तत्तन्मनसा कृतं कर्म सर्वेषां संबन्धतौल्यात् सर्वकृतं सत् सर्वेषामेव तद्भोजकादृष्टं जनयत् सर्वेषां तद्वस्तुभोगाय स्यात्, एवं सर्वत्रेति भोगव्यवस्थाभङ्गान्न तया जीवनानात्वव्यापकत्वयोः सिद्धिरित्यर्थः ॥ ५१ ॥

**अभिसंध्यादिष्वपि चैवम् ॥ ५२ ॥** विलक्षणमनःसंयोगेनादृष्टव्यवस्थामाशङ्क्य परिहरतीत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति नन्वित्यादि। ननु विलक्षणसंयोगोत्पादकानां मनःप्रभृतीनामभिमाननियामकत्वात् तेषां चेश्वरेच्छया नियतत्वान्नादृष्टानियमदोष इति चेन्न। कुतः। अभिसंधिः पूर्वोक्तोऽभिमानस्तस्यादिभूतानि कारणानि, तेष्वपि, एवं पूर्ववदेव विभूनामात्मनां विलक्षणमनःसंयोगस्यापि तुल्यत्वान्नियमाऽसंभवदोषप्रसक्तिः। नचेश्वरेच्छया समाधानम्, निमित्तभूतेश्वरकल्पनायाः पूर्वमेव निराकृतत्वात्। अभ्युपगमेऽपि अनया प्रणाड्यास्यैवादृष्टमुत्पद्यतामितिवदयमेवं भुङ्क्तामित्यण्वात्मवादेऽप्याकारेण तस्यास्तुल्यत्वान्न व्यापकात्मसिद्धिरित्यर्थः ॥ ५२ ॥

### रश्मिः।

क्रमस्येति । शरीरेहमिति । तथा च विद्वच्छरीरे विद्वङ्गमाभिमानवद्देहाभिमानिनोदृष्टवदात्मनोभिमानेन व्यवस्थेति भाष्यार्थः । ज्ञानाधिकरणमात्मेत्याहुः **सर्वेषामिति** ॥ ५१ ॥

**अभिसंध्यादिष्वपि चैवम् ॥ ५२ ॥ अभिसंधिः** संकल्पः, संकल्पोभिसंदधाति कार्यमभिमानरूपमिति । अभिसंपूर्वकडुधाञ् धारणे धातुः । घोः किः । तथा च श्रुतिः । 'वाक्संधिः' इति 'मनःपूर्वरूपं वागुत्तररूपम्'इति । अभिपूर्वकस्य शब्दसृष्टं संकल्परूपं मन इत्यर्थः । आदिनेच्छादयोभिमाननियामका इत्याशयेनाहुः । यद्वाभिसंधिः पूर्वभाष्योक्तोभिमानस्तस्यादिषु मनःप्रभृतिष्वपि पूर्वदोषप्रसङ्ग इत्याशयेनाहुः **विलक्षणेति** वैलक्षण्यमभिशब्दार्थवैदिकसृष्टिमध्यपातित्वं मनोविशेषणम् । यद्वा **विलक्षणो यो मनःसंयोगस्तेन । विलक्षणेति विलक्षणस्य मनसः संयोगस्योत्पादकानाम् । मन इति । प्रभृतिशब्देनेच्छादयः । तेष्वपीति ।** यद्वाभिसंधिः पूर्वाभासोक्तमनस्तदादिषु चैवं पूर्ववदेव दोषप्रसक्तिः । **पूर्ववदिति** भाष्यं विवृण्वन्ति स्म **एवमिति** । सूत्रीयैवमित्यस्यार्थः । **पूर्ववदिति** । सौत्रापिशब्दार्थ **एवेति** । सौत्रचकारार्थमनुक्तसमुच्चयमाहुः **विभूनामित्यादि** । **विलक्षणेति विलक्षणो मनःसंयोगस्तस्य** । यद्वा विलक्षणं यन्मनस्तस्य संयोगस्तस्य । **तादृशेत्याद्यपि** भाष्यं चकारार्थ इत्याशयेन विवरीतुमाहुः **न चेति** । विद्वन्मण्डनानुसारीच्छावाद उक्तः । विवृण्वन्ति स्म **निमित्तेत्यादि** निमित्तमात्राधिकरणेश्वरकल्पनायाः **पूर्वमेव** तर्कपाद एव नैयायिकमतनिराकरणसमये । तथा च परमाणुकारणवादे निराकृतेऽभिन्ननिमित्तोपादानभूतेश्वरो न निमित्तभूतेश्वरः । अभिन्ननिमित्तोपादानेश्वरेच्छा तु नियामिकास्त्येव । अत्र तुमनुक्त्वा चकारोक्त्यान्यानुक्तसमुच्चयोऽद्योति स चोक्तः सूत्रारम्भ एवं अभिसंधिरित्यादिना । तर्काप्रतिष्ठानसूत्रादाहुः **अभ्युपगम इति** । यथाहुः अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिरिति । संकेत इच्छा । न **व्यापकेति** श्रुत्यैवोपपत्तेस्तथा ॥ ५२ ॥



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

आसुः', 'वायुर्भूत्वा धूमो भवति' इत्यादिलोकवेदयोः प्रयोगबाहुल्येन अविभागस्यापि प्रत्यक्षभेदत्वाद्भिदिर् विदारण इत्यनुशासनाच्च

'परमात्मा जगद्रूपी सर्वसाक्षी निरञ्जनः ।
भिन्नाभिन्नस्वरूपेण स्थितोऽसौ परमेश्वरः' ॥

इत्यादिस्मृतिशतादपि भेदाभेदयोर्विरोधोऽप्रामाणिक इति । ननु भवत्वेवं भेदाभेदयोरविरोधस्तथापि ब्रह्मणो निरवयवत्वाज्जीवस्य मुख्यं ब्रह्मांशत्वं न संभवतीति चेन्न । अंशत्वं हि सजातीयत्वे सति कदाचिदविभक्तत्वमेव वाच्यम्, अन्यथा पुत्रचेतने पितृचेतनांशव्यवहारानुपपत्तेः । विभागश्च लक्षणान्यत्वम् । अभिव्यक्तधर्मभेद इति यावत् । ईदृशांऽशो निरवयवस्यापि संभवतीत्यदोषः । यदि चावयवत्वमेवांशत्वमिष्यते तथापि सजातीयाविभक्तत्वगुणेनैव जीवेंऽशशब्दो गौणो युक्तो, न तु घटाकाशादिवत् प्रकारान्तरेण गौणः । भेदग्राहकश्रुत्यादिबलेनाग्निविस्फुलिङ्गादिदृष्टान्तानामेवादर्तव्यत्वादिति चाह, एतमर्थं मोक्षधर्मीयैर्वैशम्पायनवाक्यैश्चोपष्टम्भयन् व्याससंमतत्वमस्य दृढीचकार । तदवाक्यमपि संमतमेव । एतावान् परं विशेषो यदस्मत्सिद्धान्ते श्रुतीनामेव मुख्यत्वात् तयैव विरुद्धधर्माश्रयत्वं कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वमद्भुतकर्मत्वं महामहिमशालित्वं च निश्चित्य ब्रह्मसामर्थ्यैनैव भेदाऽभेदाविरोधोऽखण्डत्वं सांशत्वमन्यच्च यदनुपपद्यमानं लौकिकप्रमाणैस्तत् सर्वं समर्थ्यते । अनेन तु युक्तिभिः समर्थ्यत इति ।

रामानुजाचार्यास्तु—'ज्ञाऽज्ञौ द्वावजावीशनीशौ' इत्यादिश्रुतेरत्यन्तभिन्न इति माध्वमतम्, उत परमेव ब्रह्माविद्यया भ्रान्तं जीवः, 'तत्त्वमसि', 'अयमात्मा ब्रह्म' इत्यादिश्रुतेरिति शांकरमतम्, अथवा ब्रह्मैवानाद्युपाध्यवच्छिन्नं जीवः, तत्त्वमस्यादिवाक्येभ्यः, उपाधिश्च सत्य इति

रश्मिः ।

क्रमुदाहरणम् । वायुरिति 'तस्माद्वा एतस्मात्' इत्यत्र 'आकाशाद्वायुः' 'वायुर्भूत्वा धूमो भवति' तस्मादग्निः । 'पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः' इति वाक्यात् । दारु निमित्तम् । समवाय्याकाशः कार्यं वायुः । विदारण इति विदारणं विभाग इत्याशयः । सजातीयेति आत्मत्वेन साजात्यम् । कदाचिदिति सृष्टिकाले मोक्षकाले च । लक्षणेति लक्षणादन्यत्वम् । लक्ष्यतेऽनेनेति लक्षणमन्यत्वं भेद इत्याह । धर्मेति अभिव्यक्तेन धर्मेण भेदः । ईदृश इति अभिव्यक्तेन धर्मेण भेदो दृश्यते यत्र भिन्न इत्यर्थः । अदोष इति अंशत्वासंभवदोषो न । सजातीयेति सजातीयेनाविभक्तत्वमात्रगुणेनैव सिंहो माणवक इतिवत् । जीवो ब्रह्मांश इति जीवेंऽशशब्दो गौणः । घटेति घटाकाशमठाकाशः । प्रकारान्तरमौपाधिकं, जीवत्वमौपाधिकमिति तेन । भेदेति 'द्वा सुपर्णा' इति, 'य इह नानेव पश्यति' इति श्रुती 'परमात्मा जगद्रूपी' इत्युक्तस्मृतिश्च तदादिबलेन । अग्नीति अग्न्यादिना पितापुत्रदृष्टान्तः । अन्योपि जलतरङ्गादिः वैशंपायनेति द्रष्टव्यं तत्र । ननु ... दीयते भिदां 'मायामात्रमनूद्य' इति भेदो माया, सा 'न यत्र माया' इति 'प्रवर्तते यत्र रजस्तमः' इति वाक्याभ्यां निषिध्यते तत्राहुः एतावानिति । अन्यथेति । चकारेण भेदसंश्रयकत्वं मायिकत्वेऽपि । भ्रान्तमिति व्याख्यातम् । अयमात्मा जीवः । आदिना 'नेह नानास्ति



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः।

नैसर्गिके भेदे अवान्तरसृष्टाविवादिसृष्टावपि पूर्वमीश्वरे जीवानां पिण्डीभाव एव भाव्यो, न त्वैक्यम्। तथा सति तेषां भिन्नत्वेन, 'बहु स्याम्' 'नामरूपे व्याकरवाणि' इत्युक्तं स्वस्य बहुभवनं नामरूपव्याकर्तृत्वमुत्तमपुरुषप्रयोगश्चोपरुध्येत। अभिमानित्वे जीवतौल्यं चापद्येतेति।

प्रकृतमनुसरामः॥ स्मृतौ सूत्रे चांशशब्द उक्तः, श्रुतौ च पादशब्दः। उभावप्यनेकार्थत्वात् संदिग्धौ। अंशशब्दस्तावदवयवे पुत्रे खण्डे विशिष्टवस्त्वेकदेशे स्वरूपैकदेशे च प्रसिद्धः। श्रुतौ तु पत्न्यामपि परंपरया, 'अर्धो वा एष आत्मनो यत् पत्नीः' इति। 'स आत्मानमेव द्वेधाऽपातयत् ततः पतिश्च पत्नीश्चाभवतां तदेतदर्धं बृगलमिव' इति श्रुत्या अर्धत्वकथनादर्धशब्दस्य च कोशे 'पुंस्यर्धोऽर्धं समेंऽशके' इत्यंशविशेषे शक्तेः। पादशब्दोऽप्यवयव एकदेशे च। अवयवे तु प्रसिद्धः। एकदेशे तु 'विश्वो वैश्वानरः प्रथमः पादः' इति। यद्यप्येतेषु यस्य कस्याप्यर्थस्य ग्रहणे लक्षणादोषसंसर्गो न भवति, तथापि श्रुतावूर्णनाभतन्तुनिदर्शनेऽग्निविस्फुलिङ्गयोश्च दृष्टान्तकथनात् तदनुकूल एवांशांशिभावो ग्राह्यः। तथा सति खण्डावयवादिरूपत्वमित्यत्वादिबोधकश्रुत्यनुरोधादविकृतस्वरूप एवांशः सिद्ध्यति, न नित्यभिन्नः केवलविशेषणरूपो वा। प्रलयदशायामविभागेन पिण्डीभाव ऐक्ये वा श्लिष्टत्वेनैव सत्त्वात् तदालिङ्गितस्य ब्रह्मणः स्वस्मिन्नहमितरभिन्न इति प्रतीतेरर्थसिद्धत्वात् सृष्टिप्राक्काले 'बहु स्याम्' इति कृतबहुबुद्धिपूर्वकस्य संकल्पस्य पीडाप्रसङ्गात्।

रश्मिः।

श्रुतयस्तु 'तत्त्वमसि' इत्यवताराभेदबोधिका। 'सत्यं भिदा ३ सत्यो जीवः ३ इति जीवेशयोर्भेदे। 'ज्ञाज्ञौ द्वावजावीशनीशौ' इति च। अनीशशब्दस्याकारलोपः। आदिना स्मृतयः। तास्तु 'कृष्णस्तु भगवान्स्वयम्' इत्यभेदे। 'जीवा भिन्नाः परो भिन्नस्तथापि ज्ञानरूपतः। प्रोच्यते ब्रह्मरूपेण वेदवादेषु सर्वशः' इति। 'परमात्मा जगद्रूपी' इत्यादिश्च। अस्मादिति। भेदस्य तद्घटकस्याचिन्त्यानेकविरुद्धधर्मत्वे मायिकत्व इवार्थत्वे च प्रवेशरूपया। अभेदस्य च भक्तिकारणत्वेन प्रवेशरूपया। 'नृप स्यात्मैव वल्लभः' इति वाक्यात्। 'भजनस्यैव सिद्ध्यर्थं तत्त्वमस्यादिकं तथा' इति वाक्याच्च। भेदाभेदोपपत्तेः। पिण्डीभाव इति। सिकतायां तैजसानां पिण्डीभाववत्। उत्तमेति स्वामित्युत्तमपुरुषप्रयोगश्च जीवानां भिन्नानां बहुभवनेनोपरुध्येत। अभीति जीवरा(?)स्यभिमानित्वे। परमिति ईक्षाविशिष्टमैच्छयेतीच्छापरंपरया। पुरुषविधब्राह्मणे। पत्नीरिति पत्नीत्यपि पाठः। 'हलङ्याब्भ्यो दीर्घात्' इति सूत्रात्। स इति ईक्षाविशिष्ट इच्छावान्। पत्नीश्चेति। पत्नीचेत्यपि पाठः। अर्धमिति अर्धखण्डितमिव। तस्या इति पत्न्याः। न चार्धनारीश्वरत्वं ग्राह्यम्। तस्य ज्ञानानौ तस्य अभिकाङ्क्षायामेतयोरेकतराभावेन तत्त्वस्याशक्यवचनत्वात्किंतु 'यथा स्त्रीपुमांसौ संपरिष्वक्तौ' इत्यस्यां श्रुतौ 'स इममेवात्मानम्' इति श्रुतेः पूर्वस्यां स्त्री जगत् पुमान् ईक्षाविशिष्ट इच्छावानिति कार्यनारीश्वरप्राप्तिः। तथा च यथा स्त्रीपुमांसावित्यस्याः पूर्वं श्रुतिः। 'स द्वितीयमैच्छत्' 'स हैतावानास' इति। एतावान्समीपतरवर्ती प्रपञ्चः। लक्षणेति। 'अंशो नानाव्यपदेशात्' इति सूत्रेंऽशपदे। तन्नित्यत्वेति। 'अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा' इति श्रुतिः। आदिना 'यथाग्नेः क्षुद्रा विस्फुलिङ्गाः' इति श्रुतिरंशत्वबोधिका। केवलेति जीवराश्यभिमानीत्यत्र इत्यत्र। अर्थेति अर्थ आक्षेपः, अन्यथानुपपत्तिरिति यावत्, तस्सिद्धत्वादित्यर्थः।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.c

तत्र जीवं निरूप्य तादृशधर्मवत्त्वं प्राणे अतिदिशति । प्राणशब्दप्रयोगः प्रियत्वाय, प्राणा इन्द्रियाणि ।

---

भाष्यप्रकाशः ।

मित्याशयेन व्याचक्षते तत्र जीवमित्यादि । अतीतपादान्ते अदृष्टानियमेन परमतं निराकृतम् । यद्यपि तत्संनिहितं तथापि तद्वत् प्राणानां निराकार्यत्वाभावेनादृष्टधर्मस्यातिदेष्टव्यत्वाभावात् ततः पूर्वं प्रकृतो यो जीवः स एव वियदाद्यपेक्षया सन्निहित इति जीवसमानधर्मवत्त्वं प्राणेऽतिदिशतीत्यर्थः । नन्वान्तराणां सर्वेषामत्र विचार्यत्वात् तथा करणानीति वक्तव्ये कथं प्राण एवात्रोक्त इत्यत आहुः प्राणशब्देत्यादि । ननु तथापि मुख्ये तद्वाचके पदेऽनुक्ते कथं तेषामवगम इत्यत आहुः प्राणा इन्द्रियाणीति । 'अथ ह प्राणा अहं श्रेयसि व्यूदिरे' इत्यादिश्रुतौ प्राणशब्द इन्द्रियेषु प्रसिद्ध इति सोऽपि मुख्यप्राय इति ततोऽपि सुखेनावगम

रश्मिः ।

कार्यत्वेंशत्वे वा । संशयमुक्त्वा पूर्वपक्षमाहुः प्राणानीति । परमतमिति नैयायिकमतम् । अध्यायार्थसंगत्यर्थमुक्तम् । अत्रापि पूर्वपक्षादौ परमतं सिद्धान्तेन तन्निराकरणं च बोध्यम् । अधिकरणसंगतिः प्रसङ्गरूपेति च स्फुटिष्यति । 'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः' इति वाक्यात् । तदिति परमतनिराकरणम् । तद्वदिति परमतवत् । नच शक्यतावच्छेदकाननुगम इति शङ्क्यम् । दार्ष्टान्तिकान्वयानुरोधेन शक्यतावच्छेदकभेदाङ्गीकारात् । स एवेति एवकारेण परमतं तन्निराकरणं वा व्यवच्छिद्यते । सन्निहित इति । ननु सन्निहितत्वस्यातिदेशकत्वं क्व सिद्धम् । पूर्वतन्त्रे तावल्लिङ्गसादृश्यादीनामतिदेशकत्वमुक्तमिति चेत्सत्यम् । त्वदादीनामुत्सर्गतः प्रधानपरामर्शकत्वात्सूत्रे तथेति त्वदादेरुद्देशाद्व्याकरणरीत्योक्तं सन्निहित इति न तु पूर्वतन्त्रोक्तरीत्येति । तेनादिशब्देन पूर्वतन्त्रेपि ज्ञेयम् । पूर्वतन्त्रे त्वष्टमस्य चतुर्थेधिकरणे भाट्टमतेनाधिकरणमालायां पञ्चमे, 'पशौ च लिङ्गदर्शनात्' इत्यधिकरणे एकसूत्रे । 'न पशावैष्टिकं स्याद्वा न कपालाद्यभावतः । स्याद्व्यक्तद्रव्यदेवत्वप्रयाजस्रुच्यसाम्यतः' इति चिन्त्यते । पशावग्नीषोमीये किं दार्शपौर्णमासिको विध्यन्तः उत सौमिक इति संशयः । ऐष्टिको विध्यन्तो नास्ति । कुतः पूर्वाधिकरणवदत्र निर्वापकपालादिलिङ्गाभावादिति पूर्वपक्षे आग्नेयमष्टाकपालमित्यत्रोत्पत्तिवाक्ये यथा द्रव्यदेवते व्यक्ते तथाग्नीषोमीयं पशुमित्यत्रापि । न तु सोमेन यजेतेत्यत्रेव देवताया अव्यक्तत्वम् । तदेतद्व्यक्तद्रव्यदेवत्वमेकं लिङ्गम् । एकादशप्रयाजान्यजतीति प्रयाजवत्त्वं द्वितीयम् । स्रुच्यामाघार्य जुह्वा पशुमनक्तीत्याघाराज्ये लिङ्गान्तरे आलम्भो लिङ्गान्तरम् । इष्टावपीषामालभत इति दर्शनात् । तदस्ति पशावैष्टिक इति । तद्वत्प्रकृतेप्यतिदिशति । वियदाद्यव्यक्तधर्मातिदेशमवकृत्य जीवसमानधर्मत्वमित्यर्थः । इत्यर्थे इति तेन 'अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते' इति लक्षणात् प्राणे जीवसमानधर्मत्वस्य प्राप्तिं करोतीत्यर्थः । कर्ता भगवान्व्यासः सूत्रं वा । कार्येण इत्यस्यापूर्वात् प्रीतदेवताया वेत्यर्थः । अथ 'प्राकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु । धर्मप्रवेशो येन स्यात्सोतिदेश इति स्मृतः' इति लक्षणाद्व्यासो भगवानतिदेशेन 'तथा प्राणः' इति तथात्मकवाक्येन प्राणे जीवसमानधर्मत्वं करोतीत्यर्थः । तथा च तैस्तैः प्रकारैरुत्क्रान्त्यादिपञ्चप्रभृत्वादिभिः प्राणो विशिष्टः कर्तव्य इति सूत्रार्थः । तथेति तथा प्राण इत्यत्र तथा प्राणानीति वक्तव्ये । व्यूदिर इति विवादं कृतवन्तः । श्रुताविति छान्दोग्यसप्तमप्रपाठकश्रुतौ । स इति ।



DR.RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

मनसो मुख्यत्वादेकवचनम् । उत्क्रान्तिगत्यागतीनामित्यारभ्य सर्वोपप-

---

भाष्यप्रकाशः ।

इत्यर्थः । तर्हि कथमेकवचनप्रयोग इत्यत आहुः मनस इत्यादि । लिङ्गशरीरे मनस एव प्राधा-न्यात् तथेत्यर्थः । ननु प्राणेषु वियदादिधर्मातिदेशे, 'स प्राणमसृजत' इति श्रुत्युक्तं सृज्य-त्वरूपं जन्यलिङ्गमतिदेशकम्, जीवधर्मातिदेशे किमतिदेशकमित्यत आहुः उत्क्रान्तीत्यादि । 'स यदाऽस्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तत एवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते । स यदा प्रतिबुध्यते यथाऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मा-दात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते' इत्यादिषूक्ता जीवसहभावबोधिका या सर्वा उपपत्तिः सैव, 'विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् स्वधर्मत्वम्' इति पूर्वतन्त्रीयन्यायाज्जीवसमानधर्मा-

रश्मिः ।

प्राणशब्दार्थः । मुख्येति वेदाद्गृहीतेन्द्रियेषु प्राणशब्दशक्तिः । ननु कथं प्रायशब्दः । उच्यते । शक्तिग्रहो व्याकरणनिरुक्तकोशाप्तवाक्यादिभ्यो भवति । वेदे त्वनेकत्र प्राणशब्दशक्तिरिति प्रायशब्द इति । तथेति एकवचनत्वप्रकारेणैकवचनं कृतम् । ननु भाष्यान्तरेषु प्राणा इति पठ्यते । सत्यम् । प्रसिद्धसूत्रपुस्तके तु ह्येकवचनान्तं प्राणशब्दान्तं सूत्रम् । भाष्यमप्युक्तम् । स प्राणमिति प्रश्नोपनिषदन्तिमप्रश्नस्था श्रुतिरियम् । स इति 'यस्मिन्नेताः षोडशकलाः प्रभवन्ति' इति । छान्दो-ग्यीयाष्टमोपदेशोक्तः । असृजतेति । परिग्रहत्वात् । अतिदेशकमिति 'अन्यत्रैव प्रतीतायाः' इत्युक्ते नियामकमतिदिशतीत्यतिदेशकम् । कर्तरि ण्वुल् । लिङ्गमतिदिशति यदा तदायं साधुः । लिङ्गमतिदेशकं पूर्वतन्त्रेऽष्टमस्य तृतीयपादे गणनोदनाधिकरणेऽस्ति । प्रथमपादे 'यस्य लिङ्गमर्थसंयोगादभिधानवत्' इत्यधिकरणेऽस्ति । स यदेति स जीवः । भाष्ये सर्वशब्दात्स्वप्नश्रुतिमाहुः यथेति । जीवसहेति प्राणस्य जीवसहभावबोधिका । सर्वेति यथैतैरिति सहार्थे तृतीया न स्याद्यदि प्राणान्गृहीत्वेत्यत्रैतैः सहेति पूरणं न स्याद्यदि चात्मनः प्राणा इत्यत्र तेनात्मना सहेति पूरणं न स्यात्तदा जीवप्राणयोः सहभावो न स्यादित्येवंविधा सर्वोपपत्तिर्यु-क्तिरन्यथाज्ञानमित्यर्थः । एवं च जीवप्राणयोः साहित्यं श्रौतमिति सादृश्यं सिद्धम् । सहभावोऽत्र प्रामाणिकस्थानिको ग्राह्यः स्वाभाविकोऽन्यो वागन्तुकः तेन चन्द्रवन्मुखमित्यादौ साहित्ये सति साद-श्यम् । न कल्पितघटादिसाहित्येन घटपटादिसादृश्यम् । नन्वात्मनः प्राणा इत्यत्रोक्तसह-भावस्य किं प्रयोजनमिति चेन्न । 'यद्वाचानभ्युदितं येन वागभ्युद्यते' इत्यादिश्रुतिभ्यः प्राणप्रेरक-सहभावौचित्यज्ञापकत्वाच्च । ननु यथाग्नेरित्यादिश्रुत्योत्पत्तिरप्युक्तेति चेन्न । प्राणेऽपि बाधका-भावादस्त्विति । ननु तथापि सृज्यत्वलिङ्गेन वियदादिधर्मातिदेशोऽस्तु किमङ्गमनया युक्त्येत्यत्र जैमिनिसूत्रं स्वोक्ते प्रमाणयन्ति स्म सैवेत्यादिना । विप्रतिषिद्धानां तुल्यबलविरुद्धानां धर्मसमवाये भूयसां धर्माणां स्वधर्मत्वं स्यादिति सूत्रार्थः । द्वादशस्य द्वितीयचरणेस्त्वधिकरणात्मकं सूत्रम् । विप्र-तिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वमिति पाठान्तरम् । एतदनुरोधेन जीवसमानधर्मत्वा-दयम् भाष्यप्रकाशः । समानस्य सादेश इति । पूर्वेति । ननु न्यायशब्दोक्तिरनुपपन्नाधिकरणान्ते यत्नान्यत्रापीत्यनुक्तेरिति चेन्न । स्वमतानुसारेण तथोक्तेः । यथाहुः शंकराचार्यास्तत्प्राक्सूत्रे 'तथा स प्राणमसृजत प्राणाच्छ्रद्धामित्यत्रापि प्राणे श्रुता सृजतिः परेष्वप्युत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते' इत्युक्त्वा





RUPNATH ( DR RUPAK NATH )
www.astrology-tantra.com

**स्तिरत्रातिदिष्टा, चिदंशस्यापि तिरोभाव इति पृथङ् निरूपणम् । ननु तद्गुणसारत्वादयः कथमुपदिश्यन्त इति चेन्न । सत्यम्, अस्ति तत्रापि, 'ये प्राणं ब्रह्मोपासते' इति ॥ १ ॥**

---

भाष्यप्रकाशः ।

तिदेशकत्वेनोपदिष्टेत्यर्थः । ननु सर्वोपपत्तिसाम्ये जीवधर्मातिदेशस्यार्थादेव सिद्धेरिदं सूत्रं पूर्वपाद एव प्रणीतं स्यात् पृथक्पादान्तरे विचारस्य किं प्रयोजनमत आहुः चिदंशेत्यादि । तथाच जडत्वाद्वियदादितुल्यत्वं संभाव्येतेति तन्निवृत्त्यर्थं पृथग्विचार इत्यर्थः । अत्र जीवसाम्यममन्वानः पृच्छति नन्वित्यादि । ननु सर्वोपपत्तिमध्ये तद्गुणसारत्वतद्व्यपदेशौ गुणानां यावदात्मभावित्वमन्ये च धर्माः प्रविष्टास्ते च प्राणविषयका न प्रसिद्धास्ते कथमुच्यन्ते इत्यर्थः । अत्र समादधते नेत्यादि । अयं पर्यनुयोगो न कार्यः । बृहदारण्यके, 'प्राणा वै सत्यं तेषामेष सत्यम्' इति श्रुत्युक्तं सत्यमस्ति । तैत्तिरीये तत्र प्राणेऽपि 'ये प्राणं ब्रह्मोपासते' इति व्यपदेशोऽस्ति । एवं षडाचार्यब्राह्मणे 'प्राणवाक्चक्षुःश्रोत्रमनोहृदयेषु प्राणो वै ब्रह्म वाग् वै ब्रह्म' इति व्यपदेशोऽस्ति । 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवन्ति

रश्मिः ।

'यत्रापि पश्चाच्छ्रुत उत्पत्तिवचनः शब्दः पूर्वैः संबध्यते तत्राप्येष एव न्यायः' इति । उदाहरणमपि 'यथा सर्वाणि भूतानि व्युच्चरन्तीत्ययमन्ते पठितो व्युच्चरन्तिशब्दः पूर्वैरपि प्राणादिभिः संबध्यते' इति । अस्माद्व्यंपदघटितान्न्यायाद्भूयसां जीवधर्माणां स्वधर्मत्वविधानाज्जीवसमानधर्मातिदेशकत्वेनोपपत्तिस्तथाशब्देन सूत्र उपदिष्टेत्यर्थः । यद्यपि धर्मवदुपपत्तिरतिदेष्टुं शक्या, तथापि धर्मेष्वतिदिष्टत्वं तथाशब्दे सौत्रेतिदेशकत्ववदुपदेशकत्वस्याप्यतिदेशकत्वाविरुद्धस्य वक्तुं शक्यत्वं मन्वानैरेवमुक्तम् । एतदेवाशङ्कामुखेनाहुः नन्विति । सर्वोपपत्तीति प्राणस्य जीवसर्वोपपत्तिसाम्ये । जीवधर्मेति । न तूपपत्त्यतिदेशः । भाष्य उपपत्तिरतिदिष्टा धर्मातिदेशफलिका । अर्थादिति आक्षेपात् । एवकारेण पृथग्विचारो व्यवच्छिद्यते तदर्थम् । पूर्वेति जीवनिरूपणात् । एवकारस्तु । 'अयमात्मा ब्रह्म' 'ये प्राणं ब्रह्मोपासते' इति श्रुत्योर्विरोधस्य परिहारेण पादार्थसंगतेः । तेन प्राथमिकतद्गुणसारत्वं समर्थितम् । वियदादीति आदिनाऽदृष्टम् । अन्य इति पुंस्त्वादिसूत्रोक्ताः । प्रविष्टा इति अष्टमे पूर्वतन्त्रे हविर्गणाधिकरणे देवतासामान्यरूपं सादृश्यमतिदेशकमत्र धर्मैः सादृश्यरूपा सर्वोपपत्तिरित्येवं प्रविष्टा इत्यर्थः । उच्यन्त इति उपासनार्थमुपदेश्यत्वेन तथेति शब्देनोच्यन्त इत्यर्थः । उपदिश्यन्त इति भाष्ये उपदेशविषयाः क्रियन्ते यद्यपि तथाप्यन्यधातुनापि विवरणदर्शनादुच्यन्त इति विवरणमुक्तम् । सत्यमत्रार्धाङ्गीकारे, नेत्याहुः । बृहदिति मूर्तामूर्तब्राह्मणे समाप्तौ । तेषामिति प्राणानाम् । सत्यमस्तीति सत्यमुपासनम् । सति साधुत्वात् । ननु प्राणानामेव सत्यमित्यत्रैतच्छब्देन समीपतरवर्त्युक्तः नोपासनमिति चेत्सत्यम् । तर्हि प्राणा वै सत्यमित्युक्तं सत्यमस्तु । प्राणानामुपासनं सत्यम् । 'आत्मानं रथिनं विद्धि' इत्युक्त्वा 'सदश्वा इव सारथेः' इत्युक्तेः । इन्द्रियेषु सत्त्वमुपासने साधुत्वं दैवीसंपत्त्वमिति यावत् । व्यपदेश इति तद्व्यपदेशः तद्व्यपदेश इति यावत् । षडाचार्येति प्राणादयः षडाचार्याः । ननु मिताक्षरायां बृहदारण्यकटीकायां षडाचार्यकूर्चब्राह्मणमिति कथनात्तद्विरोध इति चेन्न । कूर्चब्राह्मणमेतस्याग्रेऽस्ति तेन षडाचार्यकूर्चब्राह्मणमित्युक्तेः । सर्वान्तरगतानां गुणानां यावदात्मभावित्वं प्रपञ्चयन्ति स्म न प्राणेनेति ।



RUPNATHJI( DR. RUPAK NATH
www.astrology-tantra.com

भाष्यप्रकाशः ।

भवत्तस्मात् । अत्र तथेति पूर्वस्मादनुवर्तते । एवमग्रेऽपि । तेन बुद्धिस्थहेतुशुद्ध्यर्थानि त्वा-र्थेग्रिमाणि सूत्राणीति फलति । असंभवं व्युत्पादयन्ति एकैवेत्यादि । स एवा...त्यत्र द्वितीया । उत्क्रामतीति श्रुतिस्तु सर्वेषां सहभावं विधातुं पूर्वामेवोत्क्रान्तिमनुवदत्यतः पूर्वो-क्तैकैव श्रुतिर्जीवे मुख्या प्राणेषु गौणीति युगपद्वृत्तिद्वयविरोधान्न संभवतीति न तासामतिदेश-कत्वहानिरित्यर्थः । एतेनैव जीवे गौणी, प्राणेषु मुख्येति वदन्त एकदे...ऽपि प्रत्युक्ताः । वैरूप्यस्य तौल्यादिति बोध्यम् ॥ २ ॥

रश्मिः ।

असंभवादिति व्याख्यातम्, पूर्वपक्षसूत्रत्वात् । इह तु सिद्धान्तसू...समासेन व्याकुर्वन्ति स्म गौण्या इति । तेनेति तेनानुवर्तनेन करणेन बुद्धिस्थो हेतुरतिदे...सद्भावरूपस्तच्छुद्ध्यर्थानि तर्करूपाणीत्यर्थः । तथाहि । अतिदेशिकमाक्षिपतीत्युक्त्या त... प्रा... इति वाक्यमुत्क्रान्त्यादि-वाक्योक्तधर्माणां नातिदेशकम्, गौण्यसंभवात्, यन्नैवं तन्नैवं घटोस्तीति वाक्यवत् । इत्या-क्षेपग्रन्थीयानुमानम् । समाधानग्रन्थे तु अतिदेशकं, गौ...संभवात्, प्रकृतिवद्विकृतिः कर्तव्येति-वत् । न च पूर्वेणास्य विरुद्धत्वं साध्याभावसाध...मत्त्वादिति वाच्यम् । साध्यासामानाधि-करणत्वं विरुद्धत्वमिति लक्षणेनात्र तदभा...व्याप्यवत्ताज्ञानस्याप्रतिबन्धकत्वात् । यथा गौरश्वत्वादित्यत्र गोत्वाभावव्याप्यवत्ताज्ञानम...प्रतिबन्धकमनुमानासत्त्वे तथात्र सदनुमाने बोध्यम् । सदनुमानेऽगृहीताप्रामाण्यकस्यैव विरोधि...ज्ञानस्य प्रतिबन्धकत्वेनात्रैतत्सूत्रेण पूर्वानुमाने गृहीताप्रामाण्यकत्वात्तदभावव्याप्यवत्ताज्ञा...स्य न प्रतिबन्धकत्वमिति पूर्वानुमानमपि सदनुमानं दृष्टान्तभेदात् । तथा च गौण्यसंभवहेतु...ष्टान्तानुरोधेनोभयसाधकः । द्वितीयं विरुद्धलक्षणं साधारणासाधारणयोरतिव्याप्तं तथाप्युपा...धिभेदाद्भेद इति मञ्जर्याम् । तदनु प्राणः तथाऽति-दिष्टधर्मवान् । अतिदेशकसद्भावाद्विकृ...विवदित्यनुमानम् । अत्रातिदेशकं तथेति सौत्रम् । अति-देशकसद्भावो व्यासबुद्धिस्थो हेतुर्ज्ञेयः । तच्छुद्धिप्रकारस्तु मीमांसाष्टमाध्याये तृतीयपादेऽतिदेश-प्रयोजका धर्मा उद्दिष्टाः लि...ङ्गादेश्यादयः । तेषु जीवतुल्यता सूत्रेषु चतुर्षूपनिपद्यते इत्यति-देशकसद्भावरूपो हेतुः ...द्धः अन्यथा त्वशुद्धः । प्राणेषु जीवतुल्यताया अभावेनातिदेशकस-द्भावरूपहेतोः स्वरूपासिद्धत्वात् । स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः । ह्रदो द्रव्यं धूमादित्युदाहरणम् । तथा चातिदेश्यधर्माश्रयजीवतुल्यतासमानाधिकरणमतिदेशकसद्भावरूपं लिङ्गं भवेत्तदभावे तु प्राणेषु लिङ्गं न भवेदतश्चत्वारि सूत्राण्यतिदेश्यधर्माश्रयतुल्यतासमर्प-काणीति । तेष्विदं प्रथमं सूत्रं लिङ्गस्य समर्पकमतिदेशकसद्भावरूपस्य । उत्क्रान्त्यादिवाक्येषु गौण्यभाव एव तदुक्तधर्माणां गौणत्वाभावस्तस्मिन्सति न गौणधर्मातिदेशकतथेतिशब्दसद्भाव इति । द्वितीयेति । एकतिङ् वाक्यमिति वैयाकरणवाक्यलक्षणाच्छ्रुतिद्वयमित्याशयः । विधातुमिति कर्तुम् । वेधा इत्यत्र तथादर्शनात् । युगपदिति । न च 'एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ' इति कोशे पुष्पवच्छब्दो गङ्गायां मत्स्यघोषौ स्त इति प्रतीतौ गङ्गाशब्दो वैकत्र मुख्य एकत्र गौण इति न युगपद्वृत्तिद्वयविरोधो न दोष इति वाच्यम् । एकत्र कोशस्यान्यत्र प्रत्यक्षस्य प्रमाणत्वमिवात्रालाभात् । ...त्येति इति हेतोः प्राणादिषूत्क्रान्त्यादिकस्य गौणत्वाभावात् । अतिदेशकत्वेति ।

१. तथेति वाक्यम् ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## तत्प्राक्श्रुतेश्च ॥ ३ ॥

जडत्वेनाधिकविचारोऽत्र क्रियते । सृष्टेः पूर्वमपि प्राणादीनां स्थितिः श्रूयते 'असद् वा इदमग्र आसीत् तदाहुः, किं तदसदासीदित्यृषयो वाव ते ऽग्रे असदासीत् तदाहुः, के ते ऋषयः, प्राणा वा ऋषयः' इति । ननु 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति विरोध इति चेत् । न । स्वरूपोत्पत्तिरेवात्र

---

### भाष्यप्रकाशः ।

तत्प्राक्श्रुतेश्च ॥ ३ ॥ अत्रापि तथेत्यनुवर्तते । सूत्रप्रयोजनमाहुः जडत्वेनेत्यादि । जडानां भूतानां चिरस्थायित्वदर्शनात्तावतैव प्राणानामप्युत्क्रान्त्यादिमत्त्वं संभाव्यत इति तदभावाय प्राणानां नित्यत्वविचारः क्रियत इत्यर्थः । तमेवाहुः सृष्टेरित्यादि । श्रुतिस्तु वाजिनामग्निप्रकरणस्था । अत्र प्राणा इति बहुवचनमिन्द्रियाणां गमकम् । छान्दोग्यविरोधमाशङ्क्य परिहरन्ति नन्वित्यादि । नेत्यादि च । तथा च न तस्याः श्रुतेर्विरोधो, नाप्यनित्यत्वमित्यर्थः ।

### रश्मिः ।

सौत्रतथेतिशब्दार्थसादृश्यप्रयोज्योत्क्रान्त्यादिश्रुतिप्रतिपाद्यधर्मानतिदिशन्तीति ण्वुल् कर्तरि । यद्यपि तथेतिनिष्ठमतिदेशकत्वं तथापि श्रुतिनिष्ठव्यापारविवक्षया काष्ठानि पचन्तीतिवत् । एतेनेति युगपद्वृत्तिद्वयविरोधेन । एकदेशिन इति गौण्यसंभवसूत्रानुरोधेनेदं व्याचक्षाणा इत्यर्थः । यथाहुः शंकराचार्यभाष्ये वियदधिकरणस्थगौण्यसंभवसूत्रानुरोधेन त्विहापि गौणी जन्मश्रुतिरसंभवादिति व्याचक्षाणैः 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्साधनायेदमाम्नायते 'एतस्माज्जायते प्राणः' इत्यादि । सा च प्रतिज्ञा प्राणादेः समस्तस्य जगतो ब्रह्मविकारत्वे सति प्रकृतिव्यतिरेकेण विकाराभावात्सिद्ध्यति । गौण्यां तु प्राणानामुत्पत्तिश्रुतौ प्रतिज्ञेयं हीयेतेति । वैरूप्यमेतेति युगपद्वृत्तिद्वयविरोधरूपं वैरूप्यं तस्येत्यर्थः ॥ २ ॥

तत्प्राक्श्रुतेश्च ॥ ३ ॥ अतिदेशकसद्भावस्य स्वरूपोपयोगि गौण्यसंभवसूत्रमुक्तमिदं तु कथमुपयोग[१]धकमित्याकाङ्क्षायां सादृश्यवाचकमनुवर्तत इत्याहुः तथेत्यन्विति अत्रातिदेशप्रयोजका धर्मा अतिदिष्टास्तथेत्यतिदेशकेन तत्र सादृश्यं भूयोधर्मघटितमिति नित्यत्वं भूयोधर्मान्तर्गतमुद्दिष्टं वक्ष्यमाणभाष्यात् तत्प्राणेषु नास्ति । नाप्यनुक्तसिद्धं जडत्वात् । अतः सादृश्योपयोग्यधिकविचार इत्यतिदेशकसद्भावहेतुशोधकमिदमपि सूत्रम् । तथा च । ननु प्राणः नातिदेशकसद्भाववान् अनित्यत्वात् घटवदित्यनुमानेन हेतोरतिदेशकसद्भावरूपस्य स्वरूपासिद्धत्वमिति चेन्न । प्राणो नित्यः तत्प्राक्श्रुतेः । यन्नैवं तन्नैवं घटादिवदित्यनुमानेनानित्यत्वस्य त्वदुक्तस्यैव हेतोः स्वरूपासिद्धत्वात् । अतश्च प्राणः तथाऽतिदिष्टधर्मवान्, अतिदेशकसद्भावादिति बुद्धिस्थो हेतुः शुद्धः । इत्येवं तथेत्यनुवर्त्य योजनीयमित्यर्थः । संभाव्यत इति । न तु नाश इति भावः । एतावतैव जीवतुल्यत्वं भवतु न तु नित्यत्वेनापीति न तेषां प्राणानां नित्यत्वमिति । चिरकालस्थायित्वमात्रेण जीवतुल्यताभावाय प्राणानां नित्यत्वेत्यादिः । अग्नीति । असदित्यस्यार्थः पूर्वमुक्तः 'असदिति चेन्न प्रतिषेधमात्रत्वात्' इत्यत्र प्रथमपादे । असन्मृत्युरिति वा । नन्वित्यादीति । अविरोधोध्यायार्थस्तस्य संगमनम् । पादार्थस्तु जीवशरीरमध्यवर्तिनां प्राणादीनां विचारः । आषष्ठाग्रन्थत्वेप्युत्तराविरोधात् । नेत्यादीति । एवेति । 'प्राणा वै सत्यम्' इति श्रुतेरेवकारः ।

---

१. ( प्रश्नं कृत्वा । )



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

निषिध्यते जीववत् । न तूत्क्रमः । उत्क्रमात् पूर्वं तु सदेवेति श्रुतिः । चकारान्मोक्षे

### भाष्यप्रकाशः ।

चकारप्रयोजनमाहुः चकारादित्यादि । यथा सृष्टेः प्राक् स्थित्या नित्यत्वं लभ्यते तथा मोक्षे तदीयप्राणादेर्ब्रह्मसंपत्तिः श्रूयते शारीरब्राह्मणे 'न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति' इति । 'अत्रैव समवनीयन्ते' इति । उत्क्रमहेतूनामविद्याकाम्यकर्मणां निवृत्तत्वाद् ब्रह्मण्येव संपद्यन्ते इत्यर्थः । नचेयं जीवन्मुक्तव्यवस्थेति शङ्क्यम् । तथात्वेऽनशङ्काया एवाभावेन तदभावानुवादवैयर्थ्यप्रसङ्गात् । अग्रे अहिनिर्ल्वयनीदृष्टान्तदानेन स्थूलदेहत्यागस्यैव तत्र लाभाच्च । अतोऽनित्यत्वार्थं साऽपि संगृह्यत इत्यर्थः । श्रुत्यन्तरपीडामाशङ्क्य परिहरन्ति

### रश्मिः ।

श्रुतिरिति । तेन प्राणानां सत्त्वमसत्त्वं चेति विरुद्धधर्माश्रयत्वं पुरुषविधे इति । तदीयेति । संसारप्रकरणस्य विच्छिन्नत्वादसंसारीयस्य प्राणादेरित्यर्थः । एतेन तस्येति भाष्यं विवृतम् । प्राणा इति श्रौतबहुवचनेन प्राणादेरित्यादिशब्दघटितेन तदीयप्राणादिपदेनेति बोध्यम् । न तस्मादिति 'अथाकाममयमानः' इत्यादिश्रुतेरव्यवहितात् । निवृत्तेति 'योऽकामो निष्काम आप्तकाम आत्मकामो भवति न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते' इति श्रुतेर्निवृत्तत्वात् । भाष्यीयमोक्षपदस्वारस्यमाहुः न चेयमिति । जीवदिति । यथाहुष्टीकायाम् । अथाकाममयमान इति श्रुत्याऽयच्छब्दः संसारप्रकरणविच्छेदार्थ इति । एवाभावेनेति दूरत्वादिकारणस्यानापन्नाविद्याकामकर्मणां निवृत्तत्वेनेवाभावेन । तस्योत्क्रामन्तिपदप्रतिपाद्यस्योत्क्रमकर्तुरभावस्यानुवादस्य वैयर्थ्यप्रसङ्गादित्यर्थः । ननूत्क्रमाभावस्य तच्छब्देन परामर्श उचितः । त्वदादीनामुत्सर्गतः प्रधानपरामर्शकत्वादिति चेन्न । धात्वर्थस्य प्रत्ययार्थोपसर्जनत्वेनोपस्थितस्य नञर्थेनान्वयायोगात् । नह्यन्योपसर्जनमन्येनान्वेति । मा राजपुरुषमानयेत्यादौ राज्ञ आनयनान्वयित्वं ततश्च नञर्थस्य न धात्वर्थेनान्वयः । अत एवैकहायन्या । नापि तस्मादित्यनेनान्वेति । अव्यवहितत्वेपि कारकोपसर्जनतयोपस्थितत्वेन तत्पदस्य नञर्थेनान्वयायोगात् । एकहायन्या इवारुण्येन । अत एव प्राणैर्नान्वेति । कारकोपसर्जनत्वात् । अतश्चान्यैरन्वयायोगान्नञर्थः प्रत्ययार्थेन संबध्यते । न तस्मात्प्राणा उत्क्रामन्तीत्यत्र वाक्ये कर्तुः प्राधान्यात् । क्रयभावनयेवारुण्यादीनि । नञश्चैष स्वभावो यत् स्वसंबन्धिप्रतिपक्षबोधकत्वम् । नास्तीत्यत्र अस्तीति सत्त्वशब्देन संबन्धीत्यन्वितो नञ् सत्त्वप्रतिपक्षमसत्त्वं गमयतीत्यन्यत्र मीमांसायां निषेधनिरूपणे विस्तरः । तथाचाकृतौ विशिष्टे वा शक्तेरुत्कमकर्तृत्वावच्छिन्नप्रतियोगिकाभावोत्र । श्रुतिमनुकूलयन्त्यत्रैव इत्यादिना । अहीति । अहिर्निर्ल्वयते यस्यां साऽहिनिर्लयिनी । सर्वधातुभ्य इनितीन्, गुणः, व वर्णागमः, कृदिकारेभ्यो ङीप् । अहिनिर्ल्वयनीत्यपि पाठः । नन्द्यादित्युश्छान्दसः । अस्थूलेति एवकारेण स्थूलशरीरत्यागव्यवच्छेदः सिद्धान्ते तस्य चावस्थानात् । यद्यपि स्थूलास्थूलत्यागं टीकाकृतो मन्यन्ते तथापि दृष्टान्तानुरोधेनैवमिति भावः । पुष्टिमार्गव्यतिरिक्तस्थले स्थूलवतः सूक्ष्ममहान्यदर्शनादियं दृष्टान्तीकृता । लाभाच्चेति । तथा च मोक्षप्रकरणमिदं न तु जीवन्मुक्तिप्रकरणम् । तदुपपादितं तुरीयद्वितीयपादे वाक्यमोषिकरणे । अतोऽनित्येति अनित्यत्वार्थमिति पदच्छेदः । सेति न



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

तस्यापि संपत्तिः श्रूयते स्थलान्तरे । 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति श्रुतिर्विस्फुलिङ्गसदृशी ॥ ३ ॥

## तत्पूर्वकत्वाद् वाचः ॥ ४ ॥

'मनः पूर्वरूपं वागुत्तररूपम्' इति । 'तस्य यजुरेव शिरः' इति । तथा च

### भाष्यप्रकाशः ।

एतस्मादित्यादि । तथा च विस्फुलिङ्गवाक्ये यथा व्युच्चरणं तथाऽत्र प्रादुर्भाव इति तत्सादृश्यम् । स्वरूपोत्पत्तेरपि विभागानन्तरभावित्वात् स्रोधुत्पत्तेरपि न विरोधस्तत्र न तथा अपि पीडेत्यर्थः । विसर्गस्यापि विभागरूपत्वादयमेव न्यायः स प्राणमनआदेरप्यत्रापि द्रष्टव्यः । एतेन श्रुत्यविरोधप्रतिपादनरूपत्वादध्यायसंगतिरपि ज्ञापिता ज्ञेया ॥ ३ ॥

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥ ननु सुप्त्यादौ प्राणस्थितिश्रुतेरवान्तरप्रलये प्राणवस्थितप्रजापति-प्राणसत्ताप्रतिपादनेनाऽप्युपपद्यमानत्वान्न तया प्राणनित्यत्वसिद्धिरिति शङ्कायामिदं सूत्रमाहेत्या-शयेन व्याकुर्वन्ति मन इत्यादि । पूर्वया श्रुत्या मनोवाचोः पूर्वोत्तरभावेऽन्यया च मनोमयस्य

### रश्मिः ।

तस्मात्प्राणा इत्यादिः श्रुतिः । प्रादुरिति जनी प्रादुर्भाव इति धातुपाठादिति भावः । तत्सादृश्यं जीवसादृश्यम् । विभागानन्तरभावित्वेन सादृश्यमाह स्वरूपेति अनित्ये जननरूपा । जीवे नित्ये परिच्छिन्ने समागमरूपाऽपिना गृह्यते । स्रोधुत्पत्तेरिति आविना तादृशोऽन्यः । न पीति स्वरूपोत्पत्तित्वं स्त्रीपुंसयोरन्यवत् सद्योऽविभागेपीति न विरोधः । एकदेशविकृतस्यानन्यत्वात् । विसर्गस्येति । 'विसर्गः पौरुषः स्मृतः' अत्र शब्देन सर्गोऽपि । सर्गः कारणतत्त्वजन्मदो विभागः । तद्वत्पौरुषविभागो विसर्गः । अयमिति विभागन्यायो व्युच्चरणरूपः । मध्वादौ संयोगन्यायः । मृत्पिण्डविभागस्यान्यप्रसिद्धत्वम् । 'इमामगृभ्णन्रशनामृतस्य' इत्यलौकिकं नान्यथा सिद्धं गर्दभरशनाग्रहणम् । स प्राणमिति । तथा च विस्फुलिङ्गवाक्ये यथा व्युच्चरणं तथात्र विसर्ग इति तत्सादृश्यमिति भावः । द्रष्टव्य इति । मनोग्रे वाच्यम् । श्रुत्यवीति । असद्वा इदमित्यादीनां सदेव सोम्येत्यादिश्रुतीनां चाविरोधेत्यादिः । 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुत्यविरोधेत्यादिर्वा । अध्यायेति प्रथमाध्यायेनाविरोधाध्यायस्य हेतुतासंगतिः प्रसङ्गो वेत्यर्थः । सदसत्त्वरूपविरुद्धधर्माश्रयत्वं प्राणेषु न तु सति प्राणे जगज्जन्मादिकर्तृत्वस्यातिव्याप्ति-रिति जन्माद्यधिकरणविरोध इति । तेन न तृतीयपादार्थस्यात्रातिव्याप्तिः ॥ ३ ॥

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥ पूर्वसूत्रसंगत्या आभासमाहुः प्राणेति । तथा च तथा-शब्दार्थसादृश्यं प्राणेऽप्यमित्यतिदेशकसङ्गावरूपो हेतुरंशतः स्वरूपासिद्ध इति भावः । वाड्मनो-रूपप्राणयोर्नित्यत्वेन स्वरूपासिद्ध्यभावः फलिष्यति । अतो हेतुः शुद्धः । प्राणेष्विन्द्रियेषु मनो मुख्यो वागपि मता वैयाकरणानामपीति मुख्यत्वात्ताभ्यां रूपाभ्यां प्रथमं निरूपणं कृतम् । आहेति तथा च श्रुत्यर्थमान्तर्गतनित्यत्वं प्राणेषु पूर्वसूत्रोक्तमाक्षिप्तं तेन च मनोवाचोर्नित्यत्वमाक्षिप्त-प्रायमतो मनस्त्वनिन्द्रियत्वपक्षेपि तेन च सादृश्यविरहात्सादृश्यार्थं पूर्वसूत्रशेषोयमधिकविचार इति भावः । पूर्वयेति उक्तश्रुतिपूर्वया श्रुत्या । अन्ययेति वार्यक्रमवत्त्वे । शब्दसृष्टिः ॐ वेदः । इत्यर्थक्रमापेक्षा । एकरसत्वेन पूर्वोत्तरभावान्यथाभावाभावात् । ततश्च मनोमयस्वरूपमनः-

१. रत्नीत्यादीति प्रतीकमस्ति ।



RUPAK NATH (DR. RUPAK NATH)
www.astrology-tantra.com

वेदानां स्वत उत्पत्त्यभावात् तत्पूर्वरूपमनसः कथमुत्पत्तिः ॥ ४ ॥

सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥

'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति । इति पूर्वोक्तानां चक्षुरादीनाम्, 'अथारूपज्ञो भवतीत्येकीभवति न

---

भाष्यप्रकाशः ।

वेदात्मकत्वे बोधिते मनोवाचोर्वृत्तिभेदादेव भेदो, न तु स्वरूपत इति सिद्धौ, निश्वसितश्रुत्या, वाचा विरूप नित्ययेति श्रुत्या च वेदानां निश्वासरूपतया नित्यतया च स्वरूपत उत्पत्त्यभावादुद्गममात्रमेव । तथा सति तत्पूर्वरूपस्य मनसः कथमुत्पत्तिः संभवति । तस्माच्च तयोरप्युत्पत्तिः किंतूद्गममात्रमेवातस्तयोर्नित्यत्वसिद्धिरित्यर्थः । नन्वेवं भगवन्मनोवाचोर्नित्यत्वे जैवानां कथं नित्यत्वसिद्धिरिति चेदुच्यते । तद्व्यष्टित्वात् सिद्धिरिति । अत एवाग्रे 'श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निश्वसितानि' इत्युक्तम् । इदमेव चैकादशस्कन्धे 'स एष जीवो विवरप्रसूतिः' इत्यादिश्लोकत्रये स्फुटम् । तत एवाचार्यैरपि निबन्धे ।

'अस्मदादिमुखेनापि क्रीडार्थं सर्वतो हरिः ।
शब्दभेदं वितनुते रूपेष्विव विनिश्चयः' ॥ इत्युक्तम् ॥ ४ ॥

सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥ एवं प्राणमनोवाक्ष्वतिदेशिकाया उपपत्तेः सिद्धावपि चक्षुरादिषु न सा स्फुटेत्यतस्तदर्थं हेत्वन्तरं वदतामाशयेन व्याकुर्वन्ति तमित्यादि । एताभ्यां

रश्मिः ।

प्रभुरत्वाभावाद्वाच ओङ्काररूपाया मनोमयत्वाभावे न श्रुतिविरोधः । अन्ययेति पाठे बोधित इत्यनेनान्वयः । श्रुत्या बोधित इति पूर्वपाठेऽन्वयः । वृत्तीति । एवकारस्तु पूर्वोत्तरभावबोधकभाष्यश्रुत्या 'एकादशामी मनसो हि वृत्तयः' । 'वाचोभिधायिनी नाम्नाम्' इति वाग्व्यापारोभिधा । एवेति श्रुतिमतत्वात् । संभवतीति । एतच्च प्रथमस्य तृतीये तदुपर्यपीत्यधिकरणे शब्द इति चेन्नातः प्रभवादित्सूत्रेषु ह्युपपादितम् । तथा च स्वरूपलक्षणे सत्यं मनः 'तस्मात्केनाप्युपायेन' इति वाक्यात् । 'तन्मनोऽकुरुत' इति बृहदारण्यकाच्च । ज्ञानं ब्रह्म 'ज्ञानमात्रं परं ब्रह्म' इति वाक्यात् । गीतोक्तं ज्ञानं स्वयंप्रकाशं गोकुलाष्टके स्पष्टम् । तदुक्तमात्मबोधोपनिषदि । 'अनन्तं वाक्' । 'अनन्ता वै वेदा' इति श्रुतेः । एवेति । स्वरूपलक्षणे प्रयोक्तेः । एवकारेण जननरूपोत्पत्तिर्व्यवच्छिद्यते । तयोर्मनोवाचोः । वैदिक्यां शब्दसृष्टौ नित्यत्वमुपपाद्य तद्भिन्नायां रूपसृष्टावपि प्रसङ्गात्कर्ता शास्त्रयोनित्वादित्यधिकरणोक्तरीत्या जैवानां पृच्छति नन्वेवमित्यादिना । यतो व्यष्टित्वेनाविद्वद्दशायामपि न भेदोतोऽग्रे मैत्रेयीति ब्राह्मणे उभयपरत्वेन श्लोका इत्यादिः । स्फुटमिति । बोधयतीति जीवः परमेश्वर इति श्रैधरं व्याख्यानम् । रूपेष्विति रूपेषु भेदमिव ॥ ४ ॥

सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥ एवं प्राणेति । प्राणत्वं सामान्यं मनस्त्वं वाक्त्वं च विशेषजातिः । अतिदेशिकाया इति अतिदेशकत्वं तथाशब्दस्य सौत्रस्योक्तम् । व्यापारसाम्येऽविधत्वेनोत्क्रान्त्यादिवाक्यवदुत्पत्तेरप्यतिदेशकत्वम् । 'तथा प्राणः' इति सूत्रभाष्यीयसर्वोपपत्तिपदव्याख्याने व्याकृतैषोपपत्तिः । स्फुटेति गतसूत्रे प्राणनित्यत्वमाक्षिप्य प्राणमनोवाक्षु प्रसाधितम्, अन्येषु विशेषरूपेण चक्षुरादिप्राणेषु न प्रसाधितेत्यस्फुटा । हेत्वन्तरमिति । प्राणः



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

पश्यतीत्याहुः' इत्यादिभिर्जीवगतिः सप्तानां गतिभिर्विशेष्यते। सप्तगतयस्तेन विशेषिता एकीभवतीति । अतो जीवसमानयोगक्षेमत्वाज्जीवतुल्यतेति ।

---

### भाष्यप्रकाशः ।

वाक्याभ्याम् । अथारूपज्ञ इत्यादिषु पूर्ववाक्येषूक्तानां चक्षुरादीनां सप्तानां मुख्यप्राणमनुसृत्य गतिरुच्यते । सा सप्तगतिः । यद्यपि पूर्ववाक्येष्वष्टावुक्तास्तथापि मनोबुद्ध्योर्वृत्तिभेदोऽन्तःकरणत्वेन ऐक्यमतः सप्तत्वमिति सप्तगतिः । किं च 'तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वा' इत्यादिना उत्तरवाक्येन वक्ष्यमाणा या जीवगतिः सा, अथारूपज्ञ इत्यादिषु पूर्ववाक्येषु सप्तानां गतिभिर्विशेष्यते एकीभवतीति सप्तगतयो वा तेन जीवगमनेन विशेषिता एकीभवतीति विशेषितत्वम् । अतः अनश्वरभावस्याजन्यत्वेन तथेत्यर्थः । चकारसूचितं हेत्वन्तर-

### रश्मिः ।

अतिदिष्टधर्मवान्, अतिदेशकसद्भावात्, प्रकृतिवद्विकृतिः कर्तव्येतिवत् । इत्यत्र हेतावतिदिष्टधर्मेषु चक्षुरादिचेतनतुल्यत्वमस्फुटमित्यप्रसिद्धातिदेशकसौत्रतथापदेऽशः स्वरूपासिद्धिरतो हेत्वन्तरं सूत्ररूपं वदतीत्यर्थः । वाक्याभ्यामिति 'एकतिङ् वाक्यम्' इति वाक्यलक्षणम् । श्रुतयः शारीरकब्राह्मणस्थाः । इत्यादिष्विति । 'अथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयतीत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुः' इत्येतासु । मनोबुद्ध्योरिति । न विजानातीत्याहुरित्यरूपां अथाज्ञानज्ञो भवतीति पूर्वानुसारेण संभवाद्बुद्धिलाभः । वृत्तीति । एकस्या मननात्मिका द्वितीयस्याः विज्ञानात्मिका । न मनुते न विजानातीति श्रुतिभ्याम् । उत्तरेति एकार्थीभावाद्रेफमाश्रित्य णत्वम् । वक्ष्यमाणेत्यत्र टिड्ढाणञित्यनेन ङीबभावः स्त्रीप्रत्यये सिद्धान्तकौमुद्यां साधितः । गतिभिरिति निरुक्ताभिः । विशेष्यत इति सप्तगतिवाक्यानां तस्य हैतस्येति महावाक्यस्य च या हेतुतासंगतिस्तत्रोपसंहरणं जैवमुक्त्योच्यते तस्य हैतस्येत्युत्क्रमणव्यापार इति हेतुता तया विशेष्यविशेषणभावः । तथाहि । तस्य लिङ्गोपाधिकस्य ह एतस्य प्रकृतस्योपसंहृतकरणस्य मुमूर्षोर्हृदयस्याग्रं हृदयाग्रं नाडीमुखं प्रद्योतते स्वप्न इव चैतन्यज्योतिषा, प्राप्यदेहविषयबुद्धिवृत्त्यात्मना प्रकाशते तेन प्रद्योतेन प्रद्योतित एष लिङ्गोपाधिक आत्मा निष्क्रामति निर्गच्छतीत्यर्थो जैवमुक्तसहकारमपेक्षते यत इति । कथं विशेष्यत इत्यत आहुः एकीभवतीति । चाक्षुषैक्यवानरूपज्ञः शारीर आत्मेत्येवं विशेष्यत इति भावः । 'स यत्रैष चाक्षुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवत्येकीभवति' इति श्रुतेः । सप्तेति भाष्यं विवृण्वन्ति स्म सप्तेति । वेत्यवधारणे । अत्र पूर्व जीवगतिः सप्तानां गतिभिर्विशेष्यते विशेष्यं क्रियत इति भाष्ये उक्तम् । एवं च विशेष्यपरामर्शकस्तच्छब्दस्तथा च भाष्ये तेनेत्यस्य विशेष्येणेत्यर्थः । तदाहुर्जीवगमनेनेति विशेष्यानुकूलं पदम् । तेनेति सामान्ये नपुंसकं वा । जीवगत्येत्यर्थः । विशेषिता इति विशेषणं विशेषः तदितास्तारकादिभ्य इतच् । तारकादिराकृतिगणः । विशेष्यन्ते विशेषणीक्रियन्त इति विशेषिताः कर्मणि क्तः । यद्यपि विशेष्यत इति विशेषः क्रियत इत्येवार्थस्तथापि विशेषो विशेष्यरूपो विशेषणरूपो वेत्यविशेषः । एकीभवतीति प्राणाद्यैक्यवान् शारीर आत्मेत्येकीभावः । न जिघ्रतीत्याहुरेकीभवतीत्याद्युक्तश्रुतिभ्यः । एतदेवाहुः विशेषितत्वमिति प्राणाद्यैकेन शारीरात्मनो विशेषितत्वं । शारीर आत्मा विशेष्यत इति कर्मणि क्तः । अत इति भाष्यं विवृण्वन्ति स्म अत इति ।

चकारात् तत्तदुपाख्यानेषु चक्षुःप्रभृतीनां देवतात्वं संवादश्च। अतश्चेतनतुल्यत्वम् ॥ ५ ॥

इति द्वितीयाध्याये चतुर्थपादे प्रथमं तथा प्राण इत्यधिकरणम् ॥ १ ॥

---

भाष्यप्रकाशः।

माहुः चकारादित्यादि। तत्तदुपाख्यानेष्विति व्रतमीमांसाप्रभृतिषु। चेतनतुल्यत्वमिति। स्वरूपतोऽचेतनत्वात्। 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति धर्मरूपज्ञानस्य श्रावणाच्च चेतनतुल्यत्वम्। एवमत्र प्राणपदवाच्यानां जीवतुल्यत्वं समापितम्। एतस्य सूत्रस्यो-

रश्मिः।

अत अनेत्यादिः स्मार्तः प्रयोगः। तथेत्यस्य पञ्चम्या लुका जीवसमानयोगक्षेमत्वादित्यर्थः। तत्रापि ह्र अत इति सार्वविभक्तिकस्तसिरिति तृतीयान्तेन विवरणमनश्वरेत्यादि। जीवसमानयोगक्षेमत्वं चक्षुरादीनामजन्यत्वेनानश्वरभावत्वेन व्यासेर्वागादौ सिद्धम्। चक्षुरादिष्वप्युक्ताजन्यत्वेनानश्वरभावत्वसिद्धिः। चक्षुरादिः अनश्वरभावः, अजन्यत्वात्, वागादिवदिति। यद्वा सिद्धमूचुः अत अनश्वरेत्यादिना। इदं वाक्यमतपसा भाष्यीयशब्दविवरणं वा (प्रातिशाख्यप्रसाध्यमपि) अनश्वरभावस्य चक्षुरादिरूपस्याथारूपज्ञो भवतीत्यादिश्रुत्युक्तस्याजन्यत्वेन तथानित्यकत्वमित्यर्थः। अत्र ननु चक्षुरादिर्नातिदेशसद्भाववाननित्यत्वाद्घटादिवदित्यनुमानेन हेतोरतिदेशसद्भावरूपस्य स्वरूपासिद्धत्वमिति चेन्न चक्षुरादिर्नित्यः सप्तगतेर्विशेषितत्वात्। यन्नैवं तन्नैवं घटादिवदित्यनुमानेनानित्यत्वस्यैव हेतोः स्वरूपासिद्धत्वात्। ततश्च चक्षुरादिस्तथातिदिष्टधर्मवानतिदेशसद्भावात्प्राणादिवदिति शुद्धिस्थो हेतुः शुद्ध इत्येवमत्रापि तथेत्यनुमाय सूत्रार्थो योजनीयः। तेन जीवसमानधर्मत्वं प्राणेषु प्रसाधनाय गौण्यसंभवसूत्रे उत्क्रान्त्यादिवाक्येष्वतिदेशकत्वं प्रसाध्य सादृश्यमतिदेशकत्वे नियामकमित्यतिदेशनियामकसिद्ध्यर्थं त्रिषु सूत्रेषु प्राणादीनां नित्यत्वमसाधुवन्सादृश्यार्थम्। यद्यपि 'तथा प्राणः' इत्यत्र प्रकारवत्तीतिपदान्तेदृष्टानियमेन परमतं निराकृतम्। यद्यपि तत्सन्निहितमित्यादिना सन्निहितत्वस्यातिदेशनियामकत्वं प्रोक्तम्। तथाप्युपलक्षणविधया पूर्वमीमांसोक्तमप्युक्तं सादृश्यादि ह्यतिदेशनियामकम्। यद्वा सन्निहितत्वमतिदेशकं परत्र सादृश्याद्यसमानाधिकरणमतः पूर्वमीमांसानुपात्तमहम्। चकारेति पुनरर्थकश्चकारः समुच्चये वा। अतोऽतिदेशकसद्भावरूपो हेतुः शुद्धः। अत उक्तं चकारसूचितमिति हेत्वन्तरं जीवतुल्यतायाम्। व्रतेति बृहदारण्यके सप्तान्नब्राह्मणेऽस्ति व्रतमीमांसा। 'अथातो व्रतमीमांसा प्रजापतिर्हि कर्माणि ससृजे तानि सृष्टान्यन्योन्येनास्पर्धन्त वदिष्याम्यहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमित्येवमन्यानि कर्माणि यथा·कर्म' इति श्रुतेः। प्रभृतिशब्देन तृतीयस्कन्धेन्द्रियप्रसङ्गः संगृह्यते। तथाचायं सूत्रार्थः। जीवगतिः सप्तानां गतिः सप्तगतिस्तस्याः, एकत्वमविवक्षितम्। इतो पञ्चमी न तु ल्यब्लोपादाविति। सप्तानां गतिभिर्विशेष्यत इति विशेषिता तस्या भावः विशेषितत्वम्। टापो ह्रस्वः पञ्चमीति। नन्वेतस्य सूत्रस्योत्तराधिकरणे संबन्धेऽतिदेशकसद्भावरूपस्य हेतोः स्वरूपासिद्धत्वमक्षुण्णम्। सूत्रस्य नित्यत्वासाधकत्वेनानित्यत्वेन चक्षुराद्यसादृश्यादेतः सौत्रतथाशब्दार्थसादृश्याभावे हेतुघटकातिदेशकसूत्रार्थाज्ञाभावात्। ततश्चक्षुरादौ सादृश्याभावाहितातिदिष्टधर्मवत्त्वाभावेन 'तादृशधर्मवत्त्वं प्राणेतिदिशति' इत्यादि सूत्रभाष्योक्तप्रतिज्ञाया न्यूनता। एतदनुरोधेन पूर्वाधिकरणमात्रशेषत्वे तु गौण्यसंभवसूत्रीये तेन शुद्धिस्थहेतुशुद्धत्वयानी-

RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

केचिदिदं सूत्रमुत्तरसूत्रपूर्वपक्षत्वेन योजयन्ति । तत्रायमर्थः । ते प्राणाः कतीत्याकाङ्क्षायां, 'सप्त प्राणाः प्रभवन्ति तस्मात् सप्ताऽर्चिषः समिधः सप्त जिह्वाः' । 'अष्टौ ग्रहा अष्टावतिग्रहाः' इति । 'सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ' इति । 'नव वै पुरुषे प्राणा नाभिर्दशमी' । 'दश वै पशोः प्राणा आत्मैकादशः' इत्येवमादिषु

---

भाष्यप्रकाशः ।

चराधिकरणे संबन्धे तु, एते हेतवो व्याख्यातरीत्या उत्सूत्रमेव बोध्याः । तेन न कापि न्यूनता ।

अत्र सर्वेऽपि वियदाद्यतिदेशमङ्गीकृत्य इन्द्रियाणामुत्पत्तिं वदन्ति । सन्निहितजीवातिदेशानङ्गीकारे तु केचन जीवस्यानुत्पत्तिराख्याता, प्राणानां तूत्पत्तिराचिख्यासितेत्यसंबद्धत्वं हेतुं वदन्ति ।

अपरे तु, उत्पत्त्यनुत्पत्तिबोधकयोः श्रुत्योः सद्भावेऽप्युत्पत्तिबोधकश्रुतीनां भूयस्त्वात् पूर्वतन्त्रे च 'विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् सधर्मत्वम्' इति निर्णयं हेतुमाहुः ।

अन्ये तु, असद्वेति वाजिश्रुतिमपि ब्रह्मपरत्वेन व्याकुर्वन्तः, प्राणा वा ऋषय इति बहुत्वश्रुतिं च गौणीं वदन्तः, 'सदेव सोम्य' इति श्रुतेर्ब्रह्मातिरिक्तस्य प्रागवस्थानासंभवमेव हेतुमाहुः । इतरे तु, 'एतस्माज्जायते प्राण' इति श्रुतिमेव हेतुमाहुः ।

रश्मिः ।

त्यादिभाष्यविभागे न्यूनतेत्याकाङ्क्षायामाहुः एतस्येति । संबन्ध इति पूर्वपक्षत्वेन हेतुतासंबन्ध इत्यर्थः । सिद्धान्तपूर्वपक्षयोर्हेतुतासंबन्धात् । हेतव इति गौण्यसंभवादयः सूत्ररूपाः । उत्सूत्रमिति सूत्राणि विहायोपरिष्टात्कर्तव्याः । उदू आधिकाः समीपे सूत्राणां बोध्याः । 'अव्ययं विभक्ति समीप' इति सूत्रेणाव्ययीभावः । कृष्णस्य समीपमुपकृष्णमितिवत् । तत्समृद्धौ वा, मद्राणां समृद्धिः सुमद्रमितिवत् । एवेति भाष्यावेधकारः । न्यूनतेति भाष्यभाष्यविभागयोर्न्यूनता । वियदादीति । यथाहुः शंकरभाष्ये । यथातीतानन्तरपादादावुक्ता वियदादयः परस्य ब्रह्मणो विकाराः समधिगतास्तथा प्राणा अपि परस्य ब्रह्मणो विकारा इति योजयितव्यमिति सूत्रार्थ इति । केचनेति शंकराचार्याः । आचख्यौ आसमन्तात्कथयितुमिष्टा । अपर इति भास्कराचार्याः । उत्पत्तीति यथाहुः या पुनरभिप्रकाशश्रुतिः सा मुख्यार्था न । कथमवान्तरप्रलये भूमिसाधनानां शर्करादीनां सृष्टिर्वक्तव्येति तदर्थोऽयमुपक्रमः । तत्राधिकारी पुरुषः प्रजापतिरविनष्ट एव । त्रैलोक्यमात्रं प्रलीनमतस्तदीयान्प्राणानालोच्य श्रुतिः प्रवृत्तेत्यनुत्पत्तिबोधकश्रुत्यविरोधः । अनुत्पत्तिबोधिका श्रुतिस्तु तत्प्राक्श्रुतिसूत्र उक्ता । उत्पत्तिबोधिकाः श्रुतयस्त्वेवमुदाजह्रुः । 'पुरुष एवेदं विश्वं कर्मतपो ब्रह्म परामृतम्' इति 'ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' इति । 'आत्मनो दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' इति । 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति' इति यदा मुख्यार्थसंभवेऽपेक्षितार्थत्वेनान्यथा कल्पनमयुक्तमिति । हेतुमिति जीवातिदेशानङ्गीकारे हेतुम् । अन्य इति रामानुजाचार्याः । असद्वा इदमित्यभिप्रकरणस्था तत्प्राक्श्रुतिसूत्र उक्ता । व्याकुर्वन्त इति । यथाहुः असद्वा इदमग्र आसीदित्यादिवाक्येपि 'प्राणशब्देन परमात्मैव निर्दिश्यते' इति तथा प्राण इति सूत्रे । गौणीमिति । यथाहुः सूत्रद्वयमेकीकृत्यर्षयः प्राणा इति बहुवचनश्रुतिर्गौणी बह्वर्थासंभवाद्ब्रह्मण एकत्वे-



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

अधिकसंख्याऽन्तःकरणभेदादिति । एकादशैवेन्द्रियाणीति स्थितम् ॥ ६ ॥

इति द्वितीयाध्याये चतुर्थपादे द्वितीयं हस्तादय इत्यधिकरणम् ॥

भाष्यप्रकाशः ।

द्वारमात्रसूचनयेत्येवं संभवाभिप्राया । संभवन्ति ह्येकादशसंख्यायामेताः संख्या इत्यभिप्राया । चतुर्दशसंख्या त्वन्तःकरणस्य चतुर्विधत्वात् तदभिप्राया । तथाचैतज्ज्ञापनं प्रयोजनमित्यर्थः । तर्ह्येकादशैवेति कथं निर्णय इत्यत आहुः एकादशेत्यादि । गीतायां क्षेत्रकथने, 'ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः' इत्युक्त्वा, 'महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च' इत्यहंकारादीन् भिन्नतयोक्त्वा, 'इन्द्रियाणि दशैकं च' इति कथनाद् ब्रह्मसूत्रपदेष्वेकादशैवेन्द्रियाणीति निर्णीतमित्यर्थः । नच पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणीति दशोक्ताः एकं चेति भिन्नतया कथनात् संख्यापूरणता चानिन्द्रियेणापि मनसा, 'यजमानपञ्चमा इडां भक्षयन्ति' इतिवत् संभवान्न मनस इन्द्रियत्वमिति वाच्यम् । अनिन्द्रियत्वसिद्धेः पूर्वं तथा संख्यापूरणस्यापादयितुमशक्यत्वात् । भेदेन कथनस्य तूभयेन्द्रियनायकतयोत्कर्षबोधनार्थत्वात् । अन्यथा पूर्वार्धे बुद्ध्यादिभिः सह क्रमापत्तेः ।

यत्तु 'इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः' इति, 'बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च', 'इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्' इत्यादिश्रुतौ इन्द्रियेभ्यः परं मनः । 'इन्द्रियाणि मनो बुद्धिः', 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः' इत्यादिस्मृतौ च भेदेन कथनमिति [illegible]

वतिग्रहा इत्यत्र श्रुतौ ग्रहत्वं च बन्धनभावो गृह्यते । बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बन्धनेन । तथा च स्मृतिः 'पुर्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते । तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन वा' इति । पुरि देहे । प्राण आद्यो यस्य स जीवः । तेन प्राणाद्यष्टकेन । अनावृतेति । नाभेर्द्वारस्यान्यस्य च ब्रह्मरन्ध्रस्य रूपद्वारस्य मूर्ध्न्यावृतत्वाद्विशेषणम् । सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चाविति श्रुतौ शीर्षण्या भवाः सप्त चक्षुरादिरूपाः प्राणाः द्वौ पायुमेढ्रूपाववाञ्चावधोभागगताविलर्थः । केवलेति आवृतानावृतद्वारमात्रसूचनया । अत्र नाभेर्दशमत्वम् । 'नव वै पुरुषे प्राणा नाभिर्दशमी' इति श्रुतेः । चतुर्दशेति । मुण्डके सप्त इमे लोका इत्यस्यां श्रुतौ सप्त सप्तेति श्रावणाच्चतुर्दशसंख्या । शंकरभाष्ये तु प्रतिपुरुषाभिप्रायेणेयं वीप्सा प्रतिपुरुषं सप्त सप्त प्राणा इति पूर्वपक्षग्रन्थेऽस्ति । गुहाशयपदस्य बुद्धिं वाच्यामाहुर्माध्वाः । गुहायां हृदयाकाशे शेरत इति गुहाशया इत्युपनिषद्भाष्ये शंकराचार्याः । अत्र तु गुहाशयादिति पञ्चम्यन्तमिवास्ति । शंकरभाष्येपि । चत्वारीति मनोबुद्धिचित्ताहंकारैश्चतुर्विधत्वात् । एवेति सप्तादिव्यवच्छेदकः । वेदेषु विश्वये गीतामंशमपहेलाशयवन्त आहुः गीतायामिति । ब्रह्मसूत्रेति । यत्तु गीताभाष्यादौ युक्तं तत् 'अनागतमतीतं च' इति वाक्यादर्शनात् । एवेति । श्रीभागवते 'श्रोत्रं त्वग्दर्शनं घ्राणं जिह्वेति ज्ञानशक्तयः । वाक्पाण्युपस्थपाय्वङ्घ्रिः कर्माण्यङ्गोभयं मनः' इति संवादात् । यजमानेति । अत्र नृत्वेपि यजमानस्य पञ्चत्वसंख्यापूरकत्वमस्ति । यजमानः पञ्चमो येषामृत्विजामिति । इडाभक्षस्य यागनामधेयत्वं पूर्वमीमांसायामस्ति । तथेति अनिन्द्रियत्वप्रकारेण । आपादेति । यदि मनसोऽनिन्द्रियत्वं स्यात्तदा पञ्चमसंख्यापूरकत्वं न स्यादित्यापादयितुम् । अन्यथेति । अनिन्द्रियत्वार्थं भेदेन कथने सप्तम्या लुक् तथाशब्दात् । क्रमेति मनसः क्रमापत्तेः । अर्था इति



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

निर्देशान्मनो नेन्द्रियम् । क्वाचित्कमेकादशवचनं तु मनस इन्द्रियप्रवर्तकत्वेनोपचारात् । नचे-न्द्रियेभ्यः परा इत्यादिषु गोबलीवर्दन्यायेन पृथग्वचनमिति वाच्यम् । इन्द्रियलक्षणस्य बुद्ध्यादाव-संभवात् । किं तल्लक्षणमिति चेद् एकजातीयमात्रव्यापारकरणत्वमेव । अन्यथा शरीरादीना-मपीन्द्रियत्वप्रसङ्गात् । अन्तःकरणस्य तु चाक्षुषादिवचनादिरूपनानाजातीयज्ञानकर्म प्रति करण-त्वेनाऽस्य लक्षणस्यान्तःकरणे अभावादिति भिक्षुराह तन्न । उक्तश्रुतिस्मृतीनां मनसो बलव-त्त्वबोधनेनाप्युपपत्तेः । गीतायाम्, 'इन्द्रियाणां मनश्चास्मि' इति वाक्येन, चतुर्थस्कन्धे पुरञ्जनो-पाख्याने च, 'एकादशेन्द्रियचमूः पञ्चसूनाविनोदकृत्' इति वाक्येन च मनसोऽपीन्द्रियत्वसत्ताया निश्चयात् । नच लक्षणाभावः । देहस्थत्वे सति ज्ञानक्रियान्यतरकरणत्वं वा, तथात्वे सति

रश्मिः ।

विषयाः । विषयानिति देशान् । भेदेनेति इन्द्रियेभ्यो भेदेन । क्वाचित्कमिति । 'दश वै पशोः प्राणा आत्मैकादश' इत्यादिश्रौतम् । उपचारादिति इन्द्रियपदस्य स्वप्रवर्तके लक्षणा प्रवर्तकत्व-संबन्धरूपा तद्रूपात् । गोबलीति गोपदवाच्यत्वेपि बलीवर्दस्य पृथग्वचनं किंचिन्निमित्तेन तन्न्यायेन । असंभवादिति तथा च न गोबलीवर्दन्यायप्रवृत्तिरिति भावः । एकजातीयेति संयोगसंयुक्तसमवायत्वादिजातीयमात्रव्यापारकसंयोगाद्यवच्छिन्नप्रयुक्त करणत्वमेव । शब्देतरो-द्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वमित्यस्यात्मन्यतिव्याप्तेरेवकारः । एकजातीयमात्रेति विशेषणकृत्यमाहुः अन्यथेत्यादि । उक्तप्रकाराद् व्यापारे भिन्ने प्रकारे सति शरीरस्य विभक्तपदार्थान्तर्गतमायांशसंवलितत्वेन प्रबुद्धसत्त्वस्यादिपदेन तादृशसत्त्वस्य रजसस्तमसश्च ग्रहणम् । तत्र चाक्षुषादिज्ञानानि प्रति वचनादिकर्माणि प्रति च करणत्वेन व्यापारा अपि संयोगत्वसंयुक्तसमवायत्वादिभिरनेकजातीया इति नातिव्याप्तिः । सत्त्वशुद्धिरपि भवति व्यापारः । नानाप्रकारे द्वितीयपक्षेपि बोध्यम् । बलवत्त्वबोधनेनेति श्रौतस्मार्तपरपदैर्बलवत्त्वस्य बोधनेने-त्यर्थः । परत्वं सर्वत्र प्रसिद्धं नियामकत्वमवाक्यताया इति भावः । उपपत्तेर्जाघन्यं मन्यमानं प्रत्याहुः गीतायामित्यादि । गीताया वेदार्थसंदेहे मतलिकात्वस्य सर्वाचार्यसंमतत्वादिति । तद्विस्ताररूपं भागवतमप्याहुर्दार्ढ्यार्थम् । चतुर्थेत्यादि । माभूत्तल्लक्षणसंचारः समभागवतलक्षणं संचरत्वित्याहुः देहस्थत्व इत्यादिना । अत्र प्रथमं लक्षणं तृतीयस्कन्धे षड्विंशे सुबोधिन्यां विशेषणरहितमस्ति । तत्र सर्वेन्द्रियगुणाभासेऽतिव्याप्तिः । तस्य सर्वेन्द्रियविवर्जितत्वेनेन्द्रियत्वाभावात् । तथा च गीता 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्' इति । तथा च विराजोत्र प्रकरणाद्देहस्थत्वमिति लभ्यतेऽत उक्तं देहस्थत्वे सतीति । तथा च सुबोधिनी 'तैजसानीन्द्रियाण्येव' इत्यत्र ज्ञान-क्रियान्यतरकरणमिन्द्रियमिति । करणमतीन्द्रियमिति वेति । देहस्थत्वं प्राणादावतिव्याप्तमितो विशेष्यम् । जन्यज्ञानकर्मणोर्मनआदौ स्थितेर्देहस्थत्वे सतीन्द्रियत्वं स्यादतो विशेष्यम् । विशेष्ये ज्ञानक्रिये विवक्षिते ग्राह्ये अतो जन्यज्ञानक्रिययोरविवक्षितत्वान्न लक्षणस्यातिव्याप्तिः । द्वितीयस्कन्ध-पञ्चमाध्यायसुबोधिन्यां द्वितीयलक्षणमस्ति । खानीन्द्रियाणि तत्फलानि चाक्षुषज्ञानादीनि तैरात्मास्तीति ह्यात्मसत्तां ज्ञापयन्तीति लक्षणसमन्वयः । तथा च सुबोधिनी 'तैजसात्तु विकुर्वाणात्' इत्यत्र इन्द्र आत्मा ईयते अनेनेतीन्द्रियम्' इति उपपादितं च तत्रैव । 'आत्मा हि न चाक्षुषः, नाप्यन्येन्द्रियग्राह्यः । व्यवह्रियते च देवदत्तस्त्वं यज्ञदत्तस्त्वमिति । स चात्मा पश्यति



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

रतिदेशात् प्राप्तश्चकारेण सूचितः । सूचनप्रयोजनमाहुः परिमाणेत्यादि । सप्तान्नब्राह्मणे, 'त एते सर्व एव समाः सर्वेऽनन्ताः' इति यदानन्त्यश्रवणं तत्तु कालत एव तथात्वबोधकम् । अनन्तमेव स लोकं जयतीति फलोक्त्या तथाऽवसायात् । अतो जीवे यथाऽऽराग्रमात्रत्व तथा प्राणेष्वश्रवणात् पुनर्वचनमित्यर्थः । एतेन शरीरपरिमाणत्वं संकोचविकाशशालिपरिमाणत्वं व्यापकत्वं च निवारितम् । तेन चक्षुर्मनोवाचां दूरगमनम् । त्वचः सर्वशरीरव्याप्तिः सामर्थ्येन वा

रश्मिः ।

उत्क्रान्त्यादिश्रुत्युक्तेन । अयमिति गतिमत्त्वरूपो हेतुः । जीवधर्मातिदेशेन प्राप्तः सौत्रेणानुक्तस्य हेतोः समुच्चायकेन चकारेण द्योतकेन सूचितः । अस्तीति । तथा प्राण इत्यत्रोक्तः । सूचनेति परिमाणासिद्धिरूपम् । अन्यथान्येनासौत्रेणानुक्तस्य हेतुना प्राणेष्वेवाणुत्वं सिद्ध्येत् । हेतुमात्रस्यातिदेशानङ्गीकारे बाधकाभावात् । सूत्रेऽसूचनात् । उद्दिष्टनाविदिष्टबाधदर्शनाच्च । त एत इति वागादयः समाः । केन रूपेणेत्यपेक्षायामाह सर्व इति । आधिदैविकरूपेणाशेषजगद्व्याप्तिमन्त इत्यर्थः । कालत इति मुक्तिकालत इत्यर्थः । एवकारेण देशव्यवच्छेदः । तथा चाणव एवानन्ता अनन्तकालावस्थायिनः । परमाणुवदन्यनये । अनन्तमेवेति 'स यो हैतानन्तवत्तया सोऽन्तवन्त९ लोकं जयत्यथ यो हैताननन्तानुपास्ते' इत्युक्त्वोच्यतेऽनन्तमेवेत्यादिश्रुतिः । देशत आनन्त्ये सिद्धस्य लोकस्य साधनरूपो जयोऽनन्वितः स्यादिति भावः । अवसायादिति । माध्वास्तु 'अणुभिः पश्यत्यणुभिः शृणोति प्राणा वा अणवः प्राणैरेतद्भवति' इति कौण्डिन्यश्रुतिमाहुः । रामानुजाचार्यास्तु उपास्यप्राणबहुत्वानुरोधिनीं श्रुतिमाहुः । तेन 'गोविन्दान्मृत्युर्बिभेति' इति गोपालतापिनीयं समर्थितम् । न तु कालीलक्षणस्येन्द्रियेष्वतिव्याप्तिः । पुरुषविधब्राह्मणसत्त्वात् । शरीरेति । शंकराचार्यमतमिदं सूक्ष्माः परिच्छिन्नाश्चैते प्राणा इति भाष्यात् । नैयायिकानां च । तत्र त्वचि स्पष्टम् । सकलशरीरावच्छेदेन स्पर्शोपलम्भात् । संकोचेति । मुक्तावल्यां मनोनिरूपणे पूर्वपक्ष्याशयोयम् । यथाहुः मनसोणुत्वोक्त्यनन्तरम् । न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमेकदा नानेन्द्रियजन्यज्ञानमिति वाच्यम् । मनसोतिलाघवाज्झटिति नानेन्द्रियसन्निधानान्नानाज्ञानोत्पत्त्योत्पलशतपत्रभेदादिवद्यौगपद्यप्रत्ययस्य भ्रान्तत्वात् । न च मनसः संकोचविकाशशालित्वादुभयोपपत्तिरस्त्विति वाच्यमिति । समाधानं तु नानावयवतन्नाशकल्पनागौरवादिति । व्यापकत्वमिति व्यापकधर्मस्य व्यापकत्वनियमाद्गोविन्देन्द्रियाणां व्यापकत्वे क्रीडाप्रतिबन्धात् 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि' 'श्रीमद्गोकुलदृक्तारा' इत्यादिवाक्यविरोधान्निर्धारितम् । 'सर्वतः पाणिपादान्तम्' इत्यत्रान्तशब्दाज्ज्ञानमार्गीयत्वाच्च न दोषः । उपासनादिभिर्व्यापकत्वम् । दूरश्रवणदर्शनादिकं तु यमपुरुषेष्वपि । तेन चेति अणुत्वव्यवस्थापनेन च । चक्षुर्दूरगमनं तावत्प्रत्यक्षखण्डे प्रस्थानरत्नाकरे उक्तम् । वृत्तिरूपेण चाक्षुषे तु नयनकिरणा विषयपर्यन्तं गच्छन्तीन्द्रियान्तरे तु किरणाभावादिन्द्रियेण सह विषयं मनः प्राप्नोति तदा क्रमेण सहैव वा निर्विकल्पकं सविकल्पकं च तत्तदिन्द्रियसंसृष्टे मनस्युत्पद्यते । ज्ञानद्वयेपि विषयेन्द्रियसम्बन्धादिकं व्यापारः । अनेनार्चीरूपाणां किरणानां सूर्यकिरणानां सूर्यमण्डलाद्भेदस्य 'आदित्यो वा एष एतन्मण्डलं तपति' इत्यनुवाके श्रावणात्तैरखिलमेरूत्तरदेशैर्व्याप्नुवानस्यादित्यमण्डलस्य दशसहस्रयोजनपरिमाणस्मरणेन तेषां तत्परिमाणाबाधकत्ववत्सूर्याध्यात्मिकचक्षुषः किरणानामपि तथात्वेन

RUPANATHJI (DR.RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

गुणव्याप्त्या वेति बोधितम् । मोक्षे च तेषामपि सत्संपत्तिरिति च बोधितम् । नन्वेतेषां को वा गुणो यो बहिः प्रसरतीति वक्तव्यम् । यदि न वक्तुं शक्यते तर्हि मिथ्यैवायमुद्भम इत्यत आह । चक्षुर्मनोवाचां तेजोमयदेवताधिष्ठितत्वात् तदंशत्वाच्च रूपमेवेति वदामः । 'तेजोमयीवाग्' इति श्रुतेश्च । त्वचस्तु स्पर्श एव । अथवा । 'यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः' इति षष्ठस्कन्धे नारदकृत उपदेशे मनःप्रभृतीनां ब्रह्मकर्मकस्पर्शज्ञानयोर्निषेधमुखेन अन्येषु स्पर्शज्ञानयोरङ्गीकारात् स्पर्श एव सर्वत्र यथोचितो भवतु । नच तस्य प्रत्यक्षापत्तिः शङ्क्या । अणुगुणत्वेनातीन्द्रियतया कार्यैकानुमेयत्वात् । इन्द्रियाणां प्राप्यप्रकाशकारित्वस्य नियतत्वादिति । यत् पुनः

रश्मिः ।

श्रुत्यविरोध उक्तः । 'मनसैवानुद्रष्टव्यम्'इति श्रुत्या चन्द्रदेवताकत्वेन मनसो नानाकिरणशालिन ईक्षत्यधिकरणभाष्योक्तप्रकारेण कामवर्जितातिशुद्धस्य दूरगमनं ब्रह्मपर्यन्तगमनम् । तथा वाचां दूरगमनं वीचीतरङ्गन्यायेन प्रसिद्धम् । त्वचः सर्वशरीरव्याप्तिस्त्वचप्रत्यक्षं । सामर्थ्येन चेति देवतासामर्थ्येन । तथा प्राण इत्यधिकरणे प्राणे जीवधर्मातिदेशस्य श्रुत्यन्ताङ्गीकारात्सर्वशरीरे जीवचैतन्येनेव । वाकारद्वयार्थः कचित्पूर्वतन्त्रे प्रसिद्धः । 'सेवायां वा कथायां वा' इतिवत् । मोक्ष इत्यादि । इदं च तत्प्राक्श्रुतेश्चेति सूत्रे चकारान्मोक्ष इत्यादिभाष्ये स्पष्टम् । गुणव्याप्तिं प्रपञ्चयन्ति स्म नन्वेतेषामित्यादिना । अयमिति अणुत्वप्रसाधनलक्षणः । तेजोमयेत्याद्यं ज्योतिराद्यधिष्ठानाधिकरणेऽत्रैवाग्रे स्फुटम् । रूपमेवेति । तेजस्तन्मात्रत्वस्य तल्लक्षणत्वादिति भावः । एवकारेण चक्षुषः सूर्यदेवताकत्वेन तद्रश्मयो व्यवच्छिद्यन्ते । मनसस्तु कामसंकल्पादिनानावृत्तयो व्यवच्छिद्यन्ते । वाचस्तु व्यवहारजनकत्वरूपवृत्तिर्व्यवच्छिद्यते । प्रस्थानरत्नाकरे तु गुणाद्वालोकवदिति सूत्रे आलोकस्य गुणत्वाङ्गीकारात्तैजसस्य चक्षुष आलोकरूपगुणव्याप्त्यङ्गीकारेप्यदोष इत्युक्तम् । चक्षुषस्तैजसत्वस्य नैयायिकादिसकलप्रसिद्धस्य माऽपह्नवो भूत् । मनोवाचोस्त्वप्रसिद्धं मन्वानं प्रत्याहुः तेज इत्यादि । तथा च वाक्पूर्वरूपस्य मनसः कथमतैजसत्वमिति चन्द्रदेवताकस्य तैजसत्वम् । अतस्त्रिगुणं रूपं तन्मात्रेति भावः । त्वच इत्यादि । त्वचो वायुदेवताकस्य स्पर्श एव बहिः प्रसरति न तु रूपं तदभावादित्यर्थः । प्रस्थानरत्नाकरे तु देवतासामर्थ्यमप्युक्तम् । लाघवेन सकलसाधारणस्पर्शमाहुः अथवेत्यादिना । ब्रह्मकर्मकेत्यादि । वाक्यान्तर्गतयच्छब्दार्थो ब्रह्मेति भावः । निषेधेति निषेधमुखं निषेधोपायः निषेधरूपो ब्रह्मातिरिक्ते स्पर्शप्रापकोपायः । तेष्विति । मनोबुद्धीन्द्रियासुषु । स्पर्शेति ब्रह्मातिरिक्तं स्पृशन्ति विदुरिति । एवेति । स्पृशन्ति विदुरित्येतयोर्मनोबुद्धीन्द्रियासुकर्तृकत्वेन स्पर्शज्ञानानुकूलव्यापारो मनआदिनिष्ठ इति । सर्वत्रेति । मनोबुद्धीन्द्रियासुषु स्पर्शानुकूलो व्यापारः । आकाशं स्पृशन्ति विदन्ति । एवं वायुमग्निमपः पृथिवीमोषधिरन्नं पुरुषम् । एतेभ्यः प्रयोगेभ्यः । आकाशादिषु स्पर्शज्ञाने । कर्मत्वात् । तत्रापि सूक्ष्मातिसूक्ष्मार्थः । इदमेवोक्तं यथोचितपदेन । आकाशस्य मांसरूपस्य स्पर्शः । ननु त्वग्विषयकज्ञानादौ तस्याणुप्राणादिगुणस्य स्पर्शस्य प्रत्यक्षापत्तिरित्याशङ्कामपनुदन्त आहुः न चेत्यादि । कार्यैकेति । अणूनीन्द्रियाणि स्पर्शवन्ति । प्राप्यप्रकाशकारित्वात् । यन्नैवं तन्नैवं परोक्षत्वादत्यनुमेयत्वात् । कार्यं प्राप्यप्रकाशस्तद्घटितहेतुनानुमेयत्वं कार्यैकानुमेयत्वं तस्मात् । नियतत्वादिति । ज्ञानेन्द्रियाणि वस्तुप्राप्यप्रकाशकारीणि । सौगतास्तु श्रोत्रस्याप्राप्यप्रकाशकारित्वं



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

सकलदेहव्यापिकार्यानुपपत्तिप्रसङ्गादणुत्वं मध्यमपरिमाणबोधकत्वेन व्याख्यातं तदप्येतेनैव निरस्तं ज्ञेयम् । ज्ञानवत्ता तु तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति भाष्यात् देवतात्वाच्च युक्तैवेति न कोऽपि शङ्कालेशः । भिक्षुस्त्वत्राणुपदेन तन्मात्राणि व्याख्याय तेषां पूर्वोत्पत्तिविचारमत्राङ्गीचकार तत्र । मैत्रेयोपनिषदि, यत्र तन्मात्राणि भूतशब्देनोच्यन्ते । अथ

रश्मिः ।

वदन्ति तदन्ये दूषयन्ति स्म यथाह शास्त्रदीपिकाकारः । अप्राप्यकारित्वे हि सन्निकृष्टविप्रकृष्टस्थितौ युगपच्छब्दमुपलभेयाताम् । तयोस्तु क्रमेणोपलब्धिर्न कांचिदप्राप्यकारित्वे समर्थयितुं शक्या । तस्मान्नाप्राप्यकारित्वं श्रोत्रस्य संभवति । वृत्तेस्तु प्रागावस्थात्वमेवेति व्युत्पादितं प्रस्थानरत्नाकरे वृत्तिनिरूपणेन । श्रोत्रस्य शब्दो वृत्तिरिति प्राप्यकारित्वम् । न चार्तभागब्राह्मणे 'श्रोत्रं वै ग्रहणकः शब्देनातिग्रहेण गृहीतः श्रोत्रेण शब्दाञ्छृणोती'ति तत्र श्रोत्रे ग्रहणकशब्दोन्येष्विन्द्रियेषु ग्रहशब्दा इत्यप्राप्यप्रकाशकारित्वमिति वाच्यम् । मैत्रेयीब्राह्मणे 'स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः' इत्यत्र बाह्यानिति शब्दरूपग्रहणकर्मविशेषणादबाह्येतरशब्दग्राहकत्वेन प्राप्यकारित्वात् । न चैवमपि मनआदिश्रोतृत्वं भवतु बृहदारण्यकब्राह्मणे 'मन एवास्यात्मा वाग्जाया प्राणः प्रजा सौम्यं चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दन्ति श्रोत्रं दैवं श्रोत्रेण हि तच्छृणोतीति' इति श्रुतेरिति शङ्क्यम् । यत्किंचित्साक्षाद्ग्रहणेन श्रोत्रस्य प्राप्यकारित्वात् । कर्मेन्द्रियेषु तु तत्तत्क्रियैव व्यापारः । 'सर्वेषामानन्दानामुपस्थ एकायनम्'इत्यादिश्रुतेः । तज्जन्या स्थूलशरीरक्रिया च फलमिति । अन्ये तु घ्राणरसनश्रवणानां द्रव्यग्राहकत्वं नेच्छन्ति तन्नास्मभ्यं रोचते । तमसि रसनया दुग्धादेर्घ्राणेन चम्पकादेः, श्रवणेन भेर्यादेरनुभवस्य व्याप्तिज्ञानविधुराणामपि दर्शनात् । अत्र व्यवसायविरोधेन स्मृतिरूपत्वस्य तत्र वक्तुमशक्यत्वाच्च । न चोपनीतं भानं तदिति वाच्यम् । तथात्वे मानाभावात् । घ्राणादीनां द्रव्याग्राहकत्वस्याभ्युपगमैकशरणत्वादिति दिक् । तथा च सुरभि चन्दनमित्यत्रैव घ्राणादीनां द्रव्यादिग्रहणे सामान्यलक्षणाज्ञानलक्षणे प्रत्यासत्ती ज्ञेये । सिद्धान्तमुक्तावल्यां स्पष्टम् । एवं नियतत्वं तस्य बोध्यम् । व्याख्यातमिति शंकराचार्यैर्व्याख्यातम् । तथा च भाष्यम् । अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः । अणुत्वं चैषां सौक्ष्म्यपरिच्छेदो न परमाणुतुल्यत्वम् । कृत्स्नदेहव्यापिकार्यानुपपत्तिप्रसङ्गादिति । एतेनेति पूर्वग्रन्थेनैव । एवकारस्तु पूर्वग्रन्थस्य विस्तृतत्वात् । ज्ञानेति । ननु अणुषु विषयप्रकाशनसामर्थ्यमयुक्तं संहनननातिरिक्तसामर्थ्याप्रसिद्धेः परमाणुष्विवेत्याशङ्क्याहुः ज्ञानवत्तेति । चकारोऽणुत्वसंग्रहः । तथा चेन्द्रियाणां परमाणुत्वेऽयं दोषो न त्वणुत्व इति भावः । न कोपीति । परमाणुत्व इन्द्रियाणां द्विगोलके दोरादौ मल्लविद्यायां हस्ताभ्यां चलने विष्णुदेवताकपादावच्छेदेन गतिजनकत्वं न शिल्पजनकत्वम् । पशूनां चक्षुरिन्द्रियस्य नासिकाविवरावच्छेदेनाश्विनीकुमारकृतावच्छेदेनेक्षितृत्वमपि विषयेन्द्रियसंयोगाच्च चक्षुरादौ कदेवतावच्छेदेनानन्दजनकत्वमपि । पद्भ्यामिन्द्रदेवतावच्छेदेन ताळवादनं न तु गतिजननम् । नेत्राभ्यां मित्रदेवतावच्छेदेनाश्रुविसर्गोऽपि तथा शरीरे रोमस्वेदहर्षादिविसर्गोपि । तत्र पादादीन्द्रियाणां हस्तादिगोलकावच्छेदेन कार्यजननमनुपपन्नम् । अयमपि शङ्कालेशो नेति कोपीत्युक्तम् ॥ सामर्थ्याद्वा गुणत्वं ज्ञेयम् । अङ्गीचकारेति । भाष्यात्तु यत्र 'दिवीव चक्षुराततम्' इति 'अणुभिः पश्यति'इति श्रुति-



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## श्रेष्ठश्च ॥ ८ ॥ (२-४-४)

**मुख्यश्च प्राणो नित्यगतिमान् अणुपरिमाणश्च । चकारादतिदेशः । नासदासीदित्यत्र, 'आनीदवातं स्वधया तदेकम्' इति अननात्मकत्वं पूर्वसत्ता प्रदर्शिता ॥ ८ ॥**

---

भाष्यप्रकाशः ।

महाभूतानि भूतशब्देनोच्यन्ते इत्युक्त्या श्रुतौ भूतपद उभयसंग्रहस्य बोधितत्वेन पूर्वपादीयवियदाद्युत्पत्तिविचारादेव चारितार्थ्येन पृथग्विचारप्रयोजनाभावात् ॥ ७ ॥

इति तृतीयं अणवश्चेत्यधिकरणम् ॥ ३ ॥

श्रेष्ठश्च ॥ ८ ॥ इन्द्रियाणि विचार्येदानीं मुख्यप्राणं विचारयन्ति । तत्र मुख्यप्राणनित्यतायाः स्फुटमश्रवणात् प्रश्नोपनिषत्प्रभृतिषु, 'मा मोहमापद्यथ अहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि'इत्यादिरूपे प्राणानां संवादे शरीरस्थितिहेतुतया श्रेष्ठत्वेन निर्णीतत्वाच्च संदेहे श्रैष्ठ्यस्य नित्यतागमकत्वे मानाभावादनित्य इति प्राप्ते आहेत्याशयेन व्याकुर्वन्ति मुख्य इत्यादि । मुख्यः प्राणोपि नित्यो गतिमानणुपरिमाणश्च । तत्र हेतुरतिदेशप्राप्तश्चकारादेव पूर्ववद् बुध्यते । नन्वस्य सृष्टेः पूर्वं सत्तायां किं मानमत आहुः नासदित्यादि । तथाचैवं

रश्मिः ।

विभागेन प्राणाः किं व्याप्ता उताणव इति संदेहे व्याप्ता इति पूर्वपक्षेऽणव एवेति सिद्धान्तयन्ति स्म । रामानुजास्तु त एते सर्वे समाः सर्वेऽनन्ता इत्यानन्त्यश्रावणाद्विभुत्वं प्राणानामिति प्राप्तेऽभिधीयते । प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीत्युत्क्रान्त्यादिश्रवणात्परिमितत्वे सिद्धे सत्युत्क्रान्त्यादिषु पार्श्वस्थैरनुपलभ्यमानत्वादणवश्च प्राणाः । आनन्त्यश्रुतिस्तु 'अथ यो हैताननन्तानुपास्ते' इत्युपासनश्रवणादुपास्यप्राणविशेषणतया कार्यबाहुल्याभिप्रायेति सिद्धान्तयन्ति स्म । श्रुताविति अभ्यवहितपूर्वोक्तायाम् । पूर्वेति । एवकारेण पञ्चतन्मात्राणां महाभूतधर्मातिदेशस्योक्तत्वात्तत्र निविष्टत्वात्तन्मात्राज्ञाने तादृशमहाभूतरूपविशेषणाज्ञानप्रयुक्ततद्धर्मातिदेशाज्ञानापत्तेः । न च तूष्णीमतिदेशमुक्तमितः परं विविच्य विचार इति वाच्यम् । सूत्राभावात् ॥ ७ ॥

इति अणवश्चेत्यधिकरणम् ॥ ३ ॥

श्रेष्ठश्च ॥ ८ ॥ मुख्येति । प्राणपदस्य भाष्ये प्रियत्वाय व्यवस्थापनात् प्रियत्वेन स्मृतस्य मुख्यप्राणस्याधिष्ठानहेतुत्वात्तं प्रसङ्गसंगत्या विचारयति भगवानाचार्यः । विषयादिकमाहुः तत्रेत्यादिना । मुख्यप्राणो विषयः स नित्यो जीवधर्मवांश्चानित्यस्तद्धर्माभाववान्वेत्याकारकसंशयस्तु स्पष्ट एव । अश्रवणेति । 'एतस्माज्जायते प्राणः' इत्यत्रोत्पत्तेः प्रादुर्भावरूपत्वस्यापि शक्यवचनत्वात्स्फुटपदोक्तिः । प्रश्नेति । प्रभृतिपदार्थोऽग्रे स्फुटः । मा मोहमित्यादि बाणधारकत्वाय मुख्यमानप्राणान्प्रति प्राणवाक्यात् । बाणं देहम् । इति प्राप्त इति पूर्वपक्षे प्राप्ते । मुख्यश्चेति भाष्ये चकारोप्यर्थ इत्याशयेनाहुः मुख्य इति । चेति अयं समुच्चये । चकारादिति भाष्यं विवृण्वन्ति स्म तत्रेत्यादिना । हेतुरिति । सौत्रचकाराद्धेतुवाचकपञ्चम्या लुग्बोधितः । स च गतिमत्त्वेन नित्यत्वं अणुत्वमेवेति भाष्ये गतिमत्त्वं हेतुः । अतिदेशप्राप्तोऽतिदिष्टश्चकारात्तद्वाचकात् । एवेति किमत आहुः पूर्ववदिति पूर्वसूत्रवत् । तथा च पूर्वसूत्रप्रामाण्यादेवकार इति भावः । बुध्यत



DR. RUPAK NATH
www.astrology-tantra.com

न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥

ननु मुख्यः प्राणो वायुरेव भविष्यति, इन्द्रियाणां क्रिया वा । एवं हि श्रूयते । 'यः प्राणः स वायुः । एष वायुः पञ्चविधः प्राणोऽपानो व्यानः उदानः समानः' इति । 'सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च' इति । तन्त्रान्तरीया आचक्षते । तदुभयमपि न । कुतः पृथगुपदेशात् । 'एतस्माज्जायते प्राणो मनः सर्वे-

भाष्यप्रकाशः ।

सृष्टिप्राकाले वातरूपतानिषेधपूर्वकमानीदिति कथनाद्भगवतोऽननात्मको यो धर्मः स एव मुख्यः प्राण इति तेन रूपेण सत्तायां सिद्धायाम्, एतस्माज्जायते प्राण इत्यत्र जीववद् व्युच्चरणमेव, न तूत्पत्तिः । सदेवेति श्रुतिस्तु ततोऽपि पूर्ववृत्तान्तपरेति श्रुतिविरोधलेशस्याप्यभावादयमपि जीवसमानयोगक्षेमत्वादंश एवेत्यर्थः ॥ ८ ॥

न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥ प्राणस्वरूप एव किंचिदाशङ्क्य परिहरतीत्याशयमस्याहुः नन्वित्यादि । तन्त्रान्तरीयाः सांख्याः, तन्मानयति तेषां सांख्यसप्ततौ कारिका । अर्थस्तु पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि बाह्यानि । मनोबुद्ध्यहंकारास्त्रय आन्तराः । एवं त्रयोदशविधं करणम् । तस्य त्रयोदशविधस्यापि करणस्य या साधारणी वृत्तिः प्राणाद्या प्राणनादिरूपा । भावे षञ् । सैव पञ्च वायवः प्राणादय इति व्यवह्रियन्ते इत्यर्थः । तथाचोभयोर्मध्ये यत्किंचिदादर्तव्यं, न तु पृथग्विचारस्तस्य युक्त इत्याशङ्काशयः । परिहारं व्याचक्षते तदुभयमपि नेत्यादि । नन्वेवं वायोः सकाशाद्भेदोऽस्तु, इन्द्रियक्रियातः कथं भेद इत्यत

रश्मिः ।

इति भाष्यार्थस्तु श्रेष्ठः प्राणश्चकारसूचितार्थोदिनिर्देशादिति । सृष्टेरिति पञ्चम्यन्तमिदम् । नासदित्यादीति । नासदासीन्नो सदासीदित्यानीत् लुङन्तं, अवातं, स्वधया, तद्, एकम् । एकं तद् ब्रह्म कर्तृ, स्वधया स्वधाशब्देन अवातं अप्राणं जगत् आनीत् प्राणानुकूलभूतकालिकव्यापारवत् । अवातं प्राणयुक्तमकार्षीत् । स्वधापदेन पितृसृष्टिरुक्ता । सा च सामवेदप्राधान्यापेक्षया । 'वेदानां सामवेदोस्मि' इति । मनुस्मृतौ 'ऋग्वेदो देवदैवत्यः' इत्यत्र साम्नः पितृदेवत्वमुक्तम् । स्वधा पितृदाने । वातेति 'वातः प्राणः' इति बृहदारण्यके । अननेति । भगवत्संबन्ध्यननानुकूलो व्यापार इत्यर्थादिति भावः । एतदुपपादितं प्राक् । ततोपीति । तस्य तमःपदार्थकस्य समाधिकरणोक्तरीत्या तमःशब्दार्थत्वप्रच्यावनपक्षेऽवान्तरकारणपक्षे इदं बोध्यम् ॥ ८ ॥

न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥ एवेति इन्द्रियव्यवच्छेदकः । नन्वित्यादीति । कुतः पार्थक्यस्यासन्यपदेन बोधनादाहुर्मध्ये इन्द्रियाणामित्यादि । एतच्च कचित्प्रदिष्टम् । शंकरभाष्येपि न वायुः प्राणो नापि करणव्यापार इति । श्रूयत इति । तत्रेवि । इन्द्रियाणां क्रिया वेति कोटौ स्वाभिप्रायमाचक्षत इत्यर्थः । तन्त्रान्तरीयाभिप्रायात्समस्तकरणवृत्तिः प्राण इति शंकरभाष्यात् । कारिकेति । इदमुपलक्षणं सांख्यप्रवचनसूत्रस्य । सांख्यप्रवचनसूत्रवृत्तावपि सूत्रं प्रधानकार्याध्यायेस्ति । सामान्या चासौ करणवृत्तिरिति कर्मधारयं व्याचक्षते । पञ्चत्वादात् । ननु 'प्राणितीति प्राणः' एवमादिविग्रहेषु प्राणनादिरूपाः कथमत आहुः भाव इति । प्राणादिपदेषु । इत्याशङ्केति इति आशङ्का यस्य स इत्याशङ्कः, तस्याशय इत्यर्थः । इन्द्रियत



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

न्द्रियाणि च, खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इति प्राणवाय्वोः पृथगुपदेशात् । वृत्तिमतोरभेदेन ततोऽपि पृथगुपदेशाच्च ॥ ९ ॥

इति द्वितीयाध्याये चतुर्थपादे चतुर्थं श्रेष्ठप्राणेत्यधिकरणम् ॥

---

भाष्यप्रकाशः ।

आहुः वृत्तीत्यादि । ततोऽपीति इन्द्रियतोऽपि । तथाच पदार्थान्तरमेव मुख्यः प्राणः । नच पदार्थान्तरत्वे, 'यः प्राणः स वायुः', 'स एव वायुः पञ्चविधः' इति श्रुत्योर्विरोधः स्फुटः । तस्य भूतात्मकवायुव्यतिरिक्तभगवत्प्राणात्मकवायुपरत्वात् । नचात्र मानाभावः । बृहदारण्यक उद्गीथब्राह्मणे, अथ हेममासन्यं प्राणमूचुरित्यत्र नस्यप्राणादपि वैलक्षण्यश्रवणात् । नचाध्यात्मापत्त्या न वैलक्षण्यमिति वाच्यम् । तस्याः नस्यप्राणेऽपि सत्त्वात् । अतोऽपहतपाप्मत्वरूपाद् वैलक्षण्यात् तत्त्वान्तरमेव । वायुसमानाकारत्वं च तस्य मैत्रेयोपनिषदि द्वितीयप्रपाठके, 'सोऽमन्यतैतासां प्रबोधनायाभ्यन्तरं विविशामीति स वायुरिवात्मानं कृत्वाऽभ्यन्तरं प्राविशत् स एको नाशक्नोत् स पञ्चधात्मानं विभज्य' इत्यादिप्रजापतिमुपक्रम्य पठ्यते । अतो न विरोध इत्यर्थः । अन्ये त्विदं सूत्रमग्रिमाधिकरणे योजयन्ति ॥ ९ ॥

इति चतुर्थं श्रेष्ठप्राणाधिकरणम् ॥ ४ ॥

रश्मिः ।

इति । समान्यकरणवृत्तिरित्यत्र वृत्तिः वृत्तिमत्करणं तयोरभेदेन वृत्तिमदिन्द्रियतः । पञ्चमाध्यायसुबोधिन्यनुसारेण द्वितीयस्कन्धस्य 'तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन्' इति समाधातुमुपक्रमन्ते न चेत्यादि । विरोध इति सूत्रभाष्येण विरोधः । तस्येति भाष्यस्य । अध्यात्मेति भावप्रधानः । सूत्रोक्तः श्रेष्ठः । भौतिकवायुसंबद्ध आध्यात्मिको भगवदिच्छया गुहां प्रविशति । 'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः' इति वाक्यात् । न वैलक्षण्येति । 'यस्तु आध्यात्मिकः प्रोक्तः सोऽसावेवाधिदैविकः' इति वाक्यात्सूर्यचक्षुरभिमानिवत् । तस्या इत्यादि आध्यात्म्यापत्तेः । तस्य श्रेष्ठस्य प्राणे भगवति 'प्राणस्य प्राणः' इति श्रुतेः । तथा चाध्यात्म्यापत्तेर्वैलक्षण्यप्रतिबन्धकत्वे इष्टवैलक्षण्यापत्तिरिति भावः । अस्त्वेवमिति चेत्तत्राहुः अत इति । अपहतपाप्मत्वं प्राणस्य प्राणे प्रसिद्धम् । एवमाधिदैविकत्वादिभिर्वैलक्षण्यमिति भावः । एवेति उक्तयुक्तेः । प्रसिद्धेर्विशेषाद्वा । स इति प्रजापतिः । एतासामिति शक्तीनाम् । योजयन्तीति । तथाहि वायुतत्त्वान्तरत्वे प्राणस्य प्रतिषिद्धे 'वायुरेवायमध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते' इति सुसिद्धेऽध्यात्मपञ्चत्वे स्यादेतत्प्राणोऽपि तर्हि जीववदस्मिन्शरीरे स्वातन्त्र्यं प्राप्नोति श्रेष्ठत्वादित्यादिप्रकारेण शंकराचार्याः । 'क्रियावति द्रव्येऽवस्थान्तरमापन्ने वायावेव प्राणशब्दप्रसिद्धेर्न वायुनापि क्रियामात्रं प्राणः । किमयं प्राणो वायोर्विकारः सन्नग्निवद्भूतान्तरं नेत्याहेत्येवं प्रकारेण रामानुजाचार्याः । माध्वास्तु न चेष्टा वायुक्रिये पृथगुपदेशादिति पठन्ति । 'चेष्टायां बाह्यवायौ च मुख्यप्राणे च गीयते प्राणशब्दः' । 'स प्राणमसृजत खं वायुर्ज्योतिरापस्तपोमन्त्राः कर्म' इति पृथगुपदेशात् । 'भूतानि चेष्टा मन्त्राश्च मुख्यप्राणादिदं जगत्' इति स्वतन्त्रः प्राण इत्युक्त्वा चक्षुरादिवदिति सिद्धान्तयन्ति स्म ॥ ९ ॥

इति श्रेष्ठप्राणाधिकरणम् ॥ ४ ॥

RUPNATHJI( DR. RUPAK NATH
w.astrology-tantra.c

चक्षुरादिवत् सह शासनात् । इन्द्रियजयवत् प्राणजयस्यापि दृष्टत्वात् । आदिशब्देन जडत्वादयः ॥ १० ॥

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ ११ ॥

ननु प्राणस्य जीवोपकरणत्वे तदुपकारकव्यापारवत्त्वमपेक्ष्यते । तत्रैकादशैव वृत्तयस्तन्त्रान्तरेऽपि सिद्धाः ।

'एकादशामी मनसोऽहि वृत्तय आकूतयः पञ्च धियोऽभिमानः ।
मात्राणि कर्माणि पुरं च तासां वदन्ति चैकादश वीर भूमीः'

इति । तथा कश्चित् प्राणस्य व्यापारोस्तीति चेत् ।

---

भाष्यप्रकाशः ।

दृष्टत्वात् । 'जितेन्द्रियस्य युक्तस्य जितश्वासस्य योगिनः' इति पुराणेऽपि दृष्टत्वात् । जडत्वादय इति । आदिशब्देन जीवोपकरणत्वं प्राणसंवादादिषु सह शासनं सर्वैर्व्याख्यातं संगृह्यते । तथाच प्रश्नोपनिषदि प्राणोत्पत्त्युत्क्रमस्थितीनां ब्रह्माधीनत्वश्रावणादासन्यत्वेऽपि ब्रह्मतन्त्रः व्यवहारे पूर्वोक्तश्रुतिभ्यो वागादिनियामकत्वेप्येतेभ्यो हेतुभ्यो जीवतन्त्र इत्यर्थः ॥ १० ॥

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ ११ ॥ उपकरणत्वं प्राणस्य कथमित्याकाङ्क्षायां किंचिदाशङ्क्य परिहरंस्तत् समर्थयतीत्याशयेन व्याकुर्वन्ति नन्वित्यादि । तन्त्रान्तर इति योगशास्त्रे । श्लोकस्तु पञ्चमस्कन्धे जडभरतवाक्येषु, अर्थस्तु आकूतयो विसर्गादयः ।

अथ ह एवायं मुख्यः प्राणः सोऽयं मध्यमः प्राण इत्यादिषु विशेष्याभिधानादित्यमाणि । सर्वैरिति प्राणसंवादादिषु 'अथ ह प्राणा अहंश्रेयसि विवदमाना व्यूदिरे' इत्युपक्रम्य 'यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः' इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणे तद्वृत्तिमात्रहीनं यथापूर्वं जीवनं दर्शयित्वा प्राणोत्क्रिक्रमिषायां वागादिशैथिल्यापत्तिं शरीरघातप्रसङ्गं दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयतीति शांकरैरेवं रामानुजैर्माध्वैरपीति । प्राणोत्पत्तीति 'आत्मतः प्राणो जायते' इत्युपक्रम्य 'तदेष श्लोकः 'उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा (बाह्यं) । अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुते' इति श्रुतेः । एतेभ्य इति तत्सहशिष्टत्वादिभ्यो जीवतन्त्रः 'स एष जीवः' इत्यत्र सहार्थेऽप्रधाने इति तृतीयया ॥ १० ॥

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ ११ ॥ नन्वित्यादीति । जीव इवोपकरणत्वं जीवोपकरणत्वं तस्मिन् । उपकरणत्वं प्राणधारकत्वम्, प्राणधारणानुकूलव्यापारवत्त्वम्, तस्य प्राणधारणोपकारको व्यापारस्तद्वत्त्वम् । अपेक्ष्यत इति 'जीव प्राणधारणे' इति धातुपाठदर्शितेनापेक्ष्यत । योगेति क्वचिद्द्रष्टव्यम् । अथवा । 'सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः' इति वाक्यात्पातञ्जले योगशास्त्रे 'अथ योगानुशासनम्'इत्यारम्भके मुख्यप्राणैकादशेन्द्रियाभावेऽपि कापिलसांख्यप्रवचनसूत्रवृत्तौ प्रधानकार्याध्याये 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्' इत्यारम्भकेस्ति । 'कर्मेन्द्रियैर्बुद्धीन्द्रियैरान्तरमेकादशकम्' इति सूत्रम् । भागवतवाक्यप्रयोजनमाहुः श्लोकस्त्विति तुः पूर्वपक्षव्यावर्तकः । अतोऽपि पदार्थसूचितार्थवाचकः श्लोक इत्यर्थः । विसर्गेति विसर्गश्चानन्दनमादानं चागमनं च वचनं च विसर्गानन्दनादान-



DR. RUPAK NATH (RUPNATHJI)
www.astrology-tantra.com

मनसो द्वारभेदेनैवैकादशवृत्तयः स्वरूपत एव । एवमेव प्राणस्यापि पञ्चधात्मानं विभज्य कार्यकारणं व्यपदिश्यते ॥ १२ ॥

अणुश्च ॥ १३ ॥

अतिदेशेन प्राप्तमप्यणुत्वं 'पञ्चधात्मानं विभज्य' इति वचनात् संदिग्धं पुनर्विधीयते । आसन्योऽप्यणुः । चकारात् पूर्वोक्तसर्वसमुच्चयः ॥ १३ ॥

इति द्वितीयाध्याये चतुर्थपादे पञ्चमं चक्षुरादिवदधिकरणम् ॥ ५ ॥

---

भाष्यप्रकाशः ।

यथा मनसि इन्द्रियद्वारा साक्षाच्च वृत्तिस्वीकारस्तथा प्राणेऽपि श्रुत्युपदेशप्रामाण्येन साक्षादेव वृत्तिस्वीकारः । अतः कार्यमात्रात् स्वरूपत एवोपकारादुपकरणत्वमित्यर्थः । एतेन यत् परैः 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' इति योगसूत्रानुसारेण मनसः पञ्चवृत्तित्वमङ्गीकृत्य पञ्चवृत्तिकत्वांशेऽपि मनोवदिति दृष्टान्त इत्युक्तम्, तदपि परास्तम् । उक्तवाक्य एकादशत्वस्य कण्ठोक्तत्वात् । योगोक्तवृत्तीनां तृतीयस्कन्धे, 'संशयोऽथ विपर्यासः' इत्यत्र बुद्धिवृत्तित्वस्वीकाराच्च । श्रुत्युक्ताः कामादयस्त्ववान्तरवृत्तित्वेनैकादशस्वेव प्रविशन्ति । योगसूत्रं तु निरोध्यत्वेन ताः वक्तीति, न त्वन्या निराचष्ट इति न कोऽपि दोषः ॥ १२ ॥

अणुश्च ॥ १३ ॥ पूर्वोक्तसर्वसमुच्चय इति । उत्क्रान्त्यादिवृत्त्यन्तधर्मसंग्रहः । तथाच

रश्मिः ।

साक्षादिति अहंकाररूपा वृत्तिः । साक्षादेवेति । श्रुत्युपदेशेऽहमेवेत्येवकारेणेन्द्रियरूपद्वारव्यवच्छेदकेन तथा । यथेत्यादीति । द्वाराणीन्द्रियाणि । तच्छेदश्चक्षुरादिनाभिमानत्वेन च । वृत्तयो ज्ञानानि धीशब्दवाच्यानि । 'कामः संकल्पः' इति श्रुत्युक्ताः कामादयः धीविशेषा एव । 'मनोमात्रमिदं ज्ञात्वा' इति वाक्यात् । एवकारस्तु द्वारप्रकारत्वं व्यवच्छिनत्ति । स च 'स्वसृष्टमिदमापीय'इत्याद्युक्तः । अत इत्यादि । कार्यं वृत्तिरूपं तन्मात्रात् । मात्रप्रत्ययेनावधारणार्थकेनानुव्यवसायव्यवच्छेदः । स्वरूपतो वृत्तिस्वरूपतो न तु व्यापारतापीत्येवकारो व्यापारव्यवच्छेदकः । अतः स्वरूपत एव कार्यमात्रेणोपकारादुपकरणत्वमिति योजना । योगेति । समाधिपादेस्तीदम् । योगसांख्ययोरनुपष्टम्भकत्वस्योपपादितत्वादुपष्टम्भकमाहुः उक्तेति । ननु प्रमाणवृत्तेः कथमेकादशस्वन्तर्भाव इति चेन्मनोभेदबुद्धिवृत्तित्वप्रकारेणेत्याहुः योगोक्तेत्यादिना । तृतीयेति षड्विंशे 'संशयोथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्' इति । एतेन विकल्पः संशयो निद्रा स्वाप इति योगसूत्रे व्याकृतम् । श्रुतिशास्त्रयोर्विरोधं परिहरन्ति स्म श्रुत्युक्ता इति । 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव'इति श्रुत्युक्ताः । योगेति । समाधिपादस्थम् । निरोध्यत्वेनेति 'अथ योगानुशासनम्' इत्यधिकृत्य 'योगश्चित्तवृत्तिनिरोधः' इति निरोध उपक्रान्तः । समाप्तौ च 'तस्यापि निरोधे सर्वनिरोधः' इति सूत्रेणोपसंहारान्निरोध्यत्वेनेत्यर्थः । ताः इति पञ्चवृत्तीः । अन्या इति पञ्चभिन्नाः । कोपीति श्रुतिसूत्रविरोधरूपः ॥ १२ ॥

अणुश्च ॥ १३ ॥ भाष्ये । संदिग्धमिति । अणुपरिमाणस्य परमाणुनिष्ठस्य निरवयवत्वेन न पञ्चधा विभागः । द्व्यणुकनिष्ठस्य विभागार्हत्वात्संदेहः । प्रकृते पूर्वोक्तेति । चन्नातिदेशेन श्रेष्ठश्चेति सूत्रीयचकारेणातिदेशेन प्राप्तं सकलधर्मवत्त्वं विषयः अणोरेकधा द्विधा वास्तविभागो न पञ्चधा



RUPNATHJI( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

स्वसामर्थ्याद् वृत्तयो वृत्तिसामर्थ्यात् सर्वशरीरव्याप्तिः । बहिर्भूयस्त्वेन प्रत्ययस्तु त्रिवृत्करणोप-रमद्भिः पोषणादुपपन्नः । तस्मादणुरेवासन्यः प्राण इति सिद्धम् । यत्पुनः प्राणसूक्ते 'सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण' इति विभुत्वमुद्गीथब्राह्मणे श्रावितम् । यच्च 'प्राणे सर्वं प्रतिष्ठितम्' इति सर्वाधारत्वं प्रश्नोपनिषदि श्रावितं 'सर्वं हीदं प्राणेनावृतम्' इति च श्रुत्यन्तरे तत्तु, उत्क्रान्त्यादिश्रुतिभिर्निश्चिते परिच्छिन्नत्वे सर्वस्य प्राणिजातस्य प्राणायत्तस्थितिकत्वेनोपपद्यते इति रामानुजाचार्याः । तेन व्यापककार्यकरणात् तत्सिद्धिनिबन्धना गौणी सा फलति ।

शंकराचार्यभास्कराचार्याभ्यां तु आधिदैविकेन समष्ट्यात्मरूपेण हैरण्यगर्भेण प्राणेन सूत्रात्मना तद्विभुत्वमिति न विरोध इत्युक्तम् । अस्माकमप्येतदेव संमतं किंचिद्वैलक्षण्येनेत्यग्रिमाधिकरणे सेत्स्यति ।

भिक्षुस्तु अणुशब्देन तन्मात्रकार्यं स्थूलमहाभूतपरमाणुं वैशेषिकप्रतिपन्नत्र्यणुकस्थानीयं योगभाष्यानुसारेणाङ्गीकृत्य ततः स्थूलमहाभूतोत्पत्तिमङ्गीचकार । तदपि व्यासानभिप्रेतमेव । अत्र तत्प्रसङ्गादर्शनात् । यदि हि तानणूनभिप्रेयात् तदा पूर्वपाद एव विपर्ययसूत्रात् पूर्वमेव तानपि विचारयेत् । यदि च तत्र प्रामाणिकत्वमभिप्रेयात्, श्रुतेरिति वा स्मृतेरिति वा हेतुं च

रश्मिः

संभवत्यतो यथाकथंचिद्द्वितीया कोटिः । 'पञ्चधा प्रविभज्य' इति श्रुतिविरोधान्नाणुः । सूत्रं तु प्राणव्यतिरिक्तेन्द्रियपरमिति पूर्वपक्षे, आसन्योऽप्यणुरिति सिद्धान्तः । अत्राशङ्काग्रे निराकरिष्यते । बहिर्भूय इति भगवतो व्यापकत्वेन प्राणाद्बहिर्भूयस्त्वेन प्रत्ययः संभवति मुख्यत्वात् । जीववद्व्यतिरिक्तेपि पञ्चानामेतत्समानस्य व्यानरूपेण अमृतबिन्दूपनिषदि प्रसिद्धम् । अन्यदप्याहुः त्रिवृदित्यादि । 'पुरुषं प्राप्य त्रिवृत् त्रिवृदेकैका भवति तन्मे विजानीहहीति' इति छान्दोग्यश्रुतेः । अद्भिरिति । 'आपोमयः प्राणः' इति छान्दोग्यश्रुतेः । उद्गीथेति छान्दोग्येस्ति । व्यापकेति सर्वेण समत्वरूपं व्यापककार्यं तत्करणात् । सर्वाधारकत्वं च व्यापककार्यम् । सर्वावरकत्वं च व्यापककार्यम् । एवं च सिंहो माणवक इतिवद्विभुः प्राण इत्येवं विभुत्वगुणयोगाद्गौणी व्यापककार्यकरणविभुत्वगुणसिद्धिनिबन्धना । तत्रेति समा एभिरित्यादिवाक्येषु । एभिः समः प्राण इत्यत्र प्राणे सर्वमित्यत्राधारेण समः प्राणः । सर्वं हीत्यत्र सर्वावरकेण समः प्राण इत्यत्र समपदप्रयोगो गौणोणुपदप्रयोगोऽणुश्चेत्यत्र मुख्यः । इवार्थेति । गीतायाम् 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इत्यस्यैकवाक्यता 'सर्वं खल्विदं ब्रह्म' इत्यत्रत्येवकारः । अग्रिमेति समनन्तराधिकरणे । अत एव प्राण इत्यतिदेशाधिकरणेन विभुत्वमिति नोक्तम्, दुरूहे जिज्ञासोदयात् । तन्मात्रेति द्व्यणुकमात्रकार्यम् । स्थूलेति । पीलुपाकवादिमतेन प्रसिद्धम् । द्व्यणुकपरमाण्वोरप्रत्यक्षादाहुः वैशेषिकेति । पीलुपाकवादिनां त्र्यणुकप्रत्यक्षमुक्तम् । अभिप्रेतत्वव्यावर्तक एवकारः । तत्र हेतुं तर्कौ चाहुः अत्रेत्यादिना । परमाणुभ्यः सृष्टिप्रसङ्गस्यादर्शनात् । तर्कावाहुः यदीति । अन्यज्ज्ञानं तर्कः । तानिति समवायिनः परमाणून् । क्व प्रसङ्ग इति चेत्तत्राहुः पूर्वपाद इति । पूर्वप्रकरणादेवकारः । पूर्वमिति स्थूलमहाभूतकारणत्वेन । तान् लाघवप्राप्तेरेवकारः । सारवद्विश्वतो मुखात् सूत्रादुच्यत इति चेत्तत्राहुः प्रामाणिकमिति । सूत्रं प्रमाणं सौत्रमित्यर्थः । अभिप्रेयाद्व्यासो भगवान् । श्रुतेरिति ।



DR. RUPNATHJI( DR. RUPAK NATH )
w.astrology-tantra.c

आध्यात्मिकाधिदैविकयोरेकत्वात् वदनादिकार्यार्थमाध्यात्मिका एव निरूपिताः । उद्गमने, 'एतस्माज्जायते प्राण' इत्यादिषु वागादीनां नियमेन तत्र जीवसान्निध्यं, स्वतश्चानिर्गमनं मृत्युरूपश्रमेण तत्र लयः पुनरुद्गमनं समष्टिव्यष्टिभावश्च अन्यथा नोपपद्येत ।

---

भाष्यप्रकाशः ।

देवोद्गमः कुतो नोक्त इत्यत आहुः आध्यात्मिकेत्यादि । तथाच साक्षादनुक्तावपि मन्त्रान्तरेणोक्त एवेत्यर्थः । नन्वेवं दृष्टार्थापत्तौ वागादिष्वेव तादृशं सामर्थ्यं कल्प्यम् । आध्यात्मिकादिस्मृतिवाक्ययोजनेनाधिष्ठातृकल्पने किं मानमत आहुः वागादीनामित्यादि । अन्यथा यद्येवं न कल्प्येत तदा आर्तभागब्राह्मणोक्तं ग्रहातिग्रहमोचने प्राणवागादीनां जीवसान्निध्यं 'तमुत्क्रामन्तं प्राणोनूत्क्रामति' इत्यादिवाक्यावगतं स्वतोऽप्राज्जीवदेहादनिर्गमनं, व्रतमीमांसायां 'तानि मृत्युः श्रमो भूत्वोपयेमे' इत्यादिनोक्तमृत्युरूपश्रमेणावगम्यमानः शरीरे लयः पुनरुद्गमनं, शुज्युब्राह्मणे 'वायुरेव व्यष्टिर्वायुः समष्टि' रित्यनेन बोधितो य आसन्यस्य समष्टिव्यष्टिभावश्चकारात् तत्र तत्रोक्तं चेतनतुल्यत्वम्, एतत् सर्वं नोपपद्येत । तथाच श्रुतार्थापत्तिः ।

कार्यप्रत्यक्षश्रवणवशात् । ज्ञानानुकूलव्यापारार्थत्वमावश्यकमत इत्यस्य भाष्ये प्रयोगात् । भङ्गीति भङ्गोऽस्यास्तीति भङ्गिपदं भग्नपरम् । अन्यद्भङ्गिः भङ्ग्यन्तरं तेनेत्यर्थः । तथा चैतस्माज्जायत इति श्रुतौ तावत्सर्वेन्द्रियाणीति पदं भङ्गि भवति । यावदाग्राह सर्वाणि दशेन्द्रियाणि तावदैतरेय्याह सर्वाणीत्यस्य पदस्याधिदैविकादिपरत्वमभिमृश्य देवतासहितानीन्द्रियाणीति । पूर्वभग्नपदसहितं भङ्ग्यन्तरं यथा । काव्यप्रकाशे नवमउल्लासे 'नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो, वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान् । युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः, सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः' इति । अत्र नारीणामित्याद्य आह । अपरस्तु न अरीणामित्येवं पदं भङ्क्त्वाह नारीणामित्यादि । आद्य आह । कश्चेतन इत्यादि । वामानां प्रतिकूलानाम् । अपि तु न कोपि प्रियमादधातीति । अपर आह । वामानां स्त्रीणामित्येवं वामपदस्य स्त्रीपरत्वमभिमृश्य हितकृदित्यादि । अपरस्तु हितकृत्पदे कृती छेदने धातुमुररीकृत्याह युक्तमित्यादि । पुनराद्यस्तु बलाभावपदे बला असुरास्तेषाममभावरूप इन्द्रः स चासौ प्रसिद्धात्मा च तस्येत्येवं बलपदस्यासुरपरत्वमभिमृश्याह सामर्थ्यमित्यादि । प्रकृते नारीणामित्यादिजानासीत्यन्तः प्रथमः पदभङ्गो नास्त्यत उक्तम् । भङ्ग्यन्तरेणेति । एवेति अनुक्तं मन्यते छनत्ति । भाष्ये एवकारेणाधिदैविकव्यवच्छेदः । प्रत्यक्षमात्रप्रमाणवादी चार्वाकः प्रत्यक्षानुमानवादी वैशेषिको वा शङ्कते नन्वेवमित्यादि । दृष्टार्थेति । ननु यौक्तिकावेतौ कुतोणुप्रत्यक्षानुमानभङ्गीचक्रतुरिति चेन्न 'अनागतमतीतं च' इति वाक्याद्योगिप्रत्यक्षसंभवात् । दृष्टार्थापत्तावनुमानार्थापत्ताविति वा । आध्यात्मिकेति या आध्यात्मिक इत्यादिस्मृतीत्यर्थः । समष्टीति । नन्वत्राग्रतः पूर्वं श्रुतिपाठक्रमश्च कुतस्त्यक्तो भाष्य इति चेन्न । लघ्वक्षरं पूर्वमित्यस्याल्पाच्तरं पूर्वमित्यत्र बलीयस्त्वबोधनार्थत्वात् । श्रुतिस्त्वङ्गाधीना न समासे पाठक्रमं बोधयति स्म । तत्र तत्रेति सगतिसूत्र उक्तम् । एवेति दृष्टार्थापत्तिव्यवच्छेदक एवकारः । अणुप्राणदर्शनस्य कलनासाध्यत्वात् ।

१ कार्याज्ञमात् ।



DR. RUPAK NATH
www.astrology-tantra.com

लोके स्वामिभृत्यन्यायेन जीवे भोगः फलिष्यति ॥ १६ ॥

इति द्वितीयाध्याये चतुर्थपादे सप्तमं प्राणवतेत्यधिकरणम् ॥ ७ ॥

---

भाष्यप्रकाशः ।

च तत् । जीवभोगप्रकारबोधनार्थमेव तत्परिकरविचारस्य प्रकृतत्वात् । अत्र च तस्यानधिष्ठातृत्वे अव्याख्याते तस्य भोगासिद्धौ विचारवैयर्थ्यापात इत्याशङ्कायामाहुः लोके इत्यादि । श्रुत्यन्तरे, 'स यथा महाराजो जानपदान् गृहीत्वा' इति दृष्टान्तेन मुख्यप्राणांशभूतानां तत्प्राणानामपि जीवपरिकरत्वेन स्वामिभृत्यन्यायसिद्धेस्तेन न्यायेन जीवे भोगो मुख्यप्राणात्मरूपप्राणाधिष्ठानादपि फलिष्यतीति न विचारवैयर्थ्यम् । तथा च करणत्वांश एव तस्य तासां चाधिष्ठातृत्वं, भोक्तृत्वेन तु जीवस्यैवाधिष्ठातृत्वमित्यर्थः ॥ १६ ॥ इति सप्तमं प्राणवतेत्यधिकरणम् ॥७॥

अथात्र प्रसङ्गाज्ज्ञानप्रक्रियां वदामः । तत्र गीतायाम् 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् । शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पञ्चैते तत्र हेतवः' इति भगवता जीवक्रियमाणकार्यं प्रति पञ्चहेतव उक्ताः । तत्राधिष्ठानं शरीरम् । कर्ता जीवः, करणं साधनमान्तरं च नानाविधं, चेष्टाः

रश्मिः ।

रामानुजाचार्यैस्तु ज्योतिरादिसूत्रमेतच्च सूत्रमेकमङ्गीकृत्य ज्योतिरादीनां प्राणवता जीवेन च प्राणविषयमधिष्ठानं परमात्मन आमननात्संकल्पात् कृतम् एतदन्तमिति ब्राह्मणरूपाच्छब्दादित्यर्थः ।

माध्वैस्तु जीवानां करणान्याहुः प्राणा इति । प्राणो वा एतानि करणानि चक्षुः श्रोत्रं मनो वागिति' इति श्रुत्योर्द्वितीयस्या गतिः प्राणवदादिसूत्रद्वयेनेति । प्रकृतेति । ज्योतिराद्यधिकरणे स्वतन्त्रा देवतन्त्रा वा वागाद्याः स्वतन्त्रता 'नो चेद्वागादिजो भोगो देवानां स्यान्न चात्मनाम् । श्रुतमभ्यादितत्वं भोगोऽभ्यादेस्तु नोचितः । देवदेहेषु सिद्धत्वाज्जीवो भुङ्क्ते स्वकर्मणा'इत्यधिकरणमालायां श्रुतमित्यादौ राद्धान्तः परमभोगस्य सिद्धत्वात् । तस्येति जीवस्य । मुख्येति जीव प्राणधारण इति धातुपाठात् । ननु साक्षात्कुतो नेति चेन्न । 'नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्'इत्यादिजिज्ञासाधिकरणोक्तगीतावाक्येभ्यः । 'अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयाम् । यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् । परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते' इति च । एवेति सूत्रे तृतीययैवकारः । तस्येति प्राणवतो जीवस्य । तासामिति इन्द्रियाधिष्ठात्रीणां देवतानाम् । एवेति प्राणव्यवच्छेदकः । तथा च श्रुतिः 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति । अत्रात्मोक्तः प्राणसहितो नोक्तः । न तु प्राणप्रयोजनमस्ति । 'ज्ञोत एव' इति सूत्रात् । तथाच गीता 'श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च । अधिष्ठाय मनश्चायं विषयानुपसेवते' इति ।

इति सप्तमं प्राणवतेत्यधिकरणम् ॥ ७ ॥

नित्यज्ञाननिरूपणेनेन्द्रियतदधिष्ठातृनिरूपणेन च स्मृतं जन्यज्ञानं निरूपयितुमुपक्रमन्ते स्म अथात्रेति । ज्ञानेति वेदान्तपरिभाषादौ दर्शनात्स्वराद्धान्तीयाम् । उक्तश्रुत्यर्थं सोपबृंहणं वक्तव्यमित्याशयवन्त आहुः तत्र गीतायामिति । अधिष्ठानं विषयविषया कारणम् । घटभूतलादिस्थले । अधिष्ठानकारणं हेतुरित्यन्ये । यद्यपि तथाप्यव्यक्तिस्थानं शरीरमिति मन्यते व्याकरिष्यते । कर्ता करणं च 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इत्युक्तश्रुतेः । आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षमिति नैयायिकाः । मानसप्रत्यक्षसंग्रहाय श्रुतौ नोक्तम् । पृथग्विधं चक्षुरादिना । चेष्टा व्यापारः तज्जन्यत्वे सति तज्जन्यजनको



RUPAK NATH JI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

प्राणादिवायुकर्माणि, शारीराणि च, दैवं कालकर्मभगवदिच्छा, अन्तर्यामी, मुख्यप्राणस्तथा इन्द्रियाधिष्ठातारश्च । एवं सति ज्ञानजनकमनःसंयोगादिहेतुभूतक्रियायामप्येतान्येव यथासंभवं कारणानि । तत्रायं क्रमः । पूर्वं भगवदिच्छया ईश्वरांशेनान्तर्यामिणा कालकर्मसाहित्यादन्तः-करणं प्रेर्यते । तच्चतुर्विधम् । तत्राहंकारदेवता रुद्रः, तस्य च 'हृदिन्द्रियाण्यसुर्व्योम' इति वाक्या-देकादशस्थानानीति रुद्राधिष्ठितोऽहंकारो देहिकेषु तेष्वभिमतिं जनयति । बुद्धिदेवता ब्रह्मा, तेनाधिष्ठिता बुद्धिर्ज्ञानेन्द्रियाण्यनुगृह्णाति । चित्तं तु सुषुप्तौ अभेदेनात्मानं गृह्णात्यन्यदा तु लीनम् । मनस्तु चन्द्राधिष्ठितं तच्चोभयविधेन्द्रियनायकं तत्तदिन्द्रियप्रेरणेन तेन तेन तत्तद्देवता-धिष्ठितेनेन्द्रियेण संयुज्यते । तदा तानि स्वस्वकार्यं कुर्वन्तीति साधारणी प्रक्रिया । ज्ञानेन्द्रिया-णि तु मनःप्रेरितानि स्वस्वविषयैः संसृज्य स्वसंसृष्टे मनसि पूर्वं निर्विकल्पकमुत्पादयन्ति । तदा इन्द्रियदेशे मनसो वृत्तिर्भवति । सा यदा बुद्ध्या वृत्तिद्वारेणानुगृह्यते तदा सविकल्पकं भवति तच्च प्रमेयानन्त्यादनन्तविधम् । तत्रापि कारणान्तरसमवधाने संशयविपर्यासप्रमाणस्मृति-भेदा जाग्रति भवन्ति यथासंभवं स्वप्नेऽपि । सविकल्पकजनने ज्ञानोपादानबुद्धौ तु विशेषः ।

'इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ।
चेतनां हरते बुद्धेः स्तम्बस्तोयमिव ह्रदात्' ॥

रश्मिः ।

व्यापारोऽत्र । दैवं अदृष्टम् । एवकारोऽन्यव्यवच्छेदकः । शारीरेति । कायवाङ्मनसां साधनत्वं कायिकवाचिकमानसिकसाधनानीति । कर्म, ज्ञानोपलक्षकम् । कर्मेति । स्वभावोऽपि द्रष्टव्यः । भगवदिच्छेति । इच्छावादात् । अन्तर्यामी अप्रकाशितः । त्रिषु द्वितीयं रूपम् । मुख्येत्याद्युक्तं प्रथमे महत्स्रष्टरीदमित्थतयाऽज्ञातं, द्वितीये रूपे ज्ञातं, तृतीये सर्वभूतस्थे व्यष्टयः । एवमिति सोपष्टम्भकश्रुत्युक्तत्वे सति । ज्ञानेति । एवं च श्रुत्वा आत्मा मनसा युक्तः, मन इन्द्रियेण युक्तं, संयोगसमवायादिसंबन्धेन योजयतीति बोधितम् । आदिशब्देन संयुक्तसमवायादिर्ज्ञाने-न्द्रियेण कर्मेन्द्रियेण समवायसमवेतसमवायादिः । ईश्वरेति पुरुषरूपद्वितीयरूपेण । कालेति । तेन ज्ञानप्रक्रियाज्ञानसृष्टिरिति सूचितम्, सृष्टौ कालकर्मस्वभावानां कारणत्वात् । प्रेर्यत इति । सूर्योदये सति रश्मिद्वारा प्राणप्रवेशे सर्वप्रवृत्तिदर्शनात् । तेनान्तर्यामी मार्तण्ड उक्तः । तत्राहमिति । तृतीयस्कन्धे स्पष्टः । तस्येति हृदादिषु । अभीति । सर्वोपनिषच्छ्रुतेः । अन्विति । तृतीयस्कन्धे षड्विंशे । अभेदेनेति । सुषुप्तिश्रुतेः । लीनमिति कार्याभावेऽणोरभिव्यक्त्यभावाल्ली-नम् । मनसीति 'कामः संकल्पः' इत्यादिश्रुतेर्मनसि न त्वात्मनीत्यर्थः । निर्विकल्पकम् निष्प्र-कारकं ज्ञानम् । इन्द्रियेति गोलके । वृत्तिर्ज्ञानरूपा विषयाकारा । सेति वृत्तिः । बुद्ध्येति कर्त्र्या । वृत्तिद्वारेति वृत्तिः स्वयमेव द्वारं यस्याः सा । द्वारान्तरनिवर्तनार्थम् । सविकल्पकमिति । अयमर्थः । इन्द्रियसंयुक्तेनार्थेन घटघटत्वे इति निर्विकल्पकं बुद्धिमन्तरापि । बुद्ध्या तु समवायं निश्चित्य घटत्वविशिष्टो घट इति सविकल्पकं ज्ञानं जन्यत इति । प्रमेयेति घटपटकुम्भकुसूलादिप्रमेयम् । कारणेति सत्त्वादिगुणाः कारणानि । प्रमाणं निश्चयः । भावे ल्युट् । प्रमेत्यर्थः । अपीति । सुषुप्तौ तु सुखमहमस्वाप्सं न किंचिदवेदिषमिति प्रत्ययात्र ज्ञानम् । सविकल्पकेति सविकल्पकज्ञानेन जन्यायां ज्ञानोपादानबुद्धावित्यर्थः । इदमसंगतमतोऽत्र सविकल्पकज्ञानोत्तरभाविन्यामित्यर्थः । अतः सविकल्पक-ज्ञानजनकबुद्धौ सविकल्पकज्ञानजन्यत्वमुक्तलक्षणम् । तदभिव्यक्तिस्तु सविकल्पकज्ञानानन्तरम् ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः।

इति चतुर्थस्कन्धे द्वाविंशे वाक्याद्विषयैरिन्द्रियाकर्षस्ततस्तैर्मनसस्तच्च कामादिहतमिति तत्र कामोत्पत्तावुपादानबुद्धिः। तादृशे मनसि द्वेषोत्पत्तौ तु हानबुद्धिः। न चात्र ध्यायतामिति पदात् स्मृतानामेव विषयाणामिन्द्रियाकर्षकत्वं न प्रत्यक्षाणामिति वाच्यम्। कामिनीकुचकुम्भदर्शनादौ चक्षुषः, शीतादिकालेषूष्णादिना त्वचो, रागादियुक्तगीतेन श्रवणस्य, चन्दनादिगन्धेन घ्राणस्य, भक्षितस्यापि द्रव्यादेः पुनरास्वादनेन रसनस्य, तैश्च मनस आकर्षस्यानुभवसिद्धत्वात्। तेषामेव विषयाणां किंचित्प्रत्यक्षान्तराये तेषामेव स्मृतत्वस्य संभवाच्च। मनसश्च रूपद्वयं चाञ्चल्यमान्तरं चेति तृतीयस्कन्धे तत्त्वस्तुतौ, 'पराहृतान्तर्मनसः' इत्यस्य सुबोधिन्यां स्थितम्। तत्रान्तरं येन विषयेणेन्द्रियद्वाराऽऽकृष्यते तद्विषयिणी हानोपादानबुद्धिर्भवति, येन तु नाकृष्यते तद्विषयिण्युपेक्षाबुद्धिरिति युगपज्ज्ञानाबुद्धिसत्त्वम्। न च तत्र वेगाद्यौगपद्याभिमान एवेति वाच्यम्। ऐकाग्र्यदशायां पुस्तकदर्शने युगपज्ज्ञानाऽक्षरापेक्षाज्ञानस्थले वेगाङ्गीकारस्यानुभवविरुद्धत्वात्। अतो रूपद्वयमेव युक्तमिति। यदा मनसोऽनाकर्षस्तदोपेक्षाबुद्धिः। अत एव तस्या न स्थिरत्वम्। अभ्यासाद्यभावात्। अन्यासां तु स्थिरत्वमिति। बुद्ध्याऽननुग्रहे तु निर्विकल्पकमेव। इन्द्रियाणि तु प्राप्यप्रकाशकारीणि। तत्र चक्षुरिन्द्रियं स्वकिरणैर्वा, स्वाधिष्ठात्रादित्यसामर्थ्याद्वा, स्वगुणेन रूपेण वा, स्पर्शेन वा विषयदेशं प्राप्नोति। तथैव तदाऽऽर्द्रं मनोऽपि। तदा विषयदेशावच्छेदेन घटो भूमौ, व्योम्नि तारा इत्यादिज्ञानमुत्पद्यते। तत्र किरणपक्षे नयनकिरणा विषयपर्यन्तं गच्छन्ति। इन्द्रियान्तरे तु किरणाभावादिन्द्रियेण सह विषयं मनः प्राप्नोति। तदा क्रमेण सहैव वा निर्विकल्पकं सविकल्पकं च तत्तदिन्द्रियसंसृष्टे मनसि उत्पद्यते। ज्ञानद्वयेऽपि विषये विषये-

रश्मिः।

तद्विषयहानोपादानाभ्यां भवतीति नासंगतम्। हानं त्यागः। ध्यायतामिति। ध्यै चिन्तायाम्। चिति स्मृत्यामिति धातुपाठः। एवकारस्तु धातुपाठप्रामाण्यात्। कामिनीति। आदिना भगवदालयादिदर्शनम्। तेषामित्यादि। एवकारेणेतरविषयव्यवच्छेदः। किंचिदिति। मनसश्चञ्चलत्वाद् अन्यत्रमना अभूवं नापश्यमिति दर्शने पुनः केनाप्युपायेन भक्तिरूपेण तद्दर्शने तेषामेव विषयाणां स्मृतत्वं स्मृतिविषयत्वं तस्य संभवात्। तथा च ध्यायतामिति स्मृत्यर्थकप्रयोगो न विरुद्धः। सर्वस्य स्मृतिकत्वाज्ज्ञानस्य हानोपादानाभ्यां तयोर्भेदमाहुः तत्रेति। आकृष्यत इति मन आकृष्यते। येनेति ज्ञातेनेति शेषः। ज्ञानेति ज्ञानकारणीभूतया ज्ञानोत्तरमभिव्यञ्जिकाबुपाधी। येनेति। ज्ञातेन द्विष्टेन। उपेक्षा त्यागः। तस्या इति उपेक्षाबुद्धेः। अभीति। आदिना मनोरमत्वम्। एवेति। बुद्ध्यायं पदार्थोज्ञानाति बुद्धिमानयं पदार्थोज्ञानातीति ज्ञानविषयत्वेन घटघटत्वयोः प्रवेशवद्विषये संबन्धस्य हानोपादानयोश्च प्रवेशे करणत्वादिबुद्धेर्न स्यादित्येवकारः। स्पर्शेनेति संयोगेन। प्रत्यासत्त्यन्तरे स्पष्टम्। प्राप्नोतीति आत्मा तु न प्राप्नोति। 'नैव किंचित्करोमि'इति वाक्येभ्यः। 'मायासंमोहितो जीव आत्मानं त्रिगुणात्मकं। परोपि मनुतेऽनर्थं तत्कृतं' च प्राप्नोति। तदारूढमितीन्द्रियारूढम्। तदेति विसर्पिगुणत्वेप्यणोर्मनसोप्यिन्द्रियारोहेण विषयदेशप्राप्तिकाले। आदिना घटस्तत्त्वमिति ज्ञानम्। क्रमेणेति बुद्ध्यभिव्यक्तौ क्रमेण। संबन्धग्राह्यभ्यासवतस्तु सहैव। अनुभवादेवकारः। मनसीति पूर्ववत् न त्वात्मनि। ज्ञानेति सविकल्पकं निर्विकल्पकं चेति ज्ञानद्वये।



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

रात्रावप्यादित्यरश्मिसंबन्धस्योक्तत्वात् तदानीं संध्यायां च नाडीसूत्ररश्मिभिर्विषयस्य प्रापणाच्च घटाद्यदर्शनप्रसङ्ग इति वाच्यम् । नाडीसूत्ररश्मीनां हृदयाग्रप्रद्योतनजीवोत्क्रमणमात्र[...]ताया एव श्रावणेन तद्रश्मीनां रूपप्रापकताया वक्तुमशक्यत्वात् । तदानीमपि रूपप्रापकत्वाङ्गीकारे तदानीं तत्सत्त्वात् 'अस्तमिते आदित्ये, किंज्योतिरयं पुरुषः' इत्यादिज्योतिर्ब्राह्मणविरोधस्य प्रत्यक्षविरोधस्य च दुष्परिहरत्वात् । अतो 'नेतृत्वं द्रव्यशब्दयोः' इति [...]दित्यादिरश्मीनां रूपप्रापकत्वस्याशब्दगोचरत्वात् सूर्यरूपदेवताया रूपप्रापकत्वाङ्गीकार [...] न युक्तः । किंच । चक्षुषि रूपप्राप्तिश्च प्रतिबिम्बभवनरूपैव । सा तु मायया 'ऋतेऽर्थं यत् प्रतीयेत' इति वाक्यात् । तस्या विक्षेपकत्वाच्च । एवं च बुद्ध्याकारसमर्पकत्वमपि प्रतिबिम्बस्यैव । आध्यात्मिकरूपमपि मायामयम्, मनोमयत्वात् । तस्य च न सत्यता, अर्थक्रियाकारित्वमात्रं परम् । आधिदैविकं तु शब्दैकनिष्ठं भगवदात्मकं तत्सत्यमेव । आधिभौतिकं तु प्रपञ्चात्मकम् । तस्य तु कार्यरूपत्वेऽपि कारणरूपेणैव सत्यत्वं, न तु स्वेन रूपेण विकाराणां वाचाऽऽरब्धत्वात्, सदसद्ग्रन्थिरूपत्वाच्च । तदेव च लौकिकव्यवहारविषय इत्येवं चाक्षुषे बोध्यम् । स्पार्शने तु त्वगेव स्वगुणेन स्पर्शेन सर्वं शरीरं व्याप्नोति, न तु ततोऽग्रे गच्छति । घ्राणरसनश्रवणानि तु स्वस्वगोलके स्थित्वा सर्वस्मिन् शरीरे यथोचितं कार्यं स्वगुणद्वारा वा स्वदेवतासामर्थ्यादेव वा कुर्वन्ति । कर्मेन्द्रियेषु तु वाचः स्पर्शो बहिर्गच्छति । अत एव 'न कंचिन्मर्मणि स्पृशेत्' इत्यादीनि वाक्यानि । महागुलीयभशब्दे विद्युच्छब्दे च तत्स्पर्शेन हृदयकम्पभित्तिपातादिकं युज्यते ।

रश्मिः ।

तत्सत्त्वादिति आकाररूपरूपसत्त्वात् । इदं पुरुषे बोध्यम् । चकारः प्रत्यक्षविरोधसमुच्चायकः । नेतृत्वमिति वायुनिष्ठम् । अशब्देति शब्दस्य गोचरः शब्दगोचरः, तस्य भावः शब्दगोचरत्वम्, न शब्दगोचरत्वमशब्दगोचरत्वं, तस्मात् । प्रतीति बुद्धेः प्रतिबिम्बभवनरूपा । बुद्धेस्त्वान्तरत्वात्करणानां शुद्धत्वात् । एवकारस्तु सन्मुखाव्यवहितदेशस्थत्वात् । सेति प्रतिबिम्बभवनरूपा । ऋत इति द्वितीयस्कन्धनवमाध्यायवाक्यम् । प्रतिबिम्बस्य बुद्धेर्वावरणाभावादाहुः तस्या इति रजोरूपायाः । बुद्धिविक्षेपकत्वं करणे । एवं चेति मायया चक्षुषि विक्षिप्तबुद्ध्याकारप्रतिबिम्बे च । एवेति सूर्यदेवताव्यवच्छेदः । ननु कथं प्रतिबिम्बस्य बुद्ध्याकारसमर्पकत्वम् । स्वस्य स्वाकारसमर्पकत्वाभावादिति चेन्न । मायात्वेन स्वाकारसमर्पकत्वं प्रतिबिम्बत्वेन तु बुद्ध्याकारत्वं, प्रतिबिम्बे रूपद्वयात् । आध्यात्मिकेति ज्ञानाश्रितेत्यादिग्रन्थेन पूर्वमुक्तम् । मनोमयेति । बुद्धेर्मनोभेदत्वादिति भावः । अर्थेति अर्थेन पदार्थेन क्रिया स्वविषयकज्ञानं तत्कारित्वम् । मात्रचा घटादिभिर्जलाहरणादिकारित्वव्यवच्छेदः, शुक्तिरजतवत् । आधीति विशुद्धसत्त्वं तत्सत्त्वप्रधानबुद्धेराधिदैविकं भवति । शब्देति 'शब्द इति चेन्नातः' इति सूत्रात् । द्वितीयस्कन्धनवमे ……………………भगवदिति । भगवानात्मा यस्य विशुद्धसत्त्वस्य । तावता नित्यम् । एवकारस्तु ज्योतिषे 'वासुदेवः परं ब्रह्म एष छन्दसि पठ्यते' इति वाक्यात् । सदसदिति सत् कारणरूपमसत् कार्यरूपम् । ग्रन्थिरैक्यकः । तदिति सदसद्ग्रन्थिरूपम् । एवकारेणाधिदैविकव्यवच्छेदः । लौकिकेति चक्षुःसन्निकर्षजन्यो लौकिको व्यवहारस्तस्य विषयः । एवेति स्वगुणव्यवच्छेदः । चाकारद्वयं पूर्वतन्त्रात् । इत्यादीनीति प्रसिद्धम् । हृदयेति । आदिना गर्भपातः ।



RUPNATHJI ( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

पायूपस्थहस्तपादास्तु घ्राणादिवदेव स्वस्वगोलके स्थित्वा सर्वस्मिन् शरीरे यथोचितं कार्यं कुर्वन्ति । अत एव हस्ताभ्यां चलनं, पद्भ्यां तालादिवादनं, शिश्नेन मूत्रादिविसर्ग इत्यादिकं, द्विगोलकत्वमनु-भवत्रापि स्थितिश्च संगच्छते । इदं च सर्वं ज्ञानं कर्म च अन्तःकरणाध्यासाज्जीवात्मा स्वस्मिन्न-भिमन्यत इत्यतो लौकिकानां नैयायिकादीनां ज्ञानेच्छादिष्वात्मधर्मत्वप्रवाद इति । अन्तःकरणा-ध्यासस्तु हृदयदेशे जीवस्यान्तःकरणानां च स्थितत्वात् तेषु तत्प्रतिबिम्बे तस्य तावन्मात्रसेन्द्रियेषु प्रतिबिम्बान्तरे इन्द्रियाध्यासस्तस्य देहे प्रतिबिम्बे देहाध्यासश्च भवति । प्रतिबिम्बश्च तत्प्रकाशस्य तेषु क्रमेण भवति सूर्यस्येव, न तु मुख्यस्येव सन्निधिमात्रेणेति निर्णीतम्, 'यथा जलस्य आभासः' इत्यत्र तृतीयसप्तविंशाध्याये । एवंच पूर्वकृतस्य प्रारब्धकर्मणः परस्य जाग्रति फलभोगे क्रिय-माण आहारश्रमादिभिर्यदा निद्रा भवति तदा स्वापः स्वप्नवृत्तिः तदायं हृदयदेशाभिःसृत्य हिताभिधानासु शुक्लनीलहरितलोहितपीतरसभृतासु केशसहस्रभागवत्सूक्ष्मीषु नाडीषु द्वासप्तति-सहस्रसंख्यासु तस्यां तस्यां कचिदीश्वरेच्छादिवशेनान्तःकरणान्यादाय परिवर्तते । तदा चैतन्यसंकोचनेन बहिरिन्द्रियेषु मनसि च प्रकाशासंक्रमात् प्रतिबिम्बो न भवति । बुद्ध्यहंकार-योरेव तु भवति । तदा बुद्धिसहितोऽहंकाराध्यासेन स्वाप्ने सुखदुःखादि भुङ्क्ते । तत्र प्रकाशो भगवतो, विषयश्च मायिकः । भोगे बुद्धिः करणं, भोगश्चाहंकारे । यदा पुनर्निद्रायां

रश्मिः ।

पाय्विन्द्रियादि । आध्यात्मिका ग्राह्या न गोलकरूपाः । द्विगोलकानामिति विशेषणस्य वक्ष्यमाण-त्वात् । तालादीति आदिना मर्दलः । मूत्रादीति आदिना रेतः । द्विगोलकेति आदानचलनकर्मणोर्हस्तौ गोलकौ । पादौ चेति द्वयोः कर्मणोर्गोलकौ । ननु हस्तगोलके न पादगोलक-भेदः पादगोलके न हस्तगोलकभेद इति कथमैक्यं प्राप्य गोलकद्वयमिति चेन्न । द्वौ गोलकौ येषां चलनतालादिवादनानामिति समासात् । भेदेऽपि गोलकान्तरे स्थितौ बाधाभावात् । चक्षुःश्रवसि गोल-कान्तरस्थितिवत् । एवमन्यत् । उभयत्रेति हस्तपादयोः एवमन्यत्र । आभ्यामिति पश्याम्यहमहं गृह्णामीत्यादिप्रत्ययेभ्योऽभिमन्यते । नैयायिकेति । आदिना वैशेषिकमायावादिनौ । ज्ञानेच्छेति । आदिना यत्नः । आत्मेति न तु जन्यज्ञानस्य मनोधर्मत्वप्रवादः । तेष्विति प्रतिबिम्बयोग्यशुद्ध-त्वादिति भावः । तस्येत्यादि । प्रतीति चैतन्यगुणप्रतिबिम्बः प्रतिबिम्बान्तरं तस्मिन् । प्रतिबिम्बसं-बन्धेनाहं पश्यामीतीन्द्रियाध्यासः परस्मिन्परावभासः । तस्येति जीवस्य । देहाध्यासोऽहं स्थूल इति । ननु देहस्याशुद्धत्वात्कथं प्रतिबिम्ब इत्यत आहुः प्रतिबिम्बश्चेति । मुख्यस्येति सन्मुखस्थितार्थस्य । आहारेति । आदिशब्देन मन्दता । स्वप्नवृत्तिः स्वप्नविशेषः । ईश्वरेच्छेति । आदिनाऽदृष्टम् । प्रतिबिम्ब इति प्रकाशसंक्रमस्वरूपकः । एवेति चित्तमनसोर्व्यवच्छेदकः । बुद्धिसहित इति । प्रयोजनं विशेषणस्य भोगः, अन्यथा निराकारः कथं भुञ्ज्यात् । तथा च श्रुतिः 'अङ्गुष्ठमात्रो रवितुल्यरूपः कामाहंकारसमन्वितो यः । बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोऽपि दृष्टः' इति । अहंकारोऽनात्मनो देहादीनभिमन्यते सोऽभिमान इति श्रुत्युक्तः । तदध्यासोऽहं बद्ध इति । यद्यप्यहं बद्धः इति प्रत्ययः । तथापि कादाचित्कः । कंसः पाप इतिवत् । सुखेति । आदिना मरणम् । अत्रात्मा स्वयंज्योतिर्भवतीति श्रुतेराहुः तत्र प्रकाश इति । तत्र स्वप्ने । प्रकाशो ज्योतिः । करणमिति सुखदुःखसुखस्वभावस्य बुद्धेर्गुणेन सहितत्वात् । भोगश्चेति अहंकारे सति भोगो भवति ।



RUPNATHJI(DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

'सलिल एको द्रष्टा भवति' इति श्रुत्या सुषुप्तावेव जीवब्रह्मणोरेकीभावश्रावणात् तदितरत्र तदुपगमे श्रुतिविरोधाज्जाग्रदादौ व्यावर्तकोपाधेर्विद्यमानत्वाच्च दर्पणसत्त्वे बिम्बयोरिव जीवब्रह्मणोरभेदस्याशक्यवचनत्वात् । किंच । जीवब्रह्मणोरिदानीमभेदेऽन्योन्यधर्मविनिमयात् ब्रह्मणोऽल्पज्ञताऽन्यस्य सर्वज्ञता चापत्स्यत इति नोक्तदूषणोद्धारसंभवः । यदि च बिम्बभूतं विषयाधिष्ठानचैतन्यमेव साक्षादाध्यासिकसंबन्धलाभात् विषयप्रकाशकमित्याध्यासिकसंबन्धोपलक्षितचैतन्यात्मना जीवैकीभावो, न तु बिम्बत्वविशिष्टरूपेणेति भेदस्यापि सत्त्वाद्वाक्योक्तदूषणापत्तिरिति विभाव्यते, तदापि विषयतादात्म्यापन्नब्रह्मस्वैकीभावो जात एवेति अहं घट इत्याकारकज्ञानापत्तिः । अध्यासेनान्तःकरणतादात्म्यापत्त्याहमिति ज्ञानवत् । अन्तःकरणधर्माणां सुखादीनां स्वस्मिन्नभिमानवत् विषयधर्माणामप्यभिमानप्रसङ्गः । अयं घट इत्यादिज्ञानाभावश्च स्यात् । यदि च विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टाया वृत्तेरग्रभागे विषयप्रकाशकं प्रतिबिम्बमर्पयति तस्य प्रतिबिम्बस्य जीवेनैकीभावोऽभेदाऽभिव्यक्तिस्तस्यां सत्यां विषयप्रमितिरिति विभाव्यते तदा तु सुतरामसंगतम् । वस्त्वन्तरावरुद्धे दर्पणादौ प्रतिबिम्बादर्शनात् विषयसंसृष्टेऽग्रभागे प्रतिबिम्बायोगाद्विषयप्रकाशस्यैवाभावप्रसक्तेः । किंच । प्रतिबिम्बार्पकं चैतन्यं यदि विषयात् बहिस्तदा तस्य वृत्तिसंसृष्टत्वात् प्रतिबिम्बायोगः । यदि च विषयान्तस्तदापि विषयेण व्यवधानात् तथा । यदि विषयादूरवर्ति तदा विषयावच्छिन्नत्वस्यैवायोगः । किंच । अन्तःकरणोपाधिपरिच्छिन्नप्रतिबिम्बस्याणुत्वाद्दूरदर्शने वृत्तिद्वारा तस्य निर्गमात् प्राणानामपि निर्गमापत्तिः 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इति श्रुतेः । किंचैवं कल्पनैकशरणत्वे गोलकद्वारा तैजसस्य वेगवतो वृत्तिरूपपरिणामस्य निर्गमादेव प्रमातृवृत्तिविषयचैतन्या-

रश्मिः ।

'कुल्याल्पा कृत्रिमा सरित्' । सुषुप्ताविति । सलति । सल गतौ । सलिकलीतीलच् । यौगिकः सलिलशब्दो वेदान्ते । जले योगारूढः । एवकारेण जाग्रत्स्वप्नौ व्यवच्छिद्येते । जाग्रदादाविति । आदिना स्वप्नः । जाग्रति तत्त्वमस्यादिवाक्यव्यवस्थामाहुः दर्पणेत्यादिना । शक्येति जाग्रतिशक्यवचनत्वात् । विषयेति । यस्मिन्नेतत्कल्पितम् । एवकारोन्यचैतन्यव्यवच्छेदकः । साक्षात्त्वं यथा शुक्तिरजतं तथाध्यासिकसंबन्धलाभात् । अहंवृत्तिं विशेषेण सिनोमीति विषयाध्यासः । अध्यासेन संसृष्टोध्यासिकः । तेन संसृष्ट इति ठक् । विषयो घटादिः । विषयकं विषयाधिष्ठानचैतन्यम् । अज्ञाते कः । तस्य प्रकाशकं प्रमातृचैतन्यम् । अहमितीति । अस्मत्प्रत्ययगोचरत्वमन्तःकरणावच्छिन्नस्यैवेति । विषयेति घटत्वजडत्वादीनाम् । इत्यादीति मया दृश्यत इत्यादिशब्दार्थः । घटमहं जानामीत्यनुव्यवसायः आदिशब्दार्थो वा । भेदसंबन्धघटितप्रत्ययो न स्यादित्यर्थः । प्रतिबिम्बमिति । वृत्तेः स्वच्छत्वादिति भावः । अयं प्रतिबिम्बश्चतुर्थः प्रमात्रादिप्रतिबिम्बेभ्योधिकः । एकीभाव इति । अभेदाभिव्यक्तिरिति पदच्छेदः । विषयेति विषयसंसृष्टो यो वृत्त्यग्रभागस्तस्मिन् । प्रतिबिम्बेति । विषयावरुद्धत्वादिति भावः । एवकारोन्याभावप्रसक्तिं व्यवच्छिनत्ति । अभावेति । भावविषयचैतन्ययोरैक्याभावादिति भावः । वृत्तीति अन्तःकरणपरिणामभूताया जडायाः संसर्गात् । जडेऽस्वच्छे प्रतिबिम्बायोगः । एवेति एवकारः प्रतिबिम्बायोगं व्यवच्छिनत्ति । निर्गमादिति विषयचैतन्यैक्यार्थं निर्गमात् । श्रुतेरिति । तथाच मृतावस्थया जीवनदशानुपपत्तिरिति भावः ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

विषयाश्रितावरणपक्षस्यैव दुष्टत्वात् पुरुषाश्रितपक्षे तूक्तरीत्या प्रमातरि प्रमाणे प्रमेये च वक्तुमशक्यत्वेन घट्टकुटीप्रभातवदननुभवस्य सर्वाऽनुभवगोचरत्वस्य वापाताच्छुक्तिरजतस्याऽप्येतत्तुल्यत्वात् । एवं मूलाज्ञानावस्थारूपाज्ञानानां नानात्वमङ्गीकृत्य घटावरकाज्ञानस्य घटाकारवृत्त्या निवृत्तावपि नैश्चल्यावरकस्यानिवृत्त्या भ्रमविक्षेपादरणेऽपि पूर्वोक्तरीत्या पुरुषनिष्ठतैव तस्य वाच्येति चैतन्याभेदस्य पूर्ववदेवासिद्धेः । वृत्तेर्ज्ञानात्मकत्वमात्रकल्पनया तस्योत्पत्तिनाशशालित्वमात्रेण निर्वाहे विषयावरणतन्नानात्वकल्पनयोर्गुरुत्वादप्रामाणिकत्वाच्च । एतेनैव घटावरकाज्ञानगतावरणशक्तिमात्रनिवृत्तिर्न तु विक्षेपशक्तिनिवृत्तिरपीति पक्षो निरस्तो बोध्यः । नैश्चल्यावरणमन्तरेण भ्रमणविक्षेपासंभवादावरणशक्तिनिवर्तकतया अप्रयोजकत्वाच्च । जलप्रतिबिम्बितवृक्षाधोऽग्रत्वभ्रमे तु प्रतिबिम्बपदार्थस्यातिरिक्तत्वेन मूलसमीपवर्तिनि जले मूलस्य ततो विप्रकृष्टेऽग्रस्य प्रतिबिम्बात् प्रतिबिम्बत्वेनैवावगाहाद् भ्रमत्वस्यैव दुर्वचत्वेन

रश्मिः ।

दृष्टान्तबलेनेति भावः । अस्येति भ्रान्तस्यापीदमंशज्ञानाद्यननुभवापत्तेः । विषयाश्रितेति शुक्तिरजतादिस्थल इत्यादिना पूर्वमुक्तस्य । विषयाश्रितं यच्चैतन्यं तदावरणपक्षस्य । एवेति । षष्ठ्यन्तम् । अवधारणस्य । उक्तेति चिदुपरागपक्षदूषणावसरोक्तरीत्या । प्रमातर्यन्तःकरणावच्छिन्नचैतन्ये पुरुषपदवाच्ये । प्रमाणेऽन्तःकरणवृत्त्यवच्छिन्नचैतन्ये । तद्वान्यन्तःकरणचैतन्यं पुरुषः । प्रमेये विषयावच्छिन्नचैतन्ये विषयचैतन्याभेदेन वर्तमानः पुरुषः । घट्टकुटीति । 'घटः समाधिभेदेभ-शिरःकूटकुटेषु च' इति विश्वः । स्यात्कुटी कुम्भदास्यां च शरायां चित्रगुच्छक इति च । तथा च यथा कस्यचित्संन्यासिनः स्तेयकृतो वा स्वस्थाने व्युत्क्रम्यान्यत्र स्निग्धस्य घटकुट्याः समाधिभेदकुम्भदास्या निर्गतस्य संन्यासिनो योगिरूपस्योपनिषदमावर्तयतः । आरणमावर्तयेदिति संन्यासिधर्मेषु पाठात् । यथा वा तथा घटकुट्याः इभशिरःकुम्भदास्या निर्गतस्य स्तेयकृतो गजकुम्भमुक्तान्यस्तेयकामस्यान्यदलभमानस्य तत्रैव प्रभातं तथा तवाननुभवसर्वानुभवगोचरत्वाभ्यां निर्गतस्यानुभवयत्किंचिदनुभवगोचरत्वकामस्य युक्तीरलभमानस्य तत्रैव अननुभवसर्वानुभवगोचरत्वयोः प्रभातम् । ननु यथा दृष्टं शुक्तिरजतवदिदमंशे आवरणभङ्गरजतांशेनेत्येवं किंचिज्ज्ञत्वदृष्टानुसारी चेत्तत्राहुः शुक्तीति । प्रमातृप्रमाणप्रमेयाणां तत्रापि सत्त्वात्तुल्यत्वम् । मूलेति मूलस्याज्ञानस्यावस्थारूपाण्यज्ञानानि तेषाम् । भ्रमेति । भ्रमरूपो विक्षेपस्तस्यादरणे । पूर्वोक्तेति । विषयावरणपक्षस्य दुष्टत्वपुरःसरं द्वितीयपक्षरीत्या । एवकारेण विषयनिष्ठता व्यवच्छिद्यते । तस्येत्यावरणस्य । वाच्येति इतिर्हेतौ । पूर्ववदिति नेदं युक्तं भातीत्यादिग्रन्थोक्तदूषणेनैव । एवकारस्तु न शुष्कतर्केभिनिवेशः कर्तव्य इत्यधिकयुक्तिव्यवच्छेदकः । ज्ञानात्मेति । मात्रप्रत्ययेन विषयावरणतन्नानात्वकल्पनयोर्व्यवच्छेदः क्रियते । नत्विति । आवरणशक्तिमात्रनिवृत्त्या घटावरकाज्ञानसत्त्वात्तस्य रजःशक्तेर्विक्षेपिकायाः सत्त्वान्नतु विक्षेपशक्तिरपीत्यर्थः । भ्रमणेति भ्रमणरूपविक्षेपस्तस्यासंभवात् । जलेति । कनीनिकादर्पणविशेषयोरपि प्रतिबिम्बितेत्यादिवाच्यः । प्रतिबिम्बत्वेनेत्येवकारो भ्रमविषयत्वेनावगाह्व्यवच्छेदकः । एवेति । प्रतिबिम्बत्वेनानु-

१. [illegible]



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

भाष्यप्रकाशः ।

तत्रावरणादिकल्पनाया एवायोगाच्चेति दिक् ।

अतो जन्यज्ञानस्येन्द्रियान्वयव्यतिरेकानुसंधानदर्शनाच्छक्तिग्राहकेषु कोशादिषु, 'बुद्धिरुपलब्धिर्ज्ञानं संवित्' इति चिदादिभिः सह बुद्धेरैकार्थ्येन बुद्धेर्ज्ञानात्मकत्वनिश्चये तत्र ज्ञानावरणकल्पनाया अयुक्तत्वाच्च जन्यज्ञानमतिरिक्तमेव । तदुत्पत्तिप्रणाली च पूर्वोक्तरीतिकैवेति निश्चयः । भगवत्साक्षात्कारे तु नैषा प्रणाली । तस्य प्रमेयबलादेव भवनात् । नायमात्मेति श्रुत्या तत्साधननिरासेनोपलक्षणविधया निरस्तत्वात् । उत्तरार्धे वरणस्य लाभसाधनत्वकथने स्वस्य तनुविवरणसाधनत्वोक्तेश्च । वरणं वाऽनुग्रहः । स च धर्मान्तरमेव, न तु फलात्मता । 'यस्यानुग्रहमिच्छामि' इति वाक्यात् । स च भक्तिबीजभूतः । अतो 'भक्त्या मामभिजानाति', 'भक्त्या त्वनन्यया शक्यः', 'भक्त्याऽहमेकया ग्राह्यः' इत्यादिषु न विरोधः । अवतारदशायां तु मां सर्वे पश्यन्त्वित्याकारिकया सामान्येच्छयापि दर्शनम् । तत्रापि नानाविधाभिः यथा 'मल्लानामशनिः' इत्यादौ ।

रश्मिः ।

भवव्यवच्छेदकः । आवरणादीति । एवकारो वृत्त्यावरणमात्रव्यवच्छेदकः । दिगिति कुतर्काभिनिवेशनिषेधादिश्चात्रमुक्तमित्यर्थः । अन्वयेति । प्रसिद्धम् । चिदादिभिरिति चित् आदी चिदादी । चित् आदिर्यस्याः सा चिदादिः । चिदादी च चिदादिश्च चिदादयः, ताभिश्चिदादिभिः । ज्ञानात्मकेति ।

'यन्मायया बहिः क्षिप्ता ख्यायते बुद्धिरर्थवत् ।
निवर्तते च यद्बोधात्तं नमामि जनार्दनम्' ॥ इति ।

ख्यातिवादमङ्गलाचरणाद्बहिःक्षेपविषयत्वेन बुद्धिरूपज्ञानात्मकत्वनिश्चये । तत्रेति वृत्तौ । एवकारस्तु ज्ञानस्य जन्यत्वमीश्वराभेदविरुद्धमपि 'अजायमानो बहुधा विजायते' इति श्रुत्यविरुद्धमित्यनतिरिक्तत्वव्यवच्छेदकः । पूर्वोक्तेति । ज्ञानप्रक्रियारम्भे तत्रायं क्रम इत्यादिनोक्तरीतिकैव । एवकारेण 'नैषा तर्केण मतिरापनेया' इति श्रुतेः श्रुत्यविरुद्धत्वाच्छ्रुतिविरुद्धपक्षो व्यवच्छिद्यते । एवेति । एवकारः करणविषयव्यवच्छेदकः । तदेवाहुः नायमिति । उत्तरेति । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' इत्युत्तरार्धे । स्वस्यैवेति । आत्मपदेन कर्तृवाचकेन तयोक्तेश्च । 'तस्यैष आत्मा' इति जीवभेदकथनाजीवव्यवच्छेदक एवकारः । नत्विति । इच्छाया इच्छाकर्मत्वाभावात् । भक्तिलभ्यो वरणलभ्यो वेति विरोधमेकविषयत्वेन परिहरन्ति स स चेति । श्रुत्युक्तोऽनुग्रहः । न विरोध इति भक्त्यनुग्रहयोः सहानवस्थानलक्षणो विरोधो न । तत्रापीति सामान्येच्छायामपि । नानाविधा मल्लाः मामशनित्वेन पश्यन्तु, नरो मां नरवरत्वेन पश्यन्तु । स्त्रियो मां मूर्तिमत्स्मरत्वेन पश्यन्तु, गोपा मां स्वजनत्वेन पश्यन्तु, असत्क्षितिभुजो मां शास्तृत्वेन पश्यन्तु । स्वपितरौ मां शिशुत्वेन पश्यताम् । भोजपतिर्मृत्युत्वेन पश्यतु । अविद्वांसो विराट्त्वेन पश्यन्तु । योगिनस्तत्त्वेन पश्यन्तु, वृष्णयः परदेवतात्वेन पश्यन्तु इत्येवंरूपाः । मल्लानामिति ।

'मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥' इति श्लोकः ॥



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

एवं च, भक्त्या सामान्येच्छया वेति द्वेधा दर्शनम् । उभयथाऽपि प्रमेयबलमेव कारणमिति न विरोधः । स्वसाधनसामग्र्यादिभिर्दर्शनज्ञानं त्वभिमानमात्रात् । अत एव 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इत्यादिश्रुतिः संगच्छते । 'मनसैवानुद्रष्टव्य' इत्यादावपि प्रमेयबलानुगृहीतमेव तदभिप्रेतमिति श्रुत्यन्तराऽविरोधायानुसंधेयमिति शुभम् । प्रकृतमनुसरामः ॥ १६ ॥

इति सप्तमं प्राणवतेत्यधिकरणम् ॥ ७ ॥

रश्मिः ।

एवं चेति । अवतारानवतारभेदेन पूर्णसाक्षात्कार उक्ते च । एवेति 'यतो वाचो निवर्तन्ते' इति श्रुतेरेवकारः । न विरोध इति कार्यकारणभावाद्भक्तिसामान्येच्छयोः सहानवस्थानलक्षणो विरोधो न । एवमवतारानवतारयोर्दर्शनप्रणाड्यावुक्त्वा स्वसेव्यविषय आहुः स्वेति । साधनानि तनुवित्तजा मानसीसेवा तद्रूपाणि । आदिनान्यानि श्रेयांसि । 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते' इति वाक्यात् । दर्शनज्ञानं तु परस्यैव । तत्राभिमानः कारकत्वाभावात् । स्वसेव्यज्ञानं तु नाभिमानमात्रात् । तत्र श्रुतिमाहुः अत एवेति । अभिमानमात्रादेव विजानतामिति । अभिमानमात्रं नापितु यथार्थज्ञानमिति ज्ञानवताम् । 'यतो वाचो निवर्तन्ते' इति श्रुतिविरोधादविज्ञातम् । विज्ञातं यथार्थज्ञानाविषयत्वेन ज्ञातं यैस्तैः, तदविज्ञातमन्तस्तेषाम् । ननु दर्शनज्ञानस्याभिमानमात्रत्वे कदाप्यनिर्मोक्षप्रसङ्ग इति चेन्न । स्वसाधनेत्याद्युक्तमर्यादामार्गीयाणां व्यभिचारिण्या भक्त्या तत्प्राप्तेः ।

'तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः' इति ।

तत् तच्छब्दवाच्यं त्वा त्वां यामि प्राप्नोमि । यद्वार्था सेवे च । कीदृशं त्वां ब्रह्मणा प्रत्यहं मानसीसेवां कुर्वता वन्दमान इत्यपां सुः । वन्दनं सेवासमासिद्योतकम् । तद् यजमान आशास्ते न तु तनुजादिसेवाविषयं करोति । हविर्भिर्विविधोपचारैः अहेडमानः हेड अनादरे । सेवायामादरं कुर्वन् । वरुण इहबोधी उरु शंसमानो यजमानः ज्ञानवान् कीर्तनभक्तिमांश्च । आयुःकालं प्रकर्षेण मुषाण मोषीः चोरितवान् छान्दसप्रयोगः प्रमोषीत् । 'आयुर्हरति वै पुंसामुद्यन्नस्तमयन्नसौ । ऋते तं यः क्षणो नीत उत्तमश्लोकवार्तया' इति वाक्यात् । 'मनसैवानुद्रष्टव्यम्' । 'मानसी सा परा मता' । 'तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्' इति । एवंविधेषु न भक्तिर्नेच्छा न प्रमेयबलमिति तेषां संगतिमाहुः मनसैवेति । आदिशब्दार्थं आभासोक्तः । प्रमेयेति प्रमेयं भगवान् तस्य बलं भक्तिस्तसानुगृहीतं मनः । संबन्धश्च निवेश्यता । तथा च प्रमेयबलनिवेश्यमनुगृहीतम् । 'तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्' 'यथा भक्त्येश्वरे मनः' इति वाक्याभ्याम् । एवकारेणाननुगृहीतमशुद्धं मनो व्यवच्छिद्यत इत्यादेरिति मनः । श्रुत्यन्तरेति । सा च 'भक्तिरस्य भजनं तदिहामुत्रफलभोगनैराश्येनामुष्मिन्मनःकल्पनमेतदेव च नैःकर्म्यम्' इति । तथा चैतादृशमनोग्राह्यमिति भावः । श्रीकपिलवाक्यमपि 'मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोम्बुधौ । लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्' इति ॥१६॥



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## तदिन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥ (२-४-८)

इदमत्र विचार्यते । इन्द्रियाणां प्राणाधीनसर्वव्यापारत्वात् तद्व्यपदेशाच्च प्राणवृत्तिरूपाणीन्द्रियाणि, तत्त्वान्तराणि वेति संशयः । तत्त्वान्तराण्येवेति सिद्धान्तः । तानीन्द्रियाणि तत्त्वान्तराणि । कुतः । तद्व्यपदेशात् । इन्द्रियशब्देन व्यपदेशात् । 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति भिन्नशब्दवाच्यानां कचिदेकशब्दवाच्यत्वेऽपि नैकत्वम् । आसन्न्येऽपि तर्हि भेदः स्यादित्यत आह अन्यत्र श्रेष्ठात् । तस्य ते यौगिकाः शब्दा इति ॥ १७ ॥

### भाष्यप्रकाशः ।

तदिन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥ सूत्रप्रयोजनमाहुः इदमित्यादिना, सिद्धान्त इत्यन्तेन । पूर्वाधिकरणे इन्द्रियाणां प्राणाधीनसर्वव्यापारकत्वं सिद्धम् । श्रुतौ च मुख्यं प्राणमिन्द्रियाणि चोपक्रम्य, 'हन्तास्यैव सर्वे रूपं भवामः'इति त एतस्यैव सर्वे रूपमभवंस्तस्मादेत एतेनाख्यायन्ते प्राणा इति' तन्नामव्यपदेशाच्च प्राणवृत्तिरूपाणीन्द्रियाणि उत रूपभवनप्राक्कालेऽपि सत्त्वात् तत्त्वान्तराणि वेति संशयः । तत्र पूर्वं तत्त्वान्तरत्वेऽपि पश्चादेतद्रूपभवनश्रावणेन जन्मान्तरवत् पूर्वरूपत्यागात् इदानीं पूर्वोक्तयुक्तिभ्यां प्राणवृत्तिरूपाण्येवेति प्राप्ते, तत्त्वान्तराण्येवेति सिद्धान्त इत्यर्थः । तद् व्युत्पादनाय सूत्रं व्याकुर्वन्ति तानीत्यादि । सूत्रे तदिति लुप्तविभक्तिकं पदं तानीत्यनेन व्याख्यातम् । अन्ये तु त इति पठन्ति । इन्द्रियशब्देनेत्यादि । तथाच यथा श्रुतौ इन्द्रियाणीति व्यपदेशस्तथेदानीमपि लोके शास्त्रे च व्यपदेशः । अतो नात्र जन्मान्तरन्यायः संभवति किंतु भृत्यानां स्वामिस्वभावानुसरणमिव प्राणस्वभावानुसरणमेव तद्रूपभवनम् । नच प्राणशब्दव्यपदेशविरोधः । द्रोणकर्णादिषु कुरुशब्दव्यपदेशवद् गौण्यापि तत्सम्भवात् । अतो भिन्नशब्दवाच्यानां कचिदेकशब्दवाच्यत्वेपि नैकत्वमिति सिद्धमित्यर्थः अग्रिमशङ्कां । आसन्न्येऽपीत्यादि । समादधते तस्य ते इति ।

### रश्मिः ।

तदिन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥ सिद्धमिति । प्राणवताशब्दादित्यत्रसप्तम् । श्रुताविति बृहदारण्यके । 'तानि ज्ञातुं दध्रिरेऽयं वै श्रेष्ठो यः संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यति हन्तास्यैव सर्वे रूपं भवामेति त एतस्यैव सर्वे रूपमभवंस्तस्मादेत एतेनाख्यायन्ते प्राणा इति तेन हवाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उहैवं विदा स्पर्धतेऽनुशुष्यत्यनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मम्' इति श्रुतौ । अस्यैवेति प्राणस्य । भवामेति शंकरमाष्ये पाठः । एत इति प्राणाः । एतेन प्राणपदेनाख्यायन्ते । प्राक्काल इति तच्छ्रुतावेव । पूर्वोक्तेति । हन्तास्यैवेत्याद्युक्तयुक्तिभ्याम् । इतीति इति पूर्वपक्षे प्राप्ते । लुप्तेति । अव्ययमित्यर्थः । अन्य इति । शंकराचार्यादयः ते मुख्येतरे प्राणा इति व्याचक्षते । श्रुतिविरोधाभासं परिहरन्ति स्म अत इत्यादिना श्रुतिलोकशास्त्रेभ्यः । शास्त्रं तु भवाम, अभवन्नित्यत्र भूसत्तायामिति । न तु भूउत्पत्ताविति । जन्मान्तरेति । पूर्वं तत्त्वान्तरत्वेपीत्याद्युक्तः । कुर्विंत्यादि । कौरवसैन्यसागरमित्यत्र । कुरोरिदं कौरवं सैन्यं तदेव सागरस्तमित्यर्थात् । भाष्ये चेतीत्यत्रेतिशब्दो हेता-



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## भेदश्रुतेः ॥ १८ ॥

यत्रापि प्राणशब्दप्रयोगस्तत्रापि भेदेन श्रूयते । तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति ॥ १८ ॥

## वैलक्षण्याच्च ॥ १९ ॥

वैलक्षण्यं च प्राणस्य चेन्द्रियाणां च । सुप्तेषु वागादिषु प्राणो जागर्ति । स्वामिसेवकवचानेकं वैलक्षण्यम् ॥ १९ ॥

इति द्वितीयाध्याये चतुर्थपादे अष्टमं तदिन्द्रियाधिकरणम् ॥ ८ ॥

## संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥ ( २-४-९ )

भूतभौतिकसृष्टिः परमेश्वरादेवेति निर्णीय नामरूपव्याकरणमपि परमेश्वरादेवेति निश्चयार्थमधिकरणारम्भः । लोके नामरूपकरणं कुलालादिजीवेषु प्रसिद्धमिति । अलौकिकेऽपि स्थावरजङ्गमे मयूरादिसंज्ञां करोति च जीवादेव हिरण्यगर्भादेर्भविष्यतीति बह्वयादिदेवानां जीवरूपाणामेव वाक्यादिरूपेणानुप्रवेशात् तत्साह-

प्रकाशः ।

आसन्यस्य प्राणापानसमानव्यानोदानशब्दाः पाचकपाठकादिशब्दवद्यौगिका अतो न भेदका इत्यर्थः । उक्तोपोद्बलनाय सूत्रद्वयमित्याशयेनाहुः ॥ १७ ॥

भेदश्रुतेः ॥ १८ ॥ वैलक्षण्याच्च ॥ १९ ॥ एतत्सूत्रद्वयं तु निगदव्याख्यातेनैव भाष्येण व्याख्यातम् । प्राणस्य जागरणं तु 'प्राणाग्नय एवैतस्मिन् पुरुषे जाग्रति' इति प्रश्नोपनिषदि भावितम् । स्वामिसेवकवत् स्थितिस्तु प्राणवतेत्यधिकरण एव सिद्धेत्यनवद्यम् ॥ १८ ॥ १९ ॥

इत्यष्टमं तदिन्द्रियाणि तद्व्यपदेशादित्यधिकरणम् ॥ ८ ॥

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥ अधिकरणप्रयोजनमाहुः भूतभौतिकेत्यादि । नन्वत्र कुतः संशयो येनायमारम्भ इत्यत आहुः लोक इत्यादि । तथाच नामादिव्याकरणस्य उभयत्रापि श्रवणवचनत्वात् संशय इत्यर्थः । तुशब्दव्याख्यानमुखेन पूर्वपक्षमाहुः । बह्वयादीत्यादि । नामव्याकरणं वाक्साध्यं, रूपव्याकरणं क्रियासाध्यम्, उभयमप्य-

रश्मिः ।

चित्ताशयेन भिन्नेत्यादि भाष्यं विवृण्वन्ति स्म अतो भिन्नेति । अत इति संज्ञाशब्दस्याभावात् । पूर्वतन्त्रे संज्ञा भेदिकेति सिद्धम् । उक्तेति । तत्त्वान्तरत्वोपोद्बलनाय ॥ १७ ॥

भेदश्रुतेः ॥ १८ ॥ वैलक्षण्याच्च ॥ १९ ॥ निगदेति । निगदं व्याख्यातं येन भाष्येण । व्याख्यातं व्याख्यातप्रायम् । एवकारस्तु प्रकाशव्यवच्छेदकः । जाग्रतीति बहुवचनान्तं चिन्त्यम् । एवेति अन्याधिकरणव्यवच्छेदक एवकारः ॥ १८ ॥ १९ ॥

इत्यष्टमं तदिन्द्रियाणि तद्व्यपदेशादित्यधिकरणम् ॥ ८ ॥

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥२०॥ भूतभौतिकेत्यादीति । भूतानि महाभूतानि भौतिकानि शरीराणि । यद्वा । 'आकाशशरीरं ब्रह्म' इति श्रुतेः सर्वं भौतिकम् । एवकारद्वयं मध्यमव्यवच्छेदकम् । उभयत्रेति । प्रकृतौ पुरुषे च । 'शुकाश्च हरिता येन हंसाश्च धवलीकृताः' इति वाक्यात् । भाष्ये मयूरादिसंज्ञामित्यादि । बह्वयादीत्यादीति जीवादशक्यं समाहितम् ।



DR. RUPNATHJI (DR. RUPAK NATH)
www.astrology-tantra.com

चर्येण नामरूपयोरपि जीव एव कर्ता भविष्यतीत्याशङ्कां निराकरोति तुशब्दः।

संज्ञामूर्त्तिः कॢप्तिर्नामरूपयोर्निर्माणम् । त्रिवृत्कुर्वतः यस्त्रिवृत्करोति तस्मात् । 'सेयं देवतैक्षत हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति । तासां त्रिवृतं त्रिवृतमेकैकं करवाणि' इति त्रिवृत्कर्ता परमेश्वरः । स एव नामरूपयोरपि कर्ता । कुतः । उपदेशात् । उप समीपे

---

भाष्यप्रकाशः ।

नुप्रवेश उक्तस्तथैव तेन तेन रूपेणान्येषां च । तत्र यद्यपीन्द्रो नोक्तस्तथापि समानन्यायात् सोऽपि बलरूपेण प्रविष्टो बोध्यः । एवं सति तेषां जीवानां तत्तत्कार्यार्थमेवानुप्रवेशात् तत्साहचर्येण नामरूपव्याकरणयोरपि स स जीव एव कर्ता । अथैकवचनव्याकोपाभेदं रोचते, तदा जीव-समष्टिरूपो हिरण्यगर्भ एव तत्कर्ताऽस्तु । ईक्षणप्रकारान्तःप्रविष्टेन जीवेनेति तृतीया तु, चारेण परबलं प्रविश्याकलयामीतिवदुपपत्स्यते । अतः परमेश्वरः प्रयोजको भवतु । कर्ता तु तयोर्जीव एव प्रवेष्टृत्वादित्याशङ्कां निराचष्टे तुशब्द इत्यर्थः । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति संज्ञे-त्यादि । सत्यं जीवेऽपि लोकन्यायेन सामर्थ्यवशात्कामरूपव्याकर्तृत्वं वक्तुं शक्यते, तथापि श्रुतौ त्रिवृत्करणेन सहैव पूर्वं नामरूपव्याकरणमुपदिष्टं, तदा न जीवस्य शरीरसंबन्ध इति तदानीं

रश्मिः ।

एवकारश्छान्दोग्यात् । हिरण्यगर्भादेरिति । सर्वपक्षता जीवत्वम् । आदिना शिवविष्णू । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति छान्दोग्यादाहुः नामेति । क्रियेति । यथा गोवर्धनोद्धरणरूपव्याकरणं गोवर्धनोद्धरणक्रियासाध्यम् । ईश्वरस्यैव सर्वरूपत्वात् । अन्येषा-मिति देवानाम् । तथैवेति एवकारः प्रकारान्तरव्यवच्छेदकः । बहुधावृत्यादिभाष्यं विवृण्वन्ति स एवं सतीति । एवेति समानन्यायादेवकारः । जीव एवेति छान्दोग्ये जीवपदादेवकारो ब्रह्मव्यवच्छेदकः । एकेत्यादि तेषां देवानामीक्षतेत्येकवचनव्याकोपात् । रोचत इति तुभ्यं सिद्धा-न्तिने रोचते । जीवेति स्पष्टम् । एवकारो ब्रह्मव्यवच्छेदकः । अनेन जीवेनात्मनेत्यादीक्षणप्रकारः । चारेणेति चर एव चारो धृतप्रभेदनेन परबलं प्रविश्याहं राजाकलयामि तद्वदनेन जीवेनात्मनानु-प्रविश्य नामरूपे अहं व्याकरवाणीत्यन्तःकरण उपपत्स्यत इत्यर्थः । यद्वा । चरति परबलं प्रविश्येति चरः । अच् । चर एव चारः । लोकेत्र चारकर्तृकमेव सैन्यसंकलनं हेतुकर्तृत्वाद्राजात्मन्यध्यारोपयति । आकलयामीत्युत्तमपुरुषप्रयोगात् । एवं जीवकर्तृकं सन्नामरूपव्याकरणं हेतुकर्तृत्वाद्देवतात्मन्यध्या-रोपयति व्याकरवाणीत्युत्तमपुरुषप्रयोगात्तद्वदित्यर्थः । जीव एवेति दृष्टान्तसत्त्वादेवकारः । प्रवेष्टृत्वा-दिति । ब्रह्म तु प्रवेशककर्त्रिति भावः । सिद्धान्ते साध्यं भाष्यं स्फुटम् । साधनभाष्ये उप समीप इत्यादिभाष्यं विवृण्वन्ति स सत्यमित्यादि । अत्र विवरणं कर्तृत्वादित्यन्तस्यार्थं पिण्डीकृत्य वर्णनम् । कार्येति लोके नामेत्याद्युक्तेन तेन । जीवेनात्मनेति पदयोः सामर्थ्यवशात् । सामर्थ्यं करणे । त्रिवृत्करणेन सहैवेति एकवाक्य इति भाष्यस्यार्थः । एकस्मिन् वाक्य इति भाष्यार्थः । तेनोक्तम् । उपदिष्टमिति । प्रतिज्ञानादिति भाष्यार्थः । हेतुपञ्चमीरहितम् । उपदेशः सामान्य-वाक्यम् । प्रतिज्ञा विशेषवाक्यम् । स एव नामरूपयोरपि कर्तेति । यथा साध्यवत्तया पक्षवचनं पर्वतो वह्निमानिति । भाष्येपि । स एवेति पक्षः नामरूपयोरपि कर्तेति साध्यमिति साध्यवत्तया

२५ ब्र० सू० ब०



RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

एकवाक्ये उभयकरणस्य प्रतिज्ञानात्। जीवस्य तु त्रिवृत्करणानन्तरं शरीरसंबन्धे कर्तृत्वात्। तस्मान्नामरूपप्रपञ्चस्य भगवानेव कर्तेति सिद्धम्॥ २०॥

इति द्वितीयाध्याये चतुर्थपादे नवमं संज्ञामूर्तिक्लृप्त्यधिकरणम्॥ ९॥

---

भाष्यप्रकाशः।

जीवस्य तत्कर्तृत्वं न वक्तुं शक्यते। शरीरसंबन्धोत्तरमेव तस्य बाह्यक्रियाकर्तृत्वस्य दृष्टत्वात्, त्रिवृत्करणसमये हिरण्यगर्भस्याप्यनुत्पन्नत्वात्। यत्पुनः पुराणेषु

'नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम्।
वेदशब्देभ्य एवादौ देवादीनां चकार सः'॥ इति
'सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्'॥

इति पठ्यते। तदपि पाश्चात्यमेव वृत्तम्। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रौतलिङ्गात्। वेदपाठनात् पूर्वमेव ब्रह्मनामरूपयोः करणात्। अत्रापि तेजोऽबन्नदेवतानां प्रागेव करणाच्च। न च ब्रह्मणः प्रवेशाभावः शङ्क्यः। द्वा सुपर्णादिश्रुतिसिद्धत्वात्। नापि व्यापकत्वस्य बाधकत्वं शङ्क्यम्, विरुद्धधर्माधारत्वस्य प्रागेव साधितत्वात्। न च प्रवेशो ज्ञानेच्छाकृतिरूपमायावृत्त्यौपाधिक इति शङ्क्यम्। शब्दादेवानुपपत्तिपरिहारेणौपाधिकत्वे मानाभावात्।

रश्मिः।

पञ्चवचनमस्त्येव। स कर्ता। उपदेशात् प्रतिज्ञानात्। यन्नैवं तन्नैवं घटवत्। जीवस्येत्यादिभाष्यार्थमाहुः तदेति। कृत्यानामिति जीवकृत्यानां धर्मादीनाम्। स इति हिरण्यगर्भः। अहमिति ब्रह्मा। तस्मा इति ब्रह्मणे। श्रौतेति श्रुतिर्हि गोपालतापिनीये। श्रुत्वा गृह्यते श्रौतं ठेषिकोण् श्रौतं कमलिङ्गं तस्मात्। तथा च पुराणेषु यतः प्राप्तनामरूपः सः नामरूपं चेत्यादि चकारेत्यर्थः। तमेवाहुः वेदपाठनादिति। पूर्वमेवेति। अन्यथा श्रुत्युक्तक्रमेण पौराणक्रमबाधापत्तेर्योधव्यवच्छेदक एवकारः। तेजोबन्नेति। 'तत्तेज ऐक्षत'। 'ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्तेति तिस्रो देवता भवन्ति। हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य' इति श्रुतेः। प्रागेवेति 'सदेव सौम्येदमग्र आसीत्' इत्युपक्रम्य 'तत्तेजोऽसृजत' इत्यादिश्रुतेः। एवकार उत्तरकरणं व्यवच्छिनत्ति। 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' इति। अभिचाकशीति पश्यति। ब्रह्मणः प्रवेशेति अनेन जीवेनात्मनेति सहार्थतृतीयया प्रविश्येत्यत्र ब्रह्मणोपि कर्तृत्वात्तेषां ब्रह्मप्रवेशस्तस्याभवः। द्वेति 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते'। बाधकत्वमिति परिच्छिन्नत्वं प्रवेशे कारणं तदभावो व्यापकत्वं बाधकं तत्त्वम्। प्रागेवेति सर्वोपेताधिकरणे। एवकारोप्यर्थे। उभयव्यपदेशाधिकरणेपि विरुद्धधर्माधारत्वस्य साधितत्वात्। श्रुतिव्याख्यानं दूषयितुमुपक्षिपुर्नचेत्यादिना। ज्ञानं सत्त्वमिच्छा राजसी कृतिस्तामसी तद्रूपाः याः मायायाः वृत्तयः। तदौपाधिकस्तत्र भवः। शब्दादेवेति द्वा सुपर्णेति शब्दादेव प्रमितेनानुपपत्तिपरिहारेणेत्यर्थः। अनेन श्रुत्यर्थोपि जीवेनेति सहार्थतृतीयामभिप्रेत्य व्याकृत इव बोध्यः। जीवेनेत्यन्वयेन तु पादान्वयस्य पादार्थयोग्यताधीनतया जीवरूपेण प्रविश्याहमेव व्याकरवाणीत्यर्थ इति रत्नप्रभायामुक्तम्। एवकारेण प्रत्यक्षादिव्यवच्छेदः। तस्मादित्यादि भाष्यं विवृण्वन्ति



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

## मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥ (२-४-१०)

इदमिदानीं विचार्यते । 'अन्नमशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति, यो मध्यमस्तन्मांसं, योऽणिष्ठस्तन्मनः । आपः पीतास्त्रेधा विधीयन्ते । तासां यः स्थविष्ठो धातुस्तन्मूत्रं, यो मध्यमस्तल्लोहितं, योऽणिष्ठः स प्राणः । तेजोऽशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तदस्थि भवति, यो मध्यमः सा मज्जा, योऽणिष्ठः सा वाक् । अन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इति । तत्र संशयः । वाक्प्राणमनांसि किं भौतिकानि आहोस्वित् स्वतन्त्राणीति ? 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति श्रुतिविप्रतिषेधात् संशयः । त्रिवृत्करणप्रसङ्गेनोदितामाशङ्कां निराकरोति ।

---

भाष्यप्रकाशः ।

अतः, 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते' इति श्रुत्यन्तराद् भगवानेव पूर्वं नामरूपकर्ता । जीवानां तु पश्चादेव भगवदाज्ञया तथात्वम् । न चादिसृष्टौ भगवतैव तत्करणे तदानीं जीवप्रवेशवैयर्थ्यम् । तस्य भोक्तृत्वात् तदर्थमेवैतत्करणेन तस्यावश्यकत्वादिति । तस्माद् भगवानेव नामरूपप्रपञ्चस्य कर्ता सिद्धमित्यर्थः ॥ २० ॥

इति नवमं संज्ञामूर्त्यधिकरणम् ॥ ९ ॥

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥ अधिकरणप्रयोजनमाहुः इदमित्यादि । इदमिति वक्ष्यमाणं वाक्यम् । संशयं तद्बीजं चाहुः तत्रेत्यादि । नन्विन्द्रियविचार एवेदं विचारणीयम्, इहास्य कुतो विचार इत्यत आहुः त्रिवृदित्यादि । उक्तश्रुति-

रश्मिः ।

स्म अत इति । श्रुत्यन्तरादिति । 'यो ब्रह्माणम्' इति पूर्वमुक्ता तस्या अन्या श्रुतिः श्रुत्यन्तरं तस्मात् । महानारायणेऽस्ति । एवेति हिरण्यगर्भव्यवच्छेदकः । जीवानामिति । तुर्हिरण्यगर्भादिव्यावर्तकः । पश्चादेवेति क्वापि जीवत्वस्य पूर्वमभवनादेवकारः पूर्वव्यवच्छेदकः । भगवदिति । अनेन जीवेनात्मनेति सहार्थे तृतीयायाः । मय्येव सकलं जातमित्यादिषु दृष्टानाम् । आद्यीति पुरुषविधब्राह्मणे 'आत्मैवेदमग्र आसीत्'इत्युपक्रम्य 'द्वितीयाद्वै भयं भवति'इत्यन्तमादिसृष्टिः । न च भवाहंकारापरपर्यायतमोमयसृष्टिर्न तु जगदुपयोगिनीति वाच्यम् । कारणगुणाः कार्यगुणानारभन्ते इति नैयायिकप्रवादात् । आत्मैवेत्यत्र सूक्ष्मतत्त्वाङ्गीकारात् । अन्यथा प्रपञ्चेऽष्टादशतत्त्वानि न प्रतीयेरन् । पूर्वमिति सृष्टेः कारणरूपत्वेन जीवानामक्षरकार्यत्वेनाभावादेवकारः । मुक्तजीवानां भगवत्त्वादनेनेत्यात्मकत्वात् । तस्येति जीवस्य । तदर्थमेवेति एवकारेण ब्रह्मव्यवच्छेदः । 'न तदश्नोति कश्चन न तदश्नोति कंचन'इति श्रुतेर्ब्रह्मणोऽशनाभावात् । भक्तमनोरथपूरकत्वेन संभोगप्राप्तिरिति गोप्यवैशेष्यादित्यत्र संभोग उक्तो भगवतः । तस्येति प्रवेशस्य ॥ २० ॥

नवमं संज्ञामूर्तिरित्यधिकरणम् ॥ ९ ॥

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥ वाक्यमिति वाक्ये तेजोवृतादि । 'तेजो वै घृतम्' इति श्रुतेः । तत्रेत्यादीति । ननु भौतिकत्वं स्पष्टम्, कुतः संशय इत्यत आहुः



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

तत्र पूर्वपक्षमाह । मांसादि भौमं, पुरीषमांसादि तेजोऽबन्नप्रकृतिकम् । कुतः । यथाशब्दम् । अन्नमशितमित्यादिश्रुतितो निःसंदिग्धं प्रतिपादनात् । किमतो यद्येवं तदाह इतरयोश्च । वाचि तुल्यत्वान्न संदेहः । इतरयोर्मनः-प्राणयोरपि भौतिकत्वं यथाशब्दम् । उद्गमश्रुतिस्तु स्तुतित्वेनान्यभावपरा भविष्यति । उपपादकश्रुतिबाधात् । तस्माद् भौतिकान्येव मनःप्रभृतीनीत्येवं प्राप्ते ॥ २१ ॥

उच्यते—

---

भाष्यप्रकाशः ।

विप्रतिषेधजनितामाशङ्कां त्रिवृत्करणप्रसङ्गेनेदानीं निराचष्ट इत्यर्थः । तत्रेति सूत्रे । ननु सूत्रे तद्बोधकपदाभावात् कथमस्यैतद्विषयत्वमित्याकाङ्क्षायां मांसादीत्यादिपदेन तत्संग्रहादेतस्य विषयत्वावगम इत्याशयेन व्याकुर्वन्ति मांसादीत्यादि । 'भूमिः क्षितौ स्थानमात्रे' इति कोशाद् भौमपदं स्रोतपचिस्थानजन्यत्वपरम् । तथा चोक्तं तथेत्यर्थः । वाचीत्यादि । अत्र 'तेजोमयी वाक्,' ऐतरेये, 'अग्निर्वाग् भूत्वा' इति श्रुतिद्वयेऽपि वाचि तेजोमयत्वस्य तुल्यत्वान्न संदेहः । इतरयोर्मनःप्राणयोस्तु ऐतरेये, वायुः प्राणो भूत्वेति चन्द्रमा मनो भूत्वेत्यन्यथा भावनेऽपि भौतिकत्वं छान्दोग्योदितं शब्दमनतिक्रम्यैव मन्तव्यम् । नचोद्गमश्रुतिविरोधान्न भौतिकत्वमिति शङ्क्यम् । सा तु मुण्डके अक्षरात् परं स्तोतुं प्रवृत्ता, न तु वागादीनां स्वरूपं वक्ति ।

एतस्मादिति, ब्रह्मणः । श्रुतिविप्रतीति श्रुतितुल्यबलविरोधादित्यर्थः । 'विप्रतिषेधे परं कार्यम्' । तुल्यबलविरोधे परं कार्यं स्यादित्यत्र यथार्थात् । आशङ्कामिति । स्वजनकसंशये लाक्षणिकं पदम् । भाष्यं विवृण्वन्ति स्म त्रिवृदित्यादि । त्रिवृत्करणप्रसङ्गेनोदितामाशङ्कां पूर्वपक्षरूपामिदानीं निराचष्ट इत्यर्थः । अस्यैतदिति अस्य, एतद्विषयत्वम् पूर्वपक्षविषयत्वम् । मांसादीत्यादि मांसादीत्यादि यस्य पदस्य तेन भौमपदेनेत्यर्थः । तदिति पूर्वपक्षसंग्रहात् । भाष्येऽत्र स्पष्टम् । एतस्येति भौममिति पूर्वपक्षस्य । कोशादिति विश्वात् । क्षितिस्थले क्वचित्क्षितिरिति पाठः । भौमेति भूमौ जातं भौमम् । 'तत्र जातः' इत्यण् । भौमं च तत् पदमिति कर्मधारयः । स्वं मांसादि तदुत्पत्ति-स्थानं भूम्यतेजोरूपं तज्जन्यत्वपरम् । कालाविवक्षया जातार्थत्वम् । तथा चात्रेति अत्र श्रुतावुक्तं तथा पूर्वपक्षत्वेन ज्ञेयम् । मांसादीति भाष्ये सौत्रं पदम् । मांसस्यादि छान्दोग्योक्तं पुरीषम् । मांस आदिर्यासां मनआदीनां ता मांसादयः मांसादि च मांसादयश्चैतेषां समाहारो मांसादीत्येक-शेषम् । सूत्रे न्यूनता निग्रहस्थानं दोषं पुरीषादीति वक्तव्ये मांसादीत्युक्ते प्राप्तं परिहर्तुं व्याख्या-यते तेजोऽबन्नप्रकृतिकमिति भाष्यात् । तेन तथेत्यर्थ इत्यर्थः । यथाशब्दमिति शब्दमनति-क्रम्येति यथाशब्दम् । अव्ययीभावः । शब्दानतिक्रमस्तु निःसंदिग्धप्रतिपादने भवति । यथा 'अथातो ब्रह्मजिज्ञासा' इत्यत्र, संदिग्धप्रतिपादने तु शब्दातिक्रमो भवति । यथा सामान्यापत्तिसूत्रे । अतो यथाशब्दमित्यत्र शब्दो निःसंदिग्धप्रतिपादको गृह्यते तमनतिक्रम्य यथाशब्दम् । भूत्वेति मुखं प्राविशदित्यन्वयः । भूत्वेति श्रुतिद्वयान्वय ऐतरेये द्रष्टव्यः । एवेति शब्दातिक्रमव्यवच्छेदक एव-कारः ऐतरेयैकवाक्यतया । किं तु विकल्पः । भौतिकत्वं वाजन्यसत्त्वं च । उद्गमेति भाष्यं



DR. RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

मागायदित्यत्र प्राण एव सर्वस्यान्नस्यात्ता निर्दिष्टः । स कथं तत्परिणामकार्यं स्यात् । वागादयश्च तत्रान्नार्थमनुप्रविष्टाः । सृष्टौ प्रथमतो भिन्नतया निर्देशात् । अतो न भौतिकानि मनःप्रभृतीनि, किंतु तत्त्वान्तराणीति सिद्धम् । तद्वाद इति वीप्सा अध्यायसमाप्तिसूचिका ॥ २२ ॥

इति द्वितीयाध्याये चतुर्थपादे दशमं मांसादि भौममित्यधिकरणम् ॥ १० ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये द्वितीयाध्यायस्य चतुर्थः पादः ॥ २ ॥ ४ ॥

---

भाष्यप्रकाशः ।

मागायद्यत्किंचान्नमद्यतेऽनेनैव तदद्यते इह प्रतितिष्ठतीति । अर्थस्तु यथा वागादिभिरात्मार्थमागानं कृतं तथा मुख्यः प्राणोऽपि त्रिषु पवमानेषु देवार्थं गानं कृत्वा, अथानन्तरमवशिष्टेषु नवसु स्तोत्रेष्वात्मन आत्मार्थम् । अन्नाद्यम्, अन्नं च तदाद्यं च आगायत् । तस्येदं निदर्शनम् । यत्किं-

रश्मिः ।

अतो न संशयास्पदं यतः संशयोत्तरं या शङ्का स्यादित्यर्थः । श्रौतो वादो न गौणो भवितुमर्हति उपपादितत्वात् । अनुपपादितस्तु वादो गौणो भवति । यथाऽजामेकां लोहितकृष्णरूपामित्यत्र । कल्पनोपदेशसूत्रे स्पष्टम् । अथेत्यादीति । ननूच्यत इत्यादीति कुतो नोक्तमिति चेन्न प्रतिज्ञाशब्दत्वेन समाधानत्वाभावात् । यथा वागित्यादि । अयमर्थः । देवासुरस्पर्धानन्तरं देवैरुक्ता वाक् कयेत्यगायत् । 'तत्र यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मन' इति श्रुतेस्तथेत्यर्थः । श्रुत्यर्थस्तु वाचि निमित्तभूतायां भोगः सुखविशेषः संघातस्य यत्कल्याणमित्यस्यार्थः । यत्कल्याणं शोभनं वदति । यथा शास्त्रं निर्वर्तयति तदात्मने स्वार्थमेव । तच्चासाधारणं वाग्देवतायाः कर्म यत्सम्यग्वर्णोच्चारणमिति । अग्रे आगानार्थं प्राणादीनुक्त्वा मुख्यः प्राण आगानार्थमुक्तः । अथ हैनमासन्यं प्राणमूचुः त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायदिति । देवार्थं गानम् 'असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्माऽमृतं गमय' इति श्रुतेषु त्रिषु पवमानेषु यथा प्रस्तोतोद्गाता च समाप्तौ पवमानैरुक्तैस्त्रिभिः । स्तोत्रैश्च जपमात्मयजमानकामांश्च कुरुतः । तथा मुख्यः प्रसिद्धप्राणव्यतिरिक्तः प्राणोऽपि कृत्वेत्यर्थः । आदिना प्राणचक्षुःश्रोत्रमनांसि । अथेत्यादि । भाष्यस्था व्याक्रियते । आकृष्टपवमानगानकरणानन्तरमित्येवमर्थः । नवस्विति । यद्यपि तेष्वात्मनेऽन्नाद्यमगायदित्यत्र श्रुतौ संख्या न लभ्यते । तथापि स्वप्रयुज्यमानापेक्षया श्रौतान्येव स्तोत्राण्यत्र प्राणविषये ते ह्योचुः । क नु सोऽभूद्यो न इत्थमसक्तेत्याद्युक्तानि नवसंख्याकानि ज्यायांसि हीत्यभिप्रेत्य संख्यामाहुः नवस्विति । स्तोत्रेष्विति प्रगीतमन्त्रसाध्या स्तुतिः स्तोत्रं तेषु 'तेष्वात्मनेऽन्नाद्यमागायत्' इत्युद्गीथब्राह्मणश्रुतेरात्मन इत्यादि भवति । श्रुतौ तेष्वित्यस्य स्तोत्रेष्वित्यर्थः । किंच । 'तस्मादु तेषु वरं वृणीष्व यं कामं कामयेत तम्' इति श्रुतेः । स्तोत्रेषु कामा अपि तद्वाचकैः शब्दैः प्रयोक्तव्याः । इति प्रगीतमन्त्रसाध्यत्वं स्तुतौ । सामप्राकरणिकत्वात् । सामप्राकरणिकत्वं तु मुख्यप्राणस्य सामनामकत्वात् । एष उ एव सामेति श्रुतेः । एष प्राणः । मन्त्रत्वं तु ब्राह्मणान्तर्गतमन्त्रत्वमात्मार्थगानमेभिर्मन्त्रैः क्रियत इति 'प्रयोगकरणः शब्दो मन्त्रः' इति मन्त्रलक्षणसमन्वयः । तदाद्यमिति अन्नमाद्यं यस्य पयसस्तदन्नाद्य-

RUPNATHJI( DR.RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

अन्नं लोके प्राणिभिरद्यते तदन्नम् । अनेनैव प्राणेनाद्यते तस्मात् स्वार्थमेवैतदागानमिति । ननु कथमेतन्निश्चेयं यत् प्राणेनैवाद्यते इति । प्राणवद्वागादीनामप्यन्नकृतोपकारदर्शनादित्यत आह इह प्रतितिष्ठतीति । अन्नं इह प्राण एव प्रतिष्ठितम् । अतः प्राणद्वारक एव तेषामुपकार इत । अन्नमत्र न पृथिवी, किन्त्वदनीयमात्रम् । तथाच योऽदनीयमात्रस्यात्ता स कथमदनीयस्य नामपरिणाम-कार्यं स्यात् । किंचैतरेये वागादयोऽन्नार्थं मुखादिस्थानेषु प्रविष्टा उक्ताः सृष्टौ प्रथमतो भिन्नतया च निर्दिष्टाः । अतः कथमदनीयपरिणामभूताः स्युः । तस्मात् तत्त्वान्तराणीत्येव निश्चय इत्यर्थः ।

अन्ये तु संज्ञामूर्तिसूत्रमारभ्य त्रिसूत्रमेकमधिकरणमङ्गीकृत्य प्रथमसूत्रे नामरूपकरणं पर-मेश्वरादेवेति व्याख्याय, मांसादिसूत्रे यथाश्रुतमेव पुरीषादित्रयस्य भौमत्वं मूत्रादित्रयस्याऽऽप्य-त्वमस्थ्यादित्रयस्य तैजसत्वमङ्गीकुर्वन्तः सिद्धान्तकोटावेव निक्षिपन्ति ।

रश्मिः ।

मन्नूपम् । अदनीयानामपामिति वक्ष्यमाणत्वात् । प्राणेनेति । एवकारः प्राणाग्निहोत्रोपनिषदेवकारः । स्वार्थमेवेति प्राणार्थम् । एवकारो वागादि व्यवच्छिनत्ति । एवमग्रेऽपि । अन्नकृतेति अयं पञ्चदशाहानीत्यादिभिरुक्तोऽन्नकृतोपकारस्तस्य दर्शनात् । प्राण एवेति । न तु वागादावित्येवकारो वागादिव्यवच्छेदकः । अत इति । प्राणे प्रतिष्ठितत्वात् प्राणद्वारकः । इन्द्रियाणां प्राणपदवाच्यत्वा-त्तदधीनस्थितिकत्वाच्च तथा । एवकारः प्राणाग्निहोत्रोपनिषदः । तेषां वागादीनामन्नकृतोपकारः । स कथमित्यादि भाष्यं विवरीतुमाहुः अन्नमत्रेति । पृथिवी वा अन्नमिति श्रुतिप्राप्तं निषेधन्ति स्म न पृथिवीति । भाष्यं विवृण्वन्ति स्म तथा चेत्यादिना । योदनीयमात्रस्य अत्ता कथमिति पदच्छेदः । वागादयश्चेत्यादि भाष्यं विवृण्वन्ति स्म किंचेत्यादि । यद्यप्युद्गीथब्राह्मण एव 'ते देवा अब्रुवन् एतावद्वा इद९सर्वं यदन्नं तदात्मने आगासीदनु नोस्मिन्नन्न आभजस्वेति ते वै माभि-संविशतेति तथेति त९ समन्तं परिण्यविशन्त तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्ति' इति वागादयोऽन्नार्थं प्रविष्टाः । सृष्टावित्यादि भाष्यं विवृण्वन्ति स्म सृष्टाविति । पुराणे सृष्टौ प्रथमतो भिन्नतया निर्देशो-पि वर्तते तथापि सर्वथा श्रौतत्वादैतरेय उपात्तः । यद्यपि ब्राह्मणावतरणेऽप्यश्वमेधब्राह्मणयोर्यत उद्भवस्त-स्योद्भावकस्योपास्यप्राणस्य स्वरूपनिरूपणार्थमुद्गीथब्राह्मणमारभ्यत इति कारणसृष्टिरप्यस्ति । परं विस्पष्टं नेत्यैतरेय उपात्तः । श्रुत्यर्थस्तु—प्रकृता वागादयो देवाः प्राणं प्रत्यब्रुवन् इद९ सर्वमेतावद्वै प्रसिद्धं यदन्नं ततोधिकमन्नस्ति तत्पुनस्त्वमात्मने आत्मार्थमागासीरागानं कृतवानसि वयं चान्नमन्तरेण स्थातुं नोत्सहामहे अतोनु पश्चान्नोस्मानस्मिन्नन्न आत्मार्थे तवान्ने आभजस्वाभाजस्व । णिचो लोपश्छान्दसः । मामिति कुर्विंति तैरुक्तः प्राणस्ते यूयं यद्यन्नार्थिनो वै तर्हि मा मामभिसंविशत । समन्तत आभिमुख्येनाभिविशत इत्यब्रवीदिति शेषः । राज्ञा प्राणेनानुज्ञातास्ते देवास्तथास्त्वित्यङ्गीकृत्य तं प्राणं परिवेष्ट्य समन्तं समन्ताव्यविशन्त नितरामविशन्त प्राणं परिवेष्ट्य निविष्टवन्तो यस्मा-त्तस्माल्लोको यदन्नेन प्राणेनात्ति तेनैव प्राणान्नेनैता वागादयस्तृप्यन्ति । स्वातन्त्र्येणेति । इत्येवेति अन्यभावोक्तयुक्तियुक्तत्वादेवकारो मांसादिभौमत्वव्यवच्छेदकः । तद्वाद इति वीप्सेत्यादिभाष्यार्थ-स्त्वेवम् । तद्वाद इत्यस्यान्नमयत्वादिवादोर्थः । वीप्सायां तु द्वितीयस्य पुनरुक्त्यापादकतया ज्ञानकर्म-मार्गभेदेन तद्वादाविति न पुनरुक्तिदोषः । अभिधया संमतिर्वाच्या व्यञ्जनयाध्यायसमाप्तिसूचिका वीप्सेति द्विरुक्तिः प्रक्रियाप्राप्तात् 'वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु' इति सूत्रात्सं-मता वीप्सेति । अन्य इति शंकराचार्यादयः । एवेति प्रकृतिं व्यवच्छिनत्ति । निक्षिपन्तीति ।



RUPNATHJI ( DR. RUPAK NATH )
www.astrology-tantra.com

भाष्यप्रकाशः ।

अथ प्रसङ्गात् द्वितीयस्कन्धसुबोधिन्युक्तदिशा सृष्टिप्रक्रिया निगद्यते । तत्र, 'सदेव सौम्ये-दमग्र आसीदेकमेवाद्वितीयं, तदैक्षत बहु स्यां प्रजायेय' इत्यादिजातीयकेषु वाक्येषु सृष्टिकाले केवलस्य ब्रह्मण एवोक्तरूपाया इच्छायाः सृष्टिकारणत्वेन बोधनात् ब्रह्मैव स्वेच्छया सर्वं नाना-भवति । तत उच्चनीचनानानेकभावेन भवति । नचाग्रपदेन कालस्योक्तत्वादेवकारो नान्ययोग-व्यवच्छेदक इति वाच्यम्, विकल्पासहत्वात् । तथाहि । किमत्र कालसत्ता विधीयत उतानूद्यते, अथवा कालविशिष्टब्रह्मसत्तैव बोध्यते ।

तत्र नाद्यः । वाक्यभेदप्रसङ्गात् । नेतरः । एतेषां सृष्ट्यादिवृत्तान्तबोधकत्वेनैतदपेक्षयाऽ-न्येषां पुरोवादत्वस्याशक्यवचनतयाऽत्रानुवादत्वस्याशक्यवचनत्वात् । न तृतीयः । अप्रामाणिक-गौरवप्रसङ्गात् । अन्यथा एकमेवेत्यवधारणान्तरविरोधापातात् ।

नचावधारणान्तरस्य मुख्यान्यसत्तानिवारकत्वात्र विरोध इति वाच्यम् । तथा सति

रश्मिः ।

अत्रोदासीना वयमिति भावः । वैशेष्यसूत्रं तु वैशेष्यादिति विषमावाद्भूयस्त्वरूपाद्वादित्रिवृत्करणेन त्रिरूपेप्येकस्मिंस्तत्र तत्राब्बादिवादो भूयस्त्वव्यवहारार्थमिति शुशुभुरिति ।

**इति दशमं मांसादिभौमाधिकरणम् ॥ १० ॥**

